एगओ एगागं गच्छइ । दुहओ एगागं गच्छइ" भ०३श०४उ० ।

एक (ग) ओवंका-एकतोवक्रा-स्त्री० श्रेणिभेदे, सा च एकत एकस्यां दिशि वक्रा यत्र एकतो वक्रा यया जीव पुद्गला ऋजुगत्या एवं कुर्वन्ति श्रेण्यन्तरेण यान्तीति । भ० २५ श० ३ उ० । "एगओवंका" एकस्यां दिशि वक्रा स्थापना । स्था०७ठा० ।

एक (ग) ओवत्त-एकतोवृत्त-पुं० द्वीन्द्रियजीवविशेषे, जी०श० १ प्रति० ।

एक (ग) ओसमुवागय-एकतस्समुपागत-त्रि०स्थानान्तरादेत्य एकत्र स्थाने समागते, " एगयओ समुवागयाणं " (एगओत्ति) एकत्र समुपागतानाम् । भ०७श०१०उ० ।

एक(ग)ओसहिय-एकतस्सहित-त्रि०एकत एकस्मिन् स्थाने सहित एकतस्सहित। एकस्मिन्स्थाने समुदिते, "एगओ सहियाणं " भ०७श०१०उ०। एकस्मिन्स्थाने सहितानां समुदितानामिति । जं०।वक्ष०। एकतो मिलिते च। भ०११श० ११ उ० ।

एकं (गं) गिय-एकाङ्गिक-त्रि० एकेनाङ्गेन कृते, तथाच गंथमनधिकृत्योक्तम् " एक्केक्को दुविहो एगंगिओ अणेगंगिओ य " एकानेकाङ्गकृतेत्यर्थः " नि० चू० १ उ० । "एगंगिय दुगतिगहं न भवतीति " नि० चू० १६ उ० । अपरिसाडीति संस्तारकभेदमधिकृत्य चोक्तम् " जो अपरिसाडी सो दुविहो एगंगिओ य अणेगंगिओ य " एगंगिता उ दुविधा संघायाए भवे उ नायव्वो । दोमादी णियमातू, देति एगंगिअ उ नाय " "एगंगिओ दुविहो संघातिमो असंघातिमो य । दुगादिना य संघातिमाइया अणेगंगिअउ एते ।नि०चू०

एगं (गं)त-एकान्त-त्रि० एकः अन्तः निश्चयः शोभा वा । अत्यन्ते, सूत्र०१ श्रु०१० अ० " एगन्तगया" एकान्तेन सर्वात्मना रतौ [illegible] इति । स्था० अ० प्र० । एक इत्ययमन्तो निश्चयो [illegible] । एकस्मिन्, 'एगन्तमंतं गच्छइ' एक इत्ययमन्तो निश्चयो [illegible] एक इत्यर्थं [illegible] भूमिभागं गच्छ तीति । भ० ७ श० १ उ० । [illegible], पंचा० ४ विव० [illegible], सूत्र १ श्रु० १ अ० । निश्चये, [illegible] । [illegible] । [illegible], स्था० ४ ठा० । [illegible] । एक एवान्तो यत्र । निर्जने, [illegible] । [illegible], संथा० । [illegible], [illegible] । [illegible], सूत्र०१ श्रु०६ अ० । [illegible], भ० ८ श० ६ उ० । [illegible], भ० १ श० ७ उ० । "एगंते य [illegible] " [illegible] । " [illegible] " [illegible] । [illegible] । [illegible] । [illegible] ।

[illegible]

[illegible]

महति विस्तीर्णे पतिता प्राणिनस्तेन च कूटेन गलयन्त्रपाशादिना पाषाणसमूहलक्षणेन वा तत्र तस्मिन् विषमे हता इति । सूत्र०१ श्रु० ५ अ० । कूटवत् कूटमेकान्तेन कूटमेकान्तकूटम् । एकान्तेन गलयन्त्रपाशादिबन्धके, "एगंतकूडेण उ से पलेइ " यथा कूटेन मृगादिर्बद्धः परवशः सन्नेकान्तदुःखभाग् भवति एवं भावकूटेन स्नेहमयेनैकान्ततोऽसौ संसारचक्रवाले पर्येति ।सूत्र० १ श्रु० १३ अ० ।

एगंतचा (या) रिण्-एकान्तचारिन्-एकान्ते जनरहिते प्रदेशे चरितुं शीलमस्येत्येकान्तचारी । जनरहितप्रदेशे चारिणि, "एगंतचारीसमणपुरासी" "एगन्तचारिस्सिह अम्ह धम्मे तवस्सिणो णाभिसमेति पावं " अस्मदीये धर्मे प्रवृत्तस्यैकान्तचारिणः आरामोद्यानादिष्वेकाकिविहारोद्यतस्य तपस्विनो नाभिसमेति न संबन्धमुपयाति । पापमनुजकर्मेति । सूत्र०२श्रु०६अ० ।

एगंतणाण-एकान्तज्ञान-न० नित्यमेवेदमनित्यमेवेदमित्येकपक्षस्थापनरूपे मिथ्याज्ञाने, अष्ट० ।

एगंतदंड-एकान्तदण्ड-एकान्तेन सर्वथैव परान् दण्डयतीति एकान्तदण्डः । सर्वथैव परेषां दण्डके, भ० ७ श०२ उ० ।

एगंतदिट्ठि-एकान्तदृष्टि-त्रि० एकान्तेन तत्वेन जीवादिषु पदार्थेषु दृष्टिर्यस्याःसा एकान्तदृष्टिः । सूत्र० । एकान्तेन निश्चयेन जीवादितत्वेषु सम्यक्दर्शनं यस्य स एकान्तदृष्टिः। निष्प्रकम्पे सम्यक्त्वे, सूत्र०१ श्रु० १३ अ० । एकान्तवादिनि च । सूत्र०२ श्रु०६ अ० । (तद्वक्तव्यता एगंतवाय शब्दे)

एगंतदिट्ठिय-एकान्तदृष्टिक- पुं० एकान्तग्राह्यमेवेदं मयेत्येवं निश्चया दृष्टिर्यस्य स तथा । एकान्तग्राह्यमेवेदं मयेत्येवं निश्चयदृष्टिके, ज्ञा० २ अ० । भ० ॥

एगंतदुक्ख-एकान्तदुःख- त्रि० एकान्तेनावश्यं सुखलेशरहितं दुःखमेव यस्मिन् नरकादिके भवे स तथा । एकान्तेन सुखलेशरहितदुःखोपेते नरकादिके भवे, सूत्र १ श्रु०६ अ० । "एगंतदुक्खं भयमज्जणित्ता" सूत्र०१ श्रु०५ अ० । "एगंतदुक्खे जरिए व लोए" सूत्र १ श्रु० अ० । तथैकान्तेनामयनोऽन्तर्विष्ठ भागा अपगतप्रमादा सदा दु श्रमनुनयन्तीति । सूत्र० १ श्रु० ५ अ० ॥

एगंतदूसमा-एकान्तदुःषमा- स्त्री० दुष्टा समा वर्षो दुःषमा-सुसमा षष्ठम्" एकान्तं समा २ त० । दुःषमदुःषमायाम् । सूत्र०१ श्रु० ३ अ० । (तद्वक्तव्यता ओसप्पिणी शब्दे)

एगंतधार-एकान्तधार- त्रि० एकान्ता एकविभागाश्रया धारा यस्य एकधारोपेते चक्रादौ, ज्ञा० १ अ० । एकान्ता उत्सर्गलक्षणैकविभागाश्रया धारेव धारा क्रिया यत्र । भ०९ श०३३ उ० । अपवादपरित्यागेनोत्सर्गक्रियामेवाश्रित्य निर्ग्रन्थप्रवचनादौ,"खुरो इव एगंतधाराए" क्षुर इवैकान्तधारं द्वितीयधाराकल्पाया अपवादक्रियाया अभावादिति । भ० ९ श० ३३ उ० । एकत्रान्ते वस्तुविभागे प्रहरणस्य लक्षणे धारेव धारा परोपतापप्रवृत्तिलक्षणा यस्य स तथा एकत्रदर्शनप्रवृत्ते चौरादौ, तथा च तस्करपर्यायमभिधाय "खुरेव्वएगंतधाराए" यथा क्षुर एकधार एवमसौ मोषलक्षणैकप्रवृत्तिक एवेति भावः । ज्ञा० २ अ० ॥

एगंतरी-एकान्तरी- त्रि० एकान्ताभिनिवेशे, धुरया शुक्लमंमत्वाद गर्वं [illegible] पूज्यते, सुधियां वक्तितानामेकान्तधीरेकान्ताभिनिवेशो न पूज्यते एकत्रपाभिनिवेशस्य मिथ्यात्वकत्वात् " इति । प्रति० ।

एगंतपंडिय-एकान्तपण्डित-पुं० साधौ, "एगंतपंडिएणं भंते !

सिरिवद्धमाणवाणिं पणमिअ भत्तीइ अक्खरक्कमसो ।
सद्दे तेसु य सव्वं पवयणवत्तव्वयं वोच्छं ॥ १ ॥

आकार.

आ–आ–अव्य० आप् क्विप् पृषो० पत्वोदः वाक्ये, (पूर्वमित्थं नोऽमंस्था इदानीमेवं मन्यसे इत्येवं वाक्यस्यान्यथात्वद्योतने) स्मृतौ, (आ एवं मन्यसे इत्येवं विस्मृतस्य स्मृतौ) अङितो निपातत्वात्प्रगृह्यसंज्ञा ङितस्तु न " निपात एकाजनाङ् " इति सूत्रात् । अत एवोक्तम् । मर्यादायामभिविधौ, क्रियायोगेषदर्थयोः । य आकारः स ङित् प्रोक्तो, वाक्यस्मरणयोरङित् । वाच० ॥ अभिविधौ, (व्याप्तौ) आ० म० प्र० । विशे० । ओ० । मर्यादायाम्, (सीम्नि) प्रज्ञा० ३६ पद० । (अत्राङित्त्वकृत एव तात्पर्यम् ङिदंशे मर्यादायामित्यादयस्तूदाहरणमात्रमत एवान्यत्रापि ङित्प्रयुज्यते) तथाच समन्तादित्यर्थे, उत्त० आ० म० । प्रव० । भ० । ओ० । अवागर्थे (अधोभूमौ) प्रज्ञा० २ पद० । वि० वाक्यालङ्कारे, । ईषदर्थे, । (स च प्राकृते अन्यत्र वाक्यालङ्काराय प्रयुज्यते) "आ इति भाषायाम " ज्ञा० २ अ० । अमर्षे, आनिमुख्ये, वाच० । अनुकम्पायाम, समुच्चये, अङ्गीकारे, कोपे, पीडायाम । एका० । आः किमेतदित्येवं विस्मये, स्था० । ५ ठा० । एका० संतापे, सुखरतौ, चिरे, सद्भूतस्तुति, परितापे, विधौ, सन्निधे, क्रिये, । एका० स्वयंभुवि, पुं० । एका० । आचार्ये च । स च नामैकदेशे नाममात्रग्रहणादिति पदे आदाब्दः आचार्य बोधयतीति । वा० ॥

आअ– (आगअ) –आगत–त्रि० आयाते, उपस्थिते, प्राप्ते च । आगमने, न० वाच० । " व्याकरणप्राकारागते कगोः " । ८ । १ । ६८ । इति प्राकृतव्याकरणसूत्रेण वैकल्पिको गकारस्य सस्वरस्य लुक् । प्रा० व्या० ॥

आ (अंस-) आरिस–आदर्श–पुं० दर्पणे, वाच० । "ही-र्यंतप्रयत्ने वा " । २१ । २ । १० । इति सूत्रेणान्त्यव्यञ्जनात्पूर्व इकारो वैकल्पिक इति । प्रा० व्या० ॥

आअड्ड–व्यापृ–त्रि० धा० पृ–व्यापारे, तुदा० आत्म० अनिट् "व्यापेरोअड्डः " । ८ । ४ । ८१ । इतिप्राकृतसूत्रेण वैकल्पिक आअड्ड इत्यादेशः । आअड्डेइ वावारेइ– व्याप्रियत इत्यर्थः । प्रा० व्या० ॥

आअरिअ–आचार्य–पुं० गुरौ, वाच० " स्याद्भव्यचैत्य- चौर्यसमेषु यात् " । ३० । १ । ८० । इति प्राकृतसूत्रेण यकारात्पूर्व इकारः । प्रा० व्या० ॥

आइ–आदि–पुं० आदीयते गृह्यते इति आ० दा० कि–प्रथमे, प्रव० । स च यस्मात्परमस्ति न पूर्वं स इति । अनु० । मूलकारणे, प्रज्ञा० ११ पद० । मूलमादिरित्यनर्थान्तरमिति । आ० चू० २ अ० । प्रथमोत्पत्तौ, सूत्र० २ श्रु० ५ अ० । प्राथम्ये, उत्त० १ अ० । प्रधाने, आचा० २ श्रु० । उत्तरेचाय्ये नाम्नेरथस्तने देहभागे, स्था० ६ ठा० । भेदे, (प्रकारे) नि० चू० । सामीप्ये, व्यवस्थायाम, अवयवे च । आह च । " सामीप्ये च व्यवस्थायां, प्रकारेऽवयवे तथा । चतुर्ष्वर्थेषु मेधावी, आदिशब्दन्तु लक्षयेदिति " प्रश्न० १ द्वा० । अस्य चतुर्विधो निक्षेपः नामस्थापना द्रव्यभावभेदात् । तद्यथा–

णामादी ठवणादी, दव्वादी चेव होंति जावादी ।
दव्वादी पुण दव्वस्स, जो पज्जाओ गपठाणे ॥

(णामादीत्यादि) आदेर्नामादिकश्चतुर्धा निक्षेपः । नामस्थापने सुगमत्वादनादृत्य द्रव्यादिं दर्शयति । द्रव्यादिः पुनर्द्रव्यस्य परमाण्वादेर्यः स्वभावः परिणतिविशेषः इत्थं स्थाने स्वकीय पर्याये प्रथममादौ भवति स द्रव्यादिर्द्रव्यस्य द्रव्यादेर्यं भावः परिणतिविशेषः क्षीरस्य विनाशकालसमकालीन एवमन्यस्यापि परमाण्वादेर्द्रव्यस्य यो यः परिणतिविशेषः प्रथममुत्पद्यते स सर्वोऽपि द्रव्यादिरियमेव भवति । ननु च कथं क्षीर- विनाशसमये एव दध्युत्पादः । तथा हि । उत्पादविनाशौ भावाभावरूपौ वस्तुधर्मौ वर्तेते । न च धर्मो धर्मिणमन्तरेण भवितुमर्हत्यत एकस्मिन्नेव क्षणे तद्धर्मिणोर्दधिक्षीरयोः सत्तामान्येऽप्येतच्च दृष्टेष्टबाधितमिति । नैव दोषः । यस्य हि वादिनः क्षणमात्रं वस्तु तस्यायं दोषो, यस्य तु पूर्वोत्तरक्षणानुगतमन्वयि द्रव्यमस्ति तस्यायं दोष एव न भवति । तथाहि तत्परिणामि द्रव्यमेकस्मिन्नेव क्षणे एकेन स्वभावेनोत्पद्यते परेण विनश्यत- नन्तधर्मत्वाद्वस्तुन इति । पर्वार्ल्पवदेतत् । सदैवं द्रव्यस्य विवक्षितपरिणामेन परिणमतो य भावः समयः स द्रव्यादि- रिति स्थितं द्रव्यस्य प्राधान्येन विवक्षितत्वादिति ।

सांप्रतं आगमादिमधिकृत्याह ।

आगम णोआगमओ, जाणादी तं तुहा हवदिगंतो ।
णोआगमओ जाणो, पंचविहो होइ णायव्वो ॥
आगमओ पुण आदी, गणिपिडगं होइ बारगं तु ।
गच्छमि होगोपदपाद–अवस्वराइ परत्थादी ॥

(आगम इत्यादि) आदेर्भवः करणस्य परिणतिविशेषस्य श्रुत- स्कंधस्य गणधरपदयो स्वपादरूपसि मंगलादसाम । तद्यथा । आगमतो नोआगमतश्च । तत्र नोआगमत ... लोकेश- चिन्त्यमानत्वात्तत्रापि च प्रकारो ... आगमतो तत्परतादीनामाद ...

आइगुण-आदिगुण-पुं० । आदौ गुणः ३ त० मदनाविनिगुणं, वाच० ॥ अ० (सिद्धानामादिगुणा एकत्रिंशत् च सिद्धादिगुण शब्दे वक्ष्या)

आइग्घ-आघ्रा-आङ्, घ्रा-भ्वा० पर० अनिट् गन्धोपादाने, गृमी च । वाच० " आघ्रेराइग्घः ८।४।१३। " इति प्राकृतसूत्रेणाजिघ्रतेर्वैकल्पिक आइग्घादेशः । आइग्घइ-आघ्राइ जिघ्रतीत्यर्थः । प्रा० व्या० ॥

आइग्घाण-आघ्राण-त्रि० आङ् घ्रा-क्त-गृहीतगन्धे पुष्पादौ, नासिकया यस्य गन्धग्रहणं जातं तस्मिन्, तृप्ते, भावे क्तः गन्धग्रहणे, तृप्तौ च न० । वाच० ॥

आइच्च-आदित्य-पुं० । कृष्णराज्यवकाशान्तरस्थलोकान्तिकसंज्ञकाचिर्मालिविमानस्थे लोकान्तिकदेवविशेषे, प्र०६ श० ५उ० । ग्रैवेयकविमानविशेषे, तन्निवासिनि वैमानिकदेवविशेषे च । प्रश्र० । समयावलिकादीनामादौ भवे, बहुलवचनात् ण्यप्रत्ययः । सूर्ये० २० पाहु० । सूर्ये, आव० ४ अ० ।

सूर्यस्यादित्यसंज्ञा यथा ॥

से केणट्ठेणं भंते ! एवं वुच्चइ सूरे आइच्चे सूरे गोयमा ! सूरादियाणं समयाइ वा आवलियाइ वा जाव उस्सप्पिणीइ वा अवसप्पिणीइ वा से तेणट्ठेणं गोयमा ! जाव आइच्चे ।

अथादित्यशब्दस्यान्वर्थाभिधानायाह (सेकेणमित्यादि) तथा हि-सूर्योदयमवधिं कृत्वा अहोरात्रारम्भकः समयो गण्यते आवलिकामुहूर्तादयश्च (सेतेणमित्यादि) अथ तेनार्थेन सूर आदित्य इत्युच्यते इति । भ० १२श० ६ उ० । सूर० । चन्द्र० । आदित्यपर्यायस्य सूत्रकृताङ्गे " णाइच्चो उएइ ण अत्थमेइ " सर्वशून्यवादिनो ह्यक्रियावादिनः सर्वस्य ह्यमादित्योद्गमनादिकामेव क्रियां नापहिनुवन्तीति दर्शयति । आदित्यो हि सर्वजगत्प्रतीतो जगत्प्रदीपकल्पो दिवसादिकालविभागकारी स एव तावन्न विद्यते कुतस्तस्योद्गमनमस्तगमनं वा । यच्च जाज्वल्यमान तेजोमण्डलं दृश्यते तद् भ्रान्तमतीनां द्विचन्द्रादिप्रतिभासं मृगतृष्णिकाकल्पं वर्तते । अत्र तन्मतस्य निराकरणम् । तथाहि-भगोपाङ्गाङ्कनादिप्रतीतः समस्तान्धकारक्षयकारी कमलाकरोद्घाटनपटीयानादित्योद्गमः प्रत्यहं भवत्युपलभ्यते । तत्क्रिया च देशाद्देशान्तरावाप्त्याऽन्यत्र देवदत्तादौ प्रतीताऽनुमीयत इति । सूत्र० १ श्रु० १२ अ० । सर्वांचित्रे गगने दिवानिशं यत्परिभ्रममाणे लोकप्रकाशकरे तेजोमण्डले, । अत्रो प्रत्ता हुति. सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः इति । मनुना अग्निहुतद्रव्याणां हविराज्यादीनां परमाणुभावतयाऽवस्थितानां द्रव्यदोषाणां सूर्यरश्मिकर्षणेन सूर्यलोकप्राप्त्या वृष्टिहेतुत्वमुक्तम तत्र मण्डलार्थपरत्व एव सम्भवति । वाच० । अर्कवृक्षे, पुं० । आदित्यस्यापत्यम् यत् यलोपः । आदित्यापत्ये, पुं० स्त्री० वाच० । आदित्यस्यायमादित्यः पश्युसरपदयमादित्यदितेरिति ण्यापवादस्त्यक् तयश्चाद्यन्तमस्य सरूपेणा इति पाक्षिकएकस्य यकारस्य लोपः । आदित्यचारनिष्पन्नत्वात्तदुपचारतो मासोऽप्यादित्यः । आदित्यसम्बन्धिनि तच्चारनिष्पन्ने मासादौ स चैकस्य दक्षिणायनस्योत्तरायणस्य वा त्र्यशीत्यधिकदिनशतप्रमाणस्य षष्ठभागमात्रः यदादित्यचारनिष्पन्नत्वादुपचारतो मासोऽप्यादित्यः । व्य० प्र० १ उ० ।

आइच्चगय-आदित्यगत-त्रि० । सूर्याक्रान्ते नक्षत्रादौ, " आइच्चगए अनिट्ठाणी " रविगते नक्षत्रे शुभप्रयोजने प्रारभ्यमाणे ऽसुखकारीति वृत्तिः । वृ० १ उ० ।

आइच्चजस-आदित्ययशस्-पुं० स्वनामख्याते इक्ष्वाकुवंशजे भरतात्मजे नृपभेदे, आ० चू० २ अ० । स च पुण्डरीकशैलेऽत्र सिद्ध इति । ती० । आदित्ययशःप्रमुखा नृपाः भरतचक्रवर्तिवंशजाः श्रीशत्रुञ्जयतीर्थमुपास्य परमां पारमेश्वरीं दीक्षामङ्गीकृत्य तत्प्रभावतः सकलकर्मक्षयं कृत्वा, सिद्धिपदमगमन्निति । ती० ॥

आइच्चपीढ-आदित्यपीठ-न० । गजपुरस्थे श्रेयांसन कारिते आदिनाथकारत रत्नमये पादपीठे, तद्वक्तव्यता यथा-सेज्जंसो वि जाव जिनो जत्थ पडिमाठिओ ताणि पयाणि पाढेइ मा अक्कमीसामिति भत्तिए तत्थ रयणमयं पीढं करेइत्ति सज्झं च पुणइ पच्चदिवसे विसंसेजं पुइऊण भुंजइ लोगो पुच्छइ किमेयं सेज्जंसो भणइ आदित्यपरमपमह तत्तो लोगेण वि जत्थ जत्थ भयवं ठिओ तत्थ तत्थ पीढं कयं कालेण य आइच्चपीढं जायं ॥ गयाकुरगमनिका क्रियाव्याहारतः कार्या । यथा गजपुरं नगरमासीत् तत्र श्रेयांसः सोमयशसो राज्ञः पुत्रः तेनेक्षुरसदानं भगवते कृतम् । तत्रार्द्धत्रयोदशहिरण्यकोटी वसुधारा निपतिता । पीठमिति यत्र भगवता पारितं तत्र तत्पादयोर्मा कश्चिदाक्रमणं कार्षीदिति श्रेयांसेन भक्त्या रत्नमयं पीठं कारितं गुरुपूजेति तदर्चनं कृतवानिति । आ० म० प्र० ।

आइच्चपत्ता आदित्यपत्रा-स्त्री० आदित्ये पत्रा । अर्कपत्राभायाम् ओषधौ, वाच० ॥

आइच्चमास-आदित्यमास-पुं० आदित्यस्यायमादित्यः आदित्यचारनिष्पन्नत्वात्तदुपचारतो वाऽऽदित्यः स चासौ मासश्च क०स० आदित्यचारनिष्पन्ने मासभेदे, स चैकस्य दक्षिणायनस्योत्तरायणस्य वा त्र्यशीत्यधिकशतदिनप्रमाणस्य षष्ठभागप्रमाण इति । व्य० प्र० १ उ० ।

आइच्चेणं मासे एक्कतीसं राइंदियाणं किंचि विसेसूणाइं राइंदियग्गेणं पाणत्ताइं ।

आदित्यमासो येन कालेनादित्यो राशिं भुङ्क्ते (किंचिविसेसूणा इति) अहोरात्रार्द्धेन न्यूनानीति । सम० ३१ स० । "आइच्चो खलु मासो तीसं अद्धं च" टी० आदित्यसंवत्सरसम्बन्धी खलु मासो जयति त्रिंशदहोरात्रदिवानि एकस्य च रात्रिदिवसस्यार्धम् । तथाहि-सूर्यसंवत्सरस्य परिमाणं त्रीणि शतानि षट्षष्ट्यधिकानि रात्रिंदिवानि द्वादशभिश्च मासैः सम्वत्सरस्तत्त्रयाणां शतानां षट्षष्ट्यधिकानां द्वादशभिर्भागे हृते यथोक्तं मासपरिमाणं भवति । ज्यो० २० पाहु० ।

आइच्चवण्ण-आदित्यवर्ण-त्रि० । भास्वरे, पो० ॥

आइच्चसंवच्छर-आदित्यसंवत्सर-पुं० प्रमाणसंवत्सरविशेषे, स च यावता कालेन षडपि प्रावृडादय ऋतव आपूर्णा आवृत्ता भवन्ति तावत्कालविशेष आदित्यसंवत्सरः । उक्तं च " छप्पि उऊ परियट्टा, एसो संवच्छरो उ आइच्चो " तत्र यद्यपि लोके षष्ट्यहोरात्रप्रमाणः प्रावृडादिक ऋतुः प्रसिद्धः तथापि परमार्थतः स एकषष्ट्यहोरात्रप्रमाणो वेदितव्यः तथैवोत्तरकालमव्यभिचारदर्शनात् अत एवास्मिन् संवत्सरे त्रीणि शतानि षट्षष्ट्यधिकानि रात्रिंदिवानां भवन्ति । तथा चान्यत्रापि पञ्चस्वपि संवत्सरेषु यथोक्तमेव रात्रिंदिवानां परिमाणमुक्तम् । "तिन्नि अहोरत्तसया छावट्ठी नक्खरो हवइ" ॥ तत्र सूर्यसंवत्सरस्य परिमाणं त्रीणि शतानि षट्षष्ट्यधिकानि रात्रिंदिवानां द्वादशभिश्च मासैः संवत्सरस्तत्र त्रयाणां शतानां षट्षष्ट्यधिकानां द्वादशभिर्भागो ह्रियते । लब्धाः त्रिंशत् शेषास्तिष्ठन्ति षट् । ते अर्द्धीक्रियन्ते जाता द्वादश । ततो लब्धमेकं

आइएणं आइएणं, तव्विवरीयं अणाइएणं ।
आहारवत्थमाइसु, अमणादियं तु होति णायव्वं ।
करणं आयरणं तु, तस्स तु जं जत्थ आइएणं ।
पिसितं सिंधुविसए, धांति पुण उत्तरावहाइएणं ।
संवेलंदमिलेसुं, पमादी खेत्तमाइएणं ।
काले दुभिक्खादिसु, व संयमादी तु मज्झमाइएणं ।
चयगरणे आइएणं, वोच्छामि अतो समासेणं ।
सिंधू आयरिगाई, काला कप्पा सुरट्ठविसयम्मि ।
दुग्गुल्लादिपुडवत्थं, महरट्ठेसु च जनपूरा ।
एवं जत्थाइएणं, तहियं तु कप्पतीति भायरिउं ।
इतरत्थ कारणम्मि, फासणगहणं च परिभोगो ।
आइएणं चउवग्गो, ण य पीसाकारओ पवयणस्स ।
ण य महलणापवयणे, आइएणं आयरे कप्पं ।
आहारउवहिसेज्जा य, सेहावग्गहो होति ।
पवयणपीयुवघातो, पिसिया ताइ मज्जया इत्ति ।
चोदेइ का महल्लणा, भएणति परिसहियाण जं संघे ।
सा होति महल्लणा तु, जो पुण सुपरिट्ठिओ चरले ।
सणहो नु सलोहत्ती, धणति गुणेहि एसु जुत्तोत्ति ।
सुट्ठुकरे तप्पाहितं, जो पुण करणे अजुत्तो य ।
तं दट्ठुं सेदेहो, वण्णेति किएणु एस सच्छंदो ।
आऊणं ववएसो, परिम्मओ देसिओ समए ।
अह जिणकप्पियाण वि, आइएणं किंचि अत्थि अह णत्थि ।
भएणत्ति णत्थि किं पुण, आयरियजिणकप्पिताइएणं ।
आहार उवहिदेहे, णिरविक्खो णवरि णिज्जरापेही ।
संघयणविरियजुत्तो, आयएणं आयरति कप्पं ।
पं० भा० । पं० चू० ॥

आइएणहय–आकीर्णहय–पुं० । आकीर्णो गुणैर्व्याप्तः स चासौ हयश्च आकीर्णहयः क. स. । जात्येऽश्वविशेषे, स च जवविनयादिगुणोपेत इति । आइएणहय व्व निरवेक्खेव । यथा जात्याश्वो मृदुरीत्याऽनुपलिप्तगात्र इति । जी० ३ प्रति० ।

आइतित्थयर–आदितीर्थकर–पुं० । ऋषभदेवस्वामिनि, "भगवओ उसहस्सामिस्स आइतित्थयरस्स इति" । नं० ॥

आइत्त–आदीप्त–त्रि० ईषद्दीप्ते, ज्ञा० १ अ० ।

आइत्ता–आदाता–त्रि० । ग्रहीतरि, स्था० ७ ठा० ॥

आइत्तुण–आदाय–अव्य० गृहीत्वेत्यर्थे, आचा० ४ अ० १ उ० ।

आइद्ध–आविद्ध–त्रि० आ० व्यध् क्त–प्रेरिते, दर्श० । ताडिते, विद्धे, छिद्रिते, क्षिप्ते च । वाच० ।

आदिग्ध–त्रि० व्याप्ते, ज्ञा० १ अ० ।

आइदाण–आदान–न० ग्रहणे, प्रश्न० ॥

आइधम्मिय–आदिध (धा) र्मिक–पुं० एतत्संज्ञया प्रसिद्धे अपुनर्बन्धकापरपर्याये प्रथमारब्धस्थूलधर्माचारे, धर्मसंग्रहे गृहस्थधर्मानुकीर्तनप्रकरणादि प्रतिपादितम् । अथ पूर्वोक्तगुणवत एव संज्ञाविशेषविधि तदवस्थाविशेषविधि चाह ।

स आदिधार्मिकश्चित्र–स्तत्तत्तन्त्रानुसारतः ।
इह तु स्वागमापेक्षं, लक्षणं परिगृह्यते ॥

स पूर्वोक्तगुणैरुत्तरोत्तरगुणवृद्धियोग्यतावान् आदिधार्मिकः प्रथममेवारब्धं स्थूलधर्माचारत्वेनादिधार्मिकसंज्ञया प्रसिद्धः स च तानि तानि तन्त्राणि शास्त्राणि तदनुसारतश्चित्रो विचित्ररूपो भवति भिन्नाचारस्थितानामप्यन्तःशुद्धिमतामपुनर्बन्धकत्वाऽविरोधात् । अपुनर्बन्धकस्य हि ना(शा)स्त्रस्वरूपत्वात् तत्तत्तन्त्रोक्ताऽपि मोक्षार्था क्रिया घटते । तदुक्तं योगबिन्दौ "अपुनर्बन्धकस्यैवं सम्यग्नीत्योपपद्यते । तत्तत्तन्त्रोक्तमखिलमवस्थाभेदसंश्रयादिति" । इह तु प्रक्रमे स्वागमापेक्षं स्वागमानुसारिलक्षणं स्वरूपं प्रक्रमादादिधार्मिकस्य परिगृह्यते आश्रीयते । यो ह्यन्यैः शिष्टैरधिसत्त्वनिवृत्तप्रकृत्याधिकारादिशब्दैरभिधीयते स एवास्माभिरादिधार्मिकापुनर्बन्धकादिशब्दैरिति भावः । लक्षणमित्यत्रैकवचनं जात्यपेक्षं तल्लक्षणसंपादनविधिश्चायमुक्तो ललितविस्तरायां " परिहर्त्तव्योऽकल्याणमित्रयोगः । सेवितव्यानि कल्याणमित्राणि न लङ्घनीयोचितस्थितिः । अपेक्षितव्यो लोकमार्गः । माननीया गुरुसंहतिः भवितव्यमेतत्तन्त्रेण प्रवर्तितव्यं दानादौ । कर्त्तव्योदारपूजा भगवताम् । निरूपणीयः साधुविशेषः । श्रोतव्यं विधिना धर्मशास्त्रं भावनीयम् महायत्नेन प्रवर्तितव्यम् विधानतः । अवलम्बनीयं धैर्यम् । पर्यालोचनीया आयातिः । अवलोकनीयो मृत्युः । भवितव्यं परलोकप्रधानेन । सेवितव्यो गुरुजनः । कर्त्तव्यं योगपटदर्शनम् । स्थापनीयं तद्रूपादि । चेतसि निरूपयितव्या धारणा । परिहर्तव्यो विक्षेपमार्गः । यतितव्यं योगसिद्धौ । कारयितव्या भगवत्प्रतिमाः । लेखनीयं भुवनेश्वरवचनम् । कर्तव्यो मङ्गलजापः । प्रतिपत्तव्यं चतुःशरणम् । गर्हितव्यानि दुष्कृतानि । अनुमोदनीयं कुशलम् । पूजनीया मन्त्रदेवताः । श्रोतव्यानि सच्चेष्टितानि । भावनीयमौदार्यम् । वर्तितव्यमुत्तमज्ञानेन । एवंभूतस्य येह प्रवृत्तिः सा सर्वैव साध्वी " । मार्गानुसारी ह्ययं नियमादपुनर्बन्धकादिः तदस्यैवंभूतगुणसम्पद्भावात् । अत आदित आरभ्यास्य प्रवृत्तिः सत्प्रवृत्तिरेव नैगमानुसारेण चित्राऽपि प्रस्थकप्रवृत्तिकल्पा । तदेयं तद्विदन्याहुः । कुठारादिप्रवृत्तिरपि रूपनिर्माणप्रवृत्तिरेव तद्वदादिधार्मिकस्य धर्मे कात्स्न्येन तद्गामिनी न तद्बाधिनीति हार्दः । तत्त्वाविरोधकं ह्रदयमस्य ततः समन्ततद्भूता तत्प्रवृत्त्यात्मकत्वचेष्टितस्य । एवमतोऽपि विनिर्गतं तत्तद्दर्शनानुसारतः सर्वमिह योज्यं सुसमाधिकृतप्रबोधदर्शनादि । न ह्ययं भवसंमानो नेष्टसाधक इति सन्तोऽप्येतदन्तर्भिन्नोऽपुनर्बन्धक इति तं प्रत्युपदेशसाफल्यम् । नानिवृत्ताधिकारायां प्रकृतावेवंभूत इति कापिलाः । नानवाप्तभवविपाक इति च सौगताः । अपुनर्बन्धकास्त्वेवंभूता इति जैना इति ॥

अथोक्तस्वरूपस्यादिधार्मिकस्य सद्धर्मदेशनायोग्यत्वं दर्शयति

स धर्मदेशनायोग्यो, मध्यस्थत्वाज्जिनैर्मतः ।
योगदृष्टिसमुच्चयात्सार्थं, यद्गुणस्थानमादिमम् ॥ १८ ॥

स पूर्वोक्तगुणसम्पत्त्या प्रसिद्ध आदिधार्मिकः धर्मदेशनायोग्यः लोकोत्तरधर्मप्रज्ञापनार्हः जिनैर्रर्हद्भिर्मतः उपदिष्टः । कालश्चायं चरमावर्त्तवर्त्तीत्येवेत्यनुक्तमपि ज्ञेयम् । यत उक्तमुपदेशपदे । "धम्मिच्छो कालो, एत्थ अकालो य होइ णायव्वो । कालो अ अपुणबंधग, पभिई धीरेहिं णिद्दिट्ठो ॥१॥ णिच्छयओ पुण एसो, विण्णेओ गंठिभेअकालम्मि । एयम्मि विहिपरया पाइएणा आणागमेयाओ " २ एतद्वृत्तिर्यथा घनं मिथ्यात्वं यत्र स तथा कालोऽचरमावर्त्तलक्षणोऽत्र वचनौषधप्रयोगेऽकालस्तथापरः एव भवति । विहितचरमावर्त्तलक्षणस्तु तथा भव्यत्वपरिपाकतो धीजाधानबीजोद्भेदबीजपोषणादिषु स्यादपि काल इत्यत एवाह कालस्त्ववसरः पुनरपुनर्बन्धकप्र . . . . लक्षणाया मार्गपतितो गृह्यते ।

नतुल्यो विशिष्टगुणस्थानारम्भणः . . . . द्रव्योत्तम–

दिदं [illegible] इत्यर्थः । तत्र पतितो [illegible] तदादिनाधापन्नश्च मार्गा- [illegible] इति । [illegible] महतिर्यस्य स तथा धीरैर्नि- र्दिष्ट [illegible] इति । निश्चयनम्तु [illegible] [illegible] ग्रन्थिभेदो [illegible] । [illegible] विधिनाऽपस्योचि- [illegible] यतनीयपरस्य तथा [illegible] न तथा [illegible] । [illegible] तेषु तेषु इत्येषु [illegible] इति । ननु "[illegible]

[illegible]

आइम-आदिम-त्रि० आदौ भवः आदि किमङ्ग-आदिमर्व, पश्चादाद्यन्तामादिम इति सूत्रेण इमप्रत्यये टिलोपः । [illegible] आव० ५ अ० । प्रव० । कर्म० ॥

आइमगणहर-आदिमगणधर-पुं० प्रथमगणधरे, प्रव० ।

आइमज्झंतकल्लाण-आदिमध्यान्तकल्याण-त्रि० आदिम [illegible] सर्वेषु सुन्दरे, धर्मप्रशंसासु [illegible] " सर्वागमपं [illegible] यदादिमध्यान्तकल्याणमिति । षो० ३ विव० ॥

आइमुहुत्त-आदिमुहूर्त्त-न० प्रथमे मुहूर्त्ते, तत्प्रमाणं यप [illegible]

अब्भिंतरओ आइमुहुत्ते [illegible] पप [illegible]

अभ्यन्तरतोऽभ्यन्तरमेवरुन्नमाभिन्येत्यर्थः आदिमुहूर्त्त [illegible] सच्छायः सम्प्राप्तः । प्रथमत्र भावार्थः सर्वाभ्यन्तरमण्डले य [illegible] सूर्यश्चरति तस्य दिवसस्य प्रथमो मुहूर्त्तो द्वादशाङ्गुलमानं [illegible] माभिन्य [illegible] छायो भवति । तथा हि तद्दिनमध्य [illegible] दूर्तप्रमाणं भवतीति मुहूर्त्तोऽष्टादशभागो दिवसस्य भवति [illegible] छायागणितप्रक्रियया छेदनाष्टादशात्मकेन द्वादशाङ्गुलः [illegible] भवत इति ततो द्वे शते षोडशोत्तरे भवतः (२१६) तयो [illegible] शतं भवति (१०८) ततश्च शङ्कुप्रमाणे [illegible] पनीते षण्णवति (९६) रङ्गुलानि लभ्यन्ते इति । सम० [illegible]

आइमूल-आदिमूल-न० प्रधानकारणे आद्यमूलभेदे, मोक्षस्यादिमूलं विनयः संसारस्य विषय इति तत्र मोक्ष [illegible] मूलं ज्ञानदर्शनचारित्रतपः । औपचारिकरूपः पञ्चधा वि [illegible] भ्युत्थानाद्याशातनापरित्यागरूपश्चायम् इत्याह । " विणयाणाणं [illegible] दंसणाइ चरणंति । चरणाहितो मोक्खो, मोक्खे सुक्खं अण [illegible] विनयफलं शुश्रूषा, शुश्रूषायाः फलं श्रुतज्ञानम् ज्ञानस्य फलं विरतिः फलं चाश्रवनिरोधः संवरफलं तपोबलम्, अथ तपसः [illegible] फलं व्यवदानं, तस्मात् क्रियानिवृत्तिः, क्रियानिवृत्तेरयोगि [illegible] योगनिरोधात् भवसंततिक्षयः, संततिक्षयान्मोक्ष इत्यस्मात् [illegible] कल्याणं सर्वेषां भाजनं विनयः इत्यादि । संसारस्य त्वादिमूलं [illegible] कषाया इति । आचा० १ श्रु० २ अ० १ उ० ॥

आइमोह-आदिमोह-पुं० आदिः संसारस्तन्मात्रमोहः [illegible] मोहः । असमार्गनिर्वृत्तौ, धर्म [illegible] आदिमूलं [illegible] मोहः [illegible] शरीरपरित्यागं च " [illegible] आदिमात्रम " [illegible] वृत्तिः । सूत्र० १ [illegible]

[illegible]

आइयत्तिय-आदियात्रिक-पुं० आदौ यात्रायामित्यादियात्रादी-मामारब्धेषु, तस्याधौ भंदा यथा " पुग्गलमायगममाइट्ठि, भदा महद्दाणमई य। अणमिग्गाहिए सिच्चे, अनिग्गहे अनतिथी य"। सू० १ उ०। (एतस्यार्थोऽतिनङ्कादसमायंथाइयत्ते च अन्ययाइ-शब्दे द्रष्टव्यः)

आइ (दि) यावण-आदापन-न० मादपे, " आदियावेति " आदापयन्ति, आदयन्ति ॥ सूत्र० २ श्रु० १ अ०।

आइराय-आदिराज-पुं०। प्रथमनृपे, स्था० ६ ठा०।

आइरि-आगिरि-त्रि० अङ्गपमणिहरदेशादौ, वाच०।

आइल्ल-आविल-त्रि० आ-विल भेदने, क. कलुषे, कालुष्ययुते, सूत्र० १ श्रु० ६ अ०। मत्स्यजनस्य हि जलादौ सम्यग्दृष्टिप्रमा-दनेऽदर्शनाभावत्वम्, भेदके, त्रि० वाच०।

आइल्लकन्द-आविलकन्द-पुं०। आविलो भूमेराभेदकः कन्दो मूलमस्य,। माक्षाकन्दे, क्षुरकन्दे, तस्य आक्षाकारकन्दतया भूमेः सम्यग्भेदकत्वात्। वाच०।

आइल्ल-आदिम-त्रि०। आद्ये, आ०।

आइल्लचन्द-आदिमचन्द्र-पुं०। इत्तरोत्तरद्वीपसमुद्रपर्यन्ता-पेक्षया पूर्वपूर्वद्वीपसमुद्रचन्द्रे, तस्य तथात्वं सूत्रप्रज्ञप्तौ यथा "धायइसंडप्पभिति उद्दिट्ठा, तिगुणिया भवे चंदा। आदिल्लचंदस-हिता, अणंतराणंतरं खेत्ते" सू० प्र० १९ पाहु०।

आइल्लसूर-आदिमसूर्य-पुं०। उत्तरोत्तरद्वीपसमुद्रपर्यन्तापेक्षया पूर्वपूर्वद्वीपसमुद्रसूर्ये, तस्य तथात्वमत्रैव आइल्लचंद शब्दे सू० प्र० १९ पाहु०।

आई (सी) (ही) ण-आजिन-न० मृगचर्मादिकर्मनिष्पन्ने वस्त्रे, आचा० २ श्रु० २ अ० ६ उ०। द्वीपविशेषे, समुद्रविशेषे च। पुं-जी० ३ प्रति०।

आदीन-न० आसमन्तादीनम्। अत्यन्तदीनतायाम्, सूत्र० १ श्रु० ५ अ०।

आइणग-आजिनक-न० चर्ममये वस्त्रविशेषे, दश०। तच्च स्व-भावादतिकोमलं भवतीति दश० १ अ०। पञ्चविंशतिमंगि, कर्म०। दश०। आ० म० प्र०। नि०। जी०। ("आईणगरुयबूरण-वणीयतूलफासे " इति प्र० ११ श० ११ उ०। "अजिणं चम्मं तम्मि जं कीरति तं आईणगमिति " नि० चू०।

आईणजर-आजिनवर-पुं० आजिने द्वीपे, आजिनवराजिन-महाभद्रौ। आजिनद्वीपस्थे देवे, जी० ३ प्रति०।

आई (ही) णजोइ (न)-आदीनजोगिन्-पुं० पतिनपिटको दोषयोगिन,

आदीणजोईं रिवकेति पावं, पंचाइ एगंतमसाहिमाहु।

आदीनजोऽस्यपि पापं करोतीति। कथं च। " पिंडोलवेव दुस्सीले णरगाओ ण मुच्चइ" स वयाविच्योनमसारतपरमभ-[illegible] [illegible] सप्तमनरकपृथ्वीं गतः। तथा-आसादिव राजगृहनगरोद्यानिकामहासमूहे वैभारगिरि-शिलापातनेयत्न [illegible] [illegible] तथा [illegible] [illegible] संसारोत्तरणाय [illegible]। सूत्र० १ श्रु० १० अ०।

आईणमहाभद्द-आजिनमहाभद्र-पुं० आजिनद्वीपस्थे देवे, जी० ३ प्रति०।

आईणमहावर-आजिनमहावर-पुं० आजिनसमुद्रस्थे देवे, आजिनवरसमुद्रस्थे देवे च। जी० ३ प्रति०।

आईणवर-आजिनवर-पुं० द्वीपविशेषे, समुद्रविशेषे च। आजिनसमुद्रस्थे देवे, आजिनवरसमुद्रस्थे देवे च। जी० ३ प्रति०।

आईणवरभद्द-आजिनवरभद्र-पुं० आजिनवरद्वीपस्थे देवे, जी० ३ प्रति०

आईणवरमहाभद्द-आजिनवरमहाभद्र-पुं० आजिनवरद्वीपस्थे देवे, जी० ३ प्रति०।

आईणवरोभास-आजिनवरावभास-पुं० द्वीपविशेषे, समुद्रविशेषे च। जी० ३ प्रति०।

आईणवरोभासभद्द-आजिनवरावभासभद्र-पुं० आजिनवरावभासद्वीपस्थे देवे, जी० ३ प्रति०।

आईणवरोभासमहाभद्द-आजिनवरावभासमहाभद्र-पुं० आजिनवरावभासद्वीपस्थे देवे, जी० ३ प्रति०।

आईणवरोभासमहावर-आजिनवरावभासमहावर-पुं० आजिनवरावभाससमुद्रस्थे देवे, जी० ३ प्रति०।

आईणवरोभासवर-आजिनवरावभासवर-पुं० आजिनवरावभाससमुद्रस्थे देवे, जी० ३ प्रति०।

आई (दी) णवित्ति-आदीनवृत्ति-पुं० [illegible] [illegible] [illegible] [illegible] सूत्र० १ श्रु० १० अ०।

आई (दी) णिय-आदीनिक-पुं० [illegible] [illegible] [illegible]

आईरण-आचीरण-त्रि० [illegible] [illegible]

आईस-आदीश-पुं० [illegible] [illegible] प्रवर्तीति। दश०।

आईवण-आदीपन-न० [illegible] [illegible]

आईसमाण-आदीप्यमान-त्रि० [illegible]

आउकाय-आउकाय-त्रि० [illegible] [illegible]

आउ-आप-[illegible] [illegible]

तास्मां जीवन्वं स्थानाङ्गे दर्शितम । यथा-सात्मकमम्नो भौमं भूमिखनने स्वाभाविकसंभवाद्दुरवत् । अथवा सात्मकमन्तरीक्षोदकं स्वभावतो व्योमसंभूतस्य पातात् मत्स्यवत् । आह च " तृणिस्सव मानाविय, संभवयो ददुडुरोव्य जलमुत्तं " । सात्मकत्वेनेति "अहवा मच्छोव्व सहावो, थोमसंभूयपायाओ त्ति" स्था० १ ठा० " आऊ ति जीवा " इति आपश्च द्रव्यलक्षणा जीवास्तदभिन्नाश्च प्राणाः संपातिमाः शलभादयस्ते च संपतन्ति सूत्र० १ श्रु० १ अ० (अत्र बहुवक्तव्यमन्तप्कायशब्दे द्रष्टव्यम्) अष्टनामके देवविशेषे, तदधिष्ठातृके पूर्वाषाढानक्षत्रे च । आपो जलनाम्ना देवस्तेन पूर्वाषाढातोयमिति प्रसिद्धः । जं० ७ वक्ष० । पुव्वासाढा आउ देवताए इति । सूर० १० पाहु० । ननु स्वव्यभिभावसम्बन्धप्रतिपादकनामान्तरेण कथं देवतानाम्ना नक्षत्रनाम गम्यते ? उच्यते अधिष्ठातरि अधिष्ठेयस्योपचाराद् भवतीति । जं० । ७ वक्ष० ।

आउ-पुं० अप् उङ् नरके, सरूपे, वाच० ॥

आऊ (गु) पुं० अद् भग् लम् अनिनाराम, भा० क० ।

आउस्-न० प्रतिसमयं सोपक्रमेणायानीत्यायुः । नि० चू० ।

[illegible] स्था० ४ ठा० । [illegible] आयुः [illegible] पति भाग- [illegible] निष्क्रमितुम- [illegible] प्रत्ययः । यद्वा [illegible] निषेधनाद्यमागच्छतीति [illegible] । यद्यपि च सर्वं कर्मोदयमा- [illegible] [illegible]

[illegible]

१ [illegible]

२ [illegible]

३ [illegible]

४ [illegible]

५ [illegible]

६ [illegible]

७ [illegible]

८ [illegible]

९ [illegible]

१० [illegible]

११ [illegible]

१२ [illegible]

१३ [illegible]

१४ एकान्तबालैकान्तपण्डितबालपण्डितानामायुः ॥
१५ क्रियावाद्यादिजीवानां सलेश्यादिजीवानां चायुः ॥
१६ कृष्णपाक्षिकादिसम्यग्दृष्ट्यादिक्रियावाद्यादिजीवानामायुः ॥
१७ ज्ञानिनामज्ञानिनां विभङ्गज्ञानिनां सवेदकावेदकक्रियावाद्यादिजीवानां क्रियावाद्यादिनैरयिकादीनां चायुः ॥
१८ अनन्तरोपपन्नकादिक्रियावाद्यादीनामायुः ॥
१९ भविकजीवानां नैरयिकादिषूपपद्यमानानां सायुष्कत्वम् ॥
२० भविकजीवानां नैरयिकादिषूपपद्यमानानामायुष्कारणप्रतिसंवेदनादि—
२१ अनन्तरमुद्वर्त्योत्पद्यमाननैरयिकादीनामायुःप्रतिसंवेदनादि-

१ तच्चायुर्नामादिभेदतो दशधा तद्यथा ।

नामं, ठवणा, दविए, ओहे, भव, तब्भवे, य भोगे, य ।
संजमे, जस, कित्ती, जीवियं च तं भण्णई दसहा ॥१॥

तत्र नामस्थापने क्षुण्णे (दविएत्ति) द्रव्यमेव सचेतनादिभेदं जीवितव्यहेतुत्वाज्जीवित द्रव्यजीवितम् । ओघजीवितं नारकादिविशेषितायुर्द्रव्यमात्रं सामान्यजीवितं भवति नारकादिभवविशिष्टं जीवितं भवजीवितं नारकजीवितमित्यादि (तब्भवेत्ति) तस्यैव पूर्वभवस्य समानजातीयतया सम्बन्धिजीवितं तद्भवजीवितम् यथा मनुष्यस्य सतो मानुषत्वेनोत्पन्नस्येति । भोगजीवितश्चक्रवर्त्यादीनाम्, संयमजीवितम् साधूनां, यशोजीवित कीर्तिजीवितञ्च यथा महावीरस्येति, जीवितञ्चायुरेवेति ॥ २

(२) आयुश्च सर्वेषामतिप्रियं तथैवोक्तम् ।
" तृणायापि न मन्यन्ते, पुत्रदारार्थसम्पदः ।
जीवितार्थं नरास्तेन तेषामायुरतिप्रियमिति " स्था० १ ठा० ।

सव्वे पाणा पियाउया सुहसाया दुक्खपडिकूला अप्पियवहा पियजीविणो जीविउकामा सव्वेसिं जीवियं पियं ॥

प्राणशब्देनात्रानेकोपचारात्तस्य एव गृह्यन्ते सर्वे प्राणिनो जन्तवः प्रियायुषः प्रियमायुर्येषामस्ते प्रियायुषः । ननु च सिद्धैर्व्यभिचारो न हि ते प्रियायुषस्तदभावात् नैष दोषो यतो मुख्यजीवादिशब्दप्रवृत्तिरत्र प्राणशब्दस्योपचरितस्य ग्रहणं संसारिप्राणिग्रहणार्थमिति । यत्किञ्चिदेतत् । (जीविउकामा इति) यत एव प्रियजीवितोऽत एव दीर्घकालं जीवितुकामाः दीर्घकालमायुष्काभिलाषिणो दुःखानितान्ता अत्यन्तर्या दशामापन्ना जीवितमेवाभिलषन्ति यतश्च " रमइ पिइजीवियंमि, जिसंत्तमेव पिसाणे महइ । मगइ सरीरमइदो, रोगी जीवणिज्जफलयो " तदेवं सर्वोऽपि प्राणी सुखजीवितामिलाषी (कस्य कियदायुरिति जिज्ञासायां जिद शब्दो वीकर्णीयः) प्राणिनां जीवितमल्पयं दर्शितमित्यतो भूयो भूयस्तदेवापदिश्यते कथमत आह (सव्वेसिमित्यादि) सर्वेषामविगानेन जीवितमसंयमजीवितं प्रियं दर्शितम् ।

जीवियं पुढोपियं इहमेगेसिं माणवाणं खेत्तवत्थुममायमाणं आरत्तं विरत्तं मणिकुंडलं सह हिरण्णेण इत्थियाउ परिगिज्झ तत्थेव रत्ताणं एत्थ तवो वा दमो वा नियमो वा दिस्सइ संपुण्णं बाले जीविउकामे लालप्पमाणे मूढे विपरियासमुवेति ॥

जीवितं वा पृथगिति प्रत्येकं प्रतिप्राणि प्रियं दयितं बहुनामिदं [illegible] संसारं [illegible] मानवानामित्युपलक्षणार्थम् [illegible] दीर्घजीवमाधि [illegible] रसायनादिक्रियाः [illegible] क्रियाः कुर्वन्ति ।

(१) [illegible]

सिद्धमधुरेहिं आओ, च्छस्सति देहिंदिया मेहा ।

अत्यति जत्थ णत्थाति, महाविम्भु वीइगादीया ॥२५८॥

चोदक आह कथमायुषः पुष्टिः ? आचार्य आह । यथा देवकुरूत्तरासु क्षेत्रस्य स्निग्धगुणत्वादायुषो दीर्घत्वं सुषमसुषमायां च कालस्य स्निग्धत्वाद् दीर्घत्वमायुषस्तथा इहापि स्निग्धमधुराहारत्वात् पुष्टिरायुषो भवति सा च न पुद्गलवृद्धेः किंतु युक्ताससंग्रहणात् क्रमेण भोगेनेत्यर्थः । नि० चू० ॥

गतं चायुर्न पुनरावर्त्तते । उक्तं च ।

" भवकोटीभिरसुलभं, मानुष्यं प्राप्य कः प्रमादो मे ।

न च गतमायुर्भूयः, प्रत्येत्यपि देवराजस्य " ॥ १ ॥

नो नैव संसारे सुलभं सुप्रापं संयमप्रधानं जीवितं यदि वा जीवितमायुस्त्रुटितं सत् तदेव संधातुं न शक्यत इति वृत्तार्थः ॥ सूत्र० १ श्रु० २ अ० ॥

(४) अल्पमनित्यं चायुः सर्वेषाम् । तत्रानित्यत्वं यथा ।

दुमपत्तए पंडुरए, जह निवडइ राइगणाण अच्चए ।

एवं मणुआण जीवियं, समयं गोयम ! मा पमायए ॥

भगवान् श्रीमहावीरदेवो गौतमस्वामिनमुद्दिश्य अन्यानपि भव्यजीवाननुपदिशति । हे गौतम ! एवमनेन दृष्टान्तेन मनुजानां मनुष्याणां जीवितं जानीहि त्वं समयं समयमात्रमपि मा प्रमादीः प्रमादं मा कुर्याः । अत्र समयमात्रग्रहणमत्यन्तप्रमादनिवारणार्थम् । तत्र दृष्टान्तमाह । यथा रात्रिगणानामत्यये गमने रात्रीणां गणा रात्रिगणाः कालपरिणामाः रात्रिदिवससमूहास्तेषामत्यये अतिक्रमे पाण्डुरकं द्रुमपत्रं पक्वं वृन्तात् शिथिलप्रायं पर्णं निपतति तथैव दिनानामत्यये आयुःक्षयेण वृन्ते शिथिले जाते सति जीवितं शरीरं पतति । जीवो जातो यस्मिन् तत् जीवितं शरीरमित्यर्थः । जीवितस्य कालस्य विनाशाभावात् जीवितशब्देन शरीरमुच्यते । यदाह निर्युक्तिकारः "परिजूरियपेरंतं, चलंतबेंटं पडंतनिच्छीरं । पत्तं वसणं पत्तं, कालपत्तं भणइ गाहं" ॥१॥ "जह तुब्भे तह अम्हे, तुब्भे वि अ होहिहा जहा अम्हे । अप्पाहेइ पडंतं, पंडुअपत्तं किसलयाण" ॥२॥ "नवि अत्थि नवि अ होही, उल्लावो किसलपंडुपत्ताणं । उवमा खलु एस कया, भवियजणविबोहणट्ठाए" ॥३॥ यथा हि किसलयानि पाण्डुपत्रेण अनुशिष्यन्ते तथा अन्योऽपि यौवनगर्वितोऽनुशासनीयः ।

अथायुषोऽनित्यत्वमाह ।

कुसग्गे जह ओसबिंदुए, थोवं चिट्ठइ लंबमाणए ।

एवं मणुयाण जीवियं, समयं गोयम ! मा पमायए ॥२॥

हे गौतम ! समयमात्रमपि मा प्रमादीः । तत्र हेतुमाह । यथा-कुशस्याग्रे अवश्यायबिन्दुर्लम्बमानः सन् स्तोकं स्तोककालं तिष्ठति वातादिना प्रेर्यमाणः सन् पतति तथा मनुष्याणां जीवितमायुरस्थिरं ज्ञेयम् । एवं आयुषोऽनित्यत्वं ज्ञात्वा धर्मे प्रमादो न विधेय इत्यर्थः । उत्त० १ अ० । "आयुषि बहूपसर्गे, [illegible]

[illegible]

भवस्थितिहेतवः कर्मपुद्गलाः । इहेति संसारे मनुष्यभवे एकेषां केषांचिदेव मानवानां मनुजानामिति पदार्थो, वाक्यार्थस्त्वस्मिन् संसारे केषांचिन्मनुजानां क्षुल्लकभवोपलक्षितान्तर्मुहूर्त्तमात्रमल्पं स्तोकमायुर्भवति । च शब्दादुत्कर्षतस्त्रयादिपूर्वत्रयपल्योपमत्रयावसानेऽप्यायुषि तत्र क्षुद्रास्वस्याधारणाधिक्यात्संयमजीवितमल्पमेवेति । तथा ह्यन्तर्मुहूर्त्तादारभ्य देशोनपूर्वकोटिं यावत्संयमायुष्कं तच्चाल्पमेवेति । अथवा त्रिपल्योपमस्थितिकमप्यायुरल्पमेव यतस्तदप्यन्तर्मुहूर्त्तमपहाय सर्वमपवर्त्तते । उक्तञ्च ॥

अच्चा जोगुक्कोसे, बंधित्ता भोगभूमिए सुलद्धुं ।

सव्वप्पजीवियं व-ज्जइ तु उवट्टिया दोण्हं ॥

अस्यायमर्थः । उत्कृष्टे योगे बन्धाध्यवसायस्थाने आयुषो यो बन्धकालोऽद्धा उत्कृष्ट एव तं बध्वा क्व भोगभूमिकेषु देवकुर्वादिषु तस्य त्रिपल्यमेव स चाल्पमायुर्वर्जयित्वा द्वयोस्तिर्यग्मनुष्ययोरपवृत्तिकामपवर्त्तनं जघन्येनत्वापर्याप्तिकालमुहूर्त्तान्तर्वर्त्यं तत ऊर्ध्वमनपवर्त्तनमेवेति । उक्तञ्च " अतोऽन्यत हतस्ततोऽभिमुखधावमानापदा-महो निपुणता नृणां क्षणमपीह यज्जीवितम् । मुखे कवलमतिक्षुधा सरसमल्पमायोजितं, कियच्चिरमचर्वितं दशनसंकटास्ये स्थितम्" उच्छ्वासावधयः प्राणाः, स चोच्छ्वासः समीरणात् । समीरणं च चलनात्, क्षणमप्यायुरद्भुतमित्यादि येऽपि दीर्घायुष्कस्थितिका उपक्रमणकारणाभावे आयुःस्थितिमनुभवन्ति तेऽपि मरणादप्यधिकां जराभिभूततयेमहां जघन्यतरामवस्थामनुभवन्तीति । आचा० २ अ० १ उ० ॥

वर्षशतायुष्कस्याप्यायुषोऽल्पत्वमेव तद्यथा ।

आउसो से जहा नामए केइ पुरिसे एहाए कयबलिकम्मे कयकोउयमंगलपायच्छित्ते सिरसि एहाए कंठे मालकडे आविद्धमणिसुवन्ने अहय सुमहग्घवत्थपरिहिए चंदणोक्खिगायसरीरे सरससुरहिगंधगोसीसचंदणाणुलित्तगत्ते सुइमालावन्नगविलेवणे कप्पियहारद्धहारतिसरयपालंबपलंबमाणकडिसुत्तयसुकयसोहे पिणद्धगेविज्जअंगुलिज्जगललियंगयललियकयाभरणे नाणामणिकणगरयणकडगतुडियथंभियभुए अहियरूवसस्सिरीए कुंडलुज्जोवियाणणे मउडदित्तसिरए हारोत्थयसुकयरइयवच्छे पालंबपलंबमाणसुकयपडउत्तरिज्जे मुद्दियापिंगलंगुलिए नाणामणिकणगरयणविमलमहरिहनिउणो वि य मिसमिसिंतविरइयसुसिलिट्ठविसिट्ठलट्ठआविद्धवीरवलए किं बहुणा कप्परुक्खओ विव अलंकियविभूसिए सुइपयए भवित्ता अम्मापियरो अभिवादइज्जा । तए णं तं पुरिसं अम्मापियरो एवं वइज्जा जीवपुत्ता ! वाससयंति तं सियाइं तस्स नो बहुयं भवइ । कम्हा वाससयं जीवंतो वीसं जुगाइं जीवइ १ वीसं जुगाइं जीवंतो दो अयणसयाइं जीवइ २ दो अयणसयाइं जीवंतो छ उउसयाइं जीवइ ३ छ उउसयाइं जीवंतो बारसमाससयाइं जीवइ ४ बारसमाससयाइं जीवंतो चउवीसं पक्खसयाइं जीवइ ५ चउवीसं पक्खसयाइं जीवंतो छत्तीसं राइंदिअसहस्साइं जीवति छत्तीसं राइंदियसहस्साइं जीवंतो दस असीयाइं मुहुत्तसयसहस्साइं जीवइ ६ दस असीयाइं मुहुत्तसयसहस्साइं जीवंतो चत्तारि उस्सासकोडिसयसहस्साइं सत्तकोडिओ अडयालीसं च सयसहस्साइं चत्तालीसं च सहस्साइं जीवइ ७ ॥

तस्य वर्षशतायुः पुरुषस्य यदि वर्षायुर्वर्षशतमल्पाल्पं भवति ततः तस्य पुरुषस्य न बहुक वर्षशताधिकं भवति । [illegible]

जीवानामिह भविकायुः परभविकायुर्यथा

नेरइयाणं भंते ! कइभागावसेसाउया परभवियाउयं पकरेंति ? गोयमा ! नियमा छम्मासावसेसाउया परभवियाउयं पकरेंति । एवं असुरकुमारा वि जाव थणियकुमारा वि । पुढवीकाइयाणं भंते ! कइभागावसेसाउया परभवियाउयं पकरेंति ? गोयमा ! पुढवीकाइया दुविहा पन्नत्ता तंजहा- सोवक्कमाउया य निरुवक्कमाउया य । तत्थ णं जे ते निरुवक्कमाउया ते नियमा तिभागावसेसाउया परभवियाउयं पकरेंति । तत्थ णं जे ते सोवक्कमाउया ते सिय तिभागावसेसाउया परभवियाउयं पकरेंति सिय तिभागतिभागावसेसाउया परभवियाउयं पकरेंति सिय तिभागतिभागतिभागावसेसाउया परभवियाउयं पकरेंति । आउतेउवाउवणस्सइकाइयाणं बेइंदियतेइंदियचउरिंदियाण वि एवं चेव । पंचिंदियतिरिक्खजोणियाणं भंते ! कइभागावसेसाउया परभवियाउयं पकरेंति ? गोयमा ! पंचिंदियतिरिक्खजोणिया दुविहा पन्नत्ता तंजहा- संखेज्जवासाउया य, असंखेज्जवासाउया य तत्थ णं जे ते असंखेज्जवासाउया ते नियमा छम्मासावसेसाउया परभवियाउयं पकरेंति । तत्थ णं जे ते संखेज्जवासाउया ते दुविहा पन्नत्ता सोवक्कमाउया य निरुवक्कमाउया य । तत्थ णं जे ते निरुवक्कमाउया ते नियमा तिभागावसेसाउया परभवियाउयं पकरेंति । तत्थ णं जे ते सोवक्कमाउया ते णं सिय तिभागावसेसा परभवियाउयं पकरेंति सिय तिभागतिभागे परभवियाउयं पकरेंति सिय तिभागतिभागतिभागावसेसाउया परभवियाउयं पकरेंति । एवं मणुस्सा वि वाणमंतरजोइसियवेमाणिया जहा नेरइया ॥

[illegible] पूर्वभवायुषि [illegible] परभविकायुर्बध्नन्तीति [illegible] । [illegible] भंते ! कइभागावसेसाउया परभविया- [illegible] । [illegible] । प्रज्ञा० ६ पद० । आ० ॥

[illegible]

नेरइया छम्मासावसेसाउया परभवियाउयं पकरेंति । एवं असुरकुमारा [illegible] । असंखेज्जवासाउया [illegible] छम्मासावसेसमा- [illेgible] पकरेंति । [illegible] पकरेंति । [illegible] जहा नेरइया ।

[illegible]

युष्काः संज्ञिन एव भवन्तीति नियमदर्शनार्थं न त्वसंज्ञ्यायामसंज्ञिनां व्यवच्छेदार्थं तेषामसंभवादिति । इह च "निरइसुरअसंखाऊ, तिरिमणुया सेसए उ छम्मासे । इग निरुवक्कम-तिरिमणुया आउयतिभागे ॥ १ ॥ अवसेस सोवक्कम, तिभागनवभागसत्तवीसइमे । बंधंति परभवाऊं, नियं भवं सव्वजीवाओत्ति " ॥ २ ॥ इदमेवान्यैरित्थमुक्तमिह मनुष्या आत्मीयायुषस्तृतीयत्रिभागे परभवायुषो बध्नन्ति, देवनारकाः पुनः षण्मासे शेषे । तत्र तिर्यग्मनुष्याः तृतीयत्रिभागे आयुर्न बद्धं ततः पुनस्तृतीयत्रिभागस्य तृतीये भागे शेषे बध्नन्ति । एवं तावत्संक्षिपन्त्यायुर्यावत्सर्वजघन्यबन्धकाल उत्तरकालश्च शेषस्तिष्ठति । इह तिर्यग्मनुष्या अन्त्यं वा सङ्क्षेपकाल उच्यते । तथा देवनैरयिकैरपि यदि षण्मासे शेषे आयुर्न बद्धं तत आत्मीयस्यायुषः षण्मासादेर्यावत्संक्षिपन्ति यावत्सर्वजघन्य आयुर्बन्धकाल उत्तरकालश्च योऽवतिष्ठते इह परभवायुर्देवनैरयिका बध्नन्तीत्ययमसंक्षेपः । स्था० ६ ठा० ॥

(परभविकायुर्बन्धप्रकारो भगवत्याः पञ्चविंशतितमे शतके षष्ठोद्देशके निरूपितः स च उववाय शब्दे निरूपयिष्यते)

(१०) प्रत्याख्यानाप्रत्याख्यानतदुभयनिर्वर्तितायुष्कत्वं नाम यथा ।

जीवाणं भंते ! किं पच्चक्खाणनिव्वत्तियाउया अपच्चक्खाणनिव्वत्तियाउया पच्चक्खाणापच्चक्खाणनिव्वत्तियाउया ? गोयमा ! जीवा य वेमाणिया य पच्चक्खाणनिव्वत्तियाउया तिन्नि वि अवसेसा अपच्चक्खाणनिव्वत्तियाउया । गाहा- " पच्चक्खाणं जाणइ, कुव्वंति आउनिव्वत्ती । सपएसुद्देसम्मि य, एमेए दंडगा चउरो " ।

जीवपदे जीवाः प्रत्याख्यानादित्रयनिबद्धायुष्का वाच्या, निकपदे च वैमानिका वाच्याः प्रत्याख्यानादित्रयवन्तो तेषूत्पद्यमानाः (सन्ति) नारकादयोऽप्रत्याख्याननिर्वृत्तायुषो यतः शेषेषु तेष्वविरता एवोत्पद्यन्त इति उक्तार्थसंग्रहगाथा " पच्चक्खाण " मित्यादि " प्रत्याख्यानमिति एतदर्थ एको दण्डक एवमन्ये [illegible] भ० ६ श० ४ उ० ॥

(११) जीवानामाभोगानाभोगनिर्वर्तितायुष्कत्वं यथा जीवाणं भंते ! किं आभोगनिव्वत्तियाउया अणाभोगनिव्वत्तियाउया ? गोयमा ! नो आभोगनिव्वत्तियाउया अणाभोगनिव्वत्तियाउया एवं नेरइया वि, एवं वेमाणिया । भ० ७ श० ६ उ० ॥

तदायुर्बन्धं स्थानाङ्गे दर्शितं यथा ।

चउहिं ठाणेहिं जीवा णेरइयत्ताए कम्मं पकरेंति । [illegible]

[illegible] ॥

(१२) [illegible]

[illegible]

सरोववरणगा वि परंपरोववरणगा वि अणंतरपरंपरअणु-ववरणगावि । से केणट्ठेणं भंते! एवं वुच्चइ जाव अणंतर-परंपरअणुववरणगावि । गोयमा ! जेणं णेरइया पढमसमओववरणगा तेणं णेरइया अणंतरोववरणगा जेणं णेरइया अपढमसमओववरणगा तेणं णेरइया परंपरोववरणगा जेणं णेरइया विग्गहगइसमावरणगा तेणं णेरइया अणंतरपरंपरअणुववरणगा । से तेणट्ठेणं जाव अणुववरणगा वि, एवं णिरंतरं जाव वेमाणिया । अणंतरोववरणगाणं भंते ! णेरइयाउयं पकरेंति, तिरिक्खमणुस्सदेवाउयं पकरेंति ? गोयमा ! णो णेरइयाउयं पकरेंति जाव णो देवाउयं पकरेंति परंपरोववरणगाणं भंते ! णेरइया किं णेरइयाउयं पकरेंति जाव देवाउयं पकरेंति ? गोयमा ! णो णेरइयाउयं पकरेंति । तिरिक्खजोणियाउयं पकरेंति, मणुस्साउयं पकरेंति णो देवाउयं पकरेंति । अणंतरपरंपरअणुववरणगाणं भंते ! णेरइया किं णेरइयाउयं पुच्छा गोयमा ! णो णेरइयाउयं पकरेंति जाव णो देवाउयं पकरेंति, एवं जाव वेमाणियाणं । णवरं पंचिंदियतिरिक्खजोणियमणुस्साण य परंपरोववरणगा चत्तारि वि आउयं बंधंति सेसं तं चेव ॥

(नेरइयाणमित्यादि) (अणंतरोववरणगत्ति) न विद्यतेऽन्तरं समयादिव्यवधानमुपपत्तेऽनुपपातं येषां ते अनन्तरोपपन्नकाः (परंपरोववरणगत्ति) परम्परा द्वित्र्यादिसमयता उपपत्ते उपपाते येषां ते परंपरोपपन्नकाः । (अणंतरपरंपरअणुववरणगत्ति) अनन्तरमव्यवधानं परंपरं च द्वित्र्यादिसमयरूपमविद्यमानमनुपपन्नमुत्पादो येषां ते तथा । एते च विग्रहगतिकाः विग्रहगतौ द्विविधस्याप्युत्पादस्याविद्यमानत्वादिति । अथानन्तरोपपन्नादीनाश्रित्यायुर्बन्धमभिधातुमाह (अणंतरेत्यादि) इह चानन्तरोपपन्नानामनन्तरपरम्परानुपपन्नानां च चतुर्विधस्याप्यायुषः प्रतिषेधोऽभ्येतव्यः । तस्यामवस्थायां तथाविधाध्यवसायस्थानाभावेन सर्वजीवानामायुषो बन्धानाभावात् स्वायुषस्त्रिभागादौ च शेषे बन्धसद्भावात्परम्परोपपन्नकास्तु स्वायुषः षण्मासे शेषे मतान्तरेणोत्कर्षतः षण्मासे जघन्यतश्चान्तर्मुहूर्ते शेषे भवप्रत्ययात्तिर्यङ्मनुष्यायुषी एव कुर्वन्ति नेतरे इति (एवं जाव वेमाणियात्ति) अनेनानन्तरोपपन्नकत्रययुक्तश्चतुर्विंशतिदण्डकोऽध्येतव्य इति सूचितम् । यच्चात्र विशेषस्तं दर्शयितुमाह नवरं पंचिंदियेत्यादि ॥

अथानन्तरनिर्गतत्वादिना अपरं दण्डकमाह ॥

णेरइयाणं भंते ! किं अणंतरणिग्गया परंपरणिग्गया अणंतरपरंपरअणिग्गया गोयमा ! णेरइया अणंतरणिग्गया वि जाव अणंतरपरंपरअणिग्गया वि । से केणट्ठेणं भंते ! जाव अणिग्गयावि ? गोयमा ! जे णं णेरइया पढमसमयणिग्गया ते णं णेरइया अणंतरणिग्गया । जे णं णेरइया अपढमसमयणिग्गया ते णं णेरइया परंपरणिग्गया । जे णं णेरइया विग्गहगइसमावरणगा ते णं णेरइया अणंतरपरंपरअणिग्गया । से तेणट्ठेणं गोयमा ! जाव अणिग्गया वि एवं जाव वेमाणिया ॥

तत्र निश्चितं स्थानान्तरप्राप्त्या गतं गमनं निर्गतमनन्तरं समयादिना निर्व्यवधाने निर्गतं येषां तेऽनन्तरनिर्गतास्ते च येषां नरकादुद्वृत्तानां स्थानान्तरप्राप्तानां प्रथमसमयो वर्त्तते । तथा परम्परेण समयपरम्परया निर्गतं येषां ते तथा ते च येषां नरकादुद्वृत्तानामुत्पत्तिस्थानप्राप्तानां द्व्यादयः समयाः । अनन्तरपरम्परानिर्गतास्तु ये नरकादुद्वृत्ताः सन्तो विग्रहगतौ वर्त्तन्ते, न तावदुत्पादक्षेत्रमासादयन्ति तेषामनन्तरभावेन परम्परभावेन चोत्पादक्षेत्राप्राप्त्येन निश्चयेनानिर्गतत्वादिति ।

अथानन्तरनिर्गतादीनाश्रित्यायुर्बन्धमभिधातुमाह ।

अणंतरणिग्गयाणं भंते ! णेरइया किं णेरइयाउयं पकरेंति जाव देवाउयं पकरेंति ? गोयमा ! णो णेरइयाउयं पकरेंति जाव देवाउयं पकरेंति? गोयमा ! णो णेरइयाउयं पकरेंति जाव णो देवाउयं पकरेंति । परंपरणिग्गयाणं भंते ! णेरइया किं णेरइयाउयं पि पकरेंति जाव देवाउयं पि पकरेंति । अणंतरपरंपरअणिग्गयाणं भंते ! णेरइयपुच्छा, गोयमा ! णो णेरइयाउयं पकरेंति जाव णो देवाउयं पकरेंति । निरवसेसं जाव वेमाणिया ॥

इह च परम्परानिर्गता नारकाः सर्वाण्यायूंषि बध्नन्ति । यतस्ते मनुष्याः पञ्चेन्द्रियतिर्यञ्च एव च भवन्ति । ते च सर्वायुर्बन्धका एवेति । एवं सर्वेऽपि परम्परनिर्गता वैक्रियजन्मान औदारिकजन्मानोऽप्युद्वृत्ताः । केचिन्मनुष्याःपञ्चेन्द्रियतिर्यञ्चो भवन्त्यतस्तेऽपि सर्वायुर्बन्धका एवेति ॥

अनन्तरखेदोपपन्नकपरम्परखेदोपपन्नकानन्तरपरम्परखेदोपपन्नकानां नैरयिकादीनामायुर्यथा ।

णेरइयाणं भंते ! किं अणंतरखेदोववरणगा परंपरखेदोववरणगा अणंतरपरम्परखेदाणुववरणगा ? गोयमा ! णेरइया एवं एएणं अभिलावेणं ते चेव चत्तारि दंडगा भाणियव्वा ॥

(ते चेवत्ति) त एव पूर्वोक्ता उत्पन्नदण्डकादयः खेदशब्दविशेषितास्चत्वारो दण्डका भणितव्यास्तत्र च प्रथमः खेदोपपन्नदण्डको द्वितीयस्तदायुष्कदण्डकस्तृतीयः खेदनिर्गतदण्डकश्चतुर्थस्तु तदायुष्कदण्डक इति ॥ भ० १४ श० १ उ० ॥

(१३) असञ्ज्ञिजीवानामायुर्यथा

कइविहे णं भंते ! असण्णियाउए पण्णत्ते गोयमा ! चउव्विहे असण्णियाउए पण्णत्ते तंजहा णेरइयअसण्णियाउए तिरिक्खजोणियअसण्णियाउए मणुस्सअसण्णियाउए देवअसण्णिआउए । असण्णी णं भंते ! जीवे किं णेरइयाउयं पकरेइ तिरिक्खजोणियाउयं पकरेइ मणुस्सदेवाउयं पकरेइ ? गोयमा ! णेरइयाउयं पकरेइ तिरिक्खमणुस्सदेवाउयं पकरेइ । णेरइयाउयं पकरेमाणे जहण्णेणं दसवाससहस्साइं उक्कोसेणं पलिओवमस्स असंखेज्जइभागं पकरेइ, तिरिक्खजोणियाउयं पकरेमाणे जहण्णेणं अंतोमुहुत्तं उक्कोसेणं पलिओवमस्स असंखेज्जइभागं पकरेइ, मणुस्साउए वि एवं चेव । देवाउए जहा णेरइयाउए । एयस्स णं भंते ! णेरइयअसण्णिआउयस्स तिरिक्खजोणियअसण्णिआउयस्स-

[illegible] पकरेइ, णो मणुस्साउयं पकरेइ, णो देवाउयं पकरेइ। [illegible] जहा पुढवीकाइया [illegible] आउयं पकरेंति । [illegible]

[illegible]

(१८) अनन्तरोपपन्नकादिक्रियावाद्यादीनामायुर्बन्धः ।

किरियावादी णं भंते ! अणंतरोववण्णगा णेरइया णेरइयाउयं पकरेंति पुच्छा, गोयमा ! णो णेरइयाउयं णो तिरि० णो मणु० णो देवाउयं पकरेंति । एवं अकिरियावादी वि, अण्णाणियवादी वि, वेणइयवादी वि । सलेस्सा णं भंते ! किरियावादी अणंतरोववण्णगा णेरइया किं णेरइयाउयं पुच्छा, गोयमा ! णो णेरइयाउयं जाव णो देवाउयं पकरेंति । एवं जाव वेमाणिया । एवं सव्वट्ठाणेसु अणंतरोववण्णगा णेरइया ण किंचि वि आउयं पकरेंति, जाव अणागारोवउत्ते त्ति । एवं जाव वेमाणिया णवरं जं जस्स अत्थि तं तस्स भाणियव्वं । भ० ३० श० २ उ० ॥

(१९) भविकजीवानां नैरयिकादिषूत्पद्यमानानां आयुष्कर्म० [illegible]

जीवे णं भंते ! जे भविए णेरइएसु उववज्जित्तए से णं भंते ! किं साउए संकमइ निराउए संकमइ ? गोयमा ! साउए संकमइ नो निराउए संकमइ । से णं भंते ! आउए कहिं कडे कहिं समाइण्णे ? गोयमा ! पुरिमे भवे कडे पुरिमे भवे समाइण्णे, एवं जाव वेमाणियाणं दंडओ । से नूणं भंते ! जे जं भविए जोणिं उववज्जित्तए से तमाउयं पकरेइ, तंजहा–णेरइयाउयं वा जाव देवाउयं वा ? हंता गोयमा ! जे जं भविए जोणिं उववज्जित्तए से तमाउयं पकरेइ । तंजहा–णेरइयाउयं वा तिरियमणुयदेवाउयं वा । णेरइयाउयं पकरेमाणे सत्तविहं पकरेइ, तंजहा–रयणप्पभापुढवीणेरइयाउयं वा जाव अहेसत्तमापुढवीणेरइयाउयं वा । तिरिक्खजोणियाउयं पकरेमाणे पंचविहं पकरेइ । तंजहा–एगिंदियतिरिक्खजोणियाउयं वा भेदो सव्वो भाणियव्वो । मणुस्साउयं दुविहं पकरेइ देवाउयं चउव्विहं पकरेइ ॥

[illegible]

(२०) [illegible]

[illegible]

नेरइयाउयं पडिसंवेदेइ, उववज्जमाणे नेरइयाउयं पडिसंवेदेइ, उववन्ने वि नेरइयाउयं पडिसंवेदेइ, एवं जाव वेमाणिएसु । भ० ७ श० ६ उ० ॥

(२१) अनन्तरमुद्वर्त्योत्पद्यमानानां नैरयिकादीनामायुष्यनिष्ठवेदनादि यथा ।

णेरइयाणं भंते ! अणंतरं उव्वट्टित्ता जे भविए पंचिंदियतिरिक्खजोणिएसु उववज्जित्तए से णं भंते ! कयरं आउयं पडिसंवेदेइ ? गोयमा ! णेरइयाउयं पडिसंवेदेइ । पंचिंदियतिरिक्खजोणियाउए से पुरओ कडे चिट्ठइ । एवं मणुस्से वि । णवरं मणुस्साउए से पुरओ कडे चिट्ठइ । असुरकुमारा णं भंते ! अणंतरं उव्वट्टित्ता जे भविए पुढवीकाइएसु उववज्जित्तए पुच्छा, गोयमा ? असुरकुमाराउयं पडिसंवेदेइ, पुढवीकाइयाउए से पुरओ कडे चिट्ठइ । एवं जो जहिं भविओ उववज्जित्तए तस्स तं पुरओ कडे चिट्ठति, जत्थ ठिओ तं पडिसंवेदेइ जाव वेमाणिया, णवरं पुढवीकाइओ पुढवीकाइएसु उववज्जति, पुढवीकाइयाउयं पडिसंवेदेइ अण्णे य से पुढवीकाइयाउए पुरओ कडे चिट्ठइ, एवं जाव मणुस्सो सट्ठाणे उववाएयव्वो परट्ठाणे तहेव ॥

प्राग् नारकादिषूत्पत्स्यमानास्ते आयुष्कं प्रति संवेदनापन्ना इति तेषां तान्निरूपयन्नाह नेरइयाणमित्यादि ॥ भ० ॥ १८ श० ५ उ० ।

(आयुषो गुणस्थानेषु बन्धोदयसत्तास्थानानां परस्परसंवेधेन आयुषो भङ्गाः पञ्चसंग्रहे दर्शितास्ते कम्म शब्दे द्रष्टव्याः) ॥

आउ(ऊ)सिन्–आयुष्मत्–आयुः प्रशस्तं विद्यते यस्य तस्मिन् । "काउसिणा काउसमं त्याने तेषां तत्र द्विजोत्तमः" [illegible] । "किं देवाणं वयणं गाउं भाव जिणवराणं" सूत्र० नि० । आयुष्मान् आर्यस्यार्हाद्भिरिदिति चूर्णिः ॥ सूत्र० १ अ० ।

आउंचण–आकुञ्चन–न० संकोचनामके क्रियाभेदे, अष्टादशस्थाने, ५० ४ अ० । गात्रसंकोचने, आव० ४ अ० । पंचा० । तत्र आकुञ्चनस्य परिहार्यत्वात् न कर्मोत्कृष्टम् यथा [illegible] क्यादिभिरुपचयसंस्थानादिभिः स्वसंयोगिनिमित्तानि सन्ति सम्मर्दादीनि संयोगे सति येन कर्मणा कुञ्चत्यादिरूपत्वं कुटिलः संस्थाने तदाकुञ्चनम् । सम्म० ॥

आउंचणपट्ट–आकुञ्चनपट्टक–न० पर्यस्तिकापट्टे, तच्च निर्ग्रन्थीनां धारयितुं न कल्पते ।

(सूत्रम्) नो कप्पइ निग्गंथीणं आउंचणपट्टगं धारित्तए वा परिहरित्तए वा कप्पइ निग्गंथाणं आउंचणपट्टगं धारित्तए वा परिहरित्तए वा ।

अस्य व्याख्या [illegible] । अथ भाष्यम् ।

थंभववणाणि पट्ठा, गोरव पडिणिपाउ सवयोवं ।

विद्दपट्टेण अंथं, पोरगसमए विवज्जिया ॥

यथा [illegible] इत्याह [illegible] ।

नो कल्पते निर्ग्रन्थीनामाकुञ्चनपट्टं पर्यस्तिकापट्टं धारयितुं वा परिहर्तुं वा कल्पते निर्ग्रन्थानामाकुञ्चनपट्टं धारयितुं वा परिहर्तुं वेति सूत्रार्थः ।

अथ भाष्यं ।

गव्वो अवाउडत्तं, अणुवधिरतिमण्डुगातिवाओ ।

पलुपलोलियदोसा, गिलाणियाए उ भयणाए ॥

पर्यस्तिकापट्टं परिभुञ्जानामार्यिकां दृष्ट्वा लोकः ब्रूयात् यथा अस्याः कियान् गर्वो यदेवं सविकारा [illegible] अपावृता वा पर्यस्तिकां वा कुर्वाणा भवेत् । ([illegible]) [illegible] ।

[illegible]

अथ दोषाः ।

कारणे पुनरयं विधिः ।

थेरे व गिलाणे वा, सुत्तकारणम्मि उ कारणे ।

वसगए व धेठो पुव्व–वज्जणाति वा ॥

[illegible]

थेरो अचिलो अह कारिओ वा,

यहांगुलो दिसदवी कालेउठे ।

विस्साम्हेउं तु सहिराणम,

दोसा अवस्सजयणा य एवं ॥

[illegible]

बृ० ३ उ० ।

आउंच–(द) ण–आकुञ्चन–न० [illegible] तेषामाकुञ्चन । प्रश्न० । द० ३ अधि० ।

आउंटण–आकुञ्चन–न० [illegible] करणस्वरूप ट । [illegible] । " [illegible] " इति । आव० चू० १ अ० । [illegible] ।

आउट्टणसमाए–आकुट्टनसमाय–[illegible] ।

[illegible]

आउट्टिम उठि० " । आव० चू० १ अ०

[illegible]

[illegible]

मीउएदहखाररवेत्ते, अग्गीओणू य अंबिले नेहे ।
वुक्कंतजोणिएणं, पओयणं तेणिमं होइ ॥ २४ ॥

इयं गाथा प्रागिव व्याख्येया । नवरं पृथिवीकायस्थाने अप्कायस्य वाच्यः । इह या स्वकायपरकायशस्त्ररूपयोजना द्रव्यक्षेत्रकालभावापेक्षया वा अचित्तभवनादिना साऽपि प्रागिव यथा योगमप्कायेऽपि भावनीया । तथा यदा दृधिनोऽदिसत्केषु घटेषु किञ्चित्स्य शुष्कशङ्करपरिदृश्याघययसत्कातरी जायते तदा मा यदि परिस्फुरा तर्हि एकया पौरुष्या तत्परिणमति । मध्यमया चेत्तर्हि द्वाभ्यां पौरुषीभ्यां, स्तोका चेत्तर्हि तिसृभिः पौरुषीभिरिति । इह तावद् व्युत्क्रान्तयोनिकेनाप्कायेनेदं प्रयोजनमित्युक्तमनन्तरमेव दर्शयति ।

परिसेय पाण हत्थाइ-धोवणं चीरधोवणं चेव ।
आयमणभाणधुवणए-माइओ पउयणं बहुहा ॥२५॥

परिषेको ऽप्युपणादेरुपचितस्योपरि सेचनम् । पानं तृरूपनोदाय अस्यात्यवहरणम् । हस्तादिधावनं करचरणप्रभृतिशरीरावयवानां कारणमुद्दिश्य प्रक्षालनम् । चीवरधावनं वस्त्रप्रक्षालनम् । अस्य निर्धापनक्रिनिर्देशो न सदैव साधुनोपधिप्रक्षालनं कर्तव्यमिति प्रदर्शनार्थः । आचमनं पुरीषोत्सर्गानन्तरं शौचकरणम् (भाणधोवणेति) पात्रकादिनाजनप्रक्षालनम् । एवमादिकमादिशब्दात् स्नानकार्यादिपरिग्रहः । अचित्तेनाप्कायेन प्रयोजनं बहुधा बहुप्रकारं द्रष्टव्यम् । पिण्ड० । ओघ० । धर्म० ॥

(४) तन्दुलोदकस्याचित्तत्वं यथा ।

तिन्दोदगस्स गहणं, केइ भाणेसु अमुद्धपडिसेहो ।
गिहिभायणेसु गहणं, ठिअवासे मीसगं छारो ॥१॥

तीदोदक हि धूमधूमीकृतदिनकरकरसंपर्कसोष्मतीव्रसंपर्कादृचित्तमतस्तदूग्रहणे न काचिद्विराधना केचिदाहुः स्वभाजनेषु तदूग्राह्यम् । अथाचार्यः प्राह-मधुचिन्धास्वपात्रेषु ग्रहणप्रतिषेधस्ततो गृहिभाजने कुण्डिकादौ ग्राह्यम् । यदि तत्र मेघेन च तन्मिश्रं ततः स्थिते वर्षेऽन्तर्मुहूर्तादूर्ध्वं ग्राह्यम् । जलं हि केवलं प्रासुकीकृतमपि प्रहरत्रयादूर्ध्वं भूयः सचित्तं स्यादतस्तन्मध्ये क्षारः क्षेप्यः एव स्वच्छतापि स्यादिति । पिण्डनिर्युक्तिवृत्तौ तन्दुलधावनोदकानि प्रथमद्वितीयतृतीयानि अचिरस्थितानि मिश्राणि चिरं तिष्ठन्ति अचित्तानि चतुर्थादिधावनानि तु चिरं स्थितान्यपि सचित्तानि प्रासुकअक्षादिकादमानमेवमुक्तम् । प्रवचनसारोद्धारादौ " उसिणोदगंतिदंडु-क्कलिअं फासुअजलं जइ कप्पं । नवरि गिलाणाइकए, पहरतिगोवरि वि धरियव्वं " ॥ १ ॥ " जायइ सचित्तया से, गिम्हासु पहरपंचगस्सुवरिं । चउपहरुवरि सिसिरे, वासासु जलं तिपहरुवरि " ॥ २ ॥ ध० २ अ० ॥

तत्र योऽचित्तोऽप्कायस्तेनोपयोगविधिः साधूनां नेतरत्रयां कथं पुनरयं प्रत्यचित्तः किं स्वभावादाहोस्विच्छस्त्रसम्बन्धात् उभयथापीति । तत्र यः स्वभावादेवाचित्तीभवति न वाद्यशस्त्रसम्बन्धात्तमचित्तं जानाना अपि केवलमनःपर्यायावधिश्रुतज्ञानिनो न परिहृज्ञते अनवस्थाप्रसङ्गभीरुतया । यतोऽनुश्रूयते । भगवता किल श्रीवर्धमानस्वामिना विमलमलिलसमुद्रसत्तरङ्गः शैवलपनकत्रसादिरहितो महाहृदो व्यपगतनिःशेषजलजन्तुकोऽचित्तवारिपूर्णः स्वशिष्याणां तृड्बाधितानामपि पानाय नानुज्ञातो अचित्तवनस्पतिनिश्रावाकदरस्थतिलपरिभोगानुज्ञा अनवस्थादोषसंरक्षणाय भगवता न दत्तेति श्रुतज्ञानप्रामाण्यरक्षणार्थञ्च । तथा श्रुतज्ञानी सामान्यश्रुतज्ञानी बाह्येन्धनसम्पर्कादुष्णत्वस्वरूपमेवाचित्तमप्कायं व्यवहरति, अतो न पुनर्निरिन्धनमेवेति । अतो यद्बाह्यशस्त्र-

सम्पर्कोत्परिणामान्तरापन्न वर्णादिभिस्तदचित्तं सा…
गाय कल्पते । आचा० ।

(५) किम्पुनस्तच्छस्त्रमित्यत आह ।

उस्सिचणगालणधो-वणे य उवकरणकोसभंडे य ।
बायर आउक्काए, एवं तु समासओ सत्थं ॥ १३ ॥
किंची सकायसत्थं, किंची परकायसत्थं किंची ।
एयं तु दव्वसत्थं, भावे य असंजमो सत्थं ॥ १४ ॥

(उस्सिचणेत्यादि) शस्त्र द्रव्यभावभेदात् द्विधा । द्रव्यमपि समासविभागभेदात् द्विधैव । तत्र समासतो द्रव्यमिदमूर्ध्वसेचनम् उत्सेचनं कूपादेः कोशादिनोत्क्षेपणमित्यगालनं घनमसृणवस्त्रपर्यन्तेन । धावनं वस्त्राद्युपकरणचमकोश घटादिभाण्डकविषयम् । एवमादिकं बादराप्काये । एतत्पूर्वोक्तं समासतः सामान्येन शस्त्रम् । तु शब्दो विनाशापेक्षया विशेषणार्थः । विभागतस्त्विदम् (किंचीत्यादि) … शस्त्रं नादेयं … किंचिद्वोनयं …

सत्थं … अणुवीइपासा पुढो सत्थं पवेइयं ।

शास्यन्ते हिंस्यन्ते प्राणिन इति शस्त्रं तच्चोत्सेचनगालनोपकरणधावनादिस्वकायादि च यथांचापत्तयो या पूर्वोक्तस्याचित्तकरणशस्त्रम् । तथा शाभिपुद्गलानुगतत्वाद्दीपनिकृत्र अत्रं जघन्युग्गन्धतोऽपि धूमगन्धि रसतो विरसं, स्पर्शेन उष्णम् । तच्चोदकतत्रिदण्डमेवविधावस्थं यदि ततः कल्पते नान्यथा । तथा करगोकरीवस्तभ्रावादीन्धनसम्बन्धात् स्तोके स्तोकं प्रक्षिप्तनीत्यादिचतुर्भङ्गिकानावना कार्या । एवमेतत्त्रिविधं शस्त्रशब्दोऽवधारणार्थः । अन्यतमशस्त्रसम्पर्कविषयस्तमेव ग्राह्यं नान्यथेति । (पत्थंति) एतस्मिन्नप्काये प्रस्तुते अनुविचिन्त्य विचार्य इदमस्य शस्त्रमित्येवं ग्राह्यम् । पश्येत्यनेन शिष्यस्य चोदनेति तदेव नानाविधं शस्त्रमप्कायस्यास्तीति प्रतिपादितमतदेव दर्शयति । (पुढोसत्थं पवेदितं) पृथग्विभिन्नमुत्सेचनादिकं शस्त्र प्रवेदितमाख्यातं भगवता । पाठान्तरं वा (पुढोपासं पवेदितं) एव पृथग्विभिन्नं लक्षणेन शस्त्रेण परिणामितमुदकग्रहणं मया समर्थितमाख्यातं भगवता पाशो बन्धनं शस्त्रपरिणामितोदकग्रहणमबन्धनमाख्यातमिति यावदेव तावत्साधूनां सचित्तमिश्राप्कायपरित्यागेनाचित्तपयसा परिभोगः प्रतिपादित ॥ आचा० । श्रु० १ अ० १ उ० ।

(६) सचित्ताप्कायपरिभोगविचारो यथा—

इच्छिज्जइ जत्थ सया, बीय पएणावि फासुय उदयं ।
आगमविहिणा निउणं, गोयम ! गच्छं तयं भणियं ॥८०॥

इष्यते वाञ्छयते यत्र गणे सदा नित्यम् उत्सर्गपदापेक्षया द्वितीयपदमपवादपदं तेनापि किं पुनरुत्सर्गपदेनेत्यपि शब्दार्थः । इत्यता असवः प्राणा यस्मात्तत्प्रासुकं किमुदकं जलं यद्यदं उत्तानश्रयात्करकनादिप्रकारेण प्रासुकीस्यात् न तु मत्रमात्रम् । यत उक्तं दशवैकालिके ॥

" गिहिणो वेयावडियं, जायभाजीवयत्तिया ।
तत्ता निव्वुडभोइत्त, आउरस्सरणाणि य ॥ १ ॥

मत्र इत्शब्देन कर्मधारयः । तथा उत्पीडिता प्रत्यञ्चाऽऽरोपणेन शरासनपट्टिका धनुर्यष्टिर्यैस्ते तथा अथ वा उत्पीडिता बाहौ यद्धा शरासनपट्टिका धनुर्यष्टिर्यैस्ते तथा । पिनद्धं परिहितं ग्रैवेयकं ग्रीवाभरणं यैस्ते तथा तथा बद्धो- ऽऽविद्धतानेन आविद्धश्च शिरस्यारोपणेन विमलो वरश्च चिन्हपट्टो योधतासूचको नेत्रादिवस्त्ररूपः सौ- वर्णो वा पट्टो यैस्ते तथा । तथा गृहीतान्यायुधानि प्रहरणाय यैस्ते तथा, अथ वा गृहीतान्यायुधानि क्षेप्यास्त्राणि प्रह- रणानि च यैस्ते तथा । तथा त्रिनतानि मध्यपार्श्वद्वयल- क्षणस्थानत्रये ऽवनतानि त्रिसन्धितानि त्रिषु स्थानेषु कृ- तसन्धिकानि नैकाङ्गिकानीत्यर्थः । वज्रमयकोटीनि धनूंष्य- भिगृह्य वदतः पदे मुष्टिस्थाने तिष्ठन्तीति सम्बन्धः । प- रिमात्रिकः सर्वतो मात्रावात् कायदण्डापो येषां ते तथा । नीलपाणय इत्यादिषु नीलादिवर्णपुद्गलत्वाच्चीलादयो वर्णभेदाः भरम्भाम्यन्ते । चारुचापपाणय इत्यत्र च चापं धनुरेवाना- रोपितज्यमतो न पुनरुक्तता, चर्मपाणय इत्यत्र चर्मशब्दे- न स्फुरकः उच्यते, दण्डादयः प्रतीता उक्तमेवार्थं संग्र- हणेनाह (नीलपीयत्यादि) अथ वा नीलादीन् सर्वानेव यु- गपत्केचिद्धारयन्ति देवत्वाकेरिति दर्शयन्नाह (नीलपीयत्यादि) ते चात्मरक्षा न संज्ञामात्रेणेत्याह—आत्मरक्षाःस्वाम्यात्मरक्षा इत्यर्थेन एव विरोध्यन्ते रक्षोपगता रक्षामुपगताः सतते प्रयु- क्तरक्षा इत्यर्थः । एतदेव कथमित्याह—गुप्ताः अभेदवृत्त- यस्तथा गुप्तपालिकास्तदन्यतो व्यावृत्तमनोवृत्तिकमण्ड- लीका, युक्ताः परस्परसम्बद्धाः, युक्तपालीकाः निरन्तरमण्ड- लीकाः, प्रत्येकमेवैकत्वः समयतः पदातिसमाचारेण विन- यतो विनयेन किङ्करभूता इव भृत्यत्वं प्राप्ता इवेति,अर्थं च पुस्त- कान्तरं साक्षाद् दृश्यत एवेति ॥ (एवं सव्वेसिमिंदाणं ति) एवमिति, चरमचत्सर्वेषामिन्द्राणामात्मरक्षा वाच्यास्ते चा- र्थत एव सर्वेषामिन्द्राणां सामानिकचतुर्गुणा आत्मरक्षास्तत्र चतुःषष्टिसहस्राणि चमरस्येन्द्रसामानिकानां बलेस्तु षष्टिः, शेषभवनपतीन्द्राणां प्रत्येकं षट् षट् सहस्राणि,शक्रस्य च- तुरशीति , सनत्कुमारस्य द्विसप्तति,ः माहेन्द्रस्य सप्ततिः, ब्रह्मणः षष्टिः, लान्तकस्य पञ्चाशत्, शुक्रस्य चत्वारिंशत्, सहस्रारस्य त्रिंशत्, प्राणतस्य विंशतिः, अच्युतस्य दशस- हस्राणि समानिकानामिति यदाह—

"चउसट्ठी सट्ठी खलु छच्च सहस्सा उ असुरवज्जाणं ।
समाणिया उ एए चउग्गुणा आयरक्खाउ" ॥ १ ॥
"चउरासीइ असीइं बावत्तरि सत्तरी य सट्ठी य
पएणा चत्तालीसा तीसा वीसा दससहस्साणि" ॥ २॥

भ० ॥ टी०॥ ३ श० ६ उ० ॥

आत (य) रक्खा—आत्मरक्षा—स्त्री० आत्मन एव रक्षा य- स्याः इन्द्रवारुणीवृक्षे, ६ त० आत्मनो रक्षा शास्त्रोक्ते चि- न्तकर्त्तृव्य आत्मनो रक्षणे च ॥ वाच० ॥

आत (य) रक्खि (न्) आत्मरक्षिन्—त्रि० आत्मानं रक्ष- त्यपायेभ्यः कुगतिगमनादिभ्य इत्येवंशील आत्मरक्षी । कु- गतिगमनादिभ्य आत्मनो रक्षणशीले, ॥ उत्त० अप्पाणर- क्खी चरमप्पमत्तो, ॥ उत्त० ६ ॥

आत (य) रक्खिय—आत्मरक्षित—त्रि० आत्माऽपायेभ्यो दुर्ग- तिगमनादिभ्यो रक्षितो येन स तथा । दुर्गतिगमनहेतुनिबन्धन सावद्यानुष्ठानाभिवृत्ते, ॥ सूत्र० ॥ आयपरक्कमे आयर- क्खिए ॥ सूत्र० ॥ दुर्गतिगमनहेतुनिबन्धनस्य सावद्या- नुष्ठानस्य निवृत्तत्वादिति ॥ सूत्र० ॥ "अरइं पिट्ठओ किच्चा विरए आयरक्खिए" । उत्त० ॥ आत्मरक्षितो दुर्गतिहेतोरप- ध्यानादेरनेनेत्यात्मरक्षितः । आहिताग्न्यादिषु दर्शनात् क्तान्तस्य परनिपातः ॥ उत्त० ॥

आत (य) वं—आत्मवत्—त्रि० आत्मा ज्ञानादिकोऽस्या- स्तीत्यात्मवान् । ज्ञानादिमति, ॥ आचा० ॥
आत्मा चित्तं वश्यतयाऽस्त्यस्य मतुप् मस्य वः स्त्रियां ङीप् । १ वश्यचित्ते, २ निर्विकारचित्ते च आत्मा प्रकाश्यतया विद्यतेऽस्य आत्मप्रकाशके, शास्त्रे आत्मना तुल्यक्रियावति, ४ आत्मतुल्यक्रियायाम्, अव्य० ॥ वाच० ॥

आत (य) वस—आत्मवश—त्रि० आत्मनो वश आयत्तता यत्र । आत्माधीने, "यद्यदात्मवशं तु स्यात्तत्तत्सेवेत यत्न- तः । सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ॥ मनु० वाच०॥
सव्वत्थेसु विमुत्ता साहू सव्वत्थ होइ अप्पवसो
सर्वार्थेषु विमुक्तः सर्वपदार्थेषु ममतारहितः साधुर्मोक्षसा- धकः सर्वत्रात्मवशो भवति न कुत्रापि परवश इति ॥ग० ॥

आत (य) वस्स—आत्मवश्य—त्रि० आत्मनो वश्यो, य- स्य । वशीभूतमनस्के, आत्मनो वश्ये च ॥ वाच० ॥

आत (य) वायपत्त—आत्मवादप्राप्त—त्रि० आत्मन उपयो- गलक्षणस्य जीवस्यासंख्येयप्रदेशात्मकस्य संकोचविका- शभाजः स्वकृतफलभुजः प्रत्येकसाधारणतया व्यवस्थित- स्य द्रव्यपर्यायतया नित्यानित्याद्यनन्तधर्मात्मकस्य वा वाद आत्मवादस्तं प्राप्त आत्मवादप्राप्तः । सम्यग् यथा- वस्थितात्मस्वतत्त्ववेदिनि, सूत्र० ॥ "आयवायपत्ते विऊ" ॥ सूत्र० ॥

आत (य) वि [द्] आत्मविद्—त्रि०आत्मानं श्वभ्रादिप- तनरक्षणद्वारेण वेत्तीत्यात्मवित् । आत्मनो रक्षके, ॥ आचा० ॥
आत्मानं यथार्थरूपेण वेत्ति—विद्—क्विप्—६ त० आत्म- स्वरूपज्ञे, आत्मानं स्वपक्षं वेत्ति क्विप् । २ । स्वपक्षज्ञातरि, ॥ वाच० ॥

आत (य) विज्जा—आत्मविद्या—स्त्री० आत्मनो विद्या आत्मनो यथास्वरूपावेदकविद्यायाम् तद्विद्यासाधने शा- स्त्रे च ॥ वाच० ॥

आत (य) वीरिय—आत्मवीर्य—न० वीर्यभेदे, "आयवीरियं दुविहं विओगायवीरियं] च अविओगायवीरियं च । विओगायवीरियं जहा संसारावत्थस्स जीवस्स मणा- माइजोगा वियोगजा भवंति अविओगायवीरियं पुण उवओगो असंखेज्जा पएसा पएसाणं" ॥ नि० चू० ॥

आत (य) विसोहि—आत्मविशुद्धि—स्त्री० उत्कालिकश्रुत- विशेषे, आत्मनो जीवस्यालोचना प्रायश्चित्तप्रतिपत्तिप्रभृति- प्रकारेण विशुद्धिः कर्ममलविगमलक्षणा प्रतिपाद्यते यस्यां ग्रन्थपद्धतौ सा आत्मविशुद्धिरिति ॥ नं० ॥ आत्मनो जीव- स्यालोचनादिप्रायश्चित्तप्रतिपत्त्यादिप्रकारेण विशुद्धिः कर्म

[illegible] [illegible] महत्त्वनमात्मविशुद्धि- [illegible]

[illegible] (न) [illegible] —त्रि० अलसे, [illegible] पो पवेया [illegible] । [illegible] ऽनमो विसम्भोगिको [illegible]

[illegible] —पुं० आत्मना संवेत्यंते- [illegible] । स्था० । उपसर्गभेदे (अस्य [illegible] उपसर्गशब्दे) । स्था० ॥

[illegible] (द) [illegible] —पुं० आत्मनः शरीरस्य [illegible] ।[illegible], । पा० । आत्मनो मनसः [illegible] । [illegible], । [illegible] ।

[illegible] (द) [illegible] —त्रि० आत्मनः शरी- [illegible] तत्परे तत्प्रधानम [illegible], पो० ।

[illegible] (द) [illegible] —पुं० संयमनं सं- [illegible] । आत्मसंयम- [illegible] दो ति समारे रत- [illegible] जिनो दित [illegible]

[illegible] —[illegible] स्वयोपरागभेदे, [illegible]

[illegible] ॥ गुरु० ॥

[illegible] बहुमानो भेतनात्मेऽगु- [illegible] प्रत्याख्यां [illegible] ॥ सूत्र० ॥

[illegible] —पुं० आत्मनाऽति- [illegible], तत्र नेयादि- [illegible]

[illegible] —त्रि० आत्मनः यु- [illegible] वृद्धि [illegible] अन्यत- [illegible] समम- [illegible]

[illegible] —[illegible] महत्त्वं [illegible] आत्मानुभव- [illegible]

[illegible]

जिस्यं प्रकाशस्वभावसाधर्म्यात्विरत [illegible] येस्य निवेदनीयं भवदीयोऽहं किङ्करो [illegible] निमग्नस्य नाथा इत्येवं समर्पणं सर्वैस्त [illegible] कार्यैर्द्विपदचतुष्पदधनाद्यर्पणलक्षणैरप्र [illegible] कथंचिन्निवेदनं इदमत्यर्थमव्यभिचारितया घेदनमित्याह आत्मनः स्वस्याच दीक्षा [illegible] मिति गाथार्थः ॥ २९ अथ तदात्मनिवेदनं गुरु [illegible] न वा यदि न प्रतिपद्यते तदा न गुरु [illegible] कां परिहरन्नाह ॥

एसा खलु गुरुभत्ती उक्कोसो एस दाणधम्मो [illegible] भावविसुद्धीए दढं इहरा वि य वीयणेयस्स ॥ [illegible]

व्याख्या–यदेतत् गुरूणां [illegible] खलु वाक्यालंकारेऽथवाऽवधारणे नेन दो [illegible] यदाह "का भक्तिस्तस्य येनात्मा सर्वथा [illegible] भक्तेः कार्यमेवाहुर्यतो नाप्यनियोजनं" [illegible] बहुमानो गुरुभक्तिश्च सदा विधेया दुष्प्रती [illegible] स्तस्याश्च [illegible] (तिण्हं दुप्पडियारं समणा उ सो [illegible] गुरुस्स भट्टिस्स) तथा "गुरुभक्तेः [illegible] रूपमम "लोकद्वितयभाविन्यस्ततः सु [illegible] उत्कृष्यत इत्युत्कर्षं उत्कृष्ट (एसत्ति) [illegible] गु शब्दस्य संबंधादेव यथायमेव गुरोरात्म [illegible] त्योपदर्शनस्थाने हि तद्वैधर्म्ये दर्श [illegible] प्यात्मदानधर्मस्येयोत्कृष्टता दानधर्मो [illegible] नुष्ठाने विधेयश्चासौ महार्थसाधकत्वात् [illegible] नि. शुभाशुभा दानात्सौभाग्यमुत्तमं । [illegible] इत्युक्तेनधर्मो यदस्ततः "किं यथाकथंचिद [illegible] त्कृष्टदानधर्मो भवति नेत्याह भावविशुद्ध्या [illegible] संकलया इदमत्र परिणामकलंकं च [illegible] भावनुरूपभावे किं स्यादित्याह (इहरा वि [illegible]) वा भावविशुद्धिव्यतिरेकेणेत्यर्थः अपि चेति [illegible] धीजमिव बीजं हेतुर्भवतीति प्रकृतोऽपि [illegible] यो नाथानुष्ठानकारणत्वादेतत्कर्याप्युत्कृष्टदान [illegible] मिति महत्त्वमिति गाथार्थः ॥ ३० ॥ कथं [illegible] भावपूर्वकमात्मनिवेदनमुत्कृष्टदानधर्मो [illegible]

जं दाणमंतरियविणं तं पि अणुमाण [illegible] णार य भागाभावा उत्तमो होइ दाण [illegible]

[illegible]

मेयस्मस्ति" अतो गुरुणा अप्रतिपन्नत्वेऽपि न निष्फलमनिवेदनस्येति गाथार्थः ॥ ३१ ॥

यदि तदात्मनिवेदनं गुरुः प्रतिपद्यते तदाधिकरणदोषो स्यादित्याशंकापरिहारमाह—

णो वि णाहिगरणं ममत्तरहियस्स एत्थ वत्थुम्मि ।
भावसुद्धिहेउं आणाए पयत्तमाणस्स ॥ ३२ ॥

रपि न केवलं दीक्षितस्यात्मनिवेदने निष्फलत्वलक्षणो षोऽभिहितयुक्तेन भवति धर्माचार्यस्यापि न नैवाधिक्रिय-दुर्गतायनेनात्मेत्यधिकरणं दीक्षितेनात्मनिवेदिते परिग्रहामानुमतिरूपो दोषो भवतीति गम्यते किंभूतस्येत्याह-मत्वरहितस्य निःसंगस्य केत्याह अत्र एतस्मिन्ननंतरोक्ते वस्तुनि पदार्थे दीक्षितस्वतदीयापत्यवित्तादिरूपे नः किंभूतस्येत्याह प्रवर्त्तमानस्य व्याप्रियमाणस्य कया समया आप्तोपदेशेन किमर्थं तद्भावशुद्धिहेतुं दीक्षितस्यपरिणामविशोधनहेतोरेवं हि प्रवृत्तौ तस्य भावशुद्धिरुजायत इत्येवं चेहानुमानप्रयोगो यदुत दीक्षितात्मनिवेद- गुरोरधिकरणं न भवति ममत्वरहितत्वाच्छरीरादिवदेति दृष्टांतोऽभ्यूह्यः । न च ममत्वरहितत्वमसिद्धं तदुपकाराशया प्रवृत्तत्वाचारित्रोपकाराय भोजनादावियेति गाथार्थः ॥ पंचा० ॥

[य] समया—आत्मसमता—स्त्री० आत्मौपम्ये, सर्वात्मौपम्यं समाचरेदित्याह—"आततो बहिया पास तम्हा न हंता ण विज्जायए" ॥ आचा० ॥ यथा ह्यात्मनः सुखमिष्टमितरत्त्वन्यथा तथा बहिरप्यात्मनो व्यतिरिक्तानामपि जन्तूनां सुखप्रियत्वमसुखाप्रियत्वं च पश्यावधारय तदेवमन्यमतां सर्वप्राणिनामयथार्थं किं कर्त्तव्यमित्याह—तम्हा इत्यादि । यस्मात्सर्वेऽपि जंतवो दुःखद्विषः सुखलिप्सवस्तस्मात्तेषां न हंता न व्यापादकः स्यात् नाप्यपरैस्तान् जंतून् विविधैर्नानाप्रकारैरुपायैर्घातयेदिति ॥ आचा० ॥

[य] समुब्भव—आत्मसमुद्भव—पुं० आत्मा देहो म- परमात्मा वा समुद्भवोऽस्य १ पुत्रे, २ मनोभवे कामे, व पुं० ३ मनोजन्ये सुखादौ, त्रि० ४ कन्यायां, ५ बुद्धौ, च स्त्री० ६ परमात्मसम्भूते आकाशादौ, त्रि० ७ चतुर्मुखे, ८ शिवे, ९ विष्णौ, १० परमात्मनि च पुं० ॥ वाच० ॥

[य] समोयार—आत्मसमवतार— पुं० शरीरभव्य-शरीरव्यतिरिक्तद्रव्यसमवतारभेदे,

सव्वदव्वा वि णं आयसमोआरेणं आयभावे समोअरंति ॥
॥ अनु० मू० ॥

शरीरभव्यशरीरव्यतिरिक्तो द्रव्यसमवतारस्त्रिविधः प्रज्ञप्तस्तद्यथा आत्मसमवतार इत्यादि । तत्र सर्वद्रव्याण्यप्यात्मसमवतारेण चिन्त्यमानान्यात्मभावे स्वकीयस्वरूपे समवतरंति वर्तंते तदव्यतिरिक्तत्वाचेषां ॥ अनु० टी० ॥

(अत्र बहुवक्तव्यता समवतारशब्दे)

[य] सरीरखेत्तोगाढ—आत्मशरीरक्षेत्रावगाढ—त्रि० स्वशरीरक्षेत्रव्यवस्थिते, "आयसरीरखेत्तोगाढे पोग्गले अत्तमायाए आहारन्ति,, स्वशरीरक्षेत्रे व्यवस्थितानित्यर्थः ॥ भ० ॥

[य] साय—आत्मसात—न० आत्मसुखे,

भूताइं जे हिंसति आयसाते ॥ सूत्र० मू० ॥

अभूवन् भवंति भविष्यन्तीति भूतानि प्राणिनस्तान्यात्मसुखार्थं हिनस्ति व्यापादयतीति ॥ सूत्र० टी० ॥

आत [य] सायाणुगामि [न्]—आत्मसातानुगामिन्—पुं० स्वसुखलिप्सौ,

हंता छेत्ता पगब्भित्ता आयसायाणुगामिणो ॥ सूत्र० मू० ॥

आत्मसातानुगामिनः स्वसुखलिप्सव इति ॥ सूत्र० ॥

आत [य] सिद्ध—आत्मसिद्ध—त्रि० आत्मना सिद्धः १ स्वयंसिद्धे, २ अयत्ननिष्पन्ने, ॥ वाच० ॥

आत [य] सुह—आत्मसुख—न० शरीरसुखे,

आयसुहं पडुच्च ॥ सूत्र० मू० ॥

आत्मसुखम्प्रतीत्य स्वस्य शरीरसुखकृते इति ॥ सूत्र० ॥

जे छिंदंति आयसुहं पडुच्च ॥ सूत्र० मू० ॥

जीवसुखे,

अर्हत्क्रमाम्भोजयुगोपयोगि चेतः कुरुष्वात्मसुखं लभस्व ॥ द्रव्या मू० ॥

आत्मनो जीवस्य सुखं निराबाधानुभवं लभस्व प्राप्नुहि नयज्ञानात् जीवादीन् परीक्ष्य कर्मभ्य आत्मानं वियोज्यानन्तसुखभाग् भवेत्यर्थः । द्रव्या० ॥ आत्मैव सुखमस्य । आत्मलाभमात्रेण सुखिनि, त्रि० आत्मैव सुखं सच्चिदानन्दरूपत्वात् । आत्मरूपे परमानन्दे, न० ॥ वाच० ॥

आत [य] सोहि—आत्मशुद्धि—स्त्री० आत्मनो देहस्य मनसो वा शुद्धिः । देहशुद्धौ, चित्तशुद्धौ, च ॥ वाच० ॥ कर्मक्षयोपशमक्षये च "आयपओगमायसोहीए" ॥ आचा० ॥ आत्मशुध्या कर्मक्षयोपशमक्षयलक्षणयाऽऽयतयोगं सुप्रणिहितमनोवाक्कायात्मकं विधायेति ॥ आचा० ॥

आत [य] हित—आत्महित—त्रि० स्वहिते, "आयहियाए सणिणसेज्जाओ,, ॥ सूत्र० ॥ आत्महिताय स्वहितं मन्यमाना इति ॥ सूत्र० ॥ शरीराय हिते, "आयट्ठीणं आयहिताणं" ॥ ॥ दशा० ॥ आत्महितानां हितमिव हितं आत्महितं च शरीरे आत्मनि च भवति । तत्र शरीरे हिताहितं पथ्यापथ्याहारादिकं । आत्मनि तु हिंसादिप्रवृत्तिनिवृत्ती । अथवाऽऽत्मनो हितानि त्रीणि विशिष्टानि पापविध्वंसकानि तदपनयनं तदस्ति येषान्ते आत्महिता इति ॥ दशा० ॥ अहिताचाराश्च चौरादयोऽयं त्वात्महित ऐहिकामुष्मिकापायभीरुत्वादिति ॥ सूत्र० ॥ "आयहिए अणियाण संवुडे" ॥ सूत्र० ॥

आयहेउ—आत्महेतु—पुं०—आत्मनिमित्ते, "आयहेउं परिओभये" आत्महेतोरात्मनिमित्तमिति ॥ दशा० ॥ "केइ पुरिसे आयहेउं वा णाइहेउं वा" ॥ सूत्र० ॥ आत्मनिमित्तमात्मार्थमिति ॥ सूत्र० ॥

आता (अप्पा)—स्त्री० आत्मन्—पुं० अत-मनिण् । स्वरूपे, ॥ वाच० ॥ "भस्मात्मनोः पो वा" इति प्राकृतसूत्रेण भस्मात्मनोः संयुक्तस्य पो वा अप्पा—अप्पाणं—पक्षे अत्ता ॥ प्रा० व्या० ॥ "पुंस्यन आणो राजवच्च" इति प्राकृतसूत्रेण पुंलिङ्गे वर्तमानस्यात्मं तस्य स्थाने आण इत्यादेशो वा भवति पक्षे यथा दर्शनं राजवत्कार्यं भवति

त्यादयः प्रवर्तते ॥ पक्षे तु राज्ञः जश्शस्ङसिङसां णोणो णाइणममामा इति प्रवर्तते ॥ अप्पाणो । अप्पाणा । अप्पाणं । अप्पाणे । अप्पाणेण । अप्पाणेहिं । अप्पाणाओ । अप्पाणासुन्तो । अप्पाणस्स । अप्पाणाण । अप्पाणम्मि । अप्पाणेसु । अप्पाणकअं । पक्षे राजवत् । अप्पा । अप्पो । हे अप्पा । हे अप्प । अप्पाणो चिट्ठंति अप्पाणो पेच्छ अप्पाणा अप्पेहिं । अप्पाणो । अप्पाओ । अप्पाउ अप्पाहि । अप्पाहिन्तो । अप्पा । अप्पासुन्तो अप्पाणो धणं अप्पाणं । अप्पे । अप्पेसु ॥ प्रा० व्या० ॥ "आत्मनष्टो णिअणइआ" इति प्राकृतसूत्रेणात्मनः परस्याष्टायाः स्थाने णिआणइआ इत्यादेशौ वा भवतः । अप्पणिआ पाउसे उवगअम्मि अप्पणिआ अविपङ्खिआणिआ अप्पणइआ । पक्षे-अप्पाणेण । यत्ने, ॥ वाच० ॥ स्वस्मिन् आयाए एगंतमंतं अवक्कमंति (आयाएत्ति) आत्मना स्वयमित्यर्थ इति ॥ भ० ॥

दोहिं ठाणेहिं आयासरीरं फुसित्ताणं णिज्जाति देसेण वि आयासरीरं फुसित्ताणं णिज्जाति सव्वेण वि आयासरीरं फुसित्ताणं णिज्जाति एवं फुरित्ता एवं फुडित्ता एवं संवट्टित्ता निव्वट्टित्ता ॥ स्था० ॥ मू० ॥

द्वाभ्यां प्रकाराभ्यां (देसेण वित्ति) देशेनापि कतिपयप्रदेशलक्षणेन केषांचित्प्रदेशा वा इलिकागत्योत्पादस्थानं गच्छता जीवेन शरीराद्बहिः क्षिप्तत्वात् आत्मा जीवः शरीरं देहं स्पृष्ट्वा श्लिष्ट्वा निर्याति शरीरान्मरणकालेऽपि निस्सरतीति (सव्वेण वित्ति) सर्वेण सर्वात्मना सर्वैर्जीवप्रदेशैः कन्दुकगत्योत्पादस्थानं गच्छता शरीराद्बहिः प्रदेशानामक्षिप्तत्वादिति अथवा देशेनापि देशतोऽपि अपि शब्दः सर्वेणापीत्यपेक्षः । आत्मा शरीरं कोऽर्थः शरीरं देशं पादादिकं स्पृष्ट्वा अवयवान्तरेभ्यः प्रदेशसंहारान्निर्याति स च संसारी सर्वेणापि सर्वतयाप्यपि निर्देशेनापीत्यपेक्ष. सर्वमपि शरीरं स्पृष्ट्वा निर्यातीति भावः स च सिद्धो वक्ष्यति च "पायणिज्जाणे निरएसु उववज्जंतीत्यादि" यावत् (सव्वंगनिज्जाणे सिद्धसु त्ति) । आत्मना शरीरस्य स्पर्शने सति स्फुरणं भवतीत्यत उच्यते ॥ एवमित्यादि एवमिति दोहिं ठाणेहिं इत्याद्यभिलापसंसूचनार्थः तत्र देशेनापि कियद्भिरप्यात्मप्रदेशैरिलिकागतिकाले (सव्वेण वित्ति) सर्वैरपि गेन्दुकगतिकाले शरीरं ॥ फुरित्ताणं ति स्फोरयित्वा संस्पन्दनं कृत्वा निर्याति अथवा शरीरकं देशतः शरीरदेशमित्यर्थः स्फोरयित्वा पादादिनिर्याणकाले सर्वतः शरीरं स्फोरयित्वा सर्वाङ्गनिर्याणावसर इति स्फुरणाय आत्मयत्नं स्फुटं भवतीत्याह एवमित्यादि एवमिति तथैव देशेनात्मप्रदेशेन शरीरकं फुडित्ताणं ति सचेतनतया स्फुरणलिङ्गतः स्फुटं कृत्वा इलिका गतौ सर्वेण सर्वात्मना स्फुटं कृत्वा गेन्दुकगताविति अथवा शरीरकं देशतः आत्मवत्तया स्फुटं कृत्वा पादादिना निर्याणकाले सर्वतः सर्वाङ्गनिर्याणावसर इति अथवा स्फुटित्वा स्फोटयित्वा विशीर्णं कृत्वा तत्र देशतोऽप्यदेशेन सर्वत सर्वशरीरेण देवदीपादिजीववदिति शरीरकं आत्मवत्तया स्फुटं स्फुटं सम्यगवबोधमिति वाच्यत्वेनेत्याह एवमित्यादि एवमिति तथैव (संवट्टइत्ता नि) सवर्तं संवर्त्य संकोच्य देशेनेलिकागतौ शरीरसंसक्तदेशैः सर्वेण सर्वात्मना गेन्दुकगतौ सर्वात्मप्रदेशानां शरीरे स्वस्थाने संवर्त्येति अथवा शरीरकं संवर्त्य-

मुपचारादिलिकायोगादिलिकापुत्रवत् तत्र देशेन. संवर्तनं संसारिणो म्रियमाणस्य पादादिगतजीवप्रदेशसंहारात्सर्वतस्तु निर्याणं गतुरिति । अथवा शरीरकं देशतः संवर्त्य हस्तादि सङ्कोचनेन सर्वतः सर्वशरीरसङ्कोचनेन पिपीलिकादिवदिति आत्मनश्च संवर्तनं कुर्वन् शरीरस्य निवर्तनं करोतीत्याह एवं (निवट्टइत्ताणं ति) तथैव निवर्त्य जीवप्रदेशेभ्यः शरीरकं पृथक् कृत्वेत्यर्थः तत्र देशेनेलिकागतौ सर्वेण गेन्दुकगतावथवा प्रदेशतः शरीरकं निवर्त्यात्मन पादादिनिर्याणवत् सर्वतः सर्वाङ्गनिर्याणवदिति अथवा पञ्चविधशरीरसमुदयापेक्षया देशतः शरीरमौदारिकादिनिवर्त्य तैजसकार्मणे त्वादायैव तथा सर्वेण सर्वशरीरसमुदायं निवर्त्य निर्याति सिद्धयतीत्यर्थः अनन्तरं सर्वनिर्याणमुक्तं तच्च परम्परया धर्मश्रवणलाभादिषु ते च यथा स्युस्तथा दर्शयन्नाह (दोहीत्यादि) कण्ठ्यवरं (खएण चेवत्ति) ज्ञानावरणीयस्य दर्शनमोहनीयस्य च कर्मण उदयप्राप्तस्य क्षयेण निर्जरणेन अनुदितस्य चोपशमेन विपाकानुभवेन क्षायोपशमेनेत्युक्तं भवति यावत्करणात् केवलं बोहिबुज्झेज्जा मुंडेभवित्ता अगाराओ अणगारियं पव्वएज्जा केवलं बंभचेरवासमावसेज्जा केवलेणं संजमेणं संजमेज्जा केवलेणं संवरेणं संवरेज्जा केवलमाभिणिबोहियनाणमुप्पाडेज्जा" इत्यादि द्रश्यं यावन्मनःपर्यवज्ञानमुत्पादयेदिति केवलज्ञानं तु क्षयादेव भवतीति तन्नोक्तमिह च यद्यपि बोध्यादयः सम्यक्चारित्ररूपत्वात्केवलेन क्षयेणोपशमेन च भवंति तथाप्येते क्षयोपशमेनापि भवंति श्रवणाभिनिबोधिकादीनि तु क्षयोपशमेन भवन्तीति सर्वसाधारणः क्षयोपशम उक्तः । स्था० ३ ठा० ॥ देहे, उक्तं हि "धर्मधृत्याभिधीन्द्रकत्वक्तत्त्वसूर्यदेहेषु । शीलानिलमनोयत्नकवर्येष्वात्मनः स्मृतिरिति ॥ उत्त० ॥ तथा चाचाराङ्गसूत्रम् ।

जमिणं विरूवरूवेहिं सत्थेहिं लोगस्स कम्मसमारम्भा कज्जंति तं जहा अप्पणो से पुत्ताणं इत्यादि ॥ आचा० ॥

अप्पणो इत्यादि तद्यथेत्युपप्रदर्शनार्थं । लोकमात्रमेवान्यद्वधं जातीयकं मिश्रादिकं द्रष्टव्यं (से) तस्यारम्भारिप्सोरयं आत्मा शरीरं तस्मै अर्थं तदर्थं कर्म्मारम्भाः पाकादयः क्रियन्ते ॥ आचा० ॥ मनसि, बुद्धिस्थे निजे स्वभावे, बुद्धौ च ॥ वाच० देहावच्छिन्ने चैतन्ये च । अन्तःकरणे, ॥ वाच० ॥ ज्ञाने, प्रकाशस्वरूपे बुद्धावात्मनि, बुद्धिर्हि मन आदिकरणानि प्राप्नोतीत्यात्मा तेषां प्रत्यभिज्ञानम् ॥ वाच० ॥ अर्के, वह्नौ, वायौ, ॥ वाच० ॥ अततीत्यात्मा ॥ विशे० ॥ अतति सततं गच्छत्यपरापरान् स्वपरपर्य्यायानित्यात्मा अथवा अत धातोर्गमनार्थत्वेन ज्ञानार्थत्वाद्तति सततमवगच्छत्युपयोगलक्षणत्वादित्यात्मा ॥ भ० ॥ अतति सततमवगच्छति अत सातत्यगमन इति वचनात् अत् धातोर्गत्यर्थत्वाद् गत्यर्थानां च ज्ञानार्थत्वादनवरत जानातीति निपातनादात्मा जीव उपयोगलक्षणत्वादस्य सिद्धसंसारिवस्थाद्वयेऽप्युपयोगभावेन सततावबोधभावात् सततावबोधाभावे चाजीवत्वप्रसङ्गात् अजीवस्य च पुनर्जीवत्वाभावात् भावे चाकाशादीनामपि तथात्वप्रसङ्गात् एवं च जीवनादित्वाभ्युपगमाभावप्रसङ्ग इति । अथवा अतति सततं गच्छति स्वकीयान् ज्ञानादिपर्य्यायानित्यात्मा नन्वेवमाकाशादीनामप्यात्मशब्दव्यपदेशप्रसङ्गस्तेषामपि स्वपर्य्यायेषु सततगमनादन्यथा अपरिणामित्वेनावस्तुत्वप्रसङ्गादिति

नैगम व्युत्पत्तिनिमित्तत्वादस्य उपयोगस्यैव च प्रवृत्तिनिमित्तत्वाज्जीव एवात्मा नाकाशादिरिति यद्वा संसार्य्यपेक्षया नानागतिषु सततगमनान्मुक्तापेक्षया च भूततद्भावत्वादात्मा जीवः ॥ स्था० ॥ अतति सातत्येन गच्छति तांस्तान् ज्ञानदर्शनसुखादिपर्य्यायानित्याद्यात्मादिशब्दव्युत्पत्तिनिमित्तसंभवात् उक्तञ्च "एवं जीवो जीवो संसारी पाणधारणागुणओ । सिद्धो पुणरज्जीवो जीवणपरिणामरहिओत्ति" ॥ आ० म० ॥ को ह्यात्मा भगवानाह योऽहमित्यभिमन्यते स कीदृक् सूक्ष्मोऽसौ किं तत्सूक्ष्मं यन्नगृह्णीमः न तु शब्दगंधानिलाः किं तु ते इंद्रियग्राह्याः तेन ग्रहणमात्मा न तु ग्राहयिता हि सः आ० चू० ॥

(१) भेदा आत्मनः त्रिविध आत्मा ।
(२) निक्षेप आत्मनः ।
(३) भेदाः अष्टविध आत्मा ।
(४) भेदाः सूक्ष्मा बादराश्च ।
(५) लक्षणम् आत्मनः ।
(६) परिभोगोपभोगकषायद्वाराणि ।
(७) इन्द्रियाण्यात्मनः ।
(८) चित्तादीनि आत्मनः ।
(९) अस्तित्वमात्मनः ।
(१०) अध्यास्थानमात्मनः ।
(११) अस्तित्वमिन्द्रभूतिं प्रति ।
(१२) अभौतिकत्वमात्मनः ।
(१३) कस्या दिश आगतोऽहम् ।
(१४) अन्यत्वममूर्त्तत्वमनित्यत्वं च ।
(१५) कर्त्तृत्वमात्मनः ।
(१६) विभुत्वमात्मनः ।
(१७) परिमाणम् आत्मनः ।
(१८) एकत्वमात्मनः ।
(१९) क्रियावत्वमात्मनः ।
(२०) ज्ञानमात्मनो भिन्नमभिन्नं च ।
(२१) द्वाभ्यां स्थानाभ्यामात्मा जानाति ।
(२२) स्फुटगाथाः ।
(२३) क्षणिकत्वमात्मनः ।
(२४) रत्नप्रभादिभावानामात्मत्वम् ।
(२५) इलोकाः अप्पाणई वेयरणीति ।

(१) स च त्रि विधः-

बाह्यात्मा चांतरात्मा च परमात्मेति च त्रयः । ॥ द्वा० ॥
कायाधिष्ठायकध्येयाः प्रसिद्धा योगवाङ्मये ॥

बाह्यात्मा चेति कायः स्वात्मधिया प्रतीयमानोऽहं स्थूलोऽहं कृश इत्याद्युल्लेखेनाधिष्ठायकः कायचेष्टाजनकप्रयत्नवान् ध्येयश्च ध्यानभाव्य एते त्रयो बाह्यात्मा चांतरात्मा च परमात्मा चेति योगवाङ्मये योगशास्त्रे प्रसिद्धाः ॥ द्वा० ॥ ॥ टी० ॥ तत्र यस्य मनोवचनादिषु आत्मत्वभ्रमदेह एवात्मा एवं सर्वपौद्गलिकप्रपञ्चेषु आत्मनिष्ठेषु आत्मत्वबुद्धिः स बाह्यात्मा १ मिथ्यादृष्टिः एव पुनः स कर्मावस्थायामपि आत्मनि ज्ञानाद्युपयोगलक्षणे शुद्धचैतन्यलक्षणे महानंदस्वरूपे निर्विकारामृताबाधरूपे समस्तपरभावमुक्ते आत्मबुद्धिः अंतरात्मा सम्यग्दृष्टिगुणस्थानकतः क्षीणमोहं यावत् अंतरात्मा उच्यते यः केवलज्ञानदर्शनोपयुक्तः शुद्धसिद्धः स परमात्मा संयोगी अयोगी केवली सिद्धश्च स परमात्मा उच्यते ॥ अष्ट० ॥ अस्य वक्तव्यता दशवैकालिके ॥

(२) अधुना जीवपदमाह-

जीवस्स उ निक्खेवो परूवणा लक्खणं च अत्थित्तं ॥
अन्नासुरत्तं निच्चकारगो देहवावित्तं ॥ २२७ ॥
गुणिउड्ढगइत्तेयानिम्मयसाफल्लता य परिमाणे ।
जीवस्स तिविहिकालंमि परिक्खा होइ कायव्वा ॥२२८ ॥

(दो दारगाहाओ) व्याख्या जीवस्य निक्षेपो नामादिः प्ररूपणा. द्विविधाश्च भवंति जीवा इत्यादिरूपा लक्षणं ज्ञानादि अस्तित्वं सत्त्वं शुद्धपदवाच्यत्वादिना । अन्यत्वं देहात् । अमूर्तत्वं स्वतः । नित्यत्वं विकाराद्यनुपलंभेन । कर्तृत्वं स्वकर्मफलभोगात् । देहव्यापित्वं तत्रैव तल्लिंगोपलब्ध्या । गुणित्वं भोगादिना । ऊर्द्ध्वगतित्वमगुरुलघुभावेन । अनिर्मायता विकाररहितत्वेन । सफलता च कर्म्मणः । परिमाणं लोकाकाशमात्र इत्यादि । एवं जीवस्य त्रिविधकाल इति त्रिकालविषया परीक्षा भवति कर्त्तव्या इति । द्वारगाथाद्वयसमासार्थः । व्यासार्थस्तु भाष्यादवसेय. ॥

तया च निक्षेपमाह-

नामं ठवणा जीवो दव्वजीवो य भावजीवो य ।
ओहभवग्गहणंमि य तब्भवजीवे य भावंमि ॥२२९ ॥दश०॥

व्या० नामस्थापनाजीव इति । जीवशब्दः प्रत्येकमभिसंबध्यते । नामजीवः स्थापनाजीव इति । तथा द्रव्यजीवश्च भावजीवश्च वक्ष्यमाणलक्षणः । तत्रौघेत्योघजीवः । भवग्रहणे चेति भवजीवस्तद्भवजीवश्च तद्भव एवोत्पन्नः भावे भावजीव इति गाथासमासार्थः ॥

व्यासार्थं त्वाह-

नामं ठवणागयाओ दव्वे गुणपज्जवेहिं रहिओ त्ति ।
तिविहो य होइ भावे ओहे भवतब्भवे चेव ॥ २३० ॥

व्या० ॥ नामस्थापने गते सुवर्णेत्यादीतिभावः । द्रव्य इति द्रव्यजीवो गुणपर्यायाभ्यां चैतन्यमनुष्यत्वादिलक्षणाभ्यां रहितः । बुद्धिपरिकल्पितो न त्वसावित्थंविध. सम्भवतीति । त्रिविधश्च भवति भाव इति ।
भावजीवत्रैविध्यमाह-ओघजीवो भवजीवस्तद्भवजीवश्चेति । प्राग्गाथोक्तमप्येतदित्थं विधभाष्यकारदीर्घप्रामाण्यतोऽदुष्टमेवेति तु अन्ये पठंति "भावे उ तिहा भणिओ तं पुण संखेवओ वोच्छं" भाव इति भावजीवः । त्रिधेति त्रिप्रकारो भणितो निर्युक्तिकारेण ओघजीवादिस्तमपि च भावार्थमधिकृत्य संक्षेपतो वक्ष्य इति गाथार्थः

तत्रौघजीवमाह

संते आउयकम्मे धरई तस्सेव जीवई उदए ।
तस्सेव निज्जराए मओत्ति सिद्धो नयमएणं ॥ २३१ ॥

व्या० ॥ सति विद्यमाने आयुष्ककर्म्मणि सामान्यरूपे ध्रियते सामान्येनैव तिष्ठति मर्यादया एवमित्थमवस्थानमात्राज्जीवत्वमस्येत्याशंक्या त्रैयाम्बर्पयोजनामाह । तदेवो

[illegible] जीवस्युदये । उदये सति जीवत्वासंसार [illegible] [illegible] जीवनाज्जीव इति । तस्यैवायुष्ककर्मणो निर्जरणा [illegible] मृत इति सर्वथा जीवनाभावात् । स च सिद्धो मृतो नान्यः [illegible] तथा जीवनसद्भावात् । [illegible] मृत इति गाथार्थः । जीवत्वने- [illegible] सामान्येन जीवः ओघजीवितविशिष्टो जीवः [illegible] भवति उक्त ओघजीवित- विशिष्ट ओघजीवः ॥

[illegible] तद्भवजीवं चाह ॥

जेन य धरइ भवाओ, जीवो जेण य भवाउ संकमइ ।
जाणाहि तं भवाउ चउव्विहं तब्भवे दुविहं ॥ २३२ ॥
निरेओ त्ति गई । अ० ४ ॥

[illegible] येन च नारकाद्यायुष्केणाध्रियते तिष्ठति । भगवतो [illegible] जीवस्तथा येन च मनुष्याद्यायुष्केण [illegible] संक्रामति याति । मनुष्यादिभवांतर- [illegible] । जानीहि विद्धि । तदित्थंभूतं भवा- [illegible] चतुर्विधं नारकतिर्यङ्मनुष्यामरभेदेन तथा [illegible] वर्तते । तच्च द्विविधं तिर्यक्त्व- [illegible] । यस्मात्तावेव मृतौ संतौ भूय- [illegible] नान्ये । तद्भवजीवितं च तस्मा- [illegible] इति । अत्रापि च [illegible] जीव एव ग्राह्यः । [illegible] गाथार्थः । उक्तो नि- [illegible]

(६) [illegible] सूत्रम्—

[illegible] भंते ! [illegible] ? गोयमा ! अट्ठविहा आता [illegible] कसायाता जोगाता उवओगाता [illegible] वीरियाता ॥ भ० ॥ [illegible]

([illegible]) [illegible] स्वपरपर्या [illegible] [illegible] [illegible] आत्मा, [illegible] [illegible] [illegible] ([illegible]) [illegible] ([illegible]) [illegible] [illegible] ([illegible]) उपयोगः [illegible] [illegible] [illegible]

णां वीर्यमिति ॥ भ० टी० श० १२ उ० १० ॥

एवमष्टधात्मानं प्ररूप्याऽथ [illegible] भेदान्तरं युज्यते यस्य न युज्यते तस्य तद्दर्शयितु-

जस्स णं भन्ते ! दवियाता तस्स णं कसायाता [illegible] याता तस्स दवियाता ? गोयमा ! जस्स [illegible] कसायाता सिय अत्थि सिय णत्थि, [illegible] तस्स दवियाता णियमं अत्थि ॥ भ० [illegible]

जस्सणमित्यादि । इहाष्टौ पदानि स्थाप्यन्ते [illegible] शेषैः सप्तभिः [illegible] रमत्वं जीवत्वमित्यर्थः तस्य कषायात्मा स्या- [illegible] स्ति सकषायावस्थायां स्यान्नास्ति [illegible] पशान्तकषायावस्थायां, यस्य पुनः [illegible] द्रव्यात्मत्वं जीवत्वं नियमादस्ति जीवत्व [illegible] मभावादिति, ॥ भ० टी० श० १२ उ० १० ॥

जस्स णं भंते ! दवियाता तस्स जोगाता [illegible] ता कसायाता भणिया तहा दवियाता जोगाता [illegible] णियव्वा ॥ भ० मू० १० श० १२ उ०

तथा यस्य द्रव्यात्मा तस्य [illegible] स्ति चायोगिसिद्धानामिव, तथा यस्य योगात्मा [illegible] व्यात्मा नियमादस्ति जीवत्वं विना [illegible] पूर्वसूत्रोपमानेन दर्शयन्नाह—एवं जहा [illegible] ॥ भ० टी० श० १२ उ० १० ॥

जस्स णं भंते ! दवियाता तस्स उवओगाता [illegible] स्स पुच्छा भाणियव्वा, गोयमा ! जस्स दविया- [illegible] उवओगाया णियमं अत्थि, जस्स वि उवओगा- [illegible] वि दवियाता णियमं अत्थि जस्स दवियाता [illegible] णाता भयणाए, जस्स पुण णाणाता तस्स दविया- [illegible] यमं अत्थि । जस्स दवियाता तस्स दंसणाता [illegible] अत्थि, जस्स वि दंसणाता तस्स दवियाता [illegible] जस्स दवियाता तस्स चरित्ताया भयणाए, जस्स पुण [illegible] रित्ताता तस्स दवियाता णियमं अत्थि । एवं [illegible] ए वि समं ॥ भ० मू० श० १२ उ० १० ॥

तथा यस्य जीवस्य द्रव्यात्मा तस्य नियमादुपयोगा- [illegible] स्यादुपयोगात्मा तस्य नियमाद् द्रव्यात्मा [illegible] [illegible] अविनाभूतत्वाद्यथा सिद्धस्य, [illegible] स्यादुपयोगात्मा [illegible] (जस्स दवियायेत्यादि) तथा (जस्स [illegible] णाणाया भयणाए, जस्स पुण णाणाया तस्स [illegible] णियमं अत्थि त्ति) यस्य जीवस्य द्रव्यात्मा [illegible] स्यान्नास्ति यथा सम्यग्दृष्टीनां, स्यान्नास्ति [illegible] दृष्टीनामिति भजना, यस्य तु ज्ञानात्मा [illegible] नियमादस्ति यथा सिद्धस्येति, ॥ तथा ॥ (जस्स [illegible]) [illegible] ॥ (जस्स वि [illegible]) [illegible]

रिणामिव ॥ यथा चक्षुर्दर्शनादिदर्शनवतां जीवानामिति, (जस्स दवियाया तस्स चरित्ताया भयणाए त्ति ॥ यतः सिद्धस्याविरतस्य वा द्रव्यात्मत्वे सत्यपि चारित्रात्मा नास्ति विरतानां चास्तीति भजनेति (जस्स पुण चरित्ता-या तस्स दवियाया नियमं अत्थि त्ति) चारित्रिणां जीवात्वस्याभिचारित्वादिति ॥ एवं (वीरियायाए वि समं ति) यथा द्रव्यात्मनश्चारित्रात्मना सह भजनोक्ता, नियमश्च एवं वीर्यात्मनापि सहेति तथाहि—यस्य द्रव्यात्मा तस्य वीर्यात्मा नास्ति यथा सकरणवीर्यापेक्षया सिद्धस्य, तदन्यस्य त्वस्तीति भजना, वीर्यात्मनस्तु द्रव्यात्मास्त्येव यथा संसारिणामिति ॥ ७ ॥ भ० टी० श० १२ उ० १०॥

अथ कषायात्मनः सहान्यानि पदानि चिन्त्यन्ते—

जस्स णं भंते ! कसायाया तस्स जोगाया पुच्छा गोयमा ! जस्स कसायाया तस्स जोगाता णियमं अत्थि, जस्स पुण जोगाया तस्स कसायाता सिय अत्थि सिय णत्थि । एवं उवओगाए वि समं कसायाता णेयव्वा । कसायाता णाणाता य परोप्परं दोवि भइयव्वाओ, जहा कसायाया य उवओगाया य तहा कसायाया दंसणाता य कसायाता चरित्ताता य दोवि परोप्परं भइयव्वाओ, जहा कसाया-ता जोगाता तहा कसायाता य भाणियव्वाओ ॥ भ० सू० श० १२ उ० १० ॥

(जस्स चाभिस्यादि) यस्य कषायात्मा तस्य योगात्माऽस्त्येव न हि सकषायोऽयोगी भवति यस्य तु योगात्मा तस्य कषायात्मा स्यान्न वा । सयोगानां सकषायाणामकषायाणां च भावादिति । एवं (उवओगायाए वीत्यादि) अयमर्थः यस्य कषायात्मा तस्योपयोगात्मावश्यं भवत्युपयोगरहितस्य कषायाणामभावात् यस्य पुनरुपयोगात्मा तस्य कषायात्मा भजनया उपयोगात्मतायां सत्यामपि कषायिणामेव कषायात्मा भवति । निष्कषायाणां तु नासाविति भजनेति, तथा (कसायाया य णाणाया य परोप्परं दो वि भइयव्वाओ त्ति) कथं यस्य कषायात्मा तस्य ज्ञानात्मा स्यादस्ति स्यान्नास्ति, यतः कषायिणः सम्यग्दृष्टेर्ज्ञानात्मास्ति मिथ्यादृष्टेस्तु तस्य नास्त्यसाविति भजना । तथा ,यस्य ज्ञानात्मास्ति तस्य कषायात्मा स्यादस्ति स्यान्नास्ति, ज्ञानिनां कषायभावात् तदभावाच्चेति भजनेति ॥ जहा कसायाया उवओगाया तहा कसायाया य दंसणाया य त्ति अतिदेशः, तस्मायेदं सूत्रं (जस्स कसायाया तस्स दंसणाया नियमं अत्थि) दर्शनरहितस्य घटादेः कषायात्मनोऽभावात् (जस्स पुण दंसणाया तस्स कसाया-या सिय अत्थि सिय नत्थि) दर्शनवतां कषायसद्भावात्तदभावाच्चेति, दृष्टान्तार्थस्तु प्राक् प्रसिद्ध एवेति (कसायाया य चरित्ताया य दोवि परोप्परं भइयव्वाओ त्ति) भजना चैवं यस्य कषायात्मा तस्य चारित्रात्मा स्यादस्ति स्यान्नास्ति, कथं कषायिणां चारित्रस्य सद्भावात्, प्रमत्तयतीनामिव तदभावाच्चासंयतानामिवेति, तथा यस्य चारित्रात्मा तस्य कषायात्मा स्यादस्ति स्यान्नास्ति, कथं सामायिकादिचारित्रिणां कषायाणां भावाद्यथाख्यातचारित्रिणां च तदभावादिति ॥ जहा (कसायाया य जोगाया य तहा कसायाया य वीरियाया य भाणियव्वाओ त्ति)दृष्टान्तः प्राक् प्रसिद्धो दार्ष्टान्तिकस्त्वेवं यस्य कषायात्मा तस्य वीर्यात्मा नियमादस्ति, न हि कषायवान् वीर्यविकलोऽस्ति, यस्य पुनर्वीर्यात्मा तस्य कषायात्मा भजनया, यतो वीर्यवान् सकषायोपि स्याद्यथाऽसंयतः अकषायोऽपि स्याद्यथाऽकेवलीति अथ योगात्माग्रेतनपदैः पञ्चभिः सह चिन्तनीयस्तत्र च लाघवार्थमतिदिशन्नाह (एवं जहा कसायाया वत्तव्वया) *भणिया तहा जोगायाए वि उवरिमाहिं समं भाणियव्वा त्ति०* ॥ ता चैवं यस्य योगात्मा तस्योपयोगात्मा नियमाद्यथा सयोगानां, यस्य पुनरुपयोगात्मा तस्य योगात्मा स्यादस्ति यथा *सयोगानां स्यान्नास्ति यथा योगिनां सिद्धानां चेति* । तथा यस्य योगात्मा तस्य ज्ञानात्मा स्यादस्ति सम्यग्दृष्टीनामिव, स्यान्नास्ति मिथ्यादृष्टीनामिव, यस्य ज्ञानात्मा तस्यापि योगात्मा स्यादस्ति, योगिनामिव, स्यान्नास्ति अयोगिनामिवेति २ तथा यस्य योगात्मा तस्य दर्शनात्मास्त्येवेति योगिनामिव, यस्य च दर्शनात्मा तस्य योगात्मा स्यादस्ति योगवतामिव स्यान्नास्त्ययोगिनामिव ३ तथा यस्य योगात्मा तस्य चारित्रात्मा स्यादस्ति विरतानामिव, स्यान्नास्त्यविरतानामिव, यस्यापि चारित्रात्मा तस्य योगात्मा स्यादस्ति सयोगचारित्रवतामिव, स्यान्नास्त्ययोगिनामिवेति, वाचनान्तरे पुनरिदमेवं दृश्यते (जस्स चरित्ताया तस्स जोगाया नियमं ति)तत्र च चारित्रस्य प्रत्युपेक्षणादिव्यापाररूपस्य विवक्षितत्वात्तस्य च योगाविनाभावित्वाद्यस्य चारित्रात्मा तस्य योगात्मा नियमादित्युच्यत इति ४ तथा यस्य योगात्मा तस्य वीर्यात्मास्त्येव योगसद्भावे वीर्यस्यावश्यंभावात्, यस्य तु वीर्यात्मा तस्य योगात्मा भजनया यतो वीर्यविशेषवान् सयोग्यपि स्यात् यथा सयोगिकेवल्यादिरयोग्यपि *स्याद्यथाऽयोगिकेव*लीति ॥ भ० टी० श० १२ उ० १० ॥

अथोपयोगात्मना सहान्यानि चत्वारि चिन्त्यन्ते । तत्रातिदेशमाह—

जहा दविआताए वत्तव्वया भणिया तहा उवओगाताए वि उवरिल्लाहिं समं भाणियव्वा भ० सू० श० १२ उ० १० ॥

एवं च भावना कार्या यस्योपयोगात्मा तस्य ज्ञानात्मा स्यादस्ति यथा सम्यग्दृशां, स्यान्नास्ति, यथा मिथ्यादृशां, यस्य च ज्ञानात्मा तस्यावश्यमुपयोगात्मा सिद्धानामिवेति १ तथा यस्योपयोगात्मा तस्य दर्शनात्मास्त्येव, यस्यापि दर्शनात्मा तस्योपयोगात्मास्त्येव यथा सिद्धादीनामिति २ तथा यस्योपयोगात्मा तस्य चारित्रात्मा स्यादस्ति, स्यान्नास्ति, यथा संयतानामसंयतानां च, यस्य तु चारित्रात्मा तस्योपयोगा-*त्मास्त्येव यथा संयतानां, तथा यस्योपयोगात्मा तस्य* वीर्यात्मा स्यादस्ति संसारिणामिव स्यान्नास्ति सिद्धानामिव, यस्य पुनर्वीर्यात्मा तस्योपयोगात्मास्त्येव संसारिणामिवेति ४ ॥ भ० श० ११ उ० १० ॥

अथ ज्ञानात्मना सहान्यानि त्रीणि चिन्त्यन्ते—

जस्स णाणाया तस्स दंसणाया णियमं अत्थि, जस्स पुण

[illegible] । तस्स [illegible] तस्स [illegible] पुन [illegible] ॥ [illegible] १२ उ० १० ॥

[illegible]

[illegible]

[illegible]

[illegible]

धिका:, यतो धीर्यात्मानः सिद्धाश्च मीलिता [illegible] स्तानो भवन्ति ते च धीर्यात्मभ्यः सिद्धराशिनाऽधिका भ[illegible]न्तीति । भवन्ति चात्र गाथाः । "फोडीसहस्सपुहुत्तं [illegible] घोषिपाउ घरणाया । नाणाणाणंतगुणा पडुच सिद्धेहि [illegible] दाओ ॥ १ ॥ होंति कसायायाओ पंतगुणा जेण ते [illegible] [illegible] । जोगायामणिपाओ अजोगिवज्जाउ तो अहिया ॥ [illegible] सेलेसिगयाण वि सद्धो विरियं तओ [illegible] । उवओगइधिपईसवुमच्चजियाणं तयो अहिया" ॥ १ ॥ इति ॥ टी० ॥ भ० श० १२ उ० १० ॥

(४) भेदाः सूक्ष्माः बादराश्च यथा दशवैकालिके-

दुविहा य हुंति जीवा, सुहुमा तह बायरा य लोगंमि ।
सुहुमा य सव्वलोए दो चेव य बायरविहाणे ॥ [illegible] ॥

व्या० । द्विविधाश्च द्विप्रकाराश्च च शब्दात्प्रभविषयाश्च [illegible] [illegible]केन्द्रियादिभेदेन भवंति जीवाः । द्वैविध्यमाह सूक्ष्मा बादराश्च । तत्र सूक्ष्मनामकर्मोदयात् सूक्ष्माः बादरनामकर्मोदयाच्च बादरा इति लोके इति लोकमध्ये [illegible] [illegible] तत्र सूक्ष्माश्च सर्वलोक इति [illegible] [illegible] सूक्ष्मा एव सर्वलोकेषु न [illegible] [illegible] द्वे एव च पर्याप्तकाऽपर्याप्तकभेदे [illegible] बादरविधौ बादरात्सूक्ष्मविधाने च । [illegible] [illegible]पर्याप्तकरूपा इति गाथार्थः ॥

[illegible]माह—

सुहुमा य सव्वलोए, परियावन्ना भवंति नायव्वा ॥
दो चेव बायराणं पज्जत्तियरे अ नायव्वा ॥ [illegible] ॥

व्या० ॥ सूक्ष्मा एव पृथिव्यादयः सर्वलोके [illegible] [illegible] पर्यापन्ना भवन्ति ज्ञातव्या । पर्यापन्ना इति [illegible] सूक्ष्मपर्यायमापन्ना आपन्नसूक्ष्मा न तु भूतमात्रिणो [illegible] सूक्ष्मा इति भावः । तथा द्वौ भेदौ बादराणां [illegible] [illegible] च शब्दात्सूक्ष्माणां च पर्याप्तकेतरौ [illegible] [illegible] इति गाथार्थः ॥ उक्ता प्ररूपणा ॥ दश० [illegible]

(५) तथा चाह-भाष्यकारः ॥

[illegible] हेऊ य कारणं [illegible] ।
[illegible] जीवस्स उ भावणाइं इमं तं च ॥ [illegible] ॥

व्या० ॥ [illegible]

[illegible]

[illegible] ॥ [illegible] ॥

[illegible] ॥ [illegible] ॥

[illegible]

याणि बंधोदयनिर्ज्जराश्चैव। तथा चित्तं चेतना संज्ञा विज्ञानं धारणा च बुद्धिश्च तथा ईहा मतिवितर्काः जीवस्य तु लक्षणान्येतानि । तु शब्दस्यावधारणत्वात् जीवस्यैव नाजीवस्येति प्रतिद्वारगाथाद्वयसमासार्थः । व्यासार्थस्तु ।

भाष्यादवसेयस्तचेदं—

लक्खिज्जइत्ति नज्जइ, पच्चक्खपरो व जेण जो अत्थो ।

तं तस्स लक्खणं खलु धूमुण्हाइव्व अग्गिस्स ॥ २३८ ॥

व्या० लक्ष्यत इति ज्ञायते कोऽसावित्याह । प्रत्यक्षोऽक्षिगोचरापन्न इतरो वा परोक्षः । येनोष्णत्वादिना योऽर्थोऽग्न्यादिस्तस्य लक्षणं खल्विति तदेव स्पष्टयति धूमौष्ण्यादिवदग्नेरिति । स ह्यौष्ण्येन प्रत्यक्षो लक्ष्यते परोक्षो धूमेनेति गाथार्थः ।

तत्रादानादीनां दृष्टान्तानाह ।

अयगारकूरपरसू अग्गिसुवन्नेय खीरनरवासी ।

आहारो दिट्ठंता, आयाणाईण जहसंखं ॥ २३९ ॥

व्या० ॥ अयस्कारः सूरस्तथा परशु वह्निः सुवर्णं च क्षीरनरवास्यः तथा आहारो दृष्टांता आदानादीनां प्रक्रांतानां यथासंख्यं प्रतिज्ञाधुल्लंघनेन चैतदभिधानं पर्यंचार्थप्रतिपत्ति प्रति प्रायः प्रधानाङ्गता ख्यापनार्थमिति गाथार्थः ॥

सांप्रतं प्रयोगानाह—

देहिंदियाइरित्तो, आया खलु गज्झगाहगपओगो ।

संडासा अयपिंडो, अयकाराइव्व विन्नेओ ॥ २४० ॥

व्या० देहेन्द्रियातिरिक्त आत्मा । खलु शब्दो विशेषणार्थः । कथंचिच्च सर्वथा अतिरिक्त एव तदसंवेदनादिप्रसंगादित्यनेन प्रतिज्ञार्थमाह । प्रतिज्ञा पुनरर्थेन्द्रियाण्यादेयादानानि विद्यमानादातृकाणि कुत इत्याह । ग्राह्यग्राहकप्रयोगात् । ग्राह्या रूपादयः । ग्राहकाणीन्द्रियाणि तेषां प्रयोगः स्वफलसाधनव्यापारस्तस्माच्च धर्माणां कर्मकरणभावः कर्तारमंतरेण स्वकार्यसाधनप्रयोगः संभवत्यनेनापि हेत्वर्थमाह । हेतुश्चादेयादानरूपत्वादिति । दृष्टांतमाह—संदंशादादानात् अयस्पिण्डादादेयात् अयस्कारादिवदादायकारवद्विशेयः अतिरिक्तो विद्यमान आदानेत्यनेनापि दृष्टांतार्थमाह । दृष्टांतस्तु संदंशकायस्पिण्डवत् । यस्तु तदनतिरिक्तः न ततो ग्राह्यग्राहकप्रयोगः । यथा देहादिश्च यथेति व्यतिरेकार्थः । व्यतिरेकस्तु यानि विद्यमानादातृकाणि न भवंति तान्यादानादेयरूपाण्यपि न भवंति । यथा मृतकद्रव्येंद्रियादीनीति गाथार्थः उक्तमादानद्वारम् ॥ दश० ॥

(६) अधुना परिभोगद्वारमाह—

देहो सभोत्तिओ खलु भोज्जत्ता ओयणाइथालं व ।

अन्नप्पउत्तिगा खलु जोगा परसुव्व करणत्ता ॥ २४१ ॥

व्या० ॥ देहः सभोक्तृकः खल्विति प्रतिज्ञा भोग्यत्वादिति हेतुः । ओदनादिस्थालवत् स्थालस्थितौदनवदिति दृष्टांतः । भोग्यत्वं च देहस्य जीवेन तथाविधमनोपभुज्यमानत्वादित्युक्तं परिभोगद्वारमः ॥ दश० अ० ४ ॥

साम्प्रतमुपयोगद्वारमाह—

उवओगा नाभावो अग्गि व्व सलक्खणापरिच्चागा ।

सकसायाणाभावो पज्जयगमणा सुवन्नं व ॥२४२ ॥

व्या० उपयोगात्साकारानाकारभेदभिन्नान्नाभावो जीव इति गम्यते कुत इत्याह स्वलक्षणापरित्यागादुपयोगलक्षणासाधारणात्मीयलक्षणापरित्यागात् अग्निवद्यथाऽग्निरौष्ण्यादिस्वलक्षणापरित्यागान्नाभावस्तथा जीवोऽपीति प्रयोगार्थः । प्रयोगस्तु सन्नात्मा स्वलक्षणापरित्यागादग्निवदित्युक्तमुपयोगद्वारम्। अधुना कषायद्वारमाह । सकषायत्वाच्चेतनविलक्षणास्मीयलक्षणक्रोधादिपरिणामोपेतत्वादित्यर्थः । नाभावो जीवः । कुत इत्याह । पर्यायगमनात् क्रोधमानादिपर्यायप्राप्तेः । सुवर्णवत् कटकादिपर्यायगमनोपेतसुवर्णवदिति प्रयोगार्थः । प्रयोगस्तु सन्नात्मा पर्यायगमनात्सुवर्णवदिति गाथार्थः । उक्तं कषायद्वारम्, इदानीं लेश्याद्वारमाह लेसाओ णाभावो परिणमणसभावओ य खीरं व । उस्सासा णाभावो समसस्साया खउ व्व नरो ॥ २४३ ॥ व्या० लेश्यातो लेश्यासद्भावेन नाभावो जीवः किं तु भाव इति कुत इत्याह परिणमनस्वभावत्वात्कृष्णादिद्रव्यसाचिव्येन जम्बूखादकादिदृष्टान्तसिद्धतथाविधपरिणामधर्मत्वात् क्षीरवदिति प्रयोगार्थः प्रयोगस्तु सन्नात्मा परिणामित्वात् क्षीरवदिति गतं लेश्याद्वारं प्राणापानद्वारमाह । उच्छ्वासादित्यचेतनधर्मविलक्षणप्राणापानसद्भावान्नाभावो जीवः किन्तु भाव एव इति धर्मसद्भावेन परिस्पंदोपेतपुरुषवदिति प्रयोगार्थः । प्रयोगः । पुनरत्र व्यतिरेकी द्रष्टव्यः । सात्मकं जीवच्छरीरं प्राणादिमत्वात् यत्तु सात्मकं न भवति तत्प्राणादिमदपि न भवति यथाऽऽकाशमिति गाथार्थः । उक्तं प्राणापानद्वारम् । दश० ।

(७) अधुनेन्द्रियद्वारमुच्यते ॥

अक्खाणे याणि परत्थिगाणि वासाइ वेहकरणत्ता ।

गहवेयगनिज्जरओ कम्मस्सन्नो जहाहारो ॥ २४४ ॥

व्या०-अक्षाणीन्द्रियाणि एतानीति लोकप्रसिद्धानि देहाश्रयाणि परार्थानि आत्मप्रयोजनानि वास्यादिवदिह करणत्वादिह लोके वास्यादिवदिति प्रयोगार्थः । आदानान्येवेंद्रियाणि तत्किमर्थं । भेदोपन्यासः उच्यते । निर्वृत्त्युपकरण द्वारेण द्वैविध्यख्यापनार्थं ततश्च तत्रोपकरणस्य ग्रहणमिह तु निर्वृत्तेरिति । प्रयोगस्तु परार्थाश्चक्षुरादयः संघातत्वाच्छयनासनादिवत् न चायं विशेषविरुद्धः । कर्म संबंधस्यात्मनः संघातरूपत्वाभ्युपगमात् उक्तमिंद्रियद्वारम् ॥ दश० ॥

इदानीं बंधादिद्वाराण्याह ॥ ग्रहणवेदकनिर्ज्जरक ।कर्मणोऽन्यो यथाहार इति तत्र ग्रहणं कर्मणो बंध. वेदनमुदयः निर्ज्जरा क्षयः यथाहार इत्याहारविषयाणि ग्रहणादीनि न कर्त्रादिव्यतिरिक्तेन तथा कर्मणोऽपीति प्रयोगार्थः । प्रयोगस्तु विद्यमानभोक्तृकमिदं कर्म ग्रहणवेदननिर्जरणसद्भावादाहारवदिति गाथार्थः । उक्तानि बंधादिद्वाराणि । व्याख्याता च प्रथमा प्रतिद्वारगाथा ॥ दश० अ० ४ ॥

सांप्रतं द्वितीयामधिकृत्य चित्तादिस्वरूपव्याचिख्यासयाह—

चित्तं तिकालविसयं, चेयणपच्चक्खसन्नमणुसरणं ।

विण्णाणणेगभेयं, कालमसंखेयरं धरणा ॥ २४५ ॥

व्या० ॥ चित्तं त्रिकालविषयं बोधतोऽतीतानागतवर्त्तमानग्राहि चेतनं चेतना सा प्रत्यक्षवर्त्तमानार्थग्राहिणी । संज्ञानसंज्ञा सा अनु स्मरणं इदं तदिति ज्ञानं । *विविधं* ज्ञानं विज्ञानमनेकभेदमनेकप्रकारं अनेकधर्मिणि वस्तुनि तथा तथाध्यवसाय इत्यर्थः । कालमसंख्येयेतरं असंख्येयं संख्येयं

या धारणा अविच्युतिस्मृतिवासनारूपा तत्र वासनारूपा संख्येयवर्षायुषामसंख्येयं संख्येयवर्षायुषां च संख्येयमिति गाथार्थः ॥

अत्थस्स ऊहबुद्धी ईहा चेट्टत्थअवगमो उ मई ।
संभावणत्थतक्का गुणपच्चक्खाघडोव्व त्ति ॥ २४६ ॥

व्या० ॥ अर्थस्येहा बुद्धिः संज्ञितः परनिरपेक्षार्थपरिच्छेद इति भावः। ईहा चेष्टा किमयं स्थाणुः किं वा पुरुष इति सदर्थपर्यालोचनरूपा। अर्थावगमस्त्वर्थपरिच्छेदस्तु शिरःकण्डूयनादिधर्मोपपत्तेः पुरुष एवायमित्येवंरूपा मतिः (संभावणत्थतक्कत्ति) प्राकृतशैल्या अर्थसंभावना। एवमेव चायमर्थ उपपद्यत इत्यादिरूपा तर्का इत्थं द्वाराणि व्याख्याय सर्वे एते चित्तादयो गुणा वर्तन्त इति जीवाख्यगुणप्रतिपादकेन प्रयोगार्थेनोपसंहरन्नाह ॥

गुणप्रत्यक्षत्वाद्धेतोः घटवदस्ति जीव इति गम्यते। एष गाथार्थः एतदेव स्फुटयति ।

जम्हा चित्ताईया, जीवस्स गुणा हवंति पच्चक्खा ।
गुणपच्चक्खत्तणओ घडुव्व जीवो अओ अत्थि ॥ २४७ ॥

व्या० ॥ यस्माच्चित्तादयोऽनन्तरोक्ता जीवस्य गुणा जीवस्य शरीरादिगुणविधर्मत्वात्। एते च भवंति प्रत्यक्षाः स्वसंवेद्यत्वात् यतश्चैवं गुणप्रत्यक्षत्वाद्धेतोर्घटवज्जीवः। अतोऽस्तीति प्रयोगार्थः । प्रयोगस्तु सन्नात्मा गुणप्रत्यक्षत्वात् घटवदयं घटवदात्मनोऽचैतन्यापादनेन विरुद्धः विरुद्धोऽपि नाम बाधने इति वचनात् एतच्च ग्रन्थान्तरेषु बाधनमिति गाथार्थः । व्याख्यातं मूलद्वारगाथाद्वयेन लक्षणद्वारम् ॥ दश० अ० ४ ॥

(७) अस्तित्वद्वारमिदानीं तथा चाह भाष्यकारः ।

अत्थित्ति दारमहुणा जीवस्सइ अत्थि विज्जए नियमा ।
लोआयपमयपच्चत्थमुच्चए तत्थिमो हेऊ ॥ २४८ ॥

व्या० अस्तीति द्वारमधुना सांप्रतमवसरप्राप्तं। तत्रैतदुच्यते। जीवः सन् पृथिव्यादिविकारदेहमात्ररूपः भवतीति सिद्धिसाध्यता । न नु ततोऽन्योऽस्तीत्याशङ्कापनोदायाह । अस्त्यन्यश्चैतन्यरूपस्तदपि मातृचैतन्योपादानं भविष्यति परलोकयायी तु न विद्यत इति आशङ्कापोहायाह विद्यते नियमान्नियमेन तथा चाह लोकायतमतार्थं नास्तिकाभिप्रायनिराकरणार्थमुच्यते एतत्तस्य चानन्तरोदित एवाभिप्राय इति सकलानि विशेषणानि तत्र लोकायतमतविघाते वर्तव्ये अयं वक्ष्यमाणो हेतुः अन्यथानुपपत्तिरूपो युक्तिमार्ग इति गाथार्थः ।

जो चिंतेइ सरीरे नत्थि अहं स एव होइ जीवोत्ति ।
न हु जीवम्मि असंते संसयउप्पायओ अन्नो ॥ २४९ ॥

व्या० यश्चिन्तयति न शरीरे अत्र लोकप्रतीतेनाऽस्म्यहं स एव विमर्शको भवति जीव इति कथमेतदेवमित्याह । न यस्माज्जीवे असति मृतदेहादौ संशयोत्पादकोऽन्यः प्राणादिरचेतनत्वात्संशयस्येति गाथार्थः ।

एतदेव भावयति—

जीवस्स एस धम्मो, जा ईहा अत्थि नत्थि वा जीवो ।
खाणुमणुस्साणुगया, जह ईहा देवदत्तस्स ॥ २५० ॥

व्या० जीवस्यैव स्वभाव एष धर्मः या ईहा सदसत्पर्यालोचनात्मिका किं विनिर्दिष्टेत्याह । अस्ति नास्ति वा जीव इति। इदं प्रसिद्धं निदर्शनमाह। स्थाणुमनुष्यानुगता किमयं स्थाणुः किं वा पुरुष इत्येवंरूपा । यथेहा देवदत्तस्य जीवतः इति गाथार्थः ॥

प्रकारान्तरेणैतदेवाह—

सिद्धं जीवस्स अत्थित्तं सद्दादेवाणुमीयए ।
नासओ भुवि भावस्स सद्दो हवइ केवलो ॥ २५१ ॥

व्या० ॥ सिद्धं प्रतिष्ठितं जीवस्यास्तित्वं सदसत्त्वविकल्पं कुत इत्याह। शब्दादेव जीव इत्यस्मादनुमीयते एतदेवमित्याह नासत इति। न असतः अविद्यमानस्य भुवि पृथिव्यां भावस्य पदार्थस्य शब्दो भवति वाचक इति खरविषाणादिशब्दैर्व्यभिचारमाशंक्याह । केवलः शुद्धोऽसमासः। खरादिपदसंसृष्टश्च विषाणादिशब्दा इति सदर्थ एतद्विवरणायैवाह भाष्यकारः ।

अत्थित्ति निव्विगप्पो, जीवो नियमाउ सद्दओ सिद्धो ।
कम्हा सुद्धपयत्ता घडखरसिंगाणुमाणाओ ॥ २५२ ॥

व्या० ॥ अस्तीति निर्विकल्पो जीवः निर्विकल्प इति निःसंदिग्धः नियमात् नियमेनैव प्रतिपत्तव्यस्तथा शब्दतः सिद्धो वाचकाद्वाच्यप्रतीतेः । एतदेव प्रश्नद्वारेणाह । कस्मादेतदेवमित्याह । शुद्धपदत्वात् केवलपदत्वाज्जीवशब्दस्य घटखरशृङ्गानुमानादनुमानशब्दो दृष्टान्तवचनः घटखरशृङ्गदृष्टान्तादिति प्रयोगार्थः प्रयोगस्तु । मुख्येनार्थेनार्थवान् जीवशब्दः शुद्धपदत्वात् घटशब्दवत् यस्तु मुख्येनार्थेनार्थवान् न भवति स शुद्धपदमपि न भवति । यथा खरशृङ्गवद् इति गाथार्थः ॥

परमभिप्रायमाशंक्य परिहरन्नाह ॥

चोयगसुद्धपयत्ता सिद्धी जइ एव सुन्नसिद्धि अम्हं पि ।
तं न भवइ संतेणं जं सुन्नं सुन्नगेहं च ॥ २५३ ॥

व्या० ॥ शुद्धपदत्वात्सिद्धिर्यदि जीवस्य एवं तर्हि शून्यसिद्धिरस्माकमपि शून्यशब्दस्यापि शुद्धपदत्वादित्यभिप्रायः। अत्रोत्तरमाह तन्न भवति यदुक्तं परेण । कुत इत्याह। सता विद्यमानेन पदार्थेन यत्तस्मात् शून्यं शून्यमुच्यते। किं यदित्याह शून्यगृहमिव तथा हि। देवदत्तेन रहितं शून्यगृहमुच्यते। निवृत्तो घटो नष्ट इति न त्वनयोर्जीवशब्दस्य इव यवद्व्यादिष्टं वाच्यमस्तीति गाथार्थः ॥

प्रकारान्तरेणास्तित्वपक्षमेव समर्थयन्नाह—

मिच्छाभवेउ सव्वन्ना जे केई पारलोइया ।
कत्ता चेवोपभोत्ता य जइ जीवो न विज्जइ ॥ २५४ ॥

व्या० मिथ्याभवेयुरनृताः स्युः सर्वेऽपि ये केचन पारलौकिका दानादयः । यदि किमित्याह । कर्ता चैव कर्मणां स्वकृतस्य च तत्फलस्य यदि जीवो न विद्यते परलोकयायीति गाथार्थः ।

एतदेवाभ्युच्चयमतिव्याप्त्यनुग्रहार्थं स्पष्टयन्नाह ॥

पाणिदया तव नियमा बंभं दिक्खा य इंदियनिरोहो ।
सव्वं निरत्थयं तं जइ जीवो न विज्जइ ॥ २५५ ॥

व्या० ॥ प्राणिदया तपोनियमाः कर्मक्षपणार्थमाशिरस्तादिरूपाः तथा ब्रह्म ब्रह्मचर्यं दीक्षा च योगपट्ट

इंद्रियनिरोधः प्रव्रज्याप्रतिपत्तिरूपः सर्वं निरर्थकं निष्फलमेतत् यदि जीवो न विद्यते परलोकयायीति गाथार्थः ॥ किंच शिष्टाचारतो मार्गः शिष्टैरनुगंतव्य इति ॥

तन्मार्गव्यापनायाह—

लोइया वेइया चेव तहा सामाइया विऊ ।
निच्चो जीवो पिहो देहो इइ सव्वे ववत्थिया ॥ २५६ ॥

व्या० लोके भवो लोके वा विदिता इति लौकिकाः इतिहासादिकर्त्तारः । एवं वैदिकाश्चैव वैदिकवृद्धास्तथा सामायिकास्त्रिपिटकादिसमयवृत्तयो विद्वांसः पंडिताः नित्यो जीवोऽनित्यः । एवं पृथग् देहाच्छरीरादित्येवं सर्वे व्यवस्थिता नान्यथेति गाथार्थः ॥

एतदेव व्याचष्टे—

लोगे अच्छेज्ज भेज्जो वेए सपुरीसदद्धगसियालो ।
समए ज्जह मासिगओ तिविहो दिव्वाइ संसारो ॥ २५७ ॥

व्या० ॥ लोके अच्छेद्योऽभेद्य आत्मा पठ्यते यथोक्तं गीतासु ॥ अच्छेद्योऽयमभेद्योऽयमविकार्योऽयमुच्यते ॥ नित्यः सर्वगतः स्थाणुरचलोऽयं सनातनः ॥ इत्यादि तथा वेदे सपुरीषो दग्धः शृगालः पठ्यत इति ॥ यथोक्तं ॥ शृगालो वै एष जायते यः सपुरीषो दह्यते अथापुरीषो दह्यते आक्रोधुका अस्य प्रजाः प्रादुर्भवंतीत्यादि ॥ तथा समये "अहमासीदज इति पठ्यते" तथा च बुद्धवचनं ॥ अहमासं भिक्षवो हस्ती षड्दंतः शंखसंनिभः ॥ शुकः पंजरवासी च शकुंतो जीवजीवकः ॥ इत्यादि तथा त्रिविधो दिव्यादि संसारः पैष्विदिष्यते । देवमानुषतिर्यग्भेदेन । आदिशब्दाच्चतुर्विधः पैश्चिमारकादिवर्त्तिनेति गाथार्थः ॥

अत्रैव प्रकारांतरेण तदस्तित्वमाह—

अत्थि सरीरविहाया पइनियया गारयाइ भावओ ।
कुंभस्स जइ कुलालो, सो मुत्तो कम्मजोगाओ ॥ २५८ ॥

॥ व्या० ॥ अस्ति शरीरस्यौदारिकादेर्विधाता विधातेति कर्त्ता । कुत इत्याह—प्रतिनियताकारत्वादिसद्भावात् आदिमत्प्रतिनियताकारत्वादित्यर्थः । दृष्टांतमाह कुंभस्य यथा कुलालो विधाता कुलालवदेवमसावपि मूर्त्तः प्राप्नोतीति विरुद्धमाशंक्य परिहरन्नाह ॥ अमावात्मा यः शरीरविधाता असौ मूर्त्तः कर्मयोगादिति मूर्तकर्मसंबंधादिति गाथार्थः ।

अत्रैव शिष्यव्युत्पत्तये अन्यथा तद्ग्रहविधिमाह ॥

फरिसेण जहा वाऊ, गिज्झई कायसंसिओ ।
नाणाईहिं तहा जीवो, गिज्झई कायसंसिओ २५९ ॥

॥ व्या० ॥ स्पर्शेन शीतादिना यथा वायुर्गृह्यते कायसंगतो देहसंगतः अदृष्टोऽपि तथा ज्ञानादिभिर्ज्ञानदर्शनेच्छादिभिर्जीवो गृह्यते कायसंगतो देहसंगत इति गाथार्थः । अस्तकृदनुमानादस्तित्वमुक्तं जीवस्यानुमानं च प्रत्यक्षपूर्वकं न चैनं केचन पश्यंतीति तत्प्राशोभनमेतदित्याशंक्याह ।

अणिंदियगुणं जीवं दुन्नेयं मंसचक्खुणा ।
सिद्धा पासंति सव्वन्नू नाणसिद्धा य साहुणो ॥ २६० ॥

॥ व्या० ॥ अतींद्रियगुणं अविद्यमानरूपादींद्रियग्राह्यगुणं जीवममूर्त्तत्वादिधर्मकं दुर्ज्ञेयं दुर्लक्ष्यं मांसचक्षुषा छद्मस्थेन पश्यति सिद्धाः सर्वथा संज्ञातसिद्धादिव्यवच्छेदार्थं सर्वज्ञग्रहणं तत्र भ्रपमादय इत्यर्थः ज्ञानसिद्धाश्च साधवो भवस्थकेवलिन इति गाथार्थः ।

सांप्रतमागमादस्तित्वमाह—

अत्तवयणं उ सत्थं दिट्ठा य तओ अइंदियाणं पि ।
सिद्धी गहणाईणं, तहेव जीवस्स विन्नेया ॥ २६१ ॥

व्या० ॥ आप्तवचनं तु शास्त्रं आप्तो रागादिरहितः तु शब्दोऽवधारणे आप्तवचनमेव अनेन अपौरुषेयत्वव्यवच्छेदमाह तस्यासंभवादिति । दृष्टा च तत इत्युपलब्धा च तत आप्तवचनशास्त्रात् अतींद्रियाणामपि इंद्रियगोचरातिक्रांतानामपि सिद्धिर्ग्रहणादीनामिति उपलब्धिश्चंद्रोपरागादीनामित्यर्थः तथैव जीवस्य विज्ञेयेति । अतींद्रियस्याप्याप्तवचनप्रामाण्यादिति गाथार्थः । मूलद्वारगाथायां व्याख्यातमस्तित्वद्वारम् ॥ दश० अ० ४ ॥

(१०) आत्मनोऽस्तित्वे आचाराङ्गसूत्रम्—

णेव सयं लोगं अब्भाइक्खेज्जा णेव अत्ताणं अब्भाइक्खेज्जा ।
जे लोयं अब्भाइक्खइ से अत्ताणं अब्भाइक्खइ जे अत्ताणं
अब्भाइक्खइ से लोयं अब्भाइक्खइ ॥ आचा० ॥

नैवात्मानं शरीराधिष्ठातारं ज्ञानगुणं प्रत्यात्मसंवेद्यं प्रत्याचक्षीत तस्य शरीराधिष्ठातृत्वेनाहमिदं शरीरं केनचिदभिसंधिमता तथात्यकमिदं शरीरं केनचिदभिसन्धिमतैवेत्येवमादिभिर्हेतुभिः प्रमाणितत्वात्र च साधितसाधनं विदधत् विद्वज्जनमनांसि रंजयति ॥ आचा० टी० ॥

(स्थानाङ्गटीकायामपि) आत्मा न विद्यते तस्य प्रत्यक्षादिभिरनुपलभ्यमानत्वात् । तथाहि विद्यमानकर्तृकमिदं शरीरम्भोगत्वादोदनादिवद्व्योमकुसुमं विपक्षः स च कर्त्ता जीव इति न त्वोदनकर्तृवन्मूर्त आत्मा सिद्ध्यतीति साध्यविरुद्धो हेतुरिति नैवं संसारिणो मूर्त्तत्वेनाप्यभ्युपगमात् आह च "जो कत्ता सो जीवो सज्झविरुद्धोत्ति ते मई होज्जा । मोत्ताइ य संगाओ, तत्तो संसारिणो दोसो त्ति" ॥ १ ॥ न चायमेकान्तो यदुत लिङ्गाविनाभूतलिङ्गोपलम्भव्यतिरेकेणानुमानस्यैकान्ततोऽप्रवृत्तिरिति हसितादिलिङ्गविशेषस्य ग्रहावर्यालिङ्ग्यविनाभावग्रहणमन्तरेणापि गमकत्वदर्शनात् । न च देह एव ग्रहो येनाऽन्यदेहे दर्शनमविनाभावग्रहणनियामकं भवतीति । उक्तञ्च "सो नेगतो जम्हा लिंगेहिं समं अदिट्ठपुव्वो वि । गहलिंगदरिसणाओ, गहाणुमेओ सरीरंमिति ॥ १ ॥ आगमगम्यत्वं त्वात्मन एवं आया अत एव वचनाच्च चास्याप्तानान्तर्विसंवादः सम्भावनीय । सुनिश्चिताप्तप्रणीतत्वादस्येति । यदुक्तव्यमत्र तत्तु स्थानांतरादवसेयमिति किंचात्माभावे जातिस्मरणादयस्तथा प्रेतमूर्तीकृतविनाशादिकृतानुग्रहोपघातौ च न प्राप्नुयुरिति ॥ स्था० अ० १ ॥

(११) तथा च विशेषावश्यके इन्द्रभूतिमुद्दिश्य भगवता महावीरेणोक्तम्—

जीवे तुह संदेहो पच्चक्खं जं न घिप्पइ घडोव्व ।
अच्चंता पच्चक्खं च नत्थि लोए खपुष्फं व ॥

आयुष्मन्निन्द्रभूते तवैव संदेहः । किमयमात्मा अस्ति नास्ति वा उभयहेतुसद्भावात्तत्र नास्त्यात्मेति अयमात्मा प्रत्यक्षतोऽत्यन्तमग्राह्यत्वादिह यदत्यन्ताप्रत्यक्षं तल्लोके नास्त्येव यथा खपुष्पं यत्त्वस्ति तत्प्रत्यक्षेण गृह्यत एव यथा घट इत्यर्थः व्यतिरेकदृष्टान्तः परमाणवोऽपि हि अप्रत्यक्षाः किंतु घटादिकार्यतया परिणतास्ते प्रत्यक्षत्वमुपयान्ति पुनरेवमा-

मा कदाचिदपि भावप्रत्यक्षमुपगच्छन्त्यतोऽत्यंतविरो-
णमिति ॥

एवं च मन्यसे त्वं किमित्याह-

न य सो अणुमाणगम्मो जम्हा पच्चक्खपुव्वयं तंपि ।

पुव्वोवलद्धसंबंधसरणउ लिंगलिंगीणं ॥

न चासावात्मानुमानं प्रत्यक्षपूर्वकं वर्त्तते कुत इत्याह ॥ पुव्वोवलद्धेत्यादि लिंग्यते गम्यतेऽतीन्द्रियार्थोऽनेनेति लिंगमथ वा लीनं तिरोहितमर्थं गमयतीति लिंगं धूमकृतकत्वादिकं तदस्यास्तीति लिंगी वह्न्यनित्यत्वादिस्तयोर्लिंगलिंगिनोर्यः पूर्वं महानसादौ प्रत्यक्षादिना उपलब्धकार्यकारणभावादिकः संबंधस्तस्य यत् स्मरणं तस्मादिति । इदमुक्तं भवति । पूर्वं महानसादावग्निधूमयोर्लिंगिलिंगयोरन्वयव्यतिरेकवंतमविनाभावमध्यक्षतो गृहीत्वा तत उत्तरकालं क्वचित्कांतारपर्वतनितंबादौ गगनावलंबिनीं धूमलेखामवलोक्य प्राग्गृहीतं संबंधमनुस्मरति ॥ तद्यथा । यत्र २ धूमस्तत्र २ मया दृष्टो वह्निः यथा महानसादौ धूमश्चात्र दृश्यते तस्माद्वह्निनापीह भवितव्यमित्येवं लिंगग्रहणसंबंधस्मरणाभ्यां तत्र प्रमाता हुतभुजमवगच्छति न चैवमात्मना लिंगिना सार्द्धं कस्यापि लिंगस्य प्रत्यक्षेण संबंधः सिद्धोऽस्ति यतः तत्संबंधमनुस्मरतः पुनस्तल्लिंगदर्शनाज्जीवसंप्रत्ययः स्याद्यदि पुनर्जीवलिंगयोः प्रत्यक्षतः संबंधसिद्धिः स्यात्तदा जीवस्यापि प्रत्यक्षत्वाभ्युपगमादनुमानवैयर्थ्यं स्यात्तत एव तत्सिद्धेरिति ॥

एतदेवाह—

न य जीवलिंगसंबंधदरिसणमभूजउ पुणो सरउं ।

तल्लिंगदरिसणाउ जीवे संपच्चओ होज्जा ॥

न च वक्तव्यं सामान्यतो दृष्टादनुमानादादित्यादिगतिवज्जीवः सिध्यति यथा गतिमानादित्यो देशांतरप्राप्तो देवदत्तवदिति यथाहं । तद्यदत्र दृष्टांतधर्मिणि सामान्येन देशांतरप्राप्तिर्गतिपूर्विका प्रत्यक्षेणैव निश्चिता सूर्येऽपि तां तथैव प्रमाता साधयतीति युक्तं न चैवमत्र क्वचिदपि दृष्टांते जीवसत्त्वेनाविनाभूतः कोऽपि हेतुरध्यक्षेणोपलक्ष्यते इत्यतो न सामान्यतो दृष्टादप्यनुमानात्तत्सिद्धिरिति ।

न चागमगम्योऽपि जीव इति दर्शयति ।

नागमगम्मो वि तओ भिज्जइ जं नागमोऽणुमाणाउ ।

नइ कोवि पच्चक्खो जीवो जस्सागमो वयणं ॥

न चागमगम्योऽपि तस्मादसौ जीवो यदस्मादागमोऽप्यनुमानाद्भिद्यते परमार्थतस्तु तदप्यनुमानमेव । तथाहि ॥ शब्दप्रमाणमागम उच्यते शब्दश्च द्विविधो दृष्टार्थविषयोऽदृष्टार्थविषयश्च । तत्र दृष्टार्थविषयाच्छब्दाद्या प्रतीतिः सा वस्तुतोऽनुमानमेव यतः क्वचित् प्रथमं पृथुबुध्नोदराकारं [illegible] घटशब्दं प्रयुज्यमानं दृष्ट्वा तद्व्यवहार इति [illegible] भूत्वा पृथुबुध्नोदराद्याकारवस्तुविषय एव घट उच्यते । [illegible] [illegible] यथा पूर्वं हुताशनादौ [illegible] [illegible] पृथु- [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] प्रलक्षितमिति ।

पलब्धो यत्र सत्यात्मशब्दश्रवणादात्मेति प्रत्ययो भवेदिति । यदपि स्वर्गनरकाद्यदृष्टार्थविषयं शाब्दं प्रमाणं तदपि तत्त्वतोऽनुमानं नातिवर्तते । तथाहि । प्रमाणं स्वर्गनरकाद्यदृष्टार्थविषयं वचनं अविसंवादिवचनाप्तप्रणीतत्वाच्चन्द्रार्कोपरागादिवचनवदित्येवमनुमानादेव तत्र प्रमाणता । न चैवंभूतमाप्तं कमपि पश्यामो यस्यात्मप्रत्यक्ष इति तद्वचनमागम इति प्रतिपत्तुमर्हतीति शेषः ॥ किं च ॥ "जेणागमा विरुद्धा परोप्परमउज्जुत्तो । सव्वप्पमाणविसयाइउ जीवोत्ति तो बुद्धी" ॥ यतश्च तीर्थकानां संबंधिनः सर्वेऽप्यागमाः परस्परविरोधिनः खल्वतोऽपि संशय एवात्मनो युक्तो न तु निश्चयस्तथाहि केचिदागमा आत्मनो नास्तित्वमेव प्रतिपादयंति यदाहुर्नास्तिकाः ॥ "एतावानेव लोकोऽयं यावानिन्द्रियगोचरः । भद्रे वृकपदं पश्य यद्वदंति बहुश्रुता" इत्यादि भट्टोऽप्याह विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्य संज्ञास्ति । सुगतस्त्वाह ॥ "न रूपं भिक्षवः पुद्गल इत्यादि" ॥ आत्मास्तित्ववचनान्यागमेषु श्रूयंते यथा च वेदः । न ह वै सशरीरस्य प्रियाप्रिययोरपहतिरस्त्यशरीरं वा वसंतं प्रियाप्रिये न स्पृशत इति" तथा "अग्निहोत्रं जुहुयात्स्वर्गकाम" इत्यादि कापिलागमे तु प्रतिपाद्यते ॥ अस्ति पुरुषः अकर्ता निर्गुणो भोक्ता चिद्रूप इत्यादि तस्मादागमानां परस्परविरुद्धत्वादागमप्रमाणादप्यात्मसत्त्वासिद्धिः ॥ इदं च वैशेषिकमतेन प्रत्यक्षानुमानागमलक्षणं प्रमाणत्रयमुपन्यस्तं एतच्च स्वयं द्रष्टव्यं । उपमाप्रमाणगम्योऽपि जीवो न भवति तत्र हि यथा गौस्तथा गवय इत्यादावेव सादृश्यमसन्निकृष्टेऽर्थे बुद्धिमुत्पादयति न चेहाऽन्यः कश्चित् त्रिभुवनेऽप्यात्मसदृशः पदार्थोऽस्ति यद्दर्शनादात्मानमवगच्छामः कालाकाशदिगादयो जीवतुल्या विद्यंते इति चेन्न तेषामपि विवादास्पदीभूतत्वेन तदवच्छिन्नत्वात् ॥ अर्थापत्तिसाध्योऽपि जीवो न भवति न हि दृष्टः श्रुतो वा कोऽप्यर्थ आत्मानमंतरेण नोपपद्यते यद्वलात्तं साधयामस्तस्मात्सर्वप्रमाणविषयातीतो जीव इति तव बुद्धिः भावोपलंभप्रमाणपंचकविषयातीतत्वात् प्रतिषेधसाधकाभावात् षष्ठप्रमाणविषय एव जीव इत्यर्थः ॥ इति पूर्वपक्षः ॥ अथैतत्प्रतिविधानमाह—

गोयम ! पच्चक्खो च्चिय जीवो जं संसयाइविन्नाणं ।

पच्चक्खं च न सज्झं जह सुह दुक्खं सदेहम्मि ॥

गौतम ! भवतोऽपि प्रत्यक्ष एवायं जीवः किमन्येन प्रमाणांतरोपन्यासेन कोऽयं जीवो मम प्रत्यक्ष इति चेदुच्यते । यदेतत्तवैव संशयादिविज्ञानं स्वसंवेदनसिद्धं हृदि स्फुरति स एव जीवः संशयादिज्ञानस्यैव तदनन्यत्वेन जीवत्वात् यच्च प्रत्यक्षं तन्न प्रमाणांतरेण साध्यं यथा स्वशरीरे एवात्मसंवेदनसिद्धाः सुखदुःखादयः प्रत्यक्षसिद्धमपि समानमनर्गलविभ्रमान्ध्यवादिनं प्रति साध्यत एवेति चेन्नैवं निराकृताः सर्वे प्रत्ययाः प्रत्ययत्वात्स्वप्नप्रत्ययवदित्यादेरनुमानादिबाधकप्रमाणस्यैव तत्र निराकरणादत्र त्वात्मग्राहकः प्रत्यक्षप्रमाणाभावादिति । इतश्चायं प्रत्यक्षो जीव इत्याह "कयवं करेमि काहं, वाहं अहं वयपाय मा ऊप ॥ अन्न पच्चक्खो निकाय कज्जोवएसाउ ॥ वा इत्ययथा इत्याद्यहं कृतवानहं करिष्याम्यहं उक्तवानहं अर्पितवानहं

ज्ञातवानहं जानेऽहं ज्ञास्याम्यहमित्यादिप्रकारेण योऽयं त्रैकालिकः कार्यव्यपदेशस्तद्विषयप्रयुज्यमानतया तत्समुत्थोऽप्यहंप्रत्यय एतस्मादपि प्रत्यक्ष एवात्मेति प्रपद्यस्व अयं ह्यहं प्रत्ययो नानुमानिकोऽलिङ्गिकत्वान्नाप्यागमादिप्रमाणसंभवस्तदनभिज्ञानां बालगोपालादीनामप्यन्तर्मुखतया आत्मग्राहकत्वेन स्वसंविदितस्य तस्योत्पादात् घटादौ चानुत्पादादिति ॥ अपि च ॥ "कह पडिवन्नमहंति य किमत्थि नत्थि त्ति संसओ कहणु । सइ संसयंमि कस्साहं पच्चओ जुज्जते निम्मूलो" ॥ हंत कथमसति जीवेऽहमिति प्रतिपन्नं त्वया विषयाभावे विषयिणोऽनुत्थानप्रसङ्गादिह यथास्याप्रत्ययस्य विषय इति चेन्न जीवविप्रमुक्तेऽपि देहे तदुत्पत्तिप्रसंगात्सति च जीवविषये अस्मिन्नहंप्रत्यये किमहमस्मि नास्मीति भवतः संशयः कथं केन प्रकारेणोपजायते अह प्रत्ययग्राह्यस्य जीवस्य सद्भावादस्म्यहमिति निश्चय एव युज्यते इति भावः सति च अस्मिन्नात्मास्तित्वसंशये कस्यायमहंप्रत्ययो युज्यते निर्मूलत्वेन तदनुत्थानप्रसंगादिति ॥

जीवाभावे संशयविज्ञानमपि न युज्यत एवेति तद्दर्शयन्नाह—

जइ नत्थि संसयच्चिय किमत्थित्ति संसओ कस्स ।
संसयए व सरूवे गोयम किमसंसयं होज्जा ॥

व्या० ॥ यदि संशयी जीव एवादौ नास्ति तर्ह्यस्ति नास्तीति संशयः कस्य भवतु । संशयो हि विज्ञानाख्यो गुण एव न च गुणिनमंतरेण गुणः संभवति । देहोऽत्र गुणीति चेन्न देहस्य मूर्त्तत्वात् ज्ञानस्य चामूर्त्तत्वाद्बोधरूपत्वाच्च न चाननुरूपाणां गुणगुणिभावो युज्यते आकाशरूपादीनामपि तद्भावापत्त्यातिप्रसङ्गप्राप्तेः संसए एवेत्यादि वा इत्यथवा संशयिते स्वरूपे गौतम ! किमसंशयं भवेदिदमुक्तं भवति ॥ किमस्मि नास्म्यहमित्येवं यः स्वरूपेऽपि संशेते आत्मनिश्चयोऽपि यस्य नास्तीत्यर्थः । तस्य शेषं कर्म बंधमोक्षादिकं घटपटादिकं च किमसंशयमसंदिग्धं स्यान्न किंचित्सर्वं संशय एव तस्य स्यादित्यर्थः । आत्मास्तित्वनिश्चयमूलो हि शेषवस्तुनिश्चय इति भावः । अहंप्रत्ययग्राह्यं च प्रत्यक्षमात्मानं निह्नुवानस्याश्रावणः शब्द इत्यादिवत्प्रत्यक्षविरुद्धो नाम पक्षाभासस्तथा वक्ष्यमाणात्मास्तित्वानुमानसद्भावान्नित्यः शब्द इत्यादिवदनुमानविरुद्धोऽपि तथा अहमस्मि संशयीति प्रागभ्युपगम्योत्तरत्र नास्मीति प्रतिजानानस्य सांख्यस्य अनित्यः कर्त्ता अचेतन आत्मेत्यादिवदभ्युपगमविरोधः बालगोपालांगनादिप्रसिद्धं चात्मानं निराकुर्वतोऽचन्द्रः शशीत्यादिवल्लोकविरोधः अहं नाहं चेति गदतो माता मे वन्ध्येत्यादिवत्स्ववचनव्याहतिः एवं च प्रत्यक्षादिबाधितेऽस्मिन् पक्षे पक्षधर्मतया हेतुरप्यसिद्धः हिमवत्पलपरिमाणादौ पिशाचादौ च प्रमाणपंचकाभावस्य च वृत्तेरनैकान्तोऽपि वक्ष्यमाणानुमानप्रमाणसिद्धे चात्मनि विपक्षवृत्तेर्विरुद्धश्चेति ।

प्रकारांतरेणाप्यात्मनः प्रत्यक्षसिद्धतामाह—

गुणपच्चक्खत्तणओ गुणी वि जीवो घडोव्व पच्चक्खो ।
घडओ विघेप्पइ गुणी गुणमेत्तग्गहणओ जम्हा ॥

व्या० प्रत्यक्ष एव गुणी जीवः स्मृतिजिज्ञासाचिकीर्षाजिगमिषासंशीत्यादिज्ञानविशेषास्तद्गुणानां स्वसंवेदनप्रत्यक्षसिद्धत्वादिह यस्य गुणाः प्रत्यक्षाः स प्रत्यक्षो दृष्टो यथा घटः प्रत्यक्षगुणश्च जीवस्तस्मात्प्रत्यक्षः यस्मात् घटोऽपि गुणी रूपादिगुणप्रत्यक्षत्वादेव प्रत्यक्षस्तद्वदिह ज्ञानादिगुणप्रत्यक्षत्वादात्मापीत्याह । अनैकांतिकोऽयं यस्मादाकाशगुणः शब्दः प्रत्यक्षोऽस्ति न पुनराकाशमिति तदयुक्तं । यतो नाकाशगुणः शब्दः किं तु पुद्गलगुणः ऐन्द्रियकत्वाद्रूपादिवदिति । गुणानां प्रत्यक्षत्वे गुणिनस्तद्रूपतायाः किमायातमिति चेदुच्यते—

अन्नोऽणन्नो व गुणी होज्ज गुणेहिं जइ नाम सो णन्नो ।
ननु गुणमेत्तग्गहणे घेप्पइ जीवो गुणी सक्खं ॥
अह अन्नो एवं गुणिणो न घडादउ विपच्चक्खो ।
गुणमेत्तग्गहणाउ जीवंमि कओ वियारोयं ॥

व्या० ननु भवता गुणेभ्यो गुणी किमर्थांतरभूतोऽभ्युपगम्यतेऽनर्थांतरभूतो वा यदि नाम सोऽनन्यस्तेभ्योऽनर्थांतरभूतस्तर्हि ज्ञानादिगुणग्रहणमात्रादेव गुणी जीवः प्रत्यक्षेण गृह्यत इति सिद्धमेव प्रयोगो यो यस्मादनर्थांतरं स तद्ग्रहणेन गृह्यते यथा वाससि रागो गुणेभ्योऽनर्थांतरं च गुणी तस्माद्गुणग्राहकप्रत्यक्षेण सोऽपि गृह्यत एवेति । अथ गुणेभ्योऽन्योऽर्थांतरभूत एव गुणिनः प्रत्यक्षस्तदर्थांतरभूतस्य रूपादिगुणमात्रस्यैव ग्रहणादिह यद्यस्मादर्थांतरभूतं तद्ग्रहणेऽपि नेतरस्य ग्रहणं यथा घटे गृहीते पटस्य अर्थांतरभूताश्च गुणिनो गुणा इष्यंते अतो गुणग्रहणेऽपि न गुणिग्रहणमतो घटादीनामपि समानोऽग्रहणदोषः । कोऽयं नाम भवतः केवले जीवे विचारो नास्तित्वविषयाशंका वोच्यते ॥ पच्चक्खं जं न दीसइ घडोव्वेत्यादि अथ द्रव्यविरहिताः केऽपि न संत्येव गुणाः इत्यतस्तद्ग्रहणद्वारेण गृह्यंत एव घटादयो न त्वेवमात्मनापि समानमेव किं च गुणिनो गुणानामर्थांतरत्वेऽभ्युपगम्यमाने गुणिभावमात्रद्वारे प्रत्यक्षस्यापि ज्ञानादिगुणेभ्यः पृथगात्मा गुणित्वादभ्युपगमेनापि सिद्ध्यत्येवेति ॥

अत्र पराभिप्रायमाशंकमानः आह—

मन्नसि अत्थि गुणी न य देहत्थंतरं तओ किं तु ।
देहे नाणाइगुणा सोच्चिय नाणं गुणी जुत्तो ॥

व्या० अथ मन्यसे अस्त्येव ज्ञानादिगुणानां गुणिनैव तैः प्रत्यक्षैर्मेह मयाभ्युपगम्यतामसौ परं देहादर्थांतरं न कोऽप्यसौ इति किंतु देह एव ज्ञानादयो गुणाः समुपलभ्यंते अतः स एव तेषां गुणी युक्तो यथा रूपादीनां घटः । प्रयोगे देहगुणा एव ज्ञानादयस्तत्रैवोपलभ्यमानत्वाद्गौरकृशस्थूलतादिवत् ॥

अत्रोत्तरमाह—

नाणादओ न देहस्स मुत्तिमत्ताइओ घडस्सेव ।
तम्हा नाणाइगुणा जस्स स देहाहिओ जीवो ॥

प्रयोगो देहस्य संबंधिनो ज्ञानादिगुणा न भवंत्येव तस्य मूर्तिमत्त्वाच्चाक्षुषत्वाच्च घटवच्च द्रव्यगीतो गुणा सर्वोऽपि तत्रो यो ज्ञानादिगुणानामनुरूपो अमूर्तोऽचाक्षुषश्च गुणी स देहातिरिक्तो जीवो ज्ञातव्यः । अथ ज्ञानादयो न देहस्येति

प्रत्यक्षबाधितमिदं देह एव ज्ञानादिगुणानां प्रत्यक्षेणैव ग्रहणात्तदयुक्तं अनुमानबाधितत्वादस्य प्रत्यक्षस्य ॥ तथा हि ॥ इहेंद्रियातिरिक्तो विज्ञाता तदुपरमेऽपि तदुपलब्धार्थानुस्मरणाद्यो हि यदुपरमेऽपि यदुपलब्धमर्थमनुस्मरति स तस्मादर्थांतरदृष्टो यथा पंचवातायनोपलब्धार्थानुस्मर्ता देवदत्त इत्यादि वायुभूतिप्रश्ने ॥

वक्ष्याम इति उपसंजिहीर्षुराह–

इह सुहदेसेणायं पच्चक्खो सव्वहामहं जीवो ।

अविहयनाणत्तणओ तुह विन्नाणं च पडिवज्जा ॥

इत्येवमुक्तप्रकारेण स्वशरीरे तथापि देशतः प्रत्यक्षोऽयमात्मा छद्मस्थत्वेन भवतः सर्वस्यापि वस्तुनो देशविषयत्वात् घटवत्तथाहि सर्वमपि स्वपर्यायतोऽनंतपर्यायवस्तुछद्मस्थः प्रत्यक्षेण साक्षात् तद्देशमेव गृह्णाति प्रत्यक्षेण च प्रदीपादिप्रकाशेनैव देशतः प्रकाशिता अपि घटादयो व्यवहारतः प्रत्यक्षा उच्यंते एव सर्वात्मना च केवली प्रत्यक्षमेव वस्तु प्रकाशयत्यतो ममाप्रतिहिताऽनंतज्ञानत्वेन सर्वात्मनापि प्रत्यक्षोऽयं जीवो यथाऽतीन्द्रियमपि त्वत्संशयविज्ञानमिति प्रतिपद्यस्वेति ।

परशरीरे तर्हि कथमित्याह–

एवं चिय परदेहेणुमाणओ गिण्ह जीवमत्थित्ति ।

अणुवित्तिनिव्वित्ताओ विण्णाणमयं सरूवेव्व ॥

यथा स्वदेहे एवं परदेहेऽपि गृहाण जीवमनुमानतः कथमित्याह अस्ति विद्यते इति कथंभूतं जीवमित्याह ॥ विज्ञानमयं विज्ञानात्मकं अनुमानमेव सूचयन्नाह । अणुवित्तिनिवित्तीउ सरूवे वत्ति । इदमुक्तं भवति । परशरीरेऽप्यस्ति जीवः । इष्टानिष्टयोः प्रवृत्तिनिवृत्तिदर्शनाद्यथा स्वरूपे स्वात्मनि इह यत्रेष्टानिष्टयोः प्रवृत्तिनिवृत्ती दृश्येते तत्सात्मकं दृष्टं यथा स्वशरीरं यथा च प्रवृत्तिनिवृत्ती दृश्येते परशरीरे इतस्तदपि सात्मकं आत्माभावे चेष्टानिष्टप्रवृत्तिनिवृत्ती न भवतो यथा घटद्रव्यानुमानात्परशरीरेऽपि जीवसिद्धिरत्र ।

अपरमतमाशंक्योत्तरमाह कश्चन लिंगेहिं समं मयासि लिंगी पुरा जहा गहिओ । [illegible] न लिंगजुत्तोणुमेय [illegible] । [illegible] जहा लिंगेहिं समं न दिट्ठपुव्वो वि । गहलिंग [illegible] गहोत्तु मेओ [illegible] । यच न य जीवलिंगं सं- [illegible] ॥ पूर्वोक्तपूर्वपक्षानुसारेण मन्यसे त्वं किमित्याह । [illegible] न लिंगी लिंगादनुमेयोऽसौ [illegible] किमित्याह यतो न [illegible] लिंगैः कै- [illegible] समं लिंगी जीवः क्वापि केनापि पुरा पूर्वं [illegible] [illegible] [illegible] [illegible] पूर्वमेवंप्रत्यक्षाच्च लिंगाज्जीवोऽनुमी- [illegible] इति [illegible] प्रतिविधीयते ऽसौ अनेकांतः [illegible] समं [illegible] प्रत्यक्षोऽपि [illegible] देवयोनिविशेषतः [illegible] [illegible] [illegible] महालिंग- [illegible] ॥

[illegible]–

देहस्सत्थिविहाया पयनियथागारउ घडस्सेव ।

अक्खाणं च करणओ दंडाईणं कुलालोव्व ॥

देहस्यास्ति विधाता कर्त्तेति प्रतिज्ञा आदिमत्प्रतिनियताकारत्वाद् घटवद्यत्पुनरकर्तृकं तदादिमत्प्रतिनियताकारमपि न भवति यथा भ्रविकारः यश्च देहस्य कर्त्ता स जीवः प्रतिनियताकारत्वं मेर्वादीनामप्यस्ति न च तेषां कश्चिद्विधाता इति तैरनैकांतिको हेतुः स्यादतोऽनुक्तमप्यादिमत्वविशेषणं द्रष्टव्यमिति । तथा अक्षाणामिंद्रियाणामस्त्यधिष्ठाता इत्यध्याहारः करणत्वाद्यथा चक्रचीवरमृत्सूत्रदंडादीनां कुलालः यच्च निरधिष्ठातृकं तत्करणमपि न भवति यथाकाशं यश्चेंद्रियाणामधिष्ठाता स जीव इति ॥

तथा–

अत्थिंदियविसयाणं आयाणादेव भावओ वस्सं ।

कम्मार इवादाया लोए संडासलोहाणं ॥

इह यत्रादानादेयभावस्तत्रावश्यमदाता समस्ति यथा लोके संदंशकलोहानां कर्मारोऽयस्कारः विद्यते चेंद्रियविषयाणामादानादेयभावोऽतस्तेषामप्यस्त्यादाता स च जीव यत्र त्वादाता नास्ति तत्रादानादेयभावोऽपि न विद्यते यथाकाश इति ॥

तथा ॥

भोत्ता देहाईणं, भोज्जणओ नरोव्व भत्तस्स ।

संघाया यत्तणओ सात्थियअत्थी घरस्सेव ॥

इह देहादीनां भोक्ता समस्ति भोग्यत्वाद्यथा शाल्यादिभक्तवस्त्रादीनां नरः यस्य च भोक्ता नास्ति तद्भोग्यमपि न भवति यथा खरविषाणं भोग्यं च शरीरादिकं ततो विद्यमानभोक्तृकमिति तथा अर्थी स्वामी ततश्च देहानां विद्यते स्वामी संघातरूपत्वादादिशब्देन मूर्तिमत्त्वादिन्द्रियत्वाच्चाक्षुषत्वाद्योऽप्यनेकांतिकतापरिहारार्थं संभवाद्विहितविशेषणा हेतवो योजनीयाः ॥ यथा गृहादीनां सूत्रधारादय इति दृष्टांतः यत्पुनरस्वामिकं तत्संघातादिरूपमपि न भवति यथा गगनकुसुमं संघातादिरूपं च देहादिकं तस्माद्विद्यमानस्वामिकमिति । आह ननु (देहस्सत्थि विहाया) इत्यादिना शरीरादीनां कर्त्रादय एव सिध्यंति । न तु प्रस्तुतो जीवः ॥

इत्याशंक्योत्तरमाक्षेपपरिहारौ चाह–

जो कत्ताइ स जीवो मज्झ विरुद्धोति ते मई होज्जा ।

मुत्ताइपसंगाओ ततो संसारिणो दोसो ॥

यश्चायमनंतरदेहेन्द्रियादीनां कर्त्ता अधिष्ठाता आदाता भोक्ता अर्थी योक्तः स सर्वोऽपि जीव एव अन्यस्येदृशस्यानुपपद्यमानत्वेन कर्तृत्वाद्यसंभवादिति ॥ अथ साध्यविरुद्धसाधकत्वाद्विरुद्धा एते हेतव इति तव मतिर्भवेत्तथा हि घटादीनां कर्त्रादिरूपाः कुलालादयो मूर्तिमतः संघातरूपा अनित्यादिस्वभावाश्च दृष्टा इत्यतो जीवोऽप्येवंविध एव सिध्यति तद्विपरीतश्च चिदात्मकं साधयितुमिष्ट इत्येवं साध्यविरुद्धसाधकत्वं हेतूनामिति तदेतदयुक्तं यतः ननु संसारिणो जीवस्य साधयितुमिष्टत्वाद्दोषोऽयं न [illegible] संघातोपगूढत्वात् सशरीरत्वाच्च कथंचिन्मूर्तत्वादिधर्मयुक्त एवेति भावः ।

अथ स्वत्यात्मसाधकमनुमानमाह-

अत्थिं चिय ते जीवो, संसयओ सोम ! थाणुपुरिसोव्व ।
जं संदिद्धं गोयम ! तं तत्थाऽत्थन्नत्थ धुवं ॥

हे सौम्य ! गौतम अस्त्येव तव जीवः संशयतः संशयसद्भावादत्र संशयस्तवास्ति यथा स्थाणुपुरुषौ संशयश्च तव जीवे तस्मादस्त्येवायं तथाहि स्थाणुपुरुषयोरूर्ध्वतारोहपरिणाहाद्युभयसाधारणधर्मप्रत्यक्षतायां चलनशिरःकण्डूयनवयोनिलयनवल्ल्यारोहणाद्युभयगतविशेषधर्माप्रत्यक्षतायां चोभयगतैतद्धर्मानुस्मरणे च सत्येकतरविशेषनिश्चयचिकीर्षोः किमिदमिति विमर्शरूपः संशयः प्रादुरस्ति एवंभूते च स्थाणुपुरुषादिगतसंशये तत्स्थाणुपुरुषादिकं वस्त्वस्त्येव ॥ अवस्तुनि संशयायोगात् एवमात्मशरीरयोरपि प्रागुपलब्धसामान्यविशेषधर्मस्य प्रमातुस्तयोः सामान्यधर्मप्रत्यक्षतायां विशेषधर्माप्रत्यक्षत्वेऽपि च तद्विषयानुस्मृतौ सत्यामेकतरविशेषोपलिप्सोः किमयमात्मा किंवा शरीरमात्रमिदमिति विमर्शरूपः संशयो जायते अयं चात्मशरीरयोः सत्व एवोपपद्यते नैकतरस्याप्यभावेऽतोऽस्ति जीवः।अथैवं ब्रूषे अस्थ्यादिषु स्थाणुपुरुषसंशये तत्र विवक्षितप्रदेशे अनयोरेकतर एव भवति न पुनरुभयमपि ततः कथमुच्यते विद्यमान एव वस्तुनि संशयो भवतीति। तदयुक्तमभिप्रायापरिज्ञानात् न हि वयमेवं ब्रूमस्तत्रैव प्रदेशे तदुभयमप्यस्तीति किं तु यद्गतसंदेहः तद्वस्तु तत्रान्यत्र वा प्रदेशे ध्रुवमस्त्येव अन्यथा षष्ठभूतविषयोऽपि संशयः स्यादेतदेवाह।जं संदिद्धमित्यादि तस्मात् संशयविषयत्वादस्त्येव जीव इति स्थितं ।

अथ पूर्वपक्षमाशंक्य परिहरन्नाह-

एवं नामाविसाणं खरस्स पत्तं न तं खरं चेव ।

अन्नत्थ तदत्थि चिय एवं विवरीयगाहे वि ॥

इह यदि यत्र संशयस्तेनावश्यमेव भवितव्यं । एवं ततः खरविषाणमप्यस्तीति प्राप्तं तत्रापि कस्यचित्संशयसद्भावादुच्यते ॥ न त्वभिहितमत्र यदुत तत्रान्यत्र वा विद्यमान एव वस्तुनि संशयो भवति नाविद्यमाने खरस्य विषाणं खरविषाणं नास्तीत्यत्र च कोऽर्थ इत्याह ॥ (न तं खरे चेवत्ति) खर एव तद्विषाणं नास्ति अन्यत्र गवादावस्त्येवेति न कश्चिद्व्यभिचारः। एवं (विवरीयगाहेव्वत्ति) इदमुक्तं भवति यदा विपर्यस्तः कश्चित्स्थाणौ पुरुष एवायमित्यादिविपरीतग्रहं करोति तदाप्ययमेव क्षेपो वाच्यः सोऽपि विपरीतप्रदेशे विपरीतं पुरुषादिकं वस्तुनि सत्येवोपपद्यते नाविद्यमान इत्यर्थः । एवं भवदभिप्रायेण योऽस्मादृशां शरीरे आत्मास्तित्वाभिमानो नायमात्मनः सर्वथा नास्तित्वे युज्यते इति ॥

इतोऽप्यस्ति जीवः कुत इत्याह

अत्थि अजीवविवक्खो पडिसेहाओ घडोऽघडस्सेव ।

नत्थि घडोत्ति व जीवत्थित्तपरो नत्थि सद्दोयं ॥

अत्र प्रयोगः प्रतिपक्षवानयमजीवोऽत्र व्युत्पत्तिमच्छुद्धपदप्रतिषेधात् यत्र व्युत्पत्तिमतः शुद्धपदस्य प्रतिषेधो दृश्यते स प्रतिपक्षवान् दृष्टो यथा घटोऽघटप्रतिपक्षवान् अत्र ह्यघटशब्देऽशुद्धस्य व्युत्पत्तिमतश्च पदस्य प्रतिषेधो यथा-खरविषाणं, अडित्थ इत्यादि । अखरविषाणस्य लक्षणस्याऽशुद्धस्य सामायिकपदस्य प्रतिषेध इत्यतोऽत्र खरस्य विषाणं खरविषाणमित्यादिव्युत्पत्तिमत्त्वे सत्यपि खरविषाणलक्षणो विपक्षो नास्ति अडित्थ इत्यत्र तु व्युत्पत्तिरहितस्य डित्थस्य डित्थपदस्य प्रतिषेध इति समासरहितत्वेन शुद्धत्वे सत्यपि नाथद्वयमवस्थितो डित्थलक्षणः कोऽपि पदार्थो जीववद्विपक्षभूतोऽस्तीति । नत्थि घडोत्ति वेत्यादि य थापि नास्त्यात्मेति च योऽयमात्मनिषेधध्वनिः स जीवास्तित्वे नांतरीयक एव यथा नास्त्यत्र घट इति शब्दोऽन्यत्र घटास्तित्वाविनाभाव्येव प्रयोगो यस्य निषेधः क्रियमाणो दृश्यते तत् क्वचिदस्त्येव यथा घटादिकं निषिध्यते च भवता नास्ति जीव इति वचनात् जीवस्तस्मादस्त्येव यच्च सर्वथा नास्ति तस्य निषेधो न दृश्यत एव यथा खरविषाणकल्पानां पंचभूतातिरिक्तभूतानां निषिध्यते च त्वया जीवस्तस्मान्निषेध एवायं तत्सत्त्वसाधक इति,अनैकांतिकोऽयं हेतुरसतोऽपि खरविषाणादेर्निषेधदर्शनादित्याशंक्याह-

असओ नत्थि निसेहो संजोगाइपडिसेहओ सिद्धं ।

संजोगाइचउक्कं पि सिद्धमत्थंतरे नियमं ॥

असतोऽविद्यमानस्य नास्ति न संभवत्येव निषेध इति सिद्धं कुत इत्याह॥संयोगादिप्रतिषेधादादिशब्दात् समवायसामान्यविशेषपरिग्रहः एतदुक्तं भवति इह यत्किंचित्क्वचित् देवदत्तादिकं निषिध्यते तस्यान्यत्र सत एव विवक्षितस्थाने कस्मिंश्चित्संप्रयोगसमवायसामान्यविशेषलक्षणचतुष्टयमेव निषिध्यते न तु सर्वथैव देवदत्तादेरभावः प्रतिपाद्यते । तत्र नास्ति गृहे देवदत्त इत्यादिषु गृहदेवदत्तादीनां सतामेव संयोगमात्रं निषिध्यते । न तु तेषां सर्वथैवास्तित्वमपाक्रियते तथा नास्ति खरविषाणमित्यादिषु खरविषाणादीनां सतामेव समवायमात्रं निराक्रियते तथा नास्त्यन्यश्चन्द्रमा इत्यादिषु विद्यमानस्यैव चन्द्रमसोऽन्यचन्द्रनिषेधाच्चन्द्रसामान्यमात्रं निषिध्यते न तु सर्वथा चन्द्राभावः प्रतिपाद्यते । तथा न संति घटप्रमाणा मुक्ता इत्यादिषु घटप्रमाणतामात्ररूपो विशेषो मुक्तानां निषिध्यते न तु मुक्ताभावः ख्याप्यत इति एवं च सति नास्त्यात्मेत्यत्र विद्यमानस्यैवात्मनो यत्र क्वचन येन केनचित्सह संयोगमात्रमेव त्वया निषेद्धव्यम् यथा नास्त्यात्मा वपुषीत्यादि न तु सर्वथात्मनः सत्त्वमिति । अत्राह कश्चित् ननु यदि यन्निषिध्यते तदस्ति तर्हि मत्त्रिलोकेश्वरताप्यस्ति युष्मदादिभिर्निषिध्यमानत्वात्तथा चतुर्णां समवायादिप्रतिषेधानां पंचमोऽपि प्रतिषेधप्रकारोऽस्ति त्वयैव निषिध्यमानत्वात् तदयुक्तं त्रिलोकैश्वर्यविशेषमात्रं भवतो निषिध्यते यथा घटप्रमाणत्वं मुक्तानां न तु सर्वथैश्वर्यं स्वशिष्यादीश्वरतायास्तथापि विद्यमानत्वात्तथा प्रतिषेधस्यापि पंचसंख्याविशिष्टत्वमपाक्रियते न तु सर्वथा प्रतिषेधस्याभावश्चतुःसंख्याविशिष्टस्य तस्य सद्भावात् । ननु सर्वमप्यसंबद्धमिदं तथा मत्त्रिलोकेश्वरत्वं तावदसदेव निषिध्यते प्रतिषेधस्यापि पंचसंख्याविशिष्टत्वमविद्यमानमेव निवार्यते तथा संयोगसमवायसामान्यविशेषाणामपि

[illegible] प्रतिषेध इत्यतो यदि- [illegible] न युक्त इत्यानेस्याद (संयो- [illegible]) इदमुक्तं भवति देवदत्तादीनां सं- [illegible] निषिध्यते । भर्यातरे तु तेषां [illegible] गृहेणेव सह देवदत्तस्य सं- [illegible] भर्थांतरेण तु हेमहरमालादिना सह [illegible] गृहस्यापि देवदत्तेन सह संयोगो ना- [illegible] विद्यत एव एवं विभागस्यापि [illegible] सामान्यमपि द्वि- [illegible] एव मान्यर्थांतरे तु [illegible] तु कृष्णाण्डादावस्येव [illegible] तीर्थकराद्यावस्येव [illegible] प्रतिषेधो मान्यर्थांतरे स्वयुक्त [illegible] विवक्षया भूयो यन्निषिध्यते [illegible] यत्र निषिध्यते [illegible] शरीरे जीवे नि- [illegible]

[illegible]

द्रितः शरीरे जीवोपचारः क्रियते । किं वेदनं एव गतः स जीवो दह्यतामिदं शरीरमिति [illegible] इत्यादि यस्माच्च ज्ञानादिगुणयुतो [illegible] कथं देह एव जीवः प्रागिहैव चोक्तं [illegible] देहो मूर्तिमत्त्वाद् घटवत्तथा देहेन्द्रियातिरिक्त [illegible] तुपरमेपि [illegible] तद्वाप्यप्रतिबुध्यमाने इंद्रभूतौ भगवानाह-

जीवोत्थित्ति सच्चं मव्वयणाओ वसेसवयणं व ।
सव्वन्नु वयणओ वा अणुवइसव्ववयणं व ॥

जीवोऽस्तीत्येतद्वचः सत्यं मद्वचन[illegible] वयणोवचनवत् यच्च सत्यं न भवति [illegible] मपि न भवति यथा कूटसाक्षिवचनं । [illegible] जीवोऽस्तीतिवचनं सर्वज्ञवचन[illegible] वदिति ॥ यदि वा-

भयरागदोसमोहा भाउ सव्वमणइयाइं व ।
सव्वं वियमेवयणं जाणयमज्झत्थवयणं व ॥

सर्वमपि मद्वचनं सत्यमनतिपाति च दोष[illegible] रहितत्वादिह यद्भयादिरहितस्य वचनं [illegible] मार्गज्ञस्य भयरहितस्य [illegible] रागद्वेषरहितस्य [illegible] वचनं तथा च मद्वचनस्मात्सत्यमनतिपाति [illegible] अत्र गौतममतमाशंक्य भगवानुत्तरमाह-

कह सव्वण्णुत्ति मई जेणाहं सव्वसंसयच्छेई ।
पुच्छसु व जं न जाणसि जेण व मे पच्चओ होज्जा ॥

[illegible]

[illegible]

मन्नसि मज्जं गेसु विय मयभावो भूयसमुदओ भूओ ।
विण्णाणमेत्तमा या भूएणुविणस्सइ समुब्भूओ ॥
अत्थि न या पेच्च सण्णं जं पुव्वभवेभिहाणममुगोत्ति ।
जं भणियं न भवाउ भवंतरं जाइ जीवो त्ति ॥

गौतमेत्यामंत्रणं वेदपदानां श्रुतिवाक्यानाममीषां विज्ञानघन एवैतेभ्यः इत्यादीनां चेतसि वर्तमानानामर्थं यथास्थितं त्वं न जानासि नावबुध्यसे किमित्यत आह ॥ यदस्मात्त्वमात्माभिप्रायेणैवंभूतमिहार्थं मन्यसे विकल्पयसीति संबंधः कथंभूतमित्याह (विण्णाणघणो चियत्ति) पृथिव्यादिभूतानां विज्ञानलवसमुदायो विज्ञानघनः पृथिव्यादिविज्ञानांशानां पिंड इत्यर्थः अवधारणं त्वात्मवादिपरिकल्पितस्य भूतसमुदायातिरिक्तस्य ज्ञानदर्शनादिगुणाश्रयस्यात्मनो निरासार्थं । भूतेभ्यः पृथिव्यादिभ्यः समुदितेभ्यो न तु व्यस्तेभ्यो ज्ञानस्य तत्समुदायपरिणामांगीकारादिति भावः ॥ मद्यांगेषु मद्यकारणेषु धातक्यादिषु मदभाव इव कथंभूतो विज्ञानघन इत्याह (भूयसमुदयभूओ विण्णाणमेत्तमायत्ति) भूतसमुदायादुद्भूतस्तदैव जातो न तु परभावात्कश्चिदागतो विज्ञानमात्ररूप आत्मेत्यर्थ । समुत्थायोत्पद्य ततस्तान्येव पृथिव्यादिभूतानि विनाशमनुयानान्यत्र लक्षीकृत्य भूयः पुनरपि स विज्ञानघनो विज्ञानमात्ररूप आत्मा विनश्यति न त्वात्मवादिनामिवान्यभवं याति अत एव न प्रेत्य भवे परभवे संज्ञास्ति यत्पूर्वभवे नारकादिजन्मन्यभिधानमासीत्तत्परभवे नास्ति यदुतामुको नारको देवो वा भूत्वा इदानीं मनुष्यः संवृत्त इत्यादि नारकादेः प्रागेव सर्वनाशं नष्टत्वादिति भावः किमिह वाक्ये तात्पर्यवृत्त्या प्रोक्तं भवतीत्याह जं भणियमित्यादि सर्वथात्मनः समुत्पद्य विनष्टत्वान्न भवाद्भवांतरं कोऽपि यातीत्युक्तं भवति ॥

यथेवंभूतमस्य वेदवाक्यस्यार्थमहमवगच्छामि तत्र किमित्याह

गोयम पयत्थमेवं मन्नंतो नत्थि मन्नसे ।
वक्कंतरेसु य पुणो भणिओ जीवो जमत्थित्ति ॥
अग्गिहवणाइकिरिया फलं च तो संसयं कुणसि जीवे ।
मा कुरु न पयत्थोयं इमं पयत्थं निसामेहि ॥

गौतमास्य वाक्यस्य दर्शितरूपमेव पदार्थं मन्यमानस्त्वं नास्तीत्येवं मन्यसे यस्माच्च पुनर्नह वै स शरीरस्य प्रियाप्रिययोरपहतिरस्त्यशरीरं वा वसंतं प्रियाप्रिये न स्पृशत इत्यादिषु वेदवाक्यांतरेष्वस्तीत्येवं जीवो भणितः प्रतिपादितस्तथाग्निहोत्रं जुहुयात् स्वर्गकाम, इत्यादि वचनादग्निहवनादिक्रियायाः फलं च परभविकं श्रूयते न चेदं भवांतरयायिनमात्मानमन्तरेणोपपद्यतेऽतः किं जीवोऽस्ति नास्ति वेत्येवं संशयं जीवे करोषि त्वं तदमुं मा कृथाः यस्माद्विज्ञानघन एवेत्यादिवाक्यस्य नायमर्थो यं भवानध्यवस्यति किं त्वमुं वक्ष्यमाणं पदार्थमिह निशामयाकर्णयेति ॥
तमेव दर्शयति ॥

विण्णाणाओ णण्णो विण्णाणघणत्ति सव्वसो वा वि ।
स भवइ भूएहिंतो घडविण्णाणाइभावेण ॥
ताइं चिय भूयाइं सोणुविणस्सइ विणस्समाणाइं ।
अत्थंतरोवओगे कमसो विण्णायभोएणं ॥

इह विज्ञानघनो जीव उच्यते विशिष्टं ज्ञानं विज्ञानं ज्ञानदर्शनोपयोग इत्यर्थः तेन विज्ञानेन सहानन्यभूतत्वादेकघत्तया घनत्वं निविडत्वमापन्नो विज्ञानघनो जीव उच्यते । (सव्वसो वा वित्ति) सर्वतः प्रतिप्रदेशमनंतानंतविज्ञानपर्यायसंघातघटितत्वाद्विज्ञानघनो जीवः एवकारेण तु विज्ञानघन एवासौ न तु नैयायिकादीनामिव स्वरूपेण निर्विज्ञानत्वाज्जडोऽसौ बुद्धिस्तु तत्र समवेतैवेति नियम्यते स भवन् युज्यत इति क्रिया केभ्य इत्याह (भूएहिंतोत्ति) भूतानीह घटपटादिज्ञेयवस्तुरूपाण्यभिप्रेतानि तेभ्यो ज्ञेयभावेन परिणतेभ्यः केन भवतीत्याह घटः पटोयमित्यादिविज्ञानभावेन घटादिज्ञानपर्यायेण ततः किमित्याशंक्य तान्येवानुविनश्यतीत्यस्यार्थमाह (ताइं चियत्यादि) तान्येव ज्ञानालंबनभूतानि घटादिभूतानि क्रमशः कालक्रमेण व्यवधानस्थगनान्यमनस्कत्वाद्यनर्थांतरोपयोगे सति विज्ञेयभावेन ज्ञानविषयभावेन विज्ञानमाप्नुवानान्यनु पश्चात्तद्बोधपर्यायेण स विज्ञानघनो विनश्यतीति संबंधः । ज्ञानपर्यायेण घटादिभ्यो ज्ञेयभूतेभ्यो जीवः समुत्थाय कालक्रमाद् व्यवधानादिनार्थांतरोपयोगे सति ज्ञेयभावेन तान्येव विनाशमाप्नुवानान्यनुविनश्यतीति तात्पर्यार्थः किमित्थं सर्वथाऽयमात्मा विनश्यति नेत्याह ॥ "पुव्वावरविण्णाणोवगओ विगयसंभवसहाओ विण्णाणसन्तईए विण्णाणघणोयमविनासी" एक एवायमात्मा त्रिस्वभावः कथमित्युच्यते अर्थांतरोपयोगकाले पूर्वविज्ञानोपयोगेन तावदयं विगमस्वभावो विनश्वररूप. अपरविज्ञानोपयोगतस्तु संभवस्वभाव उत्पादरूपः अनादिकालप्रवृत्तसामान्यविज्ञानमात्रसंतत्या पुनरयं विज्ञानघनो जीवो विनष्ट एवावतिष्ठते एवमन्यदपि सर्ववस्तूत्पादव्ययध्रौव्यस्वभावमेवावगंतव्यं न पुनः किमपि सर्वथोत्पद्यते विनश्यति वेति ॥

न प्रेत्य संज्ञास्तीत्येतद्व्याचिख्यासुराह—

न च पेच्च नाणसन्ना वातिट्ठए संपओवओगाओ ।
विण्णाणघणाभिक्खो जीवो यं वेयपयभिहिओ ॥

न च प्रत्येति न चान्यवस्तूपयोगकाले प्राक्तनज्ञानसंज्ञास्ति कुतः सांप्रतवस्तुविषयोपयोगादिदमुक्तं भवति यथा घटोपयोगनिवृत्तौ पटोपयोग उत्पद्यते तदा घटोपयोगसंज्ञा नास्ति तदुपयोगस्य निवृत्तत्वात् किं तु पटोपयोगसंज्ञैवास्ति तदुपयोगस्यैव तदानीमुत्पन्नत्वात् तस्माद्विज्ञानघनाख्यो वेदपदेष्वभिहितोयं जीवस्ततो गौतम ! प्रतिपद्यस्वेनमिति ।

पुनरपीह प्रेर्यमाशंक्य परिहरन्नाह—

एवं पि भूयधम्मो नाणं तब्भावभावउ बुद्धी ।
तत्तो तदभावम्मि वि अन्नाणं वेयसमयम्मि ॥
अत्थमिए आइच्चे चंदे संतासु अग्गिवायासु ।
किं जोइरयं पुरिसो अप्पज्जोइत्ति निद्दिट्ठो ॥

बुद्धीति स्याद् बुद्धिः प्रकारस्य एवमपि (समवइभूयेहिंतो) इत्यादिना युष्मद्व्याख्यानप्रकारेपीत्यर्थः । पृथिव्यादिभूतधर्म एव ज्ञानम्भूतस्वभावात्मकमेव ज्ञानमेवेति भावः कुत इत्याह ॥ तम्भावभावउत्ति एतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यतीति वचनाद्भूतसद्भावे ज्ञानस्य भावात्तदभावे चाभावादित्यर्थः । यस्य च भावे एव यद्भवत्यभावे न भवति तत्तस्यैव धर्मो यथा चन्द्रमसश्चन्द्रिका तथा च ज्ञानमनुविदधाति भूतान्वयव्यतिरेकौ तस्माद्भूतधर्म एव तदयुक्तं विशिष्टमेव हि नीलपीतादिभूतग्राहकं ज्ञानं तदन्वयव्यतिरेकावनुविदधाति न तु सामान्यज्ञानमात्रं यस्माद्भूताभावेपि वेदप्रोक्ते मनये सिद्धांते सामान्यज्ञानं भणितमेवेति शेषः । केन वाक्येनेत्याह ॥ अस्तमित इत्यादि अस्तमिते आदित्ये याज्ञवल्क्यचन्द्रमस्यस्तमिते शांतेऽग्नौ शांतायां वाचि किं ज्योतिरेवायं पुरुषः आत्मज्योतिः सम्राडिति होवाच ज्योतिरपीति ज्ञानमाह आदित्यास्तमयादौ किं ज्योतिरित्याह अयं पुरुष इति पुरुष आत्मेत्यर्थः अयं च कथंभूत इत्याह ([illegible]) आत्मैव ज्योतिरस्य सोऽयमात्मज्योतिः ज्ञानात्मक इति इदयं निर्दिष्टो वेदविद्भिः कथितस्ततो न ज्ञानं भूतधर्म इत्यर्थः ॥

इतश्च न ज्ञानं भूतधर्मः कुत इत्याह–

तदभावे भावाउ भावे वा भावउं न तद्धम्मो ।

जह घडभावा भावेविजम्मराउ पडो भिन्नो ॥

न भूतधर्मो ज्ञानं मुक्तावस्थायां भूताभावेपि भावात्सुप्त[illegible] वा भावादित्यर्थः [illegible] घटस्य धर्मः पटो न भवति किं तु [illegible] इत्याह घटभावाभावे विपर्ययाच्च घटभावे[illegible] च भावादित्यर्थः विशे० ॥ आ० म० ॥ आचा० ॥ [illegible] ॥

(१६) [illegible] सूत्रकृतांगे–यथा

एए पंच महब्भूया, तेब्भो एगोत्ति आहिया ।

अह तेसिं विणासेणं, विणासो होइ देहिणो ॥ सूत्र० ॥

एतान्यनन्तरोक्तानि पृथिव्यादीनि पंचमहाभूतानि यानि ते[illegible] पदार्थो[illegible] । न पृथिव्या[illegible] ॥ [illegible] । तथेन्द्रियेण [illegible] । [illegible] [illegible] । [illegible] ॥ अनुमानप्रमाणेन, [illegible] [illegible]

तिकानामाकाशस्यापि [illegible]
न दोषायेति । ननु च यदि भूतव्यतिरिक्तोऽपरः [illegible] स्माख्यः पदार्थो न विद्यते कथं तर्हि मृत इति [illegible] शोऽस्याह । अथैषां कायाकारपरिणतौ [illegible] त्यां नद्भूर्ध्वं तेषामन्यतमस्य विनाशेऽपगमे [illegible] भयोर्वा देहिनो देवदत्ताख्यस्य [illegible] श्च मृत इति व्यपदेशः प्रवर्तते न पुनर्जीवापगम [illegible] व्यतिरिक्तचैतन्यवादिपूर्वपक्ष इति ।

अत्र प्रतिसमाधानार्थं निर्युक्तिकृदाह–

पंचण्हं संजोए अण्णगुणाणं च चेयणाइ गुणो ।

पंचिंदियठाणाणं, ण अण्णमुणियं मुणइ अण्णो ॥

(पंचण्हं संजोए इत्यादि) पंचानां पृथिव्यादीनां संयोगे कायाकारपरिणामे चैतन्यादिकः । [illegible] भाषाचंक्रमणादिकश्च गुणो न भवतीति प्रतिज्ञा [illegible] स्त्वत्र हेतुत्वेनोपात्ताः । दृष्टांतस्त्वभ्यूह्यः । [illegible] नोपादानं । तत्रेदं चार्वाकः प्रष्टव्यः । यदेतद्भूतानां [illegible] चैतन्यमभिव्यज्यते तत्किं तेषां संयोगेऽपि स्वातंत्र्य [illegible] स्वित् परस्परापेक्षया पारतंत्र्ये इति । किंचातः ॥ न तावत्स्वातन्त्र्ये यत आह (अन्नगुणाणं चेति) चैतन्यं [illegible]

[illegible]

द्रव्यगुणा आपः पञ्चगुणा तेजः [illegible] नगुणमाकाशमिति । यदि वा प्रागभिहिता [illegible] पृथिव्यादीनामेकैकपरिहाण्याऽन्ये गुणाश्चैतन्यादि [illegible] तदेवं पृथिव्यादीन्यन्यगुणानि । चशब्दो [illegible] कल्पयन्त्यतासूचनार्थः । चैतन्यगुणे साध्ये पृथिव्यादीनामन्यगुणानां सतां चैतन्यगुणस्य पृथिव्यादीनामेकैक[illegible]स्याभावात्तत्समुदायाच्चैतन्याख्यो गुणः सिद्ध्यतीति [illegible] भूतसमुदायः स्वातन्त्र्ये सति धर्मित्वेनोपादीय[illegible] न तस्य चैतन्याख्यो गुणोऽस्तीति साध्यो धर्मः पृथिव्या[illegible] अन्यगुणत्वात् । यो योऽन्यगुणानां समुदायस्तत्र तत्र [illegible] गुणोत्पत्तिर्न भवतीति यथा सिकतासमुदाये स्निग्धगुण[illegible] तैलस्य नोत्पत्तिरिति घटपटसमुदाये वा न स्तम्भाद्या[illegible] व इति । दृश्यते च कार्ये चैतन्यं तदात्मगुणो भविष्यति न भूतानामिति । अस्मिन्नेव साध्ये हेत्वंतरमाह (पंचिं[illegible] ठाणाणं ति) पंच च तानि स्पर्शनरसनघ्राणचक्षुःश्रोत्राख्यानीन्द्रियाणि तेषां स्थानान्यवकाशास्तेषां चैतन्यगुणाभाव[illegible] भूतसमुदाये चैतन्य । इदमत्र हृदय [illegible] [illegible] इन्द्रियाण्येव द्रष्टृणि । यानि [illegible] उपादानकारणानि [illegible] मुदाये चैतन्यमिति । इन्द्रियाणां चामूनि स्थानानि । तत्र [illegible] स्पर्शेन्द्रियस्याकाशं [illegible] । घ्राणेन्द्रियस्य पृथि[illegible] [illegible] चक्षुरिन्द्रियस्य तेजो[illegible] । [illegible] इन्द्रियस्य वायुरिति । [illegible] [illegible] । [illegible] । [illegible] (ण अण्णमुणियं मुणइ अण्णो) इत्यादि [illegible]

प्रत्येकं स्वविषयग्रहणादन्यविषये चाप्रवृत्तेर्नान्यदिन्द्रियज्ञातमन्यदिन्द्रियं जानातीत्यतो मया पंचापि विषया ज्ञाता इत्येवमात्मकः संकलनाप्रत्ययो न प्राप्नोत्यनुभूयते चायं तस्मादयं नैव द्रष्टा भवितव्यम्। तस्यैव च चैतन्यं न भूतसमुदायस्येति। प्रयोगः पुनरयं भूतसमुदाये चैतन्यं न द्वारस्थेन्द्रियाणां प्रत्येकविषयग्राहित्वे सति संकलनाप्रत्ययाभावात्। यदि पुनरन्यगृहीतमप्यन्यो गृह्णीयादेवदत्तगृहीते यज्ञदत्तेनापि गृह्येत नचैतद्दृष्टमिष्टं चेति। ननु च स्यान्नैष पक्षेऽपि दोषः। यदा पुनः परस्परसापेक्षाणां संयोगपरिणत्याऽभ्युपगमेन भूतानामेव समुदितानां चैतन्याख्यो धर्मः संयोगवशादाविर्भवति। यथा किण्वोदकादिषु मद्यांगेषु समुदितेषु प्रत्येकमविद्यमानापि मदशक्तिरिति तदा कुतोऽस्य दोषस्यावकाश इति। अत्रोत्तरं। गाथायां चशब्दादिममभिधास्यते। यत्तावदुक्तं। यथा भूतेभ्यः परस्परसव्यपेक्षसंयोगमात्राच्चैतन्यमुत्पद्यते। तत्र विकल्पयामः। किमसौ संयोगः संयोगिभ्यो भिन्नोऽभिन्नो वा भिन्नश्चेत्तद्भूतप्रसंगो यथान्यपंचभूतव्यतिरिक्तसंयोगाख्यभूतग्राहकं भवतां प्रमाणमस्ति प्रत्यक्षस्यैवैकस्याभ्युपगमात्तेन च तस्याग्रहणात् प्रमाणान्तराभ्युपगमे च तेनैव जीवस्यापि ग्रहणमस्तु तथाऽभिन्नो भूतेभ्यो भूतानामेव संयोगस्तथाप्येतच्चिन्तनीयं किं भूतानि प्रत्येकं चेतनावन्त्यचेतनावन्ति वा यदि चेतनावन्ति तदा एकेन्द्रियसिद्धिस्तदा समुदायस्य पंचप्रकारचैतन्यापत्तिः। अथाचेतनानि भूतानि तदा दोषो न हि यच्च प्रत्येकमविद्यमानं तत्समुदाये भवदुपलभ्यते सिकतासु तैलवदित्यादिना यदप्यत्र पूर्वोक्तं तथा मद्यांगेष्वविद्यमानाऽपि प्रत्येकं मदशक्तिः समुदाये प्रादुर्भवतीति। तदप्ययुक्तं यतस्तत्र किण्वादिषु या च यावती शक्तिरुपलभ्यते। तथाहि। किण्वं बुभुक्षापनयनसामर्थ्यं भ्रमिजननसामर्थ्यं चोदकस्य तृडपनयनसामर्थ्यमित्यादिनेति भूतानां प्रत्येकं चैतन्याऽनभ्युपगमे दृष्टान्तदार्ष्टान्तिकयोरसाम्यं। किं च भूते चैतन्याभ्युपगमे मरणाभावो मृतकायेऽपि पृथिव्यादीनां भूतानां सद्भावात्। नैतदस्ति। तत्र मृतकाये वायोस्तेजसो वाऽभावान्मरणसद्भाव इत्यशक्तिनस्योल्लापः। तथाहि। मृतकाये शोफोपलब्धेर्न वायोरभावः कायस्य च पक्तिस्वभावस्य दर्शनान्नाग्नेरिति अथ सूक्ष्मः कश्चिद्वायुविशेषोऽग्निर्वा ततोऽपगत इति मतिरित्येवं च जीव एव नामान्तरेणाभ्युपगतो भवति यत्किंचिदेतत्। तथा न भूतसमुदायमात्रेण चैतन्याविर्भावः। पृथिव्यादिष्वेकत्र व्यवस्थापितेष्वपि चैतन्यानुपलब्धेः। अथ कायाकारपरिणतौ सत्यां तदाभिव्यक्तिरिष्यते। तदपि न यतो लेप्यमयप्रतिमायां समस्तभूतसद्भावेऽपि जडत्वमेवोपलभ्यते। तदेवमन्वयव्यतिरेकाभ्यामालोच्यमानो नायं चैतन्याख्यो गुणो भूतानां भवितुमर्हति। समुपलभ्यते चायं शरीरेषु। तस्मात् परिशेषात् जीवस्यैवायमिति स्वदर्शनपक्षपातं विहायाङ्गीक्रियतामिति। यदुक्तं प्राग् न पृथिव्यादिव्यतिरिक्त आत्मास्ति तद्ग्राहकप्रमाणाभावात् प्रमाणं चात्र प्रत्यक्षमेवैकमित्यादि तत्र प्रतिविधीयते। यत्तावदुक्तं प्रत्यक्षमेवैकं प्रमाणं नानुमानादिकमित्येतदनुपासितगुरोर्वचः। तथाहि। अर्थाविसंवादकं प्रमाणमित्युच्यते प्रत्यक्षस्य च प्रामाण्यमेव व्यवस्थाप्यते। कश्चित्प्रत्यक्षव्यक्तीर्धर्मित्वेनोपादाय प्रमाणयति। प्रमाणमेता अर्थाऽविसंवादकत्वादनुभूतप्रत्यक्षव्यक्तिवत्। न च ताभिरेव प्रत्यक्षव्यक्तिभिः स्वसंविदिताभिः परं व्यवहारयितुमयमीशस्तासां स्वसन्निधिपरत्वान्मूकत्वाच्च। प्रत्यक्षस्य नानुमानं प्रमाणमित्यनुमानेनैवानुमाननिरासं कुर्वंश्चार्वाकः कथं नोन्मत्तः स्यादेवं ह्यसौ तदप्रामाण्यं प्रतिपादयते। यथा नानुमानं प्रमाणं विसंवादकत्वादनुभूतानुमानव्यक्तिवदिति स्वेतदानुमानमथ परप्रसिध्यैतदुच्यते। तदप्ययुक्तं। यतस्तत्परप्रसिद्धमनुमानं भवतः प्रमाणमप्रमाणं वा। प्रमाणं चेत्कथमनुमानमप्रमाणमित्युच्यते। अथाप्रमाणं कथमप्रमाणेन सता तेन परः प्रत्याय्यते। परेण तस्य प्रामाण्येनाभ्युपगतत्वादिति चेत्तदप्यसांप्रतं। यदि नाम परो मौढ्यादप्रमाणमेव प्रमाणमित्यध्यवस्यति किं भवताऽतिनिपुणेनापि तेनैवाऽसौ प्रतिपाद्यते। यो ह्यन्यो गुडमेव विषमपि मन्यते किं तस्य मारयितुकामेनापि बुद्धिमता गुड एव दीयते। तदेवं प्रत्यक्षानुमानयोः प्रामाण्याप्रामाण्ये व्यवस्थापयतो भवतोऽनिच्छतोऽपि बलादायातमनुमानस्य प्रामाण्यं। तथा स्वर्गापवर्गदेवतादेः प्रतिषेधं कुर्वन् भवान् केन प्रमाणेन करोति न तावत्प्रत्यक्षेण प्रतिषेधं कर्तुं पार्यते। यतस्तत्प्रत्यक्षं प्रवर्तमानं वा तन्निषेधं विदध्यान्निवर्तमानं वा। न तावत्प्रवर्तमानं तस्याऽभावविषयत्वविरोधात्। नापि निवर्तमानं। यतस्तत्र नास्ति तेन च प्रतिपत्तिरित्यसंगतं। तथाहि। व्यापकनिवृत्तौ व्याप्यस्यापि निवृत्तिरिष्यते॥ न चार्वाकदर्शितप्रत्यक्षेण समस्तवस्तुव्याप्तिः संभाव्यते। तत्कथं प्रत्यक्षनिवृत्तौ पदार्थव्यावृत्तिरिति। तदेवं स्वर्गादेः प्रतिषेधं कुर्वता चार्वाकेणाऽवश्यं प्रमाणांतरमभ्युपगतं। तथाऽन्याभिप्रायविज्ञानाभ्युपगमादत्र स्पष्टमेव प्रमाणांतरमभ्युपगतं। अन्यथा कथं परावबोधाय शास्त्रप्रणयनमकारि चार्वाकेणेत्यलमतिप्रसंगेन। तदेवं प्रत्यक्षादन्यदपि प्रमाणमस्ति तेनात्मा सेत्स्यति किं पुनस्तदिति चेदुच्यते। अस्त्यात्मा असाधारणतद्गुणोपलब्धेश्चक्षुरिन्द्रियवत्। चक्षुरिन्द्रियं हि न साक्षादुपलभ्यते। स्पर्शनादीन्द्रियाऽसाधारणरूपविज्ञानोत्पादनशक्त्या त्वनुमीयते। तथात्मापि पृथिव्याद्यसाधारणगुणोपलब्धेरस्तीत्यनुमीयते। चैतन्यं च तस्याऽसाधारणगुण इत्येतत्पृथिव्यादिभूतसमुदाये चैतन्यस्य निराकृतत्वादवसेयं। तथाऽस्त्यात्मा समस्तेन्द्रियोपलब्धार्थसंकलनाप्रत्ययसद्भावात्। पंचगवाक्षोपलब्धार्थसंकलनाविधाय्येकदेवदत्तवत्। तथाऽऽत्माऽधिष्ठाता नेन्द्रियाणि। तद्विगमे हि तदुपलब्धार्थस्मरणात्। गवाक्षोपरमेऽपि तद्द्वारोपलब्धार्थस्मर्तृदेवदत्तवत्। तथार्थापत्त्याप्यात्मास्तीत्यवसीयते। तथाहि सत्यपि पृथिव्यादिभूतसमुदाये लेप्यकर्मादौ न सुखदुःखेच्छाद्वेषप्रयत्नादिक्रियाणां सद्भाव इत्यतः सामर्थ्यादवसीयते। अस्ति भूतातिरिक्तः कश्चित्सुखदुःखेच्छादीनां क्रियाणां समवायिकारणं पदार्थः स चात्मेति। तदेवं प्रत्यक्षानुमानादिपूर्विकाऽन्याप्यर्थापत्तिरभ्यूह्या। तस्यास्त्विदं लक्षणम्॥

"प्रमाणषट्कविज्ञातो, यत्रार्थो नान्यथा भवेत्। अदृष्टं कल्पयेदन्यं, सार्थापत्तिरुदाहृता॥ १॥

तथाऽऽगमादप्यस्तीत्यवसेयं। स चायमागमः। (अत्थि मे आया उववाइए इत्यादि। यदि वा किमत्राऽपरप्रमाणचिंतया सकलप्रमाणज्येष्ठेन प्रत्यक्षेणैवात्मास्तीत्यवसीयते। तद्गुणस्य ज्ञानस्य प्रत्यक्षत्वात्। ज्ञानगुणस्य च [illegible] ऽनन्यत्वात् [illegible] वत् तथा-

[illegible] दुःखवेदनादहं प्रत्ययग्राह्योऽस्त्यात्मा प्रत्यक्षः । [illegible] स्वसंविद्रूपत्वादिति । ममेदं शरीरं पुराणं [illegible] निर्दिश्यमानत्वादित्यादीन्यन्या- [illegible] [illegible] तथा यदुक्तं [illegible] चैतन्यं [illegible] घटादिवदित्येतद- [illegible] । [illegible] तथाहि न भूतानां कार्यं चे- [illegible] भूतकार्यं चैतन्यं संकलनप्रत्ययासं- [illegible] भूतव्यतिरिक्तो ज्ञानाधा- [illegible] । ननु च किं ज्ञानाधारभूतेनात्मना ज्ञानाद्विषे- [illegible] सर्वसंकलनप्रत्ययादिकं भेत्स्य- [illegible] । तथाहि । ज्ञानस्यैव चिद्- [illegible] सह संबंधे सति सु- [illegible] प्रादुर्भवन्ति तथा संकलनाय- [illegible] । तदेवं व्यवस्थिते किमात्मनः [illegible] भूतमंतरेण संक- [illegible] । [illegible] [illegible] [illegible] [illegible] [illegible] गुणि- [illegible]

(११) [illegible] पूर्वोक्तदिशा [illegible] [illegible]

[illegible]

[illegible]

[illegible]

नामागमनमावेदितं भवति । य एव च दिगादिगमना- [illegible] रिज्ञानेनात्मवादी लोकवादी च संवृत्तः स एवानु [illegible] कर्मवादी कर्म ज्ञानावरणीयादि तद्वदितुं शीलमस्य स हि प्राणिनो मिथ्यात्वाविरतिप्रमादकषाययोगैः पूर्वं [illegible] दियोग्यानि कर्माण्यादत्ते । पश्चात्तासु तासु विरूपासु योनिषूत्पद्यन्ते । कर्म च प्रकृतिस्थित्यनुभाव [illegible] मवसेयमिति । अनेन च कालयदृच्छानियतीश्वरवादि- नो निरस्ता द्रष्टव्याः । तथा य एव कर्मवादी स एव क्रियावादी । यतः कर्म योगनिमित्तं बध्यते योगश्च व्यापारः स च क्रियारूपोऽतः कर्मणः कार्यभूतस्य तत्कारणभूतायाः क्रियायाः अवसायेय परमार्थतो [illegible] ति क्रियायाश्च कर्मनिमित्तत्वं प्रसिद्धमागमे स चा- गमः "जीवे णं भंते एस जीवे सया समियं एयइ वेयइ चलति फंदति तिप्पति जीवो तं तं भावं परिणमति ताव णं अट्ठविहबंधए वा सत्तविहबंधए वा छव्विहबंधए वा एकविहबंधए वा णो णं अबंधए त्ति" एवं कृत्वा य एव कर्मवादी स एव क्रियावादीति । एतेन च सांख्याभिमतमात्मनोऽक्रियावादित्वं निरस्तं भवति । सांप्रतं पूर्वोक्तक्रियात्मपरिणतिरूपां [illegible] भिधायिमतिप्रत्ययेनाभिद्भवहमस्य [illegible] वायविमनःपर्यायकेवलज्ञानजातिस्मरणव्यतिरेकेणैव विक- [illegible] मतिज्ञानेन स्वाध्यायागमे [illegible] "अ करिस्सं च हं कारवेसुं च हं करओ यावि समणुन्ने भविस्सामित्ति, इह भूतवर्तमानभविष्यत्काल [illegible] कृतकारितानुमतिभिर्नवविकल्पाः [illegible] [illegible] कुर्वंतमन्यमनुज्ञातवानहं । [illegible] [illegible] अनुज्ञातवानहमिति । [illegible] [illegible] कुर्वंतमन्यमनुज्ञास्याम्यहमिति । एतेषां च [illegible] [illegible] [illegible] [illegible] [illegible] निर्वायां [illegible] "कारवेसुं च हमिति" सूत्रेणोपात्ताः [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] भवति । [illegible] [illegible] [illegible] [illegible] "[illegible]" [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

दनेन कर्मणा उपादानभूतायाः क्रियायाः स्वरूपमावेदितमिति ॥ आचा० ॥ टी० ॥

अथ किमेतावत्य एव क्रिया उतान्या अपि सन्तीत्येतावत्येत्याह—

एयावंति सव्वावंति लोगंसि कम्मसमारंभा परिजाणियव्वा भवंति अपरिण्णायकम्मा खलु अयं पुरिसे जो इमाओ दिसाओ अणुदिसाओ अणु संचरइ सव्वाओ दिसाओ सव्वाओ अणुदिसाओ साहेति अणेगरूवाओ जोणीओ संधेइ विरूवरूवे फासे पडिसंवेदेइ तत्थ खलु भगवता परिण्णा पवेदिया ॥ आचा० ॥

एतावन्तः सर्वेऽपि लोके प्राणिसंघाते कर्मसमारम्भाः क्रियाविशेषा ये प्रागुक्ताः अतीतानागतवर्त्तमानभेदेन कृतकारितानुमतिभिश्चात्मक्रियानुयायिना च करोतिना सर्वेषां ग्रहादित्येतावन्त एव परिज्ञातव्या भवन्ति नान्य इति परिज्ञा च ज्ञप्रत्याख्यानभेदाद् द्विधा तत्र ज्ञायामात्मनो बंधस्य चास्तित्वमेताभिरेव सर्वैः कर्मसमारम्भैर्ज्ञातं भवति प्रत्याख्यानपरिज्ञायां च सर्वे पापोपादानहेतवः कर्मसमारम्भाः प्रत्याख्यातव्या इति इयता सामान्येन जीवास्तित्वं प्रसाधितमधुना तस्यैवात्मनो दिगादिभ्रमणहेतूपदर्शनपुरस्सरमपायान् प्रदर्शयितुमाह यदि वा यस्तावदात्मकर्मादिवादीः स दिगादिभ्रमणान्मोच्यते इतरस्य तु विपाकान्दर्शयितुमाह अपरिज्ञायेत्यादि योऽयं पुरि शयनात्पुरुषः पूर्णः सुखदुःखानां वा पुरुषो जंतुर्मनुष्यो वा प्राधान्याच्च पुरुषस्योपादानमुपलक्षणं चैतत्सर्वोऽपि चतुर्गत्यापन्नः प्राणी गृह्यते दिशोऽनुदिशो वा सञ्चरति सोऽपरिज्ञातकर्माऽपरिज्ञातं कर्मानेनेत्यपरिज्ञातकर्मा खल्ववधारणे परिज्ञातकर्मैव दिगादौ भ्राम्यति नेतर इत्युपलक्षणं चैतदपरिज्ञातात्मा परिज्ञातक्रियश्चेति यश्चापरिज्ञातकर्मा स सर्वा दिशः सर्वाश्चानुदिशः साहेति स्वयंकृतेन कर्मणा सहानुसञ्चरति सर्वग्रहणं सर्वासां प्रज्ञापकदिशां भावदिशां चोपसंग्रहार्थं यच्चाप्नोति तद्दर्शयति अणेगरूवाओ जोणीओ संधेइत्ति ॥ आचा० टी० ॥

एताश्चानेकरूपा योनीर्दिगादिषु पर्यटन्नपरिज्ञातकर्मा सुमान् संधेइत्ति सन्धयति सन्धिं करोत्यात्मना सहाविच्छेदेन संघट्टयतीत्यर्थः सन्धाव इति पाठान्तरं सन्धावति पौनःपुन्येन ता गच्छतीत्यर्थः तत्संधाने च यदनुभवति तद्दर्शयति विरूपं बीभत्समसमनोज्ञं रूपं येषां स्पर्शानां दुःखोपनिपातानां ते तथा स्पर्शाश्रिता दुःखोपनिपाताः स्पर्शा इत्युक्तास्तात्स्थ्यात्तद्व्यपदेश इति कृत्वोपलक्षणं चैतन्मानसेऽपि वेदना ग्राह्या अतस्तानेवंभूतान् स्पर्शान् प्रतिसंवेदयत्यनुभवति प्रतिग्रहणात्प्रत्येकं शारीरान्मानसांश्च दुःखोपनिपाताननुभवतीत्युक्तं भवति स्पर्शग्रहणं चेह सर्वसंसारान्तर्वर्तिजीवराशिसंग्रहार्थं स्पर्शनेन्द्रियस्य सर्वजीवव्यापित्वादपि चकारः सर्वानिवरूपरूपान् रसगंधरूपशब्दान् प्रतिसंवेदयतीति विरूपरूपत्वञ्च स्पर्शानां कार्यभूतानाम् विचित्रकर्मोदयात् कारणभूताद्भवतीति वेदितव्यं विचित्रकर्मोदयाच्चापरिज्ञातकर्मा संसारी स्पर्शादीन्विरूपरूपांस्तेषु तेषु योन्यन्तरेषु विपाकतः परिसंवेदयत्याह च "तैः कर्मभिः स जीवो विवशः संसारचक्रमुपयाति। द्रव्यक्षेत्राद्धा भावभिन्नमावर्त्तते बहुशः १ नरकेषु देवयोनिषु तिर्यग्योनिषु च मनुजयोनिषु च। पर्यटति घटीयन्त्रवदात्मा विच्छन्दपरायणि २ सततानुबद्धमुक्तं दुःखं नरकेषु तीव्रपरिणामं तिर्यक्षु भयक्षुत्तृड्वधादि दुःखं सुखं चाल्पं ३ सुखदुःखे मनुजानां मनःशरीराश्रये बहुविकल्पे, सुखमेव हि देवानां दुःखं स्वल्पञ्च मनसि भवं ४ कर्मानुभावदुःखित एवं मोहांधकारगहनवति। अन्ध इव दुर्गमार्गे भ्रमति हि संसारकान्तारे ५ दुःखप्रतिक्रियार्थं सुखाभिलाषाच्च पुनरपि तु जीवः। प्राणिवधादीन् दोषानधितिष्ठति मोहसंछन्नः ६ बध्नाति ततो बहुविधमन्यत्पुनरपि नवं सुबहुकर्म। तेनाथ पच्यते पुनरग्नेरग्निं प्रविश्यैव ७ एवं कर्माणि पुनः सन्धानस्तथैव मुञ्चंश्च। सुखकामो बहुदुःखं संसारमनादिकं भ्रमति ८ एवं भ्रमतः संसारसागरे दुर्लभं मनुष्यत्वं। संसारस्य महत्त्वत्वाद्धर्मदुष्कर्मबाहुल्ये. ९ आर्येदेशकुलरूपसम्पदायुश्च दीर्घमारोग्यं। यतिसंसर्गः श्रद्धाधर्मश्रवणञ्च मतिर्निरुपणम् ॥ १० ॥ एतानि दुर्लभानि प्राप्यतोऽपि दृढमोहनीयस्य कुपथाकुलाहितोऽतिदुर्लभो जगति सन्मार्गः ॥ ११ ॥ यदि वा बोधेर्पुरुषः सर्वा दिशोऽनुदिशश्चानुसञ्चरति तथानेकरूपां योनिं सन्धावति विरूपांश्च स्पर्शान् प्रतिसंवेदयति सोऽपरिज्ञातकर्माऽविज्ञातमविदितं कर्म क्रिया व्यापारो मनोवाक्कायलक्षणोऽनार्थमहं कर्माणि जीवोपमर्दादिके प्रवर्त्ते येनास्याष्टविधकर्मबन्धो भवति तदुदयाच्चानेकरूपयोन्यनुसन्धानं विरूपरूपस्पर्शानुभवश्च भवतीति यदेवं ततः किमित्यत आह तत्थेत्यादि तत्र कर्मणि व्यापारेऽकार्यमहं करोमि करिष्यामीत्यात्मपरिणतिस्वभावतया मनोवाक्कायव्यापाररूपे भगवता वीरवर्द्धमानस्वामिना, परिज्ञानं परिज्ञा सा प्रकर्षेण प्रकाशादौ वा वेदिता प्रवेदिता एतच्च सुधर्मस्वामी जम्बूनाम्ने कथयति सा च द्विधा ज्ञपरिज्ञा प्रत्याख्यानपरिज्ञा च तत्र ज्ञपरिज्ञया सावद्यव्यापारेण बन्धो भवतीत्येवं भगवता परिज्ञा प्रवेदिता प्रत्याख्यानपरिज्ञया च सावद्ययोगा बन्धहेतवः प्रत्याख्येया इत्येवंरूपा चेत्यमुमेवार्थं निर्युक्तिकृदाह ॥ ॥ आ० चा० टी० ॥

तत्थ अकारि करिस्संति बंधचिंता कया पुणो होइ ।

सहसंमइया जाणइ कोई पुण हेउजुत्तीए ॥ आचा० नि० ॥

तत्र कर्मणि क्रियाविशेषे विज्ञातुम् इत्याह (अकार्षं करिष्यामी ति) अकार्षमिति कृतवान् करिष्यामि करिष्यामीत्यनेनार्थः तदागतोपादानेन तन्मध्यवर्तिनो वर्त्तमानस्य करोम्यनुमस्योद्योपसंग्रहात्रयाणां भेदा आत्मपरिणामत्वेन दर्शकता उपात्ता द्रष्टव्या तत्रानेनात्मपरिणामकत्वेन त्रिकालविषयबन्धचिन्ता कृता भवति बन्धस्योपादानमुपायं भवति कर्मदोषनिमित्तं बन्धनं इति यत्नात् एतच्च कश्चित्स्वात्मना सह वा सन्मतिः स्वमतिस्तयाऽवधिमनःपर्यवकेवलजातिस्मरणरूपया तथा जानाति कश्चिच्च परधर्मोपदर्शनेनात्मरूपया हेतुयुक्त्येति ॥ आचा० ॥

अथ किमर्थमसौ कटुकविपाकेषु कर्मसमारम्भेषु क्रियाविशेषेषु प्रवर्त्तते इत्याह—

इमस्स चेव जीवियस्स परिवंदणमाणणपूयणाए जाईमरणमोयणाए दुक्खपडिघायहेउं एगावेंति ॥

सव्वावंति लोगंसि कम्मसमारम्भा परिजाणियव्वा भवंति जस्से ते लोगंसि कम्मसमारम्भा परिण्णाया भवंति से हु मुणीपरिण्णायकम्मेत्ति बेमि ॥ आचा० मू० ॥

तत्र जीवितमिति जीवन्त्यनेनायुष्कर्मणेति जीवितं प्राणधारणमेतच्च प्रतिप्राणि स्वसंविदितमिति कृत्वा प्रत्यक्षासन्नवाचिनेदमा निर्दिशति च शब्दो वक्ष्यमाणजात्यादिसमुच्चयार्थः । एवकारोऽवधारणे अस्यैव जीवितस्यार्थे परिफल्गुसारस्य तडिल्लताविलसितचञ्चलस्य बह्वपायस्य दीर्घसुखार्थिक्रियासु प्रवर्तते । तथा हि जीविष्याम्यहमरोगः सुखेन भोगान् भोक्ष्ये ततो व्याध्यपनयनार्थं स्नेहपानलावकपिशितभक्षणादिषु क्रियासु प्रवर्तते तथाल्पसुखस्य कृते ऽभिमानग्रहाकुलितचेता बह्वारम्भपरिग्रहाद्बह्वशुभकर्मादत्ते उक्तञ्च । "द्वेषाग्निप्रचरणैर्विदपायगुप्ताशय्यासनं करिवरस्तुरगो रथो वा । काले भिषग्नियमिताशनपानयात्रा राज्ञः पराक्रमिव सर्वमयोहि शोषे ॥ १ ॥ पुष्टश्चर्यमगमिह यत्प्रणाधिप्रयोगैः संग्रामदोषकलुषो नृपतिस्तु भुंक्ते ॥ यन्निर्भयं प्रशमसौख्यरतश्च भैक्षं तत् स्वादुतां भृशमुपैति न पार्थिवान्नं ॥ २ ॥ भृत्येषु मन्त्रिषु सुतेषु मनोरमेषु कान्तासु वा मधुमदांकुरितेक्षणासु । विश्वसमेति न कदाचिदपि चिंतीशः सर्वाभिशङ्कितमनः कतरत्सुखं स्यात् ॥ ३ ॥ तदेवं मम नवयुक्ततरुणकिसलयपलाशचञ्चलजीवितरतयः कर्मार्थवेषु जीवितोपमर्ददिरूपेषु प्रवर्त्तन्ते तथास्यैव जीवितस्य परिवंदनमाननपूजनार्थं हिंसादिषु प्रवर्तन्ते । तत्र परिवंन्दनं संस्तवः प्रशंसा तदर्थमाचेष्टते तथा ह्यहं मयूरादिपिशिताशनाद्बली तेजसा देदीप्यमानो देवकुमार इव लोकानां प्रशंसास्पदं भविष्यामीति माननमभ्युत्थानासनदानांजलिप्रग्रहादिरूपतदर्थं वा चेष्टमानः कर्म चिनोति तथा पूजनं पूजाद्रविणवस्त्रान्नपानसत्कारप्रणामसेवाविशेषरूपतदर्थं वा चेष्टमानः क्रियासु कर्मार्थवेष्वात्मानं सम्मापयति तथा हि वीरभोग्या वसुन्धरेति मत्वा पराक्रमतो दण्डसमारम्भाः प्रजा विभ्यतीति दण्डयति इत्येवं राजामन्येषामपि यथासम्भवमायोज्यमेव प्रत्र च चन्दनादीनां [illegible] सर्वहन्ता माहन्देवे वसुधां विवेदा परिवन्दनमाननपूजनाय जीवितस्य कर्मार्थवेषु प्रवर्तन्त इति समुदायार्थः । न केवलं परिवन्दनमाननपूजनार्थं कर्माश्रवेष्वात्मानमापादयन्ति इति दर्शयति । जातिश्च मरणं च मोचनं च जातिमरणमोचनमिति समाहारद्वन्द्वस्तदर्थं चतुर्थी तदर्थं च प्राणिनः क्रियासु प्रवर्तमानाः कर्माश्रवे [illegible] हिंसादिकाः क्रिया विध[illegible] [illegible] दृश्यन्ति [illegible] [illegible] [illegible] [illegible] [illegible]

जातिमरणयोर्विमोचनाय हिंसादिकाः क्रियाः कुर्वते (जाइमरणमोयणाएत्ति) पाठान्तरं तत्र भोजनार्थं कृष्यादिकर्मसु प्रवर्त्तमाना वसुधाजलज्वलनपवनवनस्पतिद्वित्रिचतुष्पञ्चेन्द्रियव्यापत्तये व्याप्रियन्त इति तथा दुःखप्रतिघातमुद्दिश्य रमपरित्राणार्थमारम्भानासेवन्ते । तथा हि व्याधिवेदनार्ता लावकपिशितमदिराद्यासेवन्ते तथा वनस्पतिमूलत्वक्पत्रनिर्यासादिसिद्धशतपाकादितैलार्थमन्यादिसमारम्भेण पापं कुर्वन्ति स्वतः कारयन्त्यन्यैः कुर्वतोऽन्यान् समनुजानत इत्येवमतीतानागतकालयोरपि मनोवाक्काययोगैः कर्मादानं विदधातीत्यायोजनीयं । तथा दुःखप्रतिघातमेव सुखोत्पत्त्यर्थं कलत्रपुत्रगृहोपस्काराद्याददते तत्क्षेमपालनार्थं च तासु क्रियासु प्रवर्तमानाः पापकर्मभिर्बध्यन्त इति । उक्तञ्च ॥ "आदौ प्रतिष्ठाधिगमे प्रयासो दारेषु पश्चाद् गृहिणः सुतेषु । कर्त्तुं पुनस्तेषु गुणप्रकर्षं चेष्टा तदुच्चैः पदलंघनाय ॥ १ ॥ तदेवंभूतैः क्रियाविशेषैः कर्माश्रवनानादिक्षयोपनिपातविधिर्विधेयेति एतावंत एव च क्रियाविशेषा इति दर्शयितुमाह एतावंतीत्यादि एतावन्तो सव्वावन्तीति एतौ शब्दौ मागधदेशीभाषाप्रसिध्या एतावन्तः सर्वेऽपीत्येतत्पर्यायौ एतावन्त एव सर्वस्मिन् लोके धर्माधर्मास्तिकायावच्छिन्ने नभःखंडे ये पूर्वं प्रतिपादिताः कर्मसमारम्भाः क्रियाविशेषा नैतेभ्योऽधिकाः केचन सन्तीत्येवं परिज्ञातव्या भवन्ति सर्वेषां पूर्वत्रोपादानादिति भावः तथा ह्यात्मपरोभयैहिकामुष्मिकातीतानागतवर्तमानकालकृतकारितानुमतिभिरारम्भा क्रियन्ते ते च सर्वेऽपि प्रागुपात्ता यथासम्भवमायोज्या इति । एवं सामान्येन जीवास्तित्वप्रसाधकदुपमर्दकारिणाञ्च क्रियाविशेषाणां बन्धहेतुत्वं प्रदर्श्योपसंहारद्वारेण विरतिं प्रतिपादयन्नाह जस्सेत्यादि भगवान् समस्तवस्तुवेदी केवलज्ञानेन साक्षादुपलभ्यैवमाह यस्य मुमुक्षोरेते पूर्वोक्ताः कर्मसमारम्भाः क्रियाविशेषाः कर्मणो वा ज्ञानावरणीयाद्यष्टप्रकारस्य समारम्भा उपादानहेतवस्ते च क्रियाविशेषा एव परि समन्तात् ज्ञाताः परिच्छिन्नाः कर्मबन्धहेतुत्वेन भवन्ति । दुरवधारणं मनुते जगतस्त्रिकालावस्थामिति मुनिः स एव मुनिर्ज्ञपरिज्ञया परिज्ञातकर्मा प्रत्याख्यानपरिज्ञया च प्रत्याख्यातकर्मबन्धहेतुभूतसमस्तमनोवाक्कायव्यापार इत्यनेन च मोक्षांगभूते ज्ञानक्रिये उपात्ते भवतो न ह्याभ्यां विना मोक्षो भवति यत उक्तं ज्ञानक्रियाभ्यां मोक्ष इति । इति शब्द एतावानयमारम्भपदार्थविचारः कर्मबन्धहेतुश्चारब्धः शस्त्रपरिज्ञाध्ययन परिसमापित इति प्रदर्शकः ब्रवीमीति तदहं ब्रवीमि यन्मयाऽश्रुतं यच्च यथेदं तत् सर्वं भगवदन्तिके मया श्रुतमिति ॥ आचा० ॥ टी० ॥

आत्माविष्कर्तुं वस्तुमन्तःक्रियावादिनो ऽक्रियावादिनश्च सर्वक्रियावादिशब्दे ऽक्रियावादिशब्दे च ॥ आचा० ॥

आत्मास्तित्वं विस्तरेणाचाराङ्गे यथा—

सुयं मे आउसं तेणं भगवया एवमक्खायं इहमेगेसिं णो सण्णा भवइ तं जहा पुरत्थिमाओ वा दिसाओ आगओ अहमंसि दाहिणाओ वा दिसाओ आगओ अहमंसि पच्चत्थिमाओ वा दिसाओ आगओ अहमंसि उत्तराओ वा दिसाओ आगओ अहमंसि उड्ढाओ वा दिसाओ आगओ अ

मंसि अहं दिसाओ वा आगओ अहमंसि अण्णयरीओ वा दिसाओ अणुदिसाओ वा आगओ अहमंसि एवमेगेसिं णो णाणे भवति ॥ आचा० ॥

अस्य संहितादिक्रमेण व्याख्या संहितोच्चारितैव पदच्छेदस्त्वयं श्रुतं मया आयुष्मन् तेन भगवता एवं व्याख्यातं इह एकेषां नो संज्ञा भवति एवं तिङन्तं शेषाणि सुबन्तानि गतः सपदच्छेदसूत्रानुगमः सांप्रतं सूत्रपदार्थः समुन्नीयते भगवान् सुधर्मस्वामी जंबूनामानमिदमाचष्टे यथा श्रुतमाकर्णितमवगतमवधारितमिति यावदनेन स्वमनीषिकाव्युदासो भवति साक्षाच्च पुनः पारंपर्येण आयुष्मन्निति जात्यादिगुणसंभवेऽपि दीर्घायुष्कत्वगुणोपादानाद्दीर्घायुरविच्छेदेन शिष्योपदेशप्रदायको यथा स्यात् इहाचारस्य व्याचिख्यासितत्वात्तदर्थस्य च तीर्थकृत्प्रणीतत्वादिति सामर्थ्यप्रापितं तेनेति तीर्थकरमाह यदि वा आमृशता भगवत्पादारविन्दमनेन विनय आवेदितो भवति आवसता वा तदन्तिक इत्यनेन गुरुकुलवासः कर्त्तव्य इत्यावेदितं भवति एतच्चार्थद्वयं आमुसंतेणत्येतत्पाठान्तरमाश्रित्यावगन्तव्यमिति भगवतेति भग ऐश्वर्यादिषड्गुणात्मकः सोऽस्यास्तीति भगवान् तेन एवमिति वक्ष्यमाणविधिना आख्यातमित्यनेन कृतकत्वव्युदासेनार्थरूपतया आगमस्य नित्यत्वमाह इहेति क्षेत्रे प्रवचने आचारे शस्त्रपरिज्ञायां व्याख्यातमिति संबंधो यदि वेहेति संसारे एकेषां ज्ञानावरणीयावृतानां प्राणिनां नो संज्ञा भवति। संज्ञानं संज्ञा स्मृतिरवबोध इत्यनर्थान्तरं सा नो जायत इत्यर्थः उक्तः च पदार्थः पदविग्रहस्य तु सामासिकपदाभावादप्रकटनमिदानीं चालना। ननु चाकारादिप्रतिषेधकलघुशब्दसंभवे सति किमर्थं नोशब्देन प्रतिषेध इत्यत्र प्रत्यवस्था सत्यमेवं किं तु प्रेक्षापूर्वकारितया नोशब्दोपादानं । स चैवमन्येन प्रतिषेधेन सर्वनिषेधः स्याद्यथा न घटोऽघट इति चोक्ते सर्वात्मना घटनिषेधः स च नेष्यते यतः प्रज्ञापनायां दश संज्ञाः सर्वप्राणिनामभिहितास्तासां सर्वासां प्रतिषेध. प्राप्नोतीति कृत्वा ताश्चेमाः "कइ णं भंते सण्णाओ पण्णत्ताओ गोयमा ! दस सण्णाओ पण्णत्ताओ तं-जहा आहारसण्णा भयसण्णा मेहुणसण्णा परिग्गहसण्णा कोहसण्णा माणसण्णा मायासण्णा लोभसण्णा ओहसण्णा लोगसण्णत्ति" आसां चात्रनिषेधे स्पष्टो दोषोऽतो नोशब्देन प्रतिषेधमकारि यतोऽयं सर्वनिषेधवाची देशनिषेधवाची च । तथा हि-नो घट इत्युक्ते यथा 'घटाभावमात्रं प्रतीयते तथा प्रकरणादिप्रसक्तस्य विधाने स पुनर्विधीयमानप्रतिषेध्यावयवो प्रतिषेध्यादन्यो वा । घटादिः प्रतीयत इति। तथा चोक्त "प्रतिषेधयति समस्तं प्रसक्तमर्थं च जगति नोशब्दः। स पुनस्तदवयवो वा तस्मादर्थान्तरं वा स्यादिति" एवमिहाऽपि न सर्वसंज्ञानिषेधोऽपि तु विशिष्टसंज्ञानिषेधो यथास्मादिपदार्थस्वरूपं गत्यागत्यादिकं ज्ञायते तस्यानिषेध इति ॥ आचा० टी० ॥ इह पुनर्ज्ञानसंज्ञयाऽधिकारो यत सूत्रेणैव नियमितं इह एकेषां नो संज्ञानमवबोधो भवतीति प्रतिषिद्धज्ञानविशेषावगमार्थमाह सूत्रं तंजहेत्यादि यो वाचे भवतीति यावत् तद्यथेति प्रतिज्ञातार्थोदाहरणं पुरत्थिमाओत्ति प्राकृतशैल्या मागधदेशीभाषानुवृत्त्या पूर्वस्या दिशोऽभिधायकात् पुरत्थिमशब्दात्पंचम्यन्तात्तसा निर्देशः वाशब्द उत्तरपदापेक्षया विकल्पार्थः यथा लोके मोक्तव्यं वा शयितव्यं वेति एवं पूर्वस्या वा दक्षिणस्या वेति दिशतीति दिक् अतिसृजति व्यपदिशति द्रव्यं द्रव्यभाग इति भावः ॥ आचा० टी० ॥ अत्र च सामान्यदिग्ग्रहणेऽपि यस्यां दिशि जीवानामविगानेन गत्यागती स्पष्टे सर्वत्र संभवतस्तस्यैवेहाधिकार इति तामेव निर्युक्तिकृन्माहात्म्यनीयाति भावदिग्भावेनमाधिकृता सामर्थ्यादधिकृतैव यतस्तदर्थमन्यासां दिशामभिधानमाह ॥ आचा० ॥ नेह एवमेगेसिंणोणायं भव इत्यनेन केषांचिदेव संज्ञानिषे-धात्केषांचित्तु भवत्यपीत्युक्तं भवति । तत्र सामान्यसंज्ञायाः प्रतिप्राणि सिद्धत्वात् [illegible] विशेषसंज्ञायास्तु केषांचिदेव भावात्तस्याश्च भवन-[illegible] प्रतिपादनमनारभ्य विशिष्टसंज्ञायाः कारणं सूत्रकृद्दर्शयितुमाह।

(सेज्जं पुण जाणेज्जाऽवि सुत्तं यावत् सोऽहमिति)

इति निर्देशो भगवतोक्त्या प्रथमैकवचनान्तः स इत्यनेन च यः प्राग्निर्दिष्टो ज्ञाता विशिष्टदिगागतः [illegible] भूयते यदा [illegible] निर्दिष्टे [illegible] कोऽहममूत्रमभीन [illegible] देवो [illegible] वा स्त्री पुमान्नपुंसको वा पुनः मनुष्यजन्मनः प्रच्युतः [illegible] वा [illegible] भवतीति न कश्चिदनादौ संसारे पर्यटन् [illegible] दिक् आगतावागतः [illegible] शब्दः संबंधवाची [illegible] क्वार्थः । [illegible] मतिपूर्विका [illegible] न पुनरेवं [illegible] समवायपूर्वकमिति [illegible] । [illegible] विशेषण [illegible] विशिष्टोऽवबोधः [illegible] पुनः [illegible] धिमनःपर्यायकेवलज्ञान [illegible] तत्रावधिमनःपर्यायकेवलानां [illegible] जातिस्मरणं [illegible] [illegible]

[illegible]दिशुन[illegible]मेति म च द्रव्यकषायपोगोपयोग- [illegible]र्वाघ्रानमेदाद्बहुधा तत्रोपयोगात्मना भाद्- [illegible] शेषास्तु मद्भजनयोपयुज्यन्त इति । तथा [illegible]ऽनुग्य दिशोऽनुदिशश्च सकाशादनुसञ्चर- [illegible]दनादनु पश्चात् संचरत्यनुसञ्चरति [illegible] (अनुसंसरति) दिग्विदिशां गमनं भावदिगागमनं [illegible]। मांसनं सुभावयपेन पूर्वसूत्रोक्तमेवार्थमु- [illegible] दिशा मर्थस्यामनुदिशो प आगतोऽनुस- [illegible] सोऽहमित्यात्मोल्लेखोऽहंप्रत्ययमाहा- [illegible] पूर्वेणः प्रज्ञापकदिशः सर्वगृहीता भाव- [illegible] ।

[illegible] निर्युक्तिकृद्दर्शयितुमना गाथात्रितयमाह—

[illegible] अवेमि वाति अंबिर् सोचा ।
[illegible] नीरं वर नीसरावद ॥ ६४ ॥
[illegible] पदं तस्य जाणना होइ ॥
[illegible] य ॥ ६८ ॥
[illegible] पुण [illegible] निणा परं नत्थि ।
[illegible] मग्गो पगो मग्गो ६६ आचा०॥

[illegible]

क्रियायाः । श्रुत्वा चैतदसार्थचितयपदि सर्वज्ञानुं [illegible] स्याच्छोभनं भवेदेयमध्यवसायिनस्तस्यामाधास्यदौ [illegible] पनासन्नपथेन गच्छतां साधूनां दर्शनमभूत्ते च तेनाभि[illegible] विमप भवतामनाकृष्टिर्न सञ्जाता येनाऽर्थी प्रस्थि[illegible] भिहितं यथाऽस्माकं पापचविमनाकृष्टिरित्यभिधा[illegible] न्ताः साधवस्तस्य च तदाकर्ण्येहापोहविमर्शनाज्जाति[illegible] णमुत्पन्नं यथाहं जन्मान्तरं प्रव्रज्यां कृत्वा देवलोकमनु- [illegible] भूयेहागत इत्येवं तेन विशिष्टदिगागमनं स्वमत्या [illegible] स्मरणरूपया विज्ञातं प्रत्येकबुद्धश्च जातः एवमन्येऽपि [illegible] वीरियैयाससम्भूतयोऽत्र योज्या इति। परव्याकरणे [illegible] हरणं गौतमस्वामिना भगवान्वर्द्धमानस्वामी पृष्टो भगव[illegible] मिति मे केवलज्ञानं नोत्पद्यते भगवता व्याहृतं भो गौत[illegible] भवतोऽतीव ममोपरि स्नेहोऽस्ति तद्दशास्तेनोक्तं [illegible] किंनिमित्तः पुनरसौ मम भगवदुपरि स्नेहस्ततो भगव[illegible] स्य बहुषु भवान्तरेषु पूर्वसंबंधः समावेदितः (चिरसंसिट्ठो [illegible] मे गोयमेत्येवमादि) तथा तीर्थकृद्व्याकरणमाकर्ण्य [illegible] स्वामिना विशिष्टदिगागमनादि विज्ञानमभूदिति [illegible] त्यदमुदाहरणं मल्लिस्वामिना षण्णां राजपुत्राणामनुरागे[illegible] मागतानामवधिज्ञानेन तत्प्रतिबोधनार्थं यथा जन्मान्तरे [illegible] सैरेव प्रव्रज्या कृता यथा च तत्फलं देवलोके जयन्ता[illegible] ख्यविमानेऽनुभूतं तथाख्यातं तथाख्याते तथाकर्ण्य ते[illegible] षु कर्मत्वात्मतिबुद्धविशिष्टदिगागमनविज्ञानश्च सञ्जातं [illegible] "किं च तयं पम्हुट्ठं च तया भो जयंतपवरंमि । बुज्झ मम [illegible] वतिविह्ठ देवा तं संभरह जाति" ॥ इति गाथात्रयतात्पर्यार्थः ॥ आचा० ॥ टी० ॥

(१४) [illegible]ज्ञानत्रयस्याचिख्यासयाह—

अण्णाणमुपत्तो णियत्तं चेव भमए समयं ।
कारणमविभागाईहिं इमाहिं गाहाहिं ॥ २६२ ॥

व्या०-[illegible] देहात् प्रभूतं स्वरूपेण [illegible] [illegible] भगवन्तं । [illegible] हेतुना [illegible] [illegible]मित्यर्थः । कारणाविभागादयश्च [illegible] [illegible] इमाभिरिति [illegible]गाथाभिरिचेति गाथार्थः ।

कारणविभागकारणविणागबंधस्स पच्चया भावा ।
[illegible] य अत्थाणपाउब्भावा विणागा य ॥ २६३ ॥

[illegible]

असतिदारमहुणा अन्नो देहागिहाउ पुरिसोव्व ।
तज्जीवतस्सरीरे य मयघायतं इमं भणियं २६४ ॥

व्या० अन्यो देहादिति द्वारमधुना तदेतद्व्याख्यायते अन्यो देहादपि इति गम्यते गृहादिगतपुरुषवदिति दृष्टांतस्तत्रापि तत्र नियमतोऽभावादिति हेतुरभ्यूह्यः न चासिद्धोऽयं मृतदेहे अदर्शनात् प्रयोगफलमाह तज्जीवतच्छरीरवादिमतविघातार्थमिदं प्रयोगरूपं भणितमिति गाथार्थः ॥ द्दा०अ०४॥ प्रयोगान्तरमाह-

देहिंदियाइरित्तो आया खलु तदुवलद्धअत्थाणं ।
तव्विगमेवि सरणओ गेहगवक्खेहिं पुरिसोव्व ॥ २६५ ॥

व्या० खलुशब्दो विशेषणार्थत्वात् कथंचिद्देहेंद्रियातिरिक्त आत्मेतिप्रतिज्ञार्थः । तदुपलब्धार्थानामिति सम्भवतःपरामर्शत्वात् इंद्रियोपलब्धार्थानाम् तद्विगमेऽपींद्रियविगमेऽपि स्मरणादितिहेत्वर्थः स्मरंति चांधबधिरादयः पूर्वानुभूतं रूपादीति गेहगवाक्षैः पुरुषवदिति दृष्टांतः प्रयोगस्तु कथंचिद्देहेंद्रियातिरिक्त आत्मा तद्विगमेऽपि तदुपलब्धार्थानुस्मरणात् पंचवातायनोपलब्धार्थानुस्मर्तृदेवदत्तवदिति गाथार्थः ॥ द्दा० अ०४॥

इंद्रियोपलब्धिं मत्वा शंकापोहायाह-

न उण इंदियाइं उवलद्धिमंति विगएसु विसयसंभरणा ।
जह गेहगवक्खेहिं जो अणुसरिया स उवलद्धा ॥ २६६ ॥

व्या० न पुनरिंद्रियाण्येवोपलब्धिमंति द्रष्टृणि कुत इत्याह विगतेष्विंद्रियेषु विषयस्मरणात् तद्गृहीतरूपाद्यनुस्मृतेरंधबधिरादीनामिति । निदर्शनमाह यथा गेहगवाक्षैःकरणभूतैर्दृष्टानर्थाननुस्मरन् योऽनुस्मर्ता स उपलब्धा न तु गवाक्षा एव तत्रापेतात् गाथार्थः ॥ द्दा० अ० ४ ॥

उक्तमेवेन प्रकारेणान्यत्वद्वारमधुना अमूर्त्तद्वारावसर इत्याह भाष्यकारः ।

संपयममुत्तदारं अइंदियत्ता अछेयभेयत्ता ।
रूवाइविरहओ वा अणाइपरिणामभावाओ ॥ २६७ ॥

व्या० संप्रतममूर्त्तद्वारं तद्व्याख्यायते अमूर्त्तो जीवः अतींद्रियत्वात् द्रव्येंद्रियाग्राह्यत्वात् अच्छेद्याभेद्यत्वात् खड्गशूलादिना, रूपादिविरहितश्च अरूपत्वादित्यर्थः तथाऽनादिपरिणामभावादिति स्वभावतोऽनादमूर्तपरिणामत्वादिति गाथार्थः । द्दा० अ० ४ ॥

छउमत्थाणुवलंभा तहेव सव्वन्नुवयणओ चेव ।
लोयाइपसिद्धीओ जीवो मुत्तोत्ति नायव्वो ॥ २६८ ॥

व्या० छद्मस्थानुपलंभात् । अवधिज्ञानिप्रभृतिभिरपि मात्रादगृह्यमाणत्वात् तथैव सर्वज्ञवचनाच्च सत्यवक्तृवीतरागवचनादित्यर्थः लोकादिप्रसिद्धेः लोकादावमूर्त्तत्वेन प्रसिद्धत्वात् ॥ आदिशब्दाद्वेदसमयपरिग्रहः । अमूर्त्तो जीव इति ज्ञातव्यः सर्वमेवेदं प्रतीतमिति गाथार्थः । उक्तममूर्त्तद्वारम् । द्दा० अ० ४ ॥

तस्य घात्यादिकर्मसंबद्धस्य कदाचिदपि सांसारिकस्यात्मनः स्वरूपेऽनवस्थानात् सत्यप्यमूर्त्तत्वे मूर्त्तेन कर्मणा संबंधो न विरुध्यते । कर्मसंबंधाच्च सूक्ष्मबादरैकेंद्रियद्वित्रिचतुःपंचेंद्रियपर्याप्तपर्याप्तसाधपस्था बहुविधाः प्रादुर्भवन्ति ॥ सूत्र० अ० १ ॥

इदानीं नित्यत्वद्वारावसरस्तथा चाह भाष्यकारः—

णिच्चोत्ति दारमहुणा णिच्चो अविणासिसासओ जीवो ।
भावत्ते सइजम्मा भावाओ न हं व विन्नेओ ॥ २६९ ॥

व्या० नित्य इति नित्यद्वारमधुना अवसरप्राप्तं तद्व्याचिख्यासुराह—"नित्यो जीव इति एतावत्युच्यमाने परेरपि संतानस्य नित्यत्वाभ्युपगमात्सिद्धं साध्यते । तन्निराकरणायाह—अविनाशी क्षणापेक्षयापि न निरन्वयनाशधर्म्मा । एवमपि परिमितकालावस्थायी कैश्चिदिष्यते"कप्पट्ठाइपुढवीभिक्खूवेति" वचनात्तदपोहायाशास्वत इति सर्वकालावस्थायी कुत इत्याह-भावत्वे सति वस्तुत्वे सतीत्यर्थः जन्माभावात् अनुत्पत्तेर्नभोवदाकाशवद्विशेषः भावत्वे सतीति विशेषणं । खरविषाणादिव्यवच्छेदार्थमिति गाथार्थः ।

हेत्वंतराण्याह—

संसाराओ आलोयणाओ तह पच्चभिन्नभावाओ ।
खणभंगविघायट्ठं भणियं तेलोक्कदंसीहिं ॥ २७० ॥

व्या० संसारादिति संसरणं संसारस्तस्मात्स एव नारकः स एव तिर्यगादिति नित्यः । आलोचनादिति आलोचनं करोम्यहं कृतवानहं करिष्येऽहमित्यादिरूपं त्रिकालविषयमिति नित्यः तथा प्रत्यभिज्ञाभावात् स एव इति प्रत्यभिज्ञाप्रत्यय आविद्वदंगनादिसिद्धस्तदभेदग्राहीति नित्य इति । उक्ताभिधानफलमाह क्षणभंगविघातार्थं निरन्वयक्षणिकवस्तुवादविघातार्थं भणितं त्रैलोक्यदर्शिभिस्तीर्थंकरैरेतदनंतरोदितं न पुनरेव एव परमार्थ इति गाथार्थः । द्दा०अ०४॥

एतदेव दर्शयति—

लोगे वेए समये, निच्चो जीवो विभासओ अम्हं ।
इहरा संसाराई सव्वंपि न जुज्जए तस्स ॥ २७१ ॥

व्या० लोके । नैनं छिन्दंति शस्त्राणीत्यादिवचनप्रामाण्यात् वेदेषु स एव अक्षयोऽज इत्यादिश्रुतिप्रामाण्यात् समये न प्रकृतिर्न विकृतिः पुरुष इति वचनप्रामाण्यात् किमित्याह नित्यो जीवः अप्रच्युतानुत्पन्नस्थिरैकस्वभावः एकांतनित्य एव न चैतन्न्यायमेकस्वभावतया संसरणादिव्यवहारोच्छेदप्रसंगादिति यदयस्यत आह—विभाषयास्माकं विकल्पनेन भजनया स्यान्नित्य इत्यादिरूपया द्रव्यार्थादेशान्नित्यः पर्यायार्थादेशादनित्य इत्यर्थः । इतरथा यद्येवं नाभ्युपगम्यते ततः संसारादि संसारालोचनादि सर्वमेव [illegible] एकस्वभावतया [illegible] .संरयममूर्तत्वान्य- [illegible] व्यवहाराभावप्रसंगात् एकांतामूर्त्तस्यैकांतदेहभिन्नस्य घातिपाताद्यसंभवादित्यत्र यद्वक्तव्यं तत्तु नोच्यते अक्षरगमनिकामात्रत्वादारंभस्येति गाथार्थः ॥ द्दा०अ० ४॥

एवमन्यत्वादिद्वारत्रयं व्याख्यायाधिकृतनिर्युक्तिगाथां व्याचिख्यासुराह—

कारण अविभागाओ कारणअविणासओ य जीवस्स ।
निच्चत्तं विन्नेयं आगासपडाणुमाणाओ ॥ २७२ ॥

व्या० कारणाविभागात्पटादेस्तंत्वादेरिव कारणविभागाभावादित्यर्थः । कारणाविनाशतश्च कारणाविनाशश्च कारणनाशाभावात् किमित्याह जीवस्यात्मनो नित्यत्वं विज्ञेयं

[illegible] ... दृष्टांतवचनः। [illegible] । [illegible] प्रयोगेऽनित्य आत्मा स्वाका- [illegible] ... कारणविनाशाभावाद्- [illegible] ... कारण- [illegible] । [illegible] ... [illegible] ॥

[illegible] कारणविनाशा- [illegible] ॥ सूत्र० श्रु० ५॥

[illegible] ... मनुष्यालयगतिव- [illegible] ॥ सूत्र० । श्रु० १॥

[illegible] ... [illegible] । [illegible] ... ॥ ४९॥

[illegible]

चिन्द्रेदमित्रैः कर्म्मकरणादिपर्यायांतरैर्विशिष्यते [illegible] नोक्तदोष इति । पूर्वं भावितमर्थमिदं पुनरपि [illegible]-

एक्कंपि सव्वकारगपरिणामाणुभावया नेइ ।
नाणाणाणत्तो जह विसेसाइ परिणामं ॥

व्या० एकमपि घटादिकं वस्तु सर्वकारकपरिणाम[illegible] न्यान्यभावतामन्यान्यरूपतामेति । यथा [illegible] न्यः सन्निवेशादिपरिणाममेति स एव हि [illegible] न्यमानः कर्ता करणभूतमनन्यत्वात्स एव च [illegible] संधेयमानस्तु स एव विशेष इति सविस्तरेण [illegible] विशे० ॥ इदानीं देहव्यापित्वद्वारावसर इत्याह [illegible]-

व्याविदारमहुणा देहव्यावीमओ त्ति उराई य ।
जीवो न उ सव्वगओ देहेलिंगोवलंभाओ ॥२८०॥

व्या० व्यापीति द्वारमधुना तदेतद्व्याख्यायते । देहव्ये शरीरमात्रे व्याप्तुं शीलमस्येति तथा मतः इष्टः प्रवचने वो न तु सर्वग इति योगः [illegible] रिमात्रः कुत इत्याह-देहे लिंगोपलम्भात् शरीर एव [illegible] रि तल्लिंगोपलब्धेः [illegible] उपलब्धे [illegible] आत्मेनेत्यलमनाथीति गाथा प्रयोगार्थः प्रयोगस्तु [illegible] देहमात्रव्यापी परिमितदेशो लिंगोपलब्धेः [illegible] इत्यवयवार्थप्रथमा मूलद्वारगाथा ॥ दश० अ० ४॥

[illegible] ऽन्यात्मानमधिकृत्य-स च न सर्वव्यापी [illegible] सर्वत्रानुपलभ्यमानत्वात् घटवत् । नापि [illegible] मात्रोऽङ्गुष्ठपर्वमात्रो वा [illegible] [illegible] त्वचोपलभ्यमानगुणत्वात् । [illegible] [illegible] ॥ सूत्र० श्रु० १॥

(तथा च स्याद्वादमञ्जर्याम्) अथ ते वादिनः [illegible] [illegible] विगुणं मन्यते ।

तत्रात्मनोऽसर्वगतत्वमाह-

यत्रैव यो दृष्टगुणः स तत्र कुम्भादिवन्निष्प्रतिपक्षमेतत् ।
तथापि देहाद्बहिरात्मतत्त्वमतत्त्ववादोपहताः पठन्ति ॥ ९ ॥

व्या० यत्रैव देशे यः पदार्थो दृष्टगुणः दृष्टा [illegible] गुणा धर्मा यस्य स तथा स पदार्थः [illegible] [illegible] ... [illegible]

[illegible]

[illegible]

बाधकमिति चेन्नैव वाच्यः स हि न खलु मन्त्रादीनां गुणः किं तु तदधिष्ठातृदेवतानां तासां चाकर्षणीयोच्चाटनीयादिदेशगमने कौतस्कुतोऽयमुपालम्भः न जातु गुणो गुणिनमन्तरेणाऽपि वर्तत इति । अथोत्तरार्द्धं व्याख्यायते तथापीत्यादि । तथापि एवं निःप्रश्नं व्यवस्थितेऽपि तत्त्वेऽतत्त्ववादोपहता अनाचार इत्यत्र नञः कुत्सार्थत्वात् कुत्सिततत्त्ववादेन तदभिमताप्ताभासपुरुषविशेषप्रणीतेन तत्त्वाभासप्ररूपणेनोपहता व्यामोहिता देहाद् बहिःशरीरव्यतिरिक्तेऽपि देशे आत्मतत्त्वमात्मस्वरूपं पठन्ति शास्त्ररूपतया च पठन्ते इत्यक्षरार्थः । भावार्थस्त्वयं आत्मा सर्वगतो न भवति सर्वत्र तद्गुणानुपलब्धेः यो यः सर्वत्रानुपलभ्यमानगुणः स सर्वगतो न भवति यथा घटस्तथा चायं तस्मात्तथा व्यतिरेके व्योमादि नचायमसिद्धो हेतुः कायव्यतिरिक्तदेशे तद्गुणानां बुद्ध्यादीनां वादिना प्रतिवादिना वाऽनभ्युपगमात् तथा च भट्टश्रीधरः सर्वगतत्वेऽप्यात्मनो देहप्रदेशे ज्ञातृत्वं नान्यत्र शरीरस्योपभोगायतनत्वात् अन्यथा तस्य वैयर्थ्यादिति अथास्त्यदृष्टमात्मनो विशेषगुणस्तच्च सर्वोत्पत्तिमतां निमित्तं सर्वव्यापकं च कथमितरथा द्वीपान्तरादिष्वपि प्रतिनियतदेशवर्तिपुरुषोपभोग्यानि कनकरत्नचन्दनाङ्गनादीनि तेनोत्पाद्यन्ते गुणाश्च गुणिनं विहाय न वर्तन्तेऽतोऽनुमीयते सर्वगत आत्मेति नैवं अदृष्टस्य सर्वगतत्वसाधने प्रमाणाभावात् अथास्त्येव प्रमाणं वह्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनं चादृष्टकारितमिति चेन्न तयोस्तत्स्वभावत्वादेव तत्सिद्धेः दहनस्य दाहकत्ववत् साप्यदृष्टकारिता चेत्तर्हि जगत्त्रयवैचित्र्यसूत्रणेऽपि सैव सूत्रधारायतां किमीश्वरकल्पनया तत्रायमसिद्धो हेतुः न चानैकान्तिकः साध्यसाधनयोर्व्याप्तिग्रहणेन व्यभिचाराभावात् नापि विरुद्धोऽत्यन्तं विपक्षव्यावृत्तत्वात् आत्मगुणाश्च बुद्ध्यादयः शरीर एवोपलभ्यन्ते ततो गुणिनापि तत्रैव भाव्यमिति सिद्धः कायप्रमाण आत्मा । अन्यच्च त्वयात्मनां बहुत्वमिष्यते "नानात्मानो व्यवस्थात" इति वचनात् ते च व्यापकास्तेषां प्रदीपप्रभामण्डलानामिव परस्परानुवेधेन तदाश्रितशुभाशुभकर्मणामपि परस्परं सङ्करः स्यात् तथा चैकस्य शुभकर्मणाऽन्यः सुखी भवेत् इतरस्याशुभकर्मणाऽन्यो दुःखीत्यसमञ्जसं समापद्येत अन्यच्चैकस्यैवात्मनः स्वोपात्तशुभकर्मविपाकेन सुखित्वं परोपार्जिताऽशुभकर्मविपाकसम्बन्धेन च दुःखित्वमिति युगपत् सुखदुःखसंवेदनप्रसङ्ग. अथ स्वादृष्टभोगायतनमाश्रित्यैव शुभाशुभयोर्भोग इति चेत्तर्हि स्वोपार्जितमप्यदृष्टं कथं भोगायतनाद् बहिर्निष्क्रम्य वह्नेरूर्ध्वज्वलनादिकं करोतीति चिन्त्यमेतत् । आत्मनां च सर्वगतत्वे एकैकस्य सृष्टिकर्तृत्वप्रसङ्गः सर्वगतत्वेनेश्वरान्तरानुप्रवेशस्य संभावनीयत्वात् ईश्वरस्य वा तदन्तरानुप्रवेशे तस्यापि अकर्तृत्वापत्तिः न हि क्षीरनीरयोरन्योन्यसंबन्धे एकतरस्य पानादिक्रियाऽन्यतरस्य न भवतीति युक्तं वक्तुं किं चात्मनः सर्वगतत्वे नरनारकादिपर्यायाणां युगपदनुभवानुषङ्गः अथ भोगायतनाभ्युपगमान्नायं दोष इति चेन्ननु स भोगायतनं सर्वात्मनावष्टभ्नीयादेकदेशेन वा सर्वात्मना चेदस्मदभिमताङ्गीकारः एकदेशेन चेत्सावयवत्वप्रसङ्ग परिपूर्णभोगाभावश्च अथात्मनो व्यापकत्वाभावे दिग्देशान्तरवर्तिपरमाणुभिर्युगपत् संयोगाभावादाद्यकर्माभावस्तदभावादन्त्यसंयोगस्य तन्निर्मितशरीरस्य तेन तत्संबन्धस्य चाभावादनुपायसिद्धः सर्वदा सर्वेषां मोक्षः स्यात् नैवं यदेव संयुक्तं तदेव तं प्रत्युपसर्पतीति नियमासंभवात् अयस्कान्तं प्रत्ययसस्तेनासंयुक्तस्याप्याकर्षणोपलब्धेः । अथासंयुक्तस्याप्याकर्षणे तच्छरीरारम्भं प्रत्येकमुखीभूतानां त्रिभुवनोदरविवरवर्तिपरमाणूनामुपसर्पणप्रसङ्गात् न जाने तच्छरीरं कियत्प्रमाणं स्यादिति चेत् संयुक्तस्याप्याकर्षणे कथं स एव दोषो न भवेत् आत्मनो व्यापकत्वेन सकलपरमाणूनां तेन संयोगात् अथ तद्भावाविशेषेऽप्यदृष्टवशाद् विवक्षितशरीरोत्पादनानुगुणा नियता एव परमाणव उपसर्पन्ति तदितरत्रापि तुल्यं । अथास्तु यथाकथंचिच्छरीरोत्पत्तिस्तथापि सावयवं शरीरं प्रत्यवयवमनुप्रविशन्नात्मा सावयवः स्यात्तथा चास्य पटादिवत्कार्यत्वप्रसङ्गः कार्यत्वे चासौ विजातीयैस्सजातीयैर्वा कारणैरारभ्येत न तावद्विजातीयैस्तेषामनारम्भकत्वान्न हि तन्तवो घटमारभन्ते न च सजातीयैर्यत आत्मत्वाभिसंबन्धादेव तेषां कारणानां सजातीयत्वं पार्थिवादिपरमाणूनां विजातीयत्वात्तथा चात्मभिरात्माऽऽरभ्यत इत्यायातं तच्चायुक्तम् एकत्र शरीरेऽनेकात्मनामात्मारम्भकाणामसंभवात् संभवे वा प्रतिसंधानाऽनुपपत्तिः न ह्यन्येन दृष्टमन्यः प्रतिसंधातुमर्हति अतिप्रसङ्गात् तदारभ्यत्वे चास्य घटवदवयवक्रियातो विभागात्संयोगविनाशाद्विनाशः स्यात् । तस्माद्व्यापक एवात्मा युज्यते कायप्रमाणतायामुक्तदोषसद्भावात् इति चेन्न सावयवत्वकार्यत्वयोः कथंचिदात्मन्यभ्युपगमात् तत्र सावयवत्वं तावदसंख्येयप्रदेशात्मकत्वात् तथा च द्रव्यालंकारकारः "आकाशोऽपि सदेशः सकृत्सर्वमूर्ताभिसंबन्धार्हत्वात् इति" यद्यप्यवयवप्रदेशयोर्गन्धहस्त्यादिषु भेदोऽस्ति तथापि नात्र सूक्ष्मेक्षिका चिन्त्या प्रदेशेष्वप्यवयवव्यवहारात् कार्यत्वन्तु वदामः नन्वात्मनां कार्यत्वे घटादिवत्प्राक्प्रसिद्धसमानजातीयावयवारभ्यत्वप्रसक्तिः अवयवा ह्यवयविनमारभन्ते यथा तन्तवः पटमिति चेन्न वाच्यं न खलु घटादावपि कार्ये प्राक्प्रसिद्धसमानजातीयकपालसंयोगारब्धत्वं दृष्टं कुम्भकारादिव्यापारान्वितान्मृत्पिण्डात्प्रथममेव पृथुबुध्नोदराद्याकारस्यास्योत्पत्तिप्रतीतेः द्रव्यस्य हि पूर्वाकारपरित्यागेनोत्तराकारपरिणामः कार्यत्वं तच्च बहिरिवान्तरप्यनुभूयत एव ततश्चात्मापि स्यात् कार्यं न च पटादौ स्वावयवसंयोगपूर्वककार्यत्वोपलम्भात्सर्वत्र तथाभावो युक्तः काष्ठे लोहलेख्यत्वोपलम्भाद्वज्रेऽपि तथाभावप्रसंगात् प्रमाणबाधनमुभयत्रापि तुल्यं न चोक्तलक्षणकार्यत्वाभ्युपगमेऽप्यात्मनोऽनित्यत्वानुषङ्गात्प्रतिसंधानाभावोऽनुषज्यते कथंचिदनित्यत्वे सत्येवास्योपपद्यमानत्वात् प्रतिसंधानं हि यमहमद्राक्षं तमहं स्मरामि इत्यादिरूपं तच्चैकान्तनित्यत्वे कथमुपपद्यतेऽवस्थाभेदात् अन्या ह्यनुभवावस्थाऽन्या च स्मरणावस्था अवस्थाभेदे चाऽवस्थावतोऽपि भेदादेकरूपत्वक्षतेः कथंचिदनित्यत्वं युक्त्या यातं केन वार्यताम् । अथात्मनः शरीरपरिमाणत्वे मूर्त्तत्वानुषङ्गाच्छरीरेऽनुप्रवेशो न स्यान्मूर्ते मूर्तस्यानुप्रवेशविरोधात् ततो निरात्मकमेवाखिलं शरीरं प्राप्नोतीति चेत् किमिदं मूर्त्तत्वं नाम असर्वगतद्रव्यपरिमाणत्वं रूपादिमत्त्वं वा । तत्र नाद्यः पक्षो दोषाय सम्मतत्वात् । द्वितीयस्त्वयुक्तो व्याप्त्यभावात् यदसर्वगतं तन्नियमेन रूपादिमदिति नाविनाभावोऽस्ति मनसोऽसर्वगत-

त्वेऽपि भवन्मते तदसंभवात् आकाशकालदिगात्मनां सर्वगतत्वं परममहत्त्वं सर्वसंयोगिसमानदेशत्वं चेत्युक्तत्वान्मनसो वैधर्म्यात्सर्वगतत्वप्रतिषेधनात् अतो नात्मनः शरीरेऽनुप्रवेशानुपपत्तिर्येन निरात्मकं तत्स्यात् असर्वगतद्रव्यपरिमाणलक्षणमूर्त्तत्वस्य मनोवदप्रवेशाऽप्रतिबंधकत्वात् रूपादिमत्त्वलक्षणमूर्त्तत्वोपेतस्यापि जलादेर्वालुकादावनुप्रवेशो न निषिध्यते । आत्मनस्तु तद्रहितस्यापि तथासौ प्रतिषिध्यते इति महाद्भुतम् । अथात्मनः कायप्रमाणत्वे बालशरीरपरिमाणस्य सतो युवशरीरपरिमाणस्वीकारः कथं स्यात् किं तत्परिमाणपरित्यागात्तदपरित्यागाद्वा परित्यागाच्चेत्तदा शरीरवत्तस्याऽनित्यत्वप्रसंगात्परलोकाद्यभावानुषंगः अथापरित्यागात्तन्न पूर्वपरिमाणापरित्यागे शरीरवत्तस्योत्तरपरिमाणोत्पत्त्यनुपपत्तेः तदयुक्तं युवशरीरपरिमाणावस्थायामात्मनो बालशरीरपरिमाणपरित्यागे सर्वथा विनाशाऽसंभवात् विफणावस्थोत्पादे सर्पवदिति । कथं परलोकाभावोऽनुपज्यते पर्यायतस्तस्या नित्यत्वेऽपि द्रव्यतो नित्यत्वात् । अथात्मनः कायप्रमाणत्वे तत्खंडने खंडनप्रसंग इति चेत्कश्चिदाह । शरीरस्य खंडने कथंचित् तत्खंडनस्येष्टत्वात् शरीरसंबद्धात्मप्रदेशेभ्यो हि कतिपयात्मप्रदेशानां खंडितशरीरप्रदेशेऽवस्थानादात्मनः खंडनं तच्चात्र विद्यत एवाऽन्यथा शरीरात् पृथग्भूतावयवस्य कंपोपलब्धिर्न स्यात् न च खंडितावयवानुप्रविष्टस्यात्मप्रदेशस्य पृथगात्मत्वप्रसंगस्तत्रैवानुप्रवेशात् न चैवमेकत्र संताने ऽनेके आत्मानः प्रकार्यप्रतिमासिसा... [illegible] प्रतिमासामावप्रसंगात् शरीरांतरव्यवस्थितानेकज्ञानावमेयार्थसंवित्तिवत् कथं खंडितावयवयोः संघटनं पश्चादिति चेत् एकांतेन छेदानभ्युपगमात् पद्मनालतंतुवच्छेदस्यापि स्वीकारात् तथाभूतादृष्टवशात्तत्संघट्टनमविरुद्धमेवेति तनुपरिमाण एवात्मा... [illegible] व्यापकस्तथा चात्मा व्यापको न भवति चेतनत्वात् ... [illegible] न भवति यथा व्योम चेतनश्चात्मा तस्मान्न व्यापकः ... [illegible] सिद्धा कायप्रमा... [illegible] समुद्घातदशायामर्हतात्मनः ... [illegible] सर्वव्यापकत्वं ... [illegible] तेन व्यभिचारः ... [illegible] भवमिति काव्यार्थः ॥ स्था० । २ ॥

(१५) इदानीं ... [illegible] माह—

... [illegible] जओ जीवो ।
... [illegible] एवं ॥ २७१ ॥

[illegible]

[illegible] ॥

[illegible] ॥

व्या० । येषामपि द्रव्यास्तिकादिनयमतावलंबिनां तत्र... याणां किं अस्ति विद्यते आत्मा जीवो ... आतरीयाः साध्येतदस्माकमप्यस्ति स । तदभावे ... यावैफल्यात् अकर्त्ता न भवति सुकृतदुष्कृतानां कर्म... मकर्त्ता न भवत्यनिष्पादको न भवति किं तु कर्त्तैव ... पपत्तिमाह । वेदयते अनुभवति येन कारणेन किं सु... दुःखं दुष्कृतसुकृतकर्मफलमिति भावः । न चाकर्तुस्त... स्तदनुभवो युज्यते अतिप्रसंगान्मुक्तानामपि सांसारि... सुखदुःखवेदनापत्तेरकर्तृत्वाविशेषात् प्रकृत्यादिवियोग... त्यनाधेयातिशयमेकांतेनाकर्त्तारमात्मानं प्रत्यकिंचित्कर... दलं विस्तरेणेति गाथार्थः ॥ दश० अ० १ ॥

(विशेषावश्यके आत्मनः सक्रियत्वं साधयन्नाह)

कत्ताइत्तणओ वा सक्किरिओ यं मओ कुलालोव्व ।
देहप्फंदणओ वा पच्चक्खं जंतपुरिसोव्व ॥

अथवा सक्रियोऽयमात्मा कर्तृत्वात्कुलालवदादिशब्दात् ... क्तृत्वादित्यादि वाच्यं अथवा सक्रिय आत्मा प्रत्य... एव देहपरिस्पंददर्शनाद्यंत्रपुरुषवदिति. परासां ... विघातं चाह—

देहप्फंदणहेऊ होज्ज पयत्तोत्ति सो वि नाकिरिए ।
होज्जादिट्ठे व सई तदरुवत्तेणगु समाणं ॥
रवितंमि संदेहो व्वा त्थप्फंदणे पुणो हेऊए ।
इति पयप्फंदणमन्नेवणाणं न वियज्जुत्तं ॥

अथैवं ब्रूषे देहपरिस्पंदहेतुरात्मनः प्रयत्नो न तु ... मतो नात्मनः सक्रियत्वसिद्धिरित्यभिप्रायः । अत्रोच्यते ... सोऽपि प्रयत्नो नमसीवाऽक्रिये आत्मनि न संभवत्यतः ... य यथासौ अमूर्त्तस्य च प्रयत्नस्य देहपरिस्पंदहेतुत्वे ... ऽन्यो हेतुरिति वाच्यम् । अन्यहेतुः निरपेक्षः स्वत एव ... परिस्पंदहेतुरिति चेदेवमात्मापि तद्धेतुर्भविष्यति ... मंतर्गडुना प्रयत्नेन अथादृष्टः कोऽपि देहपरिस्पंदहेतुर्न त्व... निष्क्रियत्वात् ननु सोऽप्यदृष्टः किं मूर्तोऽमूर्तो वा यद्यमूर्त... आत्मापि देहपरिस्पन्दहेतुः किं नेष्यः किं नेष्यते मूर्त... विशेषाद्यस मूर्तिमान् दृष्टः तर्हि स कार्मणशरीररूप... देह एव मान्यः संभवति तस्यापि च बहिरंगदेहपरि... दहेतुतया व्याप्रियमाणस्य परिस्पंदो द्रष्टव्यः स्वस्य ... स्पंदहेतुर्वाच्यस्तस्याऽप्यन्यस्तस्यापि चान्य इत्यनवस्था ... स्वभावादेवादृष्टस्य कार्मणदेहस्य परिस्पन्दः प्र... तर्हि बहिरंगस्यापि देहस्य तत एव तत्प्रवृत्तिर्भविष्य... किमदृष्टकार्मणदेहपरिकल्पनेन अस्त्वेवमिति चेत्तदयुक्त... अचेतनानामवंभूतप्रतिनियतविशिष्टपरिस्पन्दस्याभा... त्वानुपपत्तेः "नित्यं सत्त्वमसत्त्वं वा हेतोरन्यानपेक्ष... दित्यादिदोषप्रसंगात् तस्मात्कर्मविशिष्ट आत्मैव प्रति... देहपरिस्पंदहेतुत्वेन व्याप्रियत इति सक्रियोऽया... ॥ विशे० ॥

... आत्मनोऽक्रियत्वम् तथाच स्याद्वादमञ्ज... "अमूर्त्तश्चेतनो भोगी नित्यः सर्वगतोऽक्रियः । अकर्ता नि...

यः सूक्ष्म आत्मा कपिलदर्शने" इति ॥ स्था० ॥

(एतन्मतनिराकरणं सूत्रकृताङ्गे यथा)

जे केइ लोगंमि उ अकिरियआया, अन्नेण पुट्ठा धुयमादि-संति । आरंभसत्ता गढिता य लोए, धम्मं ण जाणंति वि-मुक्खहेउं ॥ १६ ॥ सू० ॥

ये केचन अस्मिन् लोके अक्रिय आत्मा येषामभ्युपगमे तेऽक्रियात्मनः सांख्यास्तेषां हि सर्वव्यापित्वादात्मा निष्क्रियः पठ्यते । तथा चोक्तम् अकर्ता निर्गुणो भोक्ता आत्मा कपिलदर्शने इति । तु शब्दो विशेषणे । स चैतद्विशिनष्टि । अमूर्तत्वव्यापित्वाभ्यामात्मनोऽक्रियत्वमेव युज्यते ते चाक्रियात्मवादिनोऽन्येनाक्रियत्वे सति बंधमोक्षौ न घटेते इत्यभिप्रायवता मोक्षसद्भावं पृष्टाः संतोऽक्रियावाददर्शनेऽपि धूतं मोक्षं तद्भावमादिशंति प्रतिपादयंति ते तु पचनपाचनादिके स्नानार्थं जलावगाहनरूपे वाऽऽरंभे सावद्ये सक्ता अभ्युपपन्ना लोके मोक्षैकहेतुभूतं धर्मं श्रुतचारित्राख्यं न जानंति कुमार्गमाहिणो न सम्यगवगच्छंतीति ॥ सूत्र० अ० १० ॥

(१६ आत्मनो विभुत्वविचारः सम्मतितर्के)

न चात्मनो विभुत्वमसिद्धं अनुमानात् तत्सिद्धेस्तथा हि बुध्यधिकरणं द्रव्यं विभु नित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानत्वात् यदाभित्यत्वे सत्यस्मदाद्युपलभ्यमानगुणाधिष्ठानं तद्विभु यथा च बुध्यधिकरणं द्रव्यं तस्माद्विभु न च बुद्धेर्गुणत्वासिद्धेर्हेतुविशेषणासिद्धया हेतोरसिद्धिरभिधातुं शक्या बुद्धिगुणत्वस्यानुमानेन सिद्धेस्तथा हि गुणो बुद्धिः प्रतिषिध्यमाने द्रव्यकर्मभावे सति संबंधित्वाद्यो यः प्रतिषिध्यमानद्रव्यकर्मभावे सति सत्तासंबंधी स स गुणो यथा रूपादिस्तथा च बुद्धिस्तस्माद् गुणः ॥ सम्म० ॥

बुद्धेर्गुणत्वासाधनं बुद्धिशब्दे ॥ सम्म० ॥

आत्मन प्रदेशात्वाभेदेशेत्वविचारः संमतितर्के यथा न चात्मन प्रदेशास्संति येन प्रदेशावृत्तित्वं शातस्य सिद्धं यात्कल्पितत्प्रदेशाभ्युपगमे च तद्वृत्तित्वमपि हेतुः कल्पित इति न कल्पितात्साधनात्साध्यासिद्धिर्युक्ता सर्वतः सर्वसिद्धिप्रसंगात्सादिग्धत्वे पक्षव्यावृत्तिकत्व च हेतोर्विपर्यये बाधकप्रमाणावृत्त्या त्रापि समानमिति तथा स्वदेहमात्रव्यापकत्वेन हर्षविषादाद्यनेकविवर्तात्मकस्याहमिति स्वसंवेदनप्रत्यक्षसिद्धत्वादात्मनो विभुत्वसाधकत्वेनोपन्यस्यमान सर्व्वं एव हेतुः प्रत्यक्षबाधितकर्मनिर्देशानंतरप्रयुक्तत्वेन कालात्ययापदिष्टः समतिपक्षश्चायं हेतुरित्यसत्प्रतिपक्षत्वमप्यस्य अलक्षणमसिद्धं स्वदेहमात्रात्मप्रसाधकश्च प्रतिपक्षहेतुरग्रैव प्रदर्शयिष्यते तन्नातोऽपि हेतोरात्मनो विभुत्वसिद्धिः यदप्यात्मनो विभुत्वसाधनं कैश्चिदुपन्यस्तमदृष्टं स्वाश्रयसंयुक्ते आश्रयांतरे कर्मारभते एकद्रव्यत्वे सति क्रियाहेतुगुणत्वाद्यो यः एकद्रव्यत्वे सति क्रियाहेतुगुणः स स स्वाश्रयसंयुक्ते आश्रयांतरे कर्मारभते यथा वेगस्तथा चादृष्टं तस्मात्तदपि स्वाश्रयसंयुक्ते आश्रयांतरे कर्मारभत इति न चासिद्धं क्रियाहेतुगुणत्वमग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनमदृष्ट विशेषगुणत्वात्स्वभावत् एकद्रव्यत्वादित्युच्यमाने रूपादिभिर्व्यभिचारस्तन्निवृत्त्यर्थं क्रियाहेतुगुणत्वादित्युक्तं क्रियाहेतुगुणत्वादित्युच्यमाने मुसलहस्तसंयोगेन स्वाश्रयासंयुक्तस्तंभादिचलनहेतुना व्यभिचारस्तन्निवृत्त्यर्थमेकद्रव्यत्वे सतीति विशेषणं एकद्रव्यत्वे सति क्रियाहेतुत्वादित्युच्यमाने स्वाश्रयासंयुक्तलोहादिक्रियाहेतुनायस्कांतेन व्यभिचारस्तन्निवृत्त्यर्थं गुणत्वादित्यभिधानं एतदपि प्रत्यक्षबाधितप्रत्यक्षासाधकत्वेनैकशाखाप्रभवत्वानुमानवदनुमानाभासमेकद्रव्यत्वे इति च विशेषणं किमेकस्मिन्द्रव्ये संयुक्तत्वाद्युत तत्र समवायात्तत्र यद्याद्यः पक्षः स न युक्तः संयोगगुणेनादृष्टस्य गुणवत्त्वात् तद्द्रव्यत्वप्रसक्तेः क्रियाहेतुगुणत्वादित्येतस्य बाधाप्रसङ्गाच्च द्वितीयस्तदा द्रव्येण सह कथंचिदेकत्वमदृष्टस्य प्राप्तम् न ह्यन्यस्यान्यत्र समवायः घटरूपादिषु तस्य तत्रानुभूतस्यैवोपलब्धेः न हि घटाद्रूपादयस्तदंतरालवर्ती समवायश्च भिन्नप्रतीतिगोचरा अपि तु कथंचित् तादात्मका घटपटादयः तदात्मकाश्च रूपादयः प्रतीतिगोचरचारिणोऽनुभूयंते ऽथवा गुणगुणिभावेऽतिप्रसंगात्पटस्यापि रूपादयो घटे स्युरेतषां तत्राप्यप्रतीतेरेषां तु प्रतीतेरित्यादिकं प्रतिविहितत्वान्नात्रोद्घोष्यते न समवाये नैकत्वात्मनि वर्त्तनादृष्टस्यैकद्रव्यत्वं घादिप्रतिवादिनोरसिद्धमेकांतमेवे समवायाभावेनैकद्रव्यत्वस्यासिद्धस्य गुणिनो गुणानामनर्थांतरत्वे गुणगुणिनोरन्यतर एव स्यादर्थांतरत्वे परपक्ष एव समर्थित स्यादिति समवायः सिद्धः कथंचिद्वादोपि न युक्तोऽनवस्थादिदोषप्रसंगादयुक्तमेतदर्थांतरेऽप्यस्य समानत्वात्तथाहि द्वित्वसंख्यासंयोगादिकमनेकेन द्रव्येणातिसंबंध्यमानं यदि सर्वात्मनाभिसंबध्यते तदा द्वित्वसंख्यादिमात्रं द्रव्यमात्रं वा स्यादेकेनैव वा द्रव्येण सर्वात्मनाभिसंबंधाच्च द्रव्यांतरेण तत्प्रतीतिरथैकेन देशेनैकत्र वर्त्तते ऽन्येनान्यत्र तेऽपि देशा यदि ततो भिन्नास्तेष्वपि स तथैव वर्त्तते इत्यनवस्था भिन्नाश्चेदुक्तो दोषः कथंचित्पक्षे परवाद एव समर्थितः स्यादित्यात्मना सहादृष्टस्य कथंचिदनन्यभावः एवैकद्रव्यत्वमित्यविभुत्वाद् गुणानां तदव्यतिरिक्तस्यात्मनोऽप्यविभुत्वमिति विपक्षः साधकत्वादेकद्रव्यत्वलक्षणस्य हेतुविशेषणस्य विरुद्धत्वं क्रियाहेतुगुणत्वादित्यत्रापि यदि देवदत्तसंयुक्तात्मप्रदेशे वर्त्तमानमदृष्टं द्वीपांतरवर्त्तिषु मुक्ताफलादिषु देवदत्तं प्रत्युपसर्पणवत्सु क्रियाहेतुस्तदयुक्तमतिदूरत्वेन द्वीपांतरवर्त्तिभिस्तैस्तस्यानभिसंबंधित्वेन तत्र क्रियाहेतुत्वायोगात् तथापि तद्धेतुत्वे सर्वत्र स्यादविशेषात् अथाऽनभिसंबंधाविशेषेऽपि यदेव योग्य तदेव तेनाकृष्यते न सर्वमिति नातिप्रसंगो न च चक्षुषोःप्राप्यकारित्वेऽपि यदेव योग्य तदेव तद्ग्राह्यमिति यदुक्तं परेणाप्राप्यकारित्वे चक्षुषोऽदूरव्यवस्थितस्यापि ग्रहणप्रसंग इत्ययुक्तं स्यादथ स्वाश्रयसंयोगसंबंधसंभवादनतिसंबंधादित्यसिद्धं तथाहि यमात्मानमाश्रितमदृष्टं तेन संयुक्तानि देशांतरवर्त्ति मुक्ताफलादीनि देवदत्तं प्रत्याकृष्यमाणानि न सर्वस्याकर्षणप्रसंगात्तेनाभिसंबंधाविशेषाच्च यददृष्टेन यज्जन्यते तत्तेनाकृष्यत इति कल्पना युक्तिमती देवदत्तशरीरारंभकपरमाणूनां तददृष्टाजन्यत्वे नानाकर्षणप्रसंगात्तथाप्याकर्षणे इति प्रसंगः प्रतिपादित एव यथा च कारणत्वाविशेषे घटदेशादौ सन्निहितमेव दंडादिकं घटादिकार्यं जनयत्यदृष्टंत्वन्यथेत्यभ्युपगमे तथा वाह्येन्द्रियत्वाऽविशेषेऽपि त्वगिन्द्रियाप्राप्तमर्थंमवभासयति लोचनं त्वन्यथेत्यभ्युपगमः किन्न युक्तो नापि द्वीपांतर

[illegible]

[illegible]

धिको वा कल्पनिकत्वे कल्पनिकात्मप्रदेशगुणाश्रयाः पश्वादयस्तथाभूतात्मप्रदेशे प्रत्युपसर्पणवत्वादिति तद्गुणानामपि कल्पनिकत्वं साधयेत्तथा च सौगतस्येव तद्गुणकनःप्रेत्यभावोऽपि न पारमार्थिकः स्यान्न हि कल्पितस्य पावकस्य रूपादयस्तदीयं वा दाहादिकं पारमार्थिकं दृष्टं पारमार्थिकाश्चेदात्मप्रदेशास्तेऽपि यदि ततो भिन्नास्तदात्मैव ते इति न पूर्वोक्तदोषपरिहारो भिन्नाश्चेत्तर्हि तद्विशेषगुणाकृष्टाः पश्वादय इति तेषामेवात्मत्वप्रसक्तिरित्यात्मपरिकल्पना व्यर्था तेषां च न द्वीपांतरवर्तिभिर्मुक्ताफलादिभिः संयोग इत्यदृष्टं स्वाश्रयसंयुक्तेऽन्यत्र क्रियाहेतुरिति व्याहतं संयोगे चात्मप्रदेशस्यनिवृत्तो व्यापातोऽथ तेषामप्यपरशरीरसंयुक्ताः प्रदेशा देवदत्तशरीरव्यापकत्वान्नाप्यनेतरद्दूषणमनवस्थाकारि अथात्मानमंतरेण कस्य ते प्रदेशाः स्युरिति तत्प्रदेशव्यपर आत्मन्यभ्युपगमनीयं मन्यर्पातरमूतत्वे आत्मनः कथं तस्य ते इति व्यपदेशोऽथ तेषु तस्य वर्तमानात्र वा व्यपदेशो न सदेतत्तथाभ्युपगमेऽन्यवधिपक्षमाविदूषणायकत्वात् यथा च तेषां सदूषणत्वं तथा प्रतिपादयिष्यते चेत्यास्तां तावत्तत्र परस्य देवदत्तशरीराद्वाह्यः कश्चिदस्ति यं प्रत्युपसर्पन्नग्न्यंतः पश्वादयः स्वक्रियाहेतोर्गुणत्वं साधयेयुरिति नैतदपि साधनमात्मनो विभुत्वप्रसाधकं यदपि सर्वगत आत्मा सर्वत्रोपलभ्यमानगुणत्वादाकाशवदिति साधनं तदप्यचारु यतो यदि स्वशरीरे सर्वत्रोपलभ्यमानगुणत्वादिति हेतुस्तथा सति तत्रैव ततस्तस्य सर्वगतत्वसिद्धेर्विरुद्धो हेत्वाभासोऽथ स्वशरीरवत्परशरीरेऽन्यत्र चोपलभ्यमानगुणत्वं हेतुस्तदा सिद्धस्तत्रोपलंभाभावान्न हि बुद्ध्यादयस्तत्रोपलभ्यंतेऽन्यथा सर्वसर्वज्ञताप्रसंगोऽथैकनगरे उपलब्धा बुद्ध्यादयो नगरांतरेऽप्युपलभ्यंते मनुष्यजन्मवज्जन्मान्तरेऽपीति कथं न सर्वत्रोपलभ्यमानगुणत्वं न वायोरपि स्पर्शविशेषगुण एकदेकदा उपलब्धोऽन्यथान्यदोपलभ्यमानः तस्यापि सर्वगतत्वं प्रसाधयेदन्यथा तेनैव हेतोर्व्यभिचारोऽथास्तां तावदेतात्र क्रमेण गतस्य तद्गुण उपलभ्यते आत्मनोऽपि तथैव तद्गुणस्योपलंभ इति समानं पश्यामो न च तद्वत्तस्यापि सक्रियत्वप्रसक्तेरयुक्तमेव कल्पनमिति वाच्यमिष्टत्वादप लोष्टवत् ततो मूर्तत्वप्रसंगस्तस्य दोषो न नु कथं मूर्तिरसर्वगतद्रव्यपरिमाण र्मूर्ति चेन्नाय दोषः सर्वगतात्मवादिनोऽभीष्टत्वाद्रूपरसगन्धस्पर्शवत्वं सति चेन्न तादृशी मूर्तिआत्मनः सक्रियत्वं साधयति व्याप्त्यभावाद्रूपादिमन्मूर्त्यभावे सक्रियत्वाद्यो यः स रूपादिमन्मूर्तिमान्यथा शरस्तथा चात्मा तस्माद्रूपादिमन्मूर्तिमानिति कथं न व्याप्तिप्रभवोऽसदेतन्मनसापि व्यभिचारात्र च तस्यापि पक्षीकरणं रूपादिविशेषगुणाऽनधिकरण समानार्थ प्रकाशयति शरीराद्यर्थोतरत्वे सति सर्वत्र ज्ञानकरणत्वादात्मवदित्यनुमानविरोधप्रसंगाच्च च सक्रियत्वं रूपादिमन्मूर्त्यभावेऽपि न विरुद्धं यनस्तनस्तन्निवर्तमानमात्मनि तथाविधां मूर्ति साधयेन्न च तथाविधमूर्तिरहिते स्वपदं तददर्शनात्सिद्धो विरोध एकशाखाप्रभवत्वस्यान्यथाऽदृष्टे पक्षे दर्शनाद्विरोधशक्तिप्रसक्तेः पक्ष एव व्यभिचारदर्शनात्सा तत्र नेति चेन्न सक्रियत्वस्यापि तथा व्यभिचारः समानः पक्षीकृत एवात्मनि रूपादिमन्मूर्तिरहिते तद्दर्शनादनेनैव च तत्साधनाच्च व्यभिचार इत्येकशाखाप्रभवत्वानुमानेऽपि समानं प्रत्यक्षबाधितं कर्मनिर्देशानंतरप्रयुक्तत्वेन कालात्ययापदिष्टत्वमुभयत्र तुल्यं तन्न सक्रियत्वमात्मनो रूपादिमन्मूर्तित्वं साधयतीति व्यवस्थितम् ॥

अथ सक्रियत्वे तस्यानित्यत्वं तथा हि यत्सक्रियं तदनित्यं यथा लोष्टादि तथा चात्मा तस्मादनित्य इत्येतदपि न सम्यक्परमाणुभिरनैकांतिकत्वात्कथंचिदनित्यत्वस्येष्टत्वात्सिद्धसाधनं च, सर्वात्मना नित्यत्वस्य लोष्टादावप्यसिद्धत्वात्साध्यविकलता च दृष्टांतस्य, तत्र सर्वत्रोपलभ्यमानगुणत्वमात्मनः सिद्धमाप्रपरे सर्वत्रोपलभ्यमानगुणत्वमात्मनोऽतोऽनुमानात्साधयंति देवदत्तोपकरणभूतानि मुक्ताफलादीनि द्वीपांतरसंभूतानि देवदत्तस्पृष्टानि कार्यत्वे सति देवदत्तोपकारकत्वाच्चक्षुरादिवत्र च तद्देशे सन्निहिता एव तद्गुणास्तान्युत्पादयितुं समर्था न हि यद्देशे सन्निधानवंतस्तंतुतुरीकुविन्दादयः पटमुत्पादयितुं क्षमा आत्मगुणानां च तद्देशसन्निधानं न तद्गुणसंनिधिमंतरेण संभवत्यगुणत्वप्राप्तेस्ततस्तस्यापि तद्देशत्वमसदेतत् तत्कार्यत्वेऽपि तेषां नावश्यतया कार्यदेशसन्निधानिमित्तकारणमिति नियमानुपलब्धिगोचरोऽन्यदेशस्थापि ध्यानादेरन्यस्थितविषापनयनकार्यकर्तृत्वस्योपलब्धिविषयत्वात्तन्नातोऽपि सर्वत्रोपलभ्यमानगुणत्वसिद्धेरित्यसिद्धो हेतुरतेन विभुत्वान्महानाकाश. तथा चात्मा इति निरस्तं विभुत्वस्यात्मन्यसिद्धेस्तथा हि सर्वमूर्तैर्युगपत्संयोगो विभुत्वं न च सर्वमूर्तिमद्भिर्युगपत्संयोगस्तस्य सिद्धोऽथैकदेशवृत्तिविशेषगुणाधारत्वात्तस्य सर्वमूर्तैर्युगपत्संयोग आकाशस्येव सिद्धोऽसदेतत्तद्देशवृत्तिविशेषगुणाधिष्ठानत्वस्य सर्वमूर्तिमत्संयोगादाधारत्वस्य च साध्यस्याकाशेऽप्यसिद्धेरुभयविकलो दृष्टांतः न चात्मदृष्टांतादाकाशे साध्यसाधनोभयधर्मसंबंधित्वं सिद्धमिति शक्यं वक्तुमितरेतराश्रयदोषप्रसंगाद्यदपि विभुरात्माणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वात् यद्यदणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यं तत्तद्विभु यथाकाशं तथा चात्मा तस्माद्विभुरिति तदप्यसारं तन्नित्यत्वासिद्धेर्हेतोरसिद्धत्वादणुपरिमाणानधिकरणत्वस्य विशेषणस्यात्मनो द्रव्यत्वासिद्धेरसिद्धिस्तदसिद्धेश्चेतरेतराश्रयप्रसक्तेस्तथाह अणुपरिमाणानुगुणस्य गुणत्वसिद्धेर्नाधारस्य तस्यासंभवादात्मनो गुणवत्त्वनतद्द्रव्यसिद्धिस्तत्सिद्धौ च तदाश्रितत्वेनाणुपरिमाणान्यगुणस्य गुणत्वसिद्धिरिति व्यक्तमितरेतराश्रयत्वं न चाकाशस्याप्यणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वं विभुत्वं च सिद्धमिति साध्यसाधनविकलो दृष्टांतो न चात्मदृष्टांतबलात्तस्य तदुभयधर्मयोगित्वं सिद्धमिति वक्तुं युक्तमत्रापीतरेतराश्रयदोषप्रसंगस्य व्यक्तत्वादपि चाणुपरिमाणानधिकरणत्वे सति नित्यद्रव्यत्वं च भविष्यत्यविभुत्वं च विपक्षे हेतोर्बाधकप्रमाणाभावेन ततो व्यावृत्तिसिद्धेः संदिग्धानैकांतिकश्च हेतुर्न च विपक्षे हेतोरदर्शनं बाधकं प्रमाणं सर्वात्मसंबंधिनस्तस्यासिद्धत्वादनैकांतिकत्वप्रतिपादनादपि चात्मनः स्वदेहमात्रव्यापकत्वेन सुखदुःखादिपर्यायाक्रांतस्य स्वसंवेदनाध्यक्षसिद्धत्वात्तद्विरुद्धसाधकस्य हेतोरध्यक्षबाधितपक्षानंतरप्रयुक्तत्वेन कालात्ययापदिष्टत्वमन्यस्य चाहमित्यध्यक्षसिद्धस्य प्रमाणविषयत्वेनासत्त्वाशङ्कयाऽसिद्धो हेतुरित्यनया दिशा अन्येऽपि तद्विभुत्वसाधनादौ उपन्यस्यमाना हेतवो निराकरणप्रकारस्य सर्वेषु तत्साधकहेतुषु

[illegible] सुखसिद्धिर्दुःखसिद्धिः यथापि स्या- [illegible] सुखदुःखसाधकं प्रमाणं न संभवति तथा [illegible] सुखदुःखसाधकं प्रमाणं न संभवति [illegible] सिद्धेऽपि तद्वस्तु बोधं न हि [illegible] सिद्धिमुपगच्छन्त्य- [illegible] प्रयुक्तहेतुविरुद्धतोऽप्य- [illegible] प्रदर्शितेति न [illegible] देवदत्तशरीरमात्रव्यापकस्तथैव [illegible] यत्रैव व्याप्त्योपलभ्यमानगुणः [illegible] यथा देवदत्तस्य गृह एव व्याप्त्योपलभ्य- [illegible] देवदत्तशरीर एव व्याप्त्यो- [illegible] तदात्मनो हि ज्ञानादयो [illegible] च तत्र एव व्याप्त्योपलभ्यन्ते न पर- [illegible]

[illegible]

विकल्पविषयबोधत्वात्तस्य महदात्मकत्वेऽपि [illegible] क्षणिकत्वादिवत् तथा निश्चयेऽतीन्द्रियेऽतिप्रसंगः [illegible] ह्यविकल्पकाध्यक्षविषयं जगज्जंतुमात्रस्य तथा [illegible] निर्विकल्पकाध्यक्षविषयत्वात् न च [illegible] विशेषकारत्वसद्भेतरं तत्फलादर्शनाच्च तद्दर्शनस्य [illegible] स्वसत्तासमये स्वकार्यजननसामर्थ्ये तदेव [illegible] नेतरं तद्दृष्टिप्रसक्तेः अन्यदा तु स एव नास्तीति [illegible] नाबोधस्तयोश्चेतनत्वेऽपि तदात्मगुणत्वे को विशेषोऽस्य [illegible] स्य चेतनात्मगुणत्वमेव चेतनश्च तदात्मा [illegible] दाकत्वात् अन्यथा तद्योगात् कुम्भादिवत् न च [illegible] योरभावादाश्रयासिद्धो हेतुरनुमानतस्तयोः सिद्धेः [illegible] तनस्य तदात्मनो हीनमातृगर्भस्थानप्रवेशस्य [illegible] मित्तोऽन्यनैयत्ये सति तत्प्रवेशात् [illegible] च तत्पापायात्मांशाद्व्यभिचारो धर्मादिरिति न च [illegible] भ्येन परित्यागेन शरीरान्तरगमनाभावात् [illegible] मानात्तत्सिद्धेस्तथा हि तदुदयात्तस्य स्तनादौ [illegible] पूर्विका तन्मध्यदेशावर्तित्वात् यथा च [illegible] नातिसिद्धिमुपगच्छेत्तस्मादुभौ सर्वोऽप्ययं व्यवहार [illegible] प्रसिध्येद्यथोत्तरजन्मनि सुखसाधनदर्शनाद्रमाधा [illegible] [illegible] एव स्तनादेः सुखसाधनत्वेन दर्शनम् [illegible] क्य तत्र स्मरणादिव्यवहारः संक्रमयेदिति एवं [illegible] ऽप्यात्मनः सिद्धः न [illegible] सुखसाधनादि [illegible] दिक्रमेणोपजायमानोऽपि प्रवृत्तस्तो व्यवहारो [illegible] या कल्पयितुं शक्यो विजातीयादपि गोमयादेः [illegible] [illegible] कार्यस्योत्पत्तिदर्शनादिति [illegible] निमित्तस्याच्छेदात् [illegible] पायकारी प्रवृत्तिप्रसंगात् सर्वव्यवहारोच्छेद [illegible] [illegible] देहादिदाम्पत्यानुप्रवेशस्तत्र [illegible] नुयं [illegible] हेतुरिति न [illegible] यति तदुक्तं सांगतैः "गूढो विपर्यासमतिः [illegible] "अभिमतो यस्य तेन जन्मा [illegible]" [illegible] देहादिह जन्मनि प्राणिनां [illegible] [illegible] इति युक्तं नापि मनुष्यजन्मादि [illegible] [illegible] एतदेव [illegible] मानुमानबाधित [illegible]

[illegible]

तत्तद्गुणनिमित्तत्वे तस्यान्यद्रव्यतद्गुणपूर्वकं तदुपकारकं तद्देव स्यादिति न तद्गुणसिद्धिः यत्पुनर्मांसादियदिति निदर्शनं तत्र यदि तदात्मगुणो धर्मादिहेतुः साध्यधर्मसंग आपन्नश्चेति श्रोत्र तत्स्वरूपासिद्धेः शरीराद्यवयवप्रविष्टानामात्मप्रदेशानां परिस्पन्दस्य चलनलक्षणक्रियारूपत्वाच्च गुणत्वं तत्त्वेऽनत्वे वा गमनादेरपि तत्त्वाच्च कर्मपदार्थसद्भावः कश्चिदर्शीति न युक्तं क्रियावदिति द्रव्यलक्षणं निष्क्रियस्यात्मनस्तस्येति चेत् पुनस्तस्य निष्क्रियत्वममूर्तत्वादिति चेत्प्रत्यक्षनिराकृतमेतत्प्रत्यक्षेण हि देशाद्देशांतरं गच्छन्तमात्मानमनुभवति लोकस्तथा च व्यवहारोऽहमद्य योजनमात्रं गतो न च मनः शरीरं वैतद्व्यवहारविषयस्तस्याहंप्रत्ययावेद्यत्वात्तदेवं परस्य साध्यविकलं निदर्शनमिति स्थितं तेन यदुक्तं यस्मात्तदात्मनो गुणा अपि दूरदेशभाविनि तदंगनागण एवोपलभ्यंते तस्मात्सिद्धं तस्य सर्वत्रोपलभ्यमानगुणत्वादाकाशवदित्यनुमानबाधिता तदात्मस्वशरीरमात्रं प्रति तन्निरस्तं सर्वेषां सर्वगतात्मप्रसाधकहेतूनां पूर्वमेव निरस्तत्वादतो न स्वदेहमात्रव्यापकात्मप्रसाधकहेतोरसिद्धिर्नाप्यनुमानेन तत्पक्षबाधो न च तद्देहव्यापकत्वेनैवोपलभ्यमानगुणोऽपि तदात्मा सर्वगतो निःप्रदेशैकदेशवृत्तिर्वा स्यात् अविरोधासंदिग्धविपक्षव्यावृत्तिकत्वादनैकांतिको हेतुरिति युक्तं वाय्वादावपि तथाभावप्रसंगत प्रतिदेशनियतदेशसंबद्धपदार्थव्यवहारोच्छेदप्रसक्तेस्तथाहि यद्यथा प्रतिभाति तत्तथैव सद्व्यवहारपथमवतरति यथा प्रतिनियतदेशकालाकारतया प्रतिभासमानो घटादिकोऽर्थोऽन्यथा प्रतिभासमाननियतदेशकालाकारस्पर्शविशेषगुणोऽपि वायुः सर्वगतः स्यात् नचात्र प्रत्यक्षबाधः परेण तस्य परोक्षत्वोपवर्णनात् यदि च स्वदेहैकदेशस्थितः कथं तत्र सर्वत्र सुखादिगुणोपलब्धिरितरथा सर्वत्रोपलभ्यमानगुणोऽपि वायुरेकपरमाणुमात्रः स्यात् नच क्रमेण सर्वदेहभ्रमणात्तस्य तथा तत्रोपलब्धिर्युगपत्तत्र सर्वत्र सुखादिगुणस्योपलम्भात् न चाशुवृत्तेर्यौगपद्याभिमानोऽन्यत्रापि तथा प्रसक्तेः शक्यं हि वक्तुं घटादिरप्येकावयववृत्तिराशुवृत्तेर्युगपत्सर्वावयवेषु प्रतीयत इत्यत एव सांगतोऽपि तत्रैकं निरंशं ज्ञानं कल्पयन्निरस्तप्रत्यय एवमनेकसुखादिकल्पने संतानांतरवत् परस्परमसंक्रमात् अनुस्यूतैकप्रतीतिविलोपः सर्वत्र शरीरे मम सुखमिति । अथ युगपज्ज्ञानैरिव शरीरवर्तिभिरनेकनिरंशक्षणिकसुखसंवेदनैरेकपरामर्शविकल्पजननादयमदोषः असदेतत् अनेकोपादानस्य परामर्शविकल्पस्यैकत्वमसंभवं चार्वाकाभिमतैकशरीरव्यपदेशभागनेकपरमाणूपादानानेकविज्ञानाभावेऽपि तद्विकल्पसंभवात् ततो यदुक्तं धर्मकीर्तिना तत्प्रति अनेकपरमाणूपादानमनेकं विज्ञानं सन्तानान्तरवदेकपरामर्शाभाव इति तत्तस्य न सुभाषितं स्यात् यच्च सावयवं शरीरं प्रत्यवयवमनुप्रविशंस्तदात्मा सावयवः पटवत्समानजातीयारब्धत्वात् तद्विच्छिन्नाशांश्च स्यादिति तदपि न सम्यग्घटादिनाव्यभिचारात् घटादिस्सावयवोऽपि न तन्तुवत्प्राक्प्रसिद्धः समानजातीयकपालसंयोगपूर्वको मृत्पिंडात्प्रथममेव स्वावयवरूपाद्यात्मन आदुर्भावादिति निरूपयिष्यमाणत्वादपि च यदि तदात्मनः कथंचिद्विनाशः प्रतिपादयितुमिष्टः समानजातीयावयवारब्धत्वात् तदा सिद्धसाधनं तदसिद्धसंसार्यवस्थाविनाशेन तद्रूपतया तस्यापि नष्टत्वात् अथ सर्वात्मना सर्वथा नाशः स घटादावप्यसिद्ध इति साध्यविकलो दृष्टांतः यदि च तदहर्जातबाला-

रमा. प्रागेकांतेनासंस्तथावयव आरभ्यते तदा स्तनादौ प्रवृत्तिर्न स्यात् तदभिलाषप्रत्यभिज्ञानस्मरणदर्शनादेरभावात् तदारंभकावयवानां प्राक्सतां विषयदर्शनादिकमिति चेत् तर्हि तेषामेव तदहर्जातवेलायां तत्स्यांतराणामिव तत्र प्रवृत्तिः स्यान्नात्मनः स्मरणाद्यभावात् कारणगमनात्तस्यापि सर्वत्र सा स्यात् कारणसंयोगिनामवयव संयुज्यत इति वचनान्न तस्य विषयानुभवाभावस्तदेकांते चास्याः प्रक्रियाया समवायनिषेधेन निषेधात् अथ कारणक्रमेण तत्र दर्शनादयो गुणा वर्त्तन्ते तेऽपि प्रागसंत एव जायंत इति पक्षमपि न किंचित् परिहृतमेतेनावयवेषु क्रिया क्रियातो विभागस्ततस्संयोगविनाशस्ततोऽपि द्रव्यविनाश इति परस्योक्तस्यात् पूर्वभवे तद्विनाशे आदिजन्मनि स्मरणाद्यभावप्रसंगान्निरस्तं नचायमनेकांतः कटस्य केयूरभावे कुतश्चिद्भागेषु क्रियाविभागः संयोगविनाशो द्रव्यनाशः पुनस्तदवयवा. केवलास्तदनंतरकर्मसंयोगक्रमेण केयूरभावः प्रमाणगोचरचारी केवलं सुवर्णकारव्यापारात्कटस्य केयूरीभावं पश्यामः अन्यथा कल्पनायां प्रत्यक्षविरोधः न हि पूर्वं विभागस्ततः संयोगविनाश इति तद्भेदानुपलक्षणार्थैतन्यबुद्धिवदनेकांतेन तस्या क्षणिकत्वे सुखसाधनदर्शनादयः संभवंतीत्यऽसकृदावेदितमावेदयिष्यते एवेत्यास्तां तावत्ततोऽनैकांतिको हेतुर्विपक्षेऽसंभवात् अत एव न विरुद्धोऽपीति भवत्यतः सर्वदोषरहितात् केशनखादिरहितशरीरमात्रव्यापकस्य विवादाध्यासितस्यात्मनः सिद्धिरिति साधूक्तं वाणामणोयमसुहमवगयाणमिति ॥ सम्म० ॥

विशेषावश्यके जीवानां नानात्वं व्यवस्थाप्य भवतु तर्हि जीवानां नानात्वं किंत्वेकैको जीवः सर्वजगद्व्यापकोऽस्त्विति नैयायिकादिमतमपाकुर्वन्नाह—

जीवो तणुमित्तत्थो जह कुंभो तग्गुणोवलंभाउ ।
अहवाणुवलंभाउ भिन्नंमि घडे पडस्सेव ॥ ८० ॥

ननु मात्रस्थो जीव इति प्रतिज्ञा तत्रैव तद्गुणोपलब्धेः यथा घटः स्वात्ममात्रे इति शेष. । अहवेत्यादि । अथवा यो यत्र प्रमाणैर्नोपलभ्यते तस्य तत्राभाव एव यथा भिन्ने घटे पटस्यानुपलम्भस्तेन च शरीराद्बहिर्जीवस्तस्मात्तस्य तत्राभाव एवेति ॥ विशे० ॥

सांप्रतं द्वितीयाद्वारगाथा व्याख्यायते तत्र गुणान्याद्वार तद्व्याचिख्यासयाऽऽह भाष्यकार —

अहुणा गुणित्ति दारं होइ गुणेहिं गुणित्ति विन्नेओ ।
ते भोगजोगउवओगमाइरूवा इव घडस्स ॥ ८१ ॥

व्या० अधुना गुणीति द्वारं तदेतद्व्याख्यायते भवति गुणैर्गुणी न तद्व्यतिरेकेणेत्येवं विज्ञेयः अनेन गुणगुणिनोर्भेदाभेदमाह ते भोगयोगोपयोगादयो गुणा इत्यादिशब्दादमूर्तत्वादिपरिग्रहः । निदर्शनमाह रूपादय इव घटस्य गुणा इति गाथार्थः व्याख्यातं मूलद्वारगाथायां गुणिद्वारम् ॥ दश० अ०४॥

अधुनोर्ध्वगतिद्वारावसर इत्याह भाष्यकारः—

उड्ढंगइत्ति अहुणा अगुरुलहुत्ता सभावउड्ढगइ ।
दिहंतलाउएणं एरंडफलाई एहिं व ॥ ८२ ॥

व्या० ॥ ऊर्ध्वगतिरित्यधुना द्वारं तदेतद्व्याख्यायते अगुरु-

[illegible] कर्मविप्रमुक्तः सन्नूर्ध्वंगतिर्जीव इति [illegible] दृष्टांतोऽधुना [illegible] यथा [illegible] ऊर्ध्वगमनस्वभावमपि मृल्लेपाज्जलेऽ[illegible] [illegible]नारोर्ध्वमास्मापि कर्मले[illegible] [illegible]लोकांतादिति एरण्डफला[illegible] [illegible] दृष्टांतं दर्शयति यथा एरण्डफ[illegible] [illegible]परिग्रह इति [illegible] । व्याख्याते द्वितीयमूलद्वारगाथायामूर्ध्वंगति[illegible] [illegible] । दश० अ० ४ ।

[illegible]—

[illegible] आगासं ।

[illegible] ॥ २८३ ॥

[illegible] जीवः न विस्मयोऽर्थः [illegible] [illegible] यथैवाकाशमाकाशाय[illegible] । [illegible] एतदेव दर्शयति [illegible]

[illegible] ॥ २८४ ॥

[illegible]

यथा कश्चित्प्रमाता मिनुयात् सर्षपान् [illegible] एवं मीयमाना असद्भावस्थापनया भवंति [illegible] तास्तु जीवभृता इति भावः आह यद्येवं [illegible] य ते लोके माता इति उच्यते सूक्ष्मावगाहनया [illegible] नंता व्यवस्थिता इह तु प्रत्येकावगाहनया विचा[illegible] दोषः । इष्टं च बादरद्रव्याणामपि प्रदीपप्रभा[illegible] दीनां तथा परिणामतो भूयसामेकत्रैवावस्थानं[illegible] थार्थः । व्याख्याते द्वितीयमूलद्वारगाथायां [illegible] द्व्याख्यानाच द्वितीया मूलद्वारगाथा जीवपदे [illegible]

१८ आत्मन एकत्वानेकत्वविचारः स्थानाङ्गे यथा—

"एगे आया" एको न द्व्यादिरूप आत्मा जीवः [illegible] दिति गम्यते तत्र अतति सततमवगच्छति ([illegible] त्यगमन) इति वचनात् धातोर्गत्यर्थत्वात् [illegible] नार्थत्वादनवरतं जानातीति निपातनादात्मा जीव [illegible] सद्यारवादस्य सिद्धसंसार्यवस्थाद्वयेऽप्युपयोगभावे [illegible] सतावबोधभावात् सततावबोधाभावे [illegible] मजीवस्य च पुनर्जीवत्वाभावात् भावे [illegible] तथान्वप्रसंगात् एवं च जीवानादित्वाभ्युपगम[illegible] ग इति अथवा अतति सततं गच्छति स्वकीया[illegible] दिपर्यायानित्यात्मा नन्वेवमाकाशादीनामप्यात्मत्वप्र[illegible] देशप्रसङ्गस्तेषामपि स्वपर्यायेषु सततगमना[illegible] रिणामित्वेनावस्तुत्वप्रसंगादिति नैवं व्युत्पत्तिमात्र[illegible] त्वादस्य उपयोगस्यैव च प्रवृत्तिनिमित्तत्वाज्जीव [illegible] माकाशादिरिति यद्वा संसार्यपेक्षया नानागतिषु [illegible] भाग्गुणापेक्षया च भूतत्रायत्वादात्मेति तत्र [illegible] विवेच तथाहि द्रव्यार्थतयैकत्वमेकद्रव्यत्वादात्मन [illegible] प्रार्थतया त्वनेकत्वमप्यसंख्येयप्रदेशात्मकत्वा[illegible] [illegible] द्रव्यार्थस्तस्य भावो द्रव्यार्थता [illegible] पर्यायाधारता अवयविद्रव्यतेति [illegible] प्रदेशा निरवयवांशाः [illegible] प्रदेशार्थः [illegible] प्रदेशार्थता गुणपर्यायाधारावयवत्व[illegible] [illegible]

[illegible]

तीति चेत् सत्यं केवलं स एव सन्निवेशविशेषोऽवयविद्र-व्यमिति यदोच्यते विरुद्धधर्माध्यासो भेदनिबन्धनमिति तदपि न सूक्तं प्रत्यक्षसंवेदनस्य परमार्थापेक्षया भ्रांतत्वेन संव्यवहारापेक्षया त्वभ्रांतत्वेनाभ्युपगमादिति यदि नाम भ्रा-न्तत्वमभ्रांतत्वं कथमित्येवमत्रापि वक्तुं शक्यत्वादिति किं-च विद्यते ह्यवयविद्रव्यमव्यभिचारितया तथैव प्रतिभासमा-नत्वादवयववदेवत्वद्वा नचायमसिद्धो हेतुस्तथा प्रतिभा-सस्यानुभूयमानत्वान्नाप्यनैकांतिकत्वाविरुद्धत्वं सर्ववस्तुव्य-वस्थायाः प्रतिभासाधीनत्वादन्यथा न कस्यचिदपि वस्तुसिद्धे-रिति । स्या०टी० ठा०२ । आत्मनस्तु सप्रदेशत्वमवश्यमभ्यु-पगंतव्यम् ॥ निरवयवत्वे तु हस्ताद्यवयवानामेकत्वप्रसंगः प्रत्यवयव स्पर्शाद्यनुपलब्धिप्रसंगश्चेति सप्रदेश आत्मा प्रत्य-क्षं चैतन्यलक्षणतद्गुणोपलम्भात् प्रतिनियतावयववदुपल-भ्यमानरूपगुणघटवदिति स्थापितमेतद्द्रव्यार्थतयैक आत्मे-ति । अथ वा एक आत्मा कथंचिदिति प्रतिक्षणं सम्भवद-परापरकालकृतकुमारतरुणनरनारकत्वादिपर्यायैरुत्पादविना-शयोगेऽपि द्रव्यार्थतयैकत्वादस्य यद्यपि हि कालकृ-तपर्यायैरुत्पद्यते नश्यति च वस्तु तथापि स्वपरपर्या-यरूपानन्तधर्मात्मकत्वात्तस्य न सर्वथा नाशो युक्त इति आह च । न हि सव्वहा विणासो अद्धपज्जायमित्तनासंमि । सपरपज्जायाणंतधम्मुणो वत्थुणो जुत्तो त्ति ॥१॥ किंच प्रति क्षणं क्षयिणो भावा इत्येतस्माद्वचनात्प्रतिपाद्यस्य यत् क्ष-णभंगविज्ञानमुपजायते तदसंख्यातसमयैरेव वाक्यार्थग्रह-णपरिणामाज्जायते न तु प्रतिपत्तुः प्रतिसमयं विनाशे सति यत एकैकमप्यक्षरं पदसत्कसंख्यातीतसमयसंभूतं संख्या-तानि चाक्षराणि पदं संख्यातपदं च वाक्यं तदर्थग्र-हणपरिणामाश्च सर्वं क्षणभंगुरमिति संविज्ञानं भवेत्तथा-युक्तं समयनष्टस्येति । आह च "कहवा सव्वं खणियं वि-न्नायं जइ मइसुयाओत्तिओ तदसंखसमयसुत्तत्थगहणपरिणामो जुत्तं ॥ १ ॥ "न उ पइसमयविणासे जेणेक्केकक्खरं पि य वस्स । सखाईयसमाइयं संखेज्जाइं पयं ताइं" ॥ २ ॥ सं-खेज्जपयं वक्कं तदत्थगहणपरिणामओ होज्जा । सव्व-क्खणभङ्गप्पाए तदजुत्त समयनट्ठस्सत्ति" ॥ ३ ॥ तथा सर्व-थोच्छेदे तृष्णादयो न घटंते पूर्वसंस्कारानुवृत्तावेव तेषां युज्यमानत्वादाह च "तेत्तीसमो किलामो सारिक्खविप-क्खपच्चयाईणि । अज्झयणज्झाणभावणा य का सव्व-नासं सच्चनासंमि त्ति ॥ १ ॥ " तत्र तृतिर्माणि- श्रमोऽ-ध्वादिखेदः क्लमो ग्लानिः सादृश्यं साधर्म्यं विपक्षो वै-धर्म्यं प्रत्ययोऽवबोधः शेषपदानि प्रतीतानि इत्यादि बहु वक्तव्यं तत्तु स्थानांतरादवसेयमिति । तदेवं आत्मा स्थि-तिभवनभंगरूपापेक्षया नित्यो नित्यत्वाच्चैको भवनभङ्गरूपा-पेक्षया त्वनित्योऽनित्यत्वाच्चानेक इति आह च "उप्पा-यठिइभंगमयं वत्थुं भयणं विचित्तपरिणामं । ठिइविभवभंग-रूवं णिच्चाणिच्चाइतोभिमयं ति ॥ १ ॥" एवं च—सुहदु-क्खबंधमोक्खो उभयं न य मयाणुवत्तिणो जुत्ता । एगय-रपरिच्चाए सव्ववहारवोच्छित्तित्ति ॥ १ ॥" अथ वा एक आत्मा कथंचिदेवेति यतो जैनानां न हि सर्वथा किंचि-द्वस्तु एकमनेकं चास्ति सामान्यविशेषरूपत्वाद्वस्तुनः । अथ भ्रयाद्विशेषरूपमेव वस्तु सामान्यस्य विशेषेभ्यो भेदा-भेदाभ्यां चिन्त्यमानस्यायोगात्तथाहि सामान्यं विशेषेभ्यो-भिन्नमभिन्नं वा स्यान्न भिन्नमुपलंभाभावाद्वानुपलभ्य-मानमपि सत्तया व्यवहर्तुं शक्यं खरविषाणस्यापि तथा प्रसंगात् । अथाभिन्नमिति पक्षस्तथा च सामान्यमात्रं वा स्या-द्विशेषमात्रं वेति न ह्येकस्मिन्सामान्यमेकं विशेषास्त्वनेके-रूपा इत्यसंकीर्णा वस्तुव्यवस्था स्यादिति अत्रोच्यते । न ह्यस्माभिः सामान्यविशेषयोरेकांतेन भेदोऽभेदो वाभ्यु-पगम्यते अपि तु विशेषा एव प्रधानीकृतास्तुल्यरूपा उपसर्जनीकृततुल्यरूपाः विषमतया प्रज्ञायमाना विशेषा व्यपदिश्यन्ते त एव च विशेषा उपसर्जनीकृताः तुल्य-रूपाः प्रधानीकृततुल्यरूपाः समतया प्रज्ञायमानाः सामा-न्यमिति व्यपदिश्यन्त इति । आह च—"निर्विशेषं गृहीताश्च भेदाः सामान्यमुच्यते । ततो विशेषात्सामान्यं विशिष्टत्वं न युज्यते ॥ १ ॥" "वैषम्यसमभावेन ज्ञायमाना इमे किल । प्रकल्पयन्ति सामान्यविशेषस्थितिमात्मनीति ॥ २ ॥" तदेवं सामान्यरूपेणात्मा एको विशेषरूपेण त्वनेको न चात्मनां तुल्यं रूपन्नास्ति एकात्मव्यतिरेकेणा-शेषात्मनामनात्मत्वप्रसंगादिति तुल्यश्च रूपमुपयोग उपयो-गलक्षणोजीव इति वचनात्तदेवमुपयोगरूपैकलक्षणत्वात्सर्वं एवात्मानः एकरूपा एवं च एकलक्षणत्वादेक आत्मेति अथ वा जन्ममरणसुखदुःखादिसंवेदनेष्वसहायत्वादेक आत्मे-ति भावनीयमिति इह सर्वसूत्रेषु कथंचिदित्यनुस्मरणीयं कथंचिद्वादस्याविरोधं सर्ववस्तुव्यवस्थानिबंधनत्वात् उ-क्तं च "स्याद्वादाय नमस्तस्मै यं विना सकलाः क्रियाः । लोकाद्वितयभाविन्यो नैव सांगत्यमासते ॥ १ ॥" तथा "न-यास्तव स्यात्पदसत्यलांछिता रसोपविद्धा इव लोहधातवः । भवंत्यभिप्रेतफला यतस्ततो भवन्तमार्याः प्रणता हितै-षिण" इति ॥ २ स्था० ठा० १ ॥

एक आत्मा कथं विदितमिति गम्यते तत्र प्रदेशार्थतया असंख्यातप्रदेशोऽपि जीव इत्यर्थतया एकः । अथ वा प्रतिक्षणपूर्वस्वभावक्षयाऽपरस्वरूपोत्पादयोगेनानंतभेदोऽपि कालत्रयानुगामिचैतन्यमात्रापेक्षया एक एव आत्मा । अथ वा प्रतिसंतानं चैतन्यभेदेनाऽनंतत्वेऽप्यात्मनां संग्रहनया-श्रितसामान्यरूपापेक्षयैकत्वमात्मन इति तथा न आत्मा अनात्मा घटादिपदार्थः सोऽपि प्रदेशार्थतयाऽसंख्येयानं-तप्रदेशोऽपि तथाविधैकपरिणामरूपद्रव्यार्थापेक्षया एक एव संतानापेक्षयाऽपि तुल्यरूपापेक्षया तु अनुपयोगलक्ष-णैकस्वभावयुक्तत्वात्कथंचिद्भिन्नस्वरूपाणामपि धर्मास्तिका-यादीनामनात्मनामेकत्वमवसेयमिति । सम०टी० स०१ । विशे० ॥ ननु बहुभेदत्वमात्मनोऽसिद्धं तस्य सर्वत्रैकत्वात् तदुक्तं । "एक एव हि भूतात्मा भूते २ प्रतिष्ठितः । एकधा बहुधा चैव दृश्यते जलचंद्रवत्" "यथा विशुद्धमाकाशं तिमिरोपप्लुतो जनः । सं-कीर्णमिव मात्राभिर्भिन्नाभिरभिमन्यते" "तथेदममलं ब्रह्म नि-र्विकल्पमविद्यया कलुषत्वमिवापन्नं भेदरूपं प्रकाशते" "ऊर्ध्वं मूलमधःशाखमश्वत्थं प्राहुरव्ययं छंदांसि यस्य पर्णानि यस्तं वेद स वेदवित् । पुरुष एवेदं ॐ सर्वं यद् भूतं यच्च भाव्यं उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥ यदेजति यन्नैजति यद्दूरे यदंतिके यदंतरस्य सर्वस्य यत्सर्वस्यास्य बाह्यत इत्या-दि । इत्येतदेव पूर्वार्द्धेनोत्क्षिप्योत्तरार्द्धेन परिहरन्नाह ॥

एगे पुण से एगो च्चिय हवेज्ज वोमं व सव्वपिंडेसु ।

गोयम तदेगलिंगं पिंडेसु तहा न जीवो यं ॥

परः प्राह॥ यदि पुनर्दर्शितन्यायेन स आत्मा सर्वेष्वपि नारकतिर्यङ्नरामरपिंडेषु व्योमवदेक एव भवेत्र तु संसारीतरादिभेदभिन्नस्तर्हि किं नाम दूषणं स्यादेवमुक्ते भगवानाह गौतम ! तद्व्योम सर्वेष्वपि पिंडेषु मूर्तिविशेषु स्थितं एकलिंगं चैतत्सदृशाभावादेकरूपमेवेति युक्तं तस्यैकत्वं जीवस्त्वयं विचार्यत्वेन प्रस्तुतो न तथा नैकलिंगः सर्वत्र दृश्यते प्रतिपिंडं तस्य विलक्षणत्वाल्लक्षणभेदेन च लक्ष्यभेदादिति न तस्यैकत्वमिति ॥

अत्र प्रयोगमाह—

नाणा जीवा कुंभादओ व्व भुवि लक्खणाइभेयाओ ।
सुहदुक्खबंधमोक्खाभावो य जओ तदेगत्ते ॥

नानारूपा भुवि जीवाः परस्परं भेदभाज इत्यर्थः लक्षणादिभेदादिति हेतुः कुंभादय इवेति दृष्टांतः ॥ यच्च न भिन्नं तस्य न लक्षणभेदो यथा नभस इति सुखदुःखबंधमोक्षाभावश्च यस्मात्तदेकत्वे तस्माद्भिन्ना एव सर्वेऽपि जीवा इति ॥

कथं पुनस्तेषां प्रतिपिंडं लक्षणभेद इत्याह—

जेणोवओगलिंगो जीवो भिन्नो य सो पइ सरीरं ।
उवओगो उक्करिसावगरिसओ तेण तेणंता ॥

येन ज्ञानदर्शनोपयोगलक्षणोऽसौ जीवः स चोपयोगः प्रतिशरीरमुत्कर्षापकर्षभेदादनंतभेदस्तेन भेदादनंतभेदा एवेति [illegible] भावितं नाणा जीवा इत्यादि पूर्वार्द्धम् ॥

इदानीं सुखदुःखाद्युत्तरार्द्धं भावयन्नाह—

एगत्ते सव्वगयत्तओ य न मोक्खादओ नभस्सेव ।
कत्ता भोत्ता मंता न य संसारी जहागासं ॥

एकत्वे जीवानां सुखदुःखबंधमोक्षादयो नोपपद्यन्ते सर्वगतत्वान्नभस इव यत्र तु सुखादयो न तन्नभोगतं यथा देवदत्त इति [illegible] न कर्ता न भोक्ता न मंता न संसारी जीवः [illegible] सर्वजीवानां यथैक न तस्य कर्तृत्वादयो यथा नभस इति [illegible] सुही बहुयथाउत्ति देवमित्तो य । [illegible] य मय मुक्को देवमुक्को य, इदमत्र हृदयं [illegible] जीवा नानाजीवशरीरमाना [illegible] सुखितः [illegible] सुखाद्येवां चैकत्वे [illegible] सर्वगतेन [illegible] एवं न कोऽपि मुक्तो [illegible] जीवत्वमिति स्थितं [illegible] ॥ [illegible] ॥

[illegible]—

[illegible] ॥ नि० ॥

[illegible] बुद्ध्या

पर्यनुयोगो द्विजेन कृतं यावच्छब्दादुभौ भवन्तौ द्वौ भगवान् इति च द्वित्वाभ्युपगमेऽहमित्येकत्वविशिष्टस्यार्थस्य द्वित्वविरोधेन द्वित्वं दूषयिष्यामीति बुद्ध्या पर्यनुयोगो विहितः । अत्र भगवता स्याद्वादपक्षं निखिलदोषगोचरातिक्रांतमवलंब्योत्तरमदायि एकोऽप्यहं कथं द्रव्यार्थतया जीवद्रव्यस्यैकत्वात् न तु प्रदेशार्थतया ह्यनेकत्वान्नेति यादिनामेकत्वोपलंभो न बाधकः ज्ञानदर्शनार्थतया कदाचिद् द्वित्वमपि न विरुध्यतीत्यत उक्तं द्वावप्यहं किंचैकस्यापि स्वभावभेदेनानेकधात्वं दृश्यते तथा ह्येको हि देवदत्तादिपुरुष एकदैव तत्तदपेक्षया पितृत्वपुत्रत्वभ्रातृत्वमातुलत्वभागिनेयत्वादीननेकान् स्वभावान् लभते (तहा अक्खए अव्वए निच्चे अवट्ठिए आयट्ठिति) यथा जीवद्रव्यस्यैकत्वादेकस्तथा प्रदेशार्थतया असंख्येयप्रदेशतामाश्रित्याक्षयः सर्वथा प्रदेशानां क्षयाभावात् तथा अव्ययः कियतामपि कियतामपि च व्ययाभावात् असंख्येयप्रदेशता हि न कदाचनाप्यपैति अतो व्यवस्थितत्वान्नित्यताभ्युपगमेऽपि न दोषः इत्येवं भगवताभिहिते तेनापृष्टेप्यात्मस्वरूपे तद्विषयव्यवच्छिन्नसंशयः संजातसम्यक्त्वः (दुवालसविहं सावगधम्मं पडिवज्जित्ता सड्ढाणमुवगओ सोमिलमाहणो इति) ज्ञाताधर्मकथायामपि—

एगे भवं दुवे भवं अक्खए भवं अव्वए भवं अवट्ठिए भवं अणेगभूयभावभविए भवं एवं सूया एगे वि अहं दुवे वि अहं जाव अणेगभूयभावभविए वि अहं से केणट्ठेणं भन्ते ! एगे वि अहं—जावसूयादव्वट्ठाए एगे अहं नाणदंसणट्ठयाए दुवे अहं पएसट्ठयाए अक्खए वि अहं अव्वए वि अहं उवओगट्ठए अणेगभूयभावभविए वि अहं ॥ ज्ञाता० ५ अ० ॥

एगे भवं ति एको भवान् इति एकत्वाभ्युपगमे आत्मनः सूरिणा श्रोत्रादिविज्ञानावयवानां चात्मनोऽनेकतोपलभ्य एकत्वं दूषयिष्यामीति बुद्ध्या पर्यनुयोगः शुकेन कृत (दुवे भवंति) द्वौ भवानिति च द्वित्वाभ्युपगमे अहमित्येकत्वविशिष्टस्यार्थस्य द्वित्वविरोधेन द्वित्वं दूषयिष्यामीति बुद्ध्या पर्यनुयोगो विहितः अक्षयः अव्ययः अवस्थितो भवानेवं नित्यात्मपक्षः पर्यनुयुक्तः अनेके भूता अतीता भावाः परिणामा या भाव्याश्च भाविनो यस्य स तथा अनेन वातिक्रांतभाविसत्त्वाभदनेन अनित्यात्मपक्षः पर्यनुयुक्तः एकतरपरिग्रहे अन्यतरस्य दूषणायेति । तत्राचार्येण स्याद्वादस्य निखिलदोषगोचरातिक्रांतत्वात्तमवलंब्योत्तरमदायि एकोऽप्यहं कथं द्रव्यार्थतया जीवद्रव्यस्यैकत्वात् न तु प्रदेशार्थतया तथा तथाप्यनेकत्वात्ममेत्यवयवादीनामनेकत्वे एकत्वं न बाधकः । तथा कंचित्स्वभावमाश्रित्यैकत्वसंख्याविशिष्टस्य पदार्थस्य स्वभावांतरद्वयापेक्षया द्वित्वमपि न विरुध्यत उक्तः द्वावप्यहं ज्ञानदर्शनार्थतया न चैकस्य स्वभावभेदो न दृश्यते एको हि देवदत्तादिपुरुष एकदा तत्तदपेक्षया पितृत्वपुत्रत्वभ्रातृत्वपितृव्यत्वमातुलत्वभागिनेयत्वादीननेकान्स्वभावाँल्लभते इति तथा प्रदेशार्थतया असंख्येयप्रदेशतामाश्रित्याक्षयः सर्वथा प्रदेशानां क्षयाभावात् । अव्ययः कियतामपि च व्ययाभावादित्येवं भवति अवस्थितो नित्यः । असंख्येयप्रदेशता हि न कदाच

नापि व्यपैति अतो नित्यताभ्युपगमेऽपि न दोषः । उपयोगार्थतया विविधविषयानुयोगार्थतया विविधविषयानुयोगानाश्रित्य अनेकभूतभावभविकोऽपि अतीतानागतयोर्हि कालयोरनेकविषयबोधानामात्मनः कथंचिदभिन्नानामुत्पादाद्विगमाद्वा नित्यपक्षो न दोषायेति ॥ ज्ञाता टी० अ०५॥

मुक्तोऽपि वाऽभ्येतु भवं भवो वा भवस्थशून्योऽस्तु मितात्मवादे । षड्जीवकायं त्वमनन्तसंख्यमाख्यस्तथा नाथ! यथा न दोषः॥२९॥

व्या० । मितात्मवादे संख्यातानामात्मनामभ्युपगमे दूषणद्वयमुपतिष्ठते तत्क्रमेण दर्शयति मुक्तोऽपि वाऽभ्येतु भवमिति मुक्तो निर्वृतिप्राप्तः सोऽपि वाऽपिर्विस्मये वाशब्द उत्तरदोषापेक्षया समुच्चयार्थः । यथा देवो वा दानवो वेति भवमभ्येतु संसारमभ्यागच्छतु इत्येको दोषप्रसंगः। भवो वा भवस्थशून्योऽस्तु भवः संसारः स वा भवस्थशून्यः संसारिजीवैर्विरहितोऽस्तु भवतु इति द्वितीयो दोषप्रसंगः। इदमत्राकूतं। यदि परिमिता एवात्मानो मन्यंते तदा तत्त्वज्ञानाभ्यासप्रकर्षादिक्रमेणापवर्गं गच्छत्सु तेषु संभाव्यते खलु कश्चित्कालो यत्र तेषां सर्वेषां निर्वृतिकालस्यानादिनिधनत्वादात्मनां च परिमितत्वात्संसारस्य रिक्तता भवंती केन वार्यतां। समुपलभ्यते हि प्रतिनियतसलिलपटलपरिपूरिते सरसि पवनतपनातपनजलोदंचनादिना कालांतरे रिक्तता ॥ नचायमर्थः प्रामाणिकस्य कस्यचित्प्रसिद्धः संसारस्य स्वरूपहानिप्रसंगात् तत्स्वरूपं ह्येतद्यत्र कर्मवशवर्तिनः प्राणिनः संसरंति समसार्षुः संसरिष्यंति चेति सर्वेषां च निर्वृतत्वे संसारस्य वा रिक्तत्वं हठादभ्युपगंतव्यं मुक्तै र्वा पुनर्भवे आगंतव्यं न च क्षीणकर्मणां भवाधिकारः "दग्धे बीजे यथाऽत्यंतं प्रादुर्भवति नांकुरः । कर्मबीजे तथा दग्धे न रोहति भवांकुरः" इति वचनात् । आह च पतंजलिः सति मूले तद्विपाको जात्यायुर्भोगा इति एतट्टीका च सत्सु क्लेशेषु कर्माशयो विपाकारंभी भवति नाच्छिन्नक्लेशमूलः यथा तुषावनद्धाः शालितंडुला अदग्धबीजभावाः प्ररोहणसमर्था भवंति नापनीततुषा दग्धबीजभावाः तथा क्लेशावनद्धः कर्माशयो विपाकप्ररोही भवति नापनीतक्लेशो न दग्धबीजभावो वेति स च विपाकस्त्रिविधो जातिरायुर्भोग इति । अक्षपादोऽप्याह न प्रवृत्तिः प्रतिसंधानाय हीनक्लेशस्येति एवं विभंगज्ञानिशिवराजर्षिमतानुसारिणो दूषयित्वा उत्तरार्द्धेन भगवदुपज्ञमपरिमितात्मवादं निर्दोषतया स्तौति षड्जीवेत्यादि त्वं तु हे नाथ! अनन्तसंख्यं अनंताख्यसंख्याविशेषयुक्तं षड्जीवकायं अजीवन् जीवंति जीविष्यंति वेति जीवा इंद्रियादिप्राणादिद्रव्यभावप्राणधारणयुक्तास्तेषां "संघे चानूर्द्धे" इति। चिनोतेर्घञ् आदेश्च कत्वे कायः समूहो जीवकायः पृथिव्यादिषण्णां जीवकायानां समाहारः षड्जीवकायं पात्रादिदर्शनान्नपुंसकत्वं अथवा षण्णां जीवानां कायः प्रत्येकं संघातः षड्जीवकायस्तं षड्जीवकायं पृथिव्यप्तेजोवायुवनस्पतित्रसलक्षणषड्जीवनिकायं तथा तेन प्रकारेण आख्यः मर्यादया प्ररूपितवान् यथा येन प्रकारेण न दोषो न दूषणमिति जात्यपेक्षमेकवचनं प्रागुक्तदोषद्वयजातीया अन्येऽपि दोषा यथा न प्रादुष्यंति तथा त्वं जीवानंत्यमुपदिष्टवानित्यर्थः । आख्य इति आङ्पूर्वस्य ख्यातेरङि सिद्धिः त्वमित्येकवचनं चेदं ज्ञापयति यज्जगद्गुरोरेवैकस्येदृक्प्ररूपणसामर्थ्यं न तीर्थांतरशास्तृणामिति पृथिव्यादिना पुनर्जीवत्वमित्थं साधनीयं यथा सात्मिका विद्रुमशिलादिरूपा पृथिवी छेदे समानधातूत्थानादर्शांकुरवत् भौममंभोऽपि सात्मकं क्षतभूसजातीयस्य स्वभावस्य संभवात् शालूरवत् । अंतरिक्षमपि सात्मकमभ्रादिविकारे स्वतः संभूय पातात् मत्स्यादिवत् तेजोऽपि सात्मकं आहारोपादानेन वृद्ध्यादिविकारोपलंभात् पुरुषांगवत् । वायुरपि सात्मकः अपरप्रेरितत्वेऽपि तिर्यग्गतिमत्त्वात् गोवत् । वनस्पतिरपि सात्मकः छेदादिभिर्म्लान्यादिदर्शनात् पुरुषांगवत् । केषांचित् स्वापांगोपांगोपश्लेषादिविकाराच्च अपकर्षतश्चेतन्याद्या सर्वेषां सात्मकत्वसिद्धिराप्तवचनाच्च त्रसेषु च कृमिपिपीलिकाभ्रमरमनुष्यादिषु न केषांचित्सात्मकत्वे विगानमिति । यथा च भगवदुपज्ञे जीवानंत्ये न दोषस्तथा दिग्मात्रं भाव्यते भगवन्मते हि षण्णां जीवनिकायानामेतदल्पबहुत्वं सर्वस्तोकास्त्रसकायिकास्तेभ्योऽसंख्यातगुणास्तेजस्कायिकास्तेभ्यो विशेषाधिकाः पृथ्वीकायिकास्तेभ्यो विशेषाधिका अप्कायिकास्तेभ्यो विशेषाधिका वायुकायिकास्तेभ्योऽनन्तगुणाः वनस्पतिकायिकास्ते च व्यावहारिकाऽव्यावहारिकाश्च "गोलाय असंखिज्जा असंखनिग्गोयगोलउ भणिओ । इक्किक्कंमि निगोए अणंतजीवा मुणेयव्वा॥१॥ सिज्झंति जत्तिया खलु इह संववहारजीव रासीउ। इंति अणाइवणस्सइ रासीउ तत्तिया तंमि॥२॥ इति वचनात् यावंतश्च यतो गच्छंति मुक्तिं जीवास्तावंतोऽनादिनिगोदवनस्पतिराशेस्तत्रागच्छंति न च तावता तस्य काचित्परिहाणिर्निगोदजीवानामानंत्यस्याऽक्षयत्वात् निगोदस्वरूपं च समयसागरादवगंतव्यं अनाद्यनंतेऽपि काले ये केचिन्निर्वृता निर्वांति निर्वास्यंति च ते निगोदानामनंतभागेऽपि न वर्तंन्ते नावर्तिषत न वर्त्स्यंति ततश्च कथं मुक्तानां भवागमनप्रसंगः कथं च संसारस्य रिक्तताप्रसक्तिरिति अभियुक्तं वेतदन्ययूथ्यानामपि तथाचोक्तं वार्तिककारेण "अत एव च विद्वत्सु मुच्यमानेषु संततं । ब्रह्मांडलोकजीवानामनंतत्वाद शून्यता॥१॥ अत्यन्यूनातिरिक्तत्वैर्युज्यते परिमाणवत् । वस्तुन्यपरिमेये तु नूनं तेषामसंभव"॥२॥ इति काव्यार्थः ॥ ॥ स्या० २९ ॥ आव० ॥

अनेकान्तजयपताकायामपि एवं नित्यकत्वा वद्धः खन्यनस्येक सर्वथा । आत्मेति निश्चयादस्मिन् भवनैर्गुण्यदर्शनात् ॥ ४ ॥ तत्त्वागायोपघातस्य मद्भवस्यापि भावतः । वैराग्यं तद्गतं यत्तन्मोहगर्भमुदाहृतं ॥ ५ ॥ सुधांसो मोक्षमनो वडवाहो नेच्छणदिना हर्मी ॥ आत्मानन्दनात्मकं भवे तिष्ठति दारुणे ॥ ६ ॥ एवं विज्ञाय तत्त्वार्थविधिं त्यागस्य सर्वथा। वैराग्यमाहु मज्ञानमगमन तत्त्वदर्शिनः॥ अने० ॥ ३ ॥ आत्मन एकान्तानेकत्वस्वभावमन्त्वमनित्यत्वनिरीक्षणादवचन्द्रपतापरलोकशब्देऽपि ॥ विशे० ॥

(१९) अथवा मुक्तामुक्त विशेषणसद्भावमाश्रित्यात्मनः सक्रियत्वं साधयन्नाह–

कत्ताइत्तणओ वा मोइत्तिओ पंओ दवप्पगारो व्व।
देहप्फंदणओ वा पचक्खं जंतुजिम्मो व्व ॥

एवं दर्शनसूत्राण्यपि, नवरं सम्यग्दृष्टिमिथ्यादृष्ट्योर्दर्शनस्याविशिष्टत्वादात्मा दर्शनं दर्शनमप्यात्मैवेति वाच्यं, यत्र हि धर्मे विपर्ययो नास्ति तत्र नियम एवोपनीयते, न व्यभिचारो यथेहैव दर्शने, यत्र तु विपर्ययोऽस्ति तत्र व्यभिचारो नियमश्च यथा ज्ञाने, आत्मा ज्ञानरूपोऽज्ञानरूपश्चेति व्यभिचारः ज्ञानं त्वात्मैवेति नियम इति ॥ भ० ॥ टी० ॥ आत्मनः स्वपर्यायेभ्यः कथञ्चिद्व्यतिरिक्तत्वं सम्मतितर्के यथा ॥

(आगासगओत्ति) आकाशगतोऽत्यर्थं तुङ्गमित्यर्थः (कुडभिन्ति) लघुपताकाः संजायन्ते । तत्पर्यन्तैः परिमण्डितत्वाच्चासावभिरामश्चातिरमणीय इति विग्रहः । (इंदज्झओत्ति) इन्द्रध्वज शेषध्वजापेक्षयातिमहत्वात् इन्द्रश्चासौ ध्वजश्च इन्द्रध्वज इति । (पुरओत्ति) जिनस्याग्रतो गच्छतीति दशमोऽतिशयः । समा० ३४ स० ॥

इंदज्झया–इन्द्रध्वजा–स्त्री०–इन्द्रसम्बन्धिन्यां तन्नंतोवाय स्थापितायां ध्वजायाम्, वाच० । तदुत्पत्तिप्रायश्चूर्णौ भरत-कथामधिकृत्योक्ता यथा—

ताहे सो सक्को भणति तुब्भेहिं केरिसेण रूवेण तन्थ
अत्थ इति ताहे सक्को भणति ण सक्का तं माणुसेणं दट्ठुं ।
ताहे सो भणति । तस्स आकितिं पेच्छामि । ताहे सक्को भणति जेण तुमं उत्तमपुरिसो तेण ते अहं दाएमि एगपदेसं ताहे एगं अंगुलिं सव्वालंकारविभूसितं काऊण दाएति सो तं दट्ठूणं अतीव हरिसं गतो । ताहे तस्स अट्ठाहियं महिमं करेति ताए अंगुलीए आकितिं काऊण पच्छा स इंदज्झया एवं वरिसे वरिसे इंदमहो पवत्तो । पढम उसभवो भरहो भणति तुमं सि देविंदो अहं मणुसिंदो मित्तामो एवं होउत्ति । आ. चू० ० अ. ॥

इंदट्ठाण–इन्द्रस्थान–न०–भवननगरविमानरूपे चमरादिसम्बन्ध्याश्रये, स्था० ६ ठा० ॥ तेषन्द्रोपपातविरहितकालो यथा–

इंदट्ठाणे णं भंते ! केवतियं कालं विरहिते उववातेणं पन्नत्ते ? गो० ! जहण्णेणं एक्कं समयं उक्कोसेणं छम्मासा (इंदट्ठाणेणमित्यादि) इन्द्रस्थानं भदन्त ! कियन्तं कालमुपपातेन विरहितं प्रज्ञप्तम् ! भगवानाह गौतम ! जघन्येनैकं समयं यावत् उत्कर्षतः षण्मासान् । जी० ३ प्र० ॥ स्था० ॥

स्थानाङ्गेऽपि ।

एगमेगे णं इंदट्ठाणे उक्कोसेणं छम्मासे विरहिए उववाएणं (एगेत्यादि) एकैकमिन्द्रस्थानं चमरादिसम्बन्ध्याश्रयो भवननगरविमानरूपस्तदुत्कर्षेण षण्मासान् यावदिन्द्रोत्पादविरहितं (?) पाते नेन्द्रापेक्षयेति । स्था. ६ ठा. ॥ इन्द्रोपपातविरहिते । तथाइन्द्रस्थाने किं भवतीति जीवाभिगमे प्रतिपादितम् । तथा–

तेसिं णं भंते ! जया देवाणं इंदे चयति से कहमिदाणीं पकरेंति ? गो० ! चत्तारि पंच सामाणिया तट्ठाणं उवसंपज्जित्ताणं विहरंति जाव तत्थ अन्ने इंदे उववन्ने भवति ॥

पुनः प्रश्नयति (तेसिणं भंते इत्यादि) तेषां भदन्त ! ज्योतिष्कदेवानां यदा इन्द्रश्च्यवते तदा ते देवा इदानीं इन्द्रविरहकाले कथं प्रकुर्वन्ति । भगवानाह । गौतम ! यावच्चत्वारः पंच वा सामानिका देवाः समुदिताभूय तत्स्थानमुपसंपद्य विहरन्ति तदिन्द्रस्थानं परिपालयन्तीति यावदन्यस्तत्र इन्द्र उत्पन्नो भवति । जी० ३ प्र० ॥

एवं वाणव्यन्तरदेवेन्द्रस्थानेऽपि तथाच सूत्रम् ।

एवं वाणमंतराणं जाव इंदे चयति से कहमिदाणिं ता तेसिणं देवाणं जाव इंदे चयति से कहमिदाणिं पकरेंति ता चत्तारि पंच सामाणियदेवा तट्ठाणं उवसंपज्जित्ताणं विहरंति जाव तत्थ अन्ने इंदे उववन्ने भवति ता इंदट्ठाणे केवतियं कालं विरहिते उववातेणं पन्नत्ते ता जहण्णेणं एक्कं समयं उक्कोसेणं छम्मासे ॥

(ता तेसिंदत्ति) ता इति पूर्ववत् तेषां ज्योतिष्काणां देवानां यदा इन्द्रश्च्यवते तदा ते देवा इदानीं इन्द्रविरहकाले कथं प्रकुर्वन्ति भगवानाह ता इत्यादि पूर्ववत् चत्वारः पंच वा सामानिका देवाः समुदिताभूय तदिन्द्रस्थानमुपसंपद्य विहरन्ति तदिन्द्रस्थानं परिपालयन्तीति यावत् ... इति तदिन्द्रस्थानं परिपालयन्तीति यावदन्यस्तत्र इन्द्र उत्पन्नो भवति (ता इंदट्ठाणेत्ति) ता इति पूर्ववत् इन्द्रस्थानं कियन्तं कालमुपपातेन विरहितं प्रज्ञप्तं ! भगवानाह (ता इत्यादि) जघन्येन एकं समयं उत्कर्षतः षण्मासान् । सूर्य० १९ पा. ॥ इन्द्रस्थाने ...

णावसरे (ठाण) शब्दे । इन्द्रयष्टिस्थापनाय कृते स्थाने च ॥

जेणेव इन्दट्ठाणे तेणेव उवागए ।

(इंदट्ठाणेत्ति) यत्रेन्द्रयष्टिरूर्ध्वी क्रियत इति । अन्त० ।

इंदणक्खत्त–इन्द्रनक्षत्र–न०–इन्द्रस्वामिकं नक्षत्रम् । ज्येष्ठानक्षत्रे, तस्य तत्स्वामिकत्वात्तथात्वम् । इन्द्रनामकं नक्षत्रम् । फाल्गुनीनक्षत्रे च । वाच० ।

इंदणाग–इन्द्रनाग– पुं०–वसंतपुरस्थे स्वनामख्याते श्रेष्ठिकुमारे, तेन च बालतपसा सामायिकं लब्धमिति (सामाइय) शब्दे । आ० म० द्वि० ॥

इंदणील–इन्द्रनील–पुं०–इन्द्र इव नीलः श्यामः । वाच० । खरबादरपृथिवीकायात्मके नीलरत्नविशेषरूपे मणिविशेषे, उत्त० सूत्र० २ श्रु० ३ अ० । राज० । जी० । प्रज्ञा० । कल्प० । औप० । (नीलम) इति ख्याते मरकतमणौ, तल्लक्षणमुक्तं रत्नपरीक्षायाम् । " क्षीरमध्ये क्षिपेन्नीलं क्षीरञ्चेन्नीलतां व्रजेत् । इन्द्रनील इति ख्यातं सर्वरत्नोत्तमोत्तमम् " वाच० ।

इंदतोया–इन्द्रतोया–स्त्री० इन्द्रमैश्वर्यान्वितं तोयमस्याः, इन्द्रेण पूरितं तोयमस्या वा । गन्धमादनसमीपस्थे नदीभेदे ॥ इन्द्रतोयां समासाद्य गन्धमादनसन्निधौ । भा. व० २४ वाच. ॥

इंददत्त–इन्द्रदत्त–पुं० स्वनामख्यातेऽभिनंदनजिनस्य प्रथमभिक्षादातरि, सम० २४स० । आ.म. । वासुपूज्यजिनस्य पूर्वभवपितृनामधेये च । सम. २४स. ॥ इन्द्रपुरनगरस्थे स्वनामख्याते नृपे, तत्कथा मानुष्यदुर्लभत्वे । तितिक्षायाम् शीले च सम्भवति आ. म. । आ. क. । आ. चू० । उत्त. । पं० व० । आव. । व्य. । विपा. । नि० चू. । इन्द्रपुरं नगरं इंददत्तो राया । इति । आ. चू. ४ अ० । इन्द्रपुरे इंददत्ते य । व्य. २ खं० ६ उ० ।

इंदपुरइंददत्ते, वावीसमुआ सुरिंददत्ते अ ।

महुराए जिअसत्तू सयंवरो निव्वुई एव ॥ ८० ॥

अस्य व्याख्या ॥ कथानकादवसेया । तच्चेदं । इंदपुरं नगरं इंददत्तो राया तस्स इट्ठाणं देवी से वावीसं पुत्ता अन्ने भणंति एगाए देवीए ते सव्वे रन्नो पाणसमा अन्ना एक्का धूया अमच्चस्स सा जं परिणिय तेण दिट्ठा सा अन्नया कयाइ ण्हाया समाणी अच्छइ ताहे रायाए दिट्ठा का एसा तेहिं भणियं तुज्झ देवी ताहे सो ताए समं एक्कं रत्तिं वुत्थो सेसा जं च रायाए वत्तव्वियं सव्वं कारो तेण तं पत्तए लिहियं सो य सारवेइ नवण्हं मासाणं दारओ जाओ तस्स दारचेडरूवाणि तद्दिवस जायाणि तं अग्गियओ पव्वयओ बहुलिया सागरग ताणि सह जायाणि तेण कलायरियस्स उवणीओ तेण लेहाइयाओ बावत्तरिकलाओ गाहियाओ जाहे ताओ गाहेइ आयरिओ ताहे ताणि कड्ढंति ढि [illegible] पुव्वपरिच्चएण ताणि रोडेंति सो वि ताणि न गणेइ गहियाओ कलाओ ते अन्ने गाहिज्जंति वावीसं पि कुमारा [illegible] ते अहिज्जंति आयरियस्स तं पिट्टंति मत्थएहिं य हणंति जइ उवज्झाओ ते पिट्टेइ अप्पणो ताहे साहेंति माईणं [illegible] ताहे ताओ भणंति । किं सुलभाणि पुत्तजम्माणि ताहे न सिक्खिया तए महुराए जिअसत्तू राया तस्स सुया निव्वुई नाम कन्नगा सा अलंकिया उवणीया राया भणइ जो ते रोयइ सो ते भत्ता ताहे तीए भणियं जो सूरो वीरो पंडिओ सो मम भत्ता होउ ताहे सा तं गहाय गया इंदपुरं नगरं रायसुया बहवे कन्ना दिन्ना पत्तट्ठिया ताहे आणाविया सव्वे रायाणो ताहे तेण रायाणएण सुयं अठारसाए इट्टतुट्ठा वत्तियपडागं नगरं कयं रंगो कओ तत्थ चक्कं तत्थ एगंमि अक्खे अट्ठ चक्काणि तेसिं पुरओ धूया ठविया सा पुण पुत्तलिमि विंधियव्वा राया सन्नद्धो निग्गतो सह पुत्तेहिं ताहे सा कन्ना सव्वालंकारभूसियाए भंडिया से अच्छइ सो रंगो रायाणय ते पत्तेयदंडभडभोयणा जारिसो दोवतीए तत्थ रन्नो जेट्ठपुत्तो सिरिमालीनामकुमारो भणिओ एस दारिया रज्जं च मोत्तव्वं सो वि तुट्ठो अहं नूणं अन्नेहिंतो रातिहिं अब्भहिओ ताहे सो भणति विंधेहित्ति ताहे सो अकयकरणो तस्स समूहस्स मज्झे तं धणु घेत्तुं चेव न वाएइ किह वि णेण गहियं तेण जंतो धव्वदत्तो वच्चउत्ति कम्मुणं तं भग्गं एवं कामइणा अट्ठंवो हीणं कासइ दो तिण्णि अन्नेसिं बाहिरेण चेव णिंति तेण वि अमच्चेण सो पत्तगो णसावियओ तद्दिवसमाणिओ तत्थ अच्छइ ताहे राया ओहयमणसंकप्पो करयलपल्हत्थमुहो अहो अयं लोयमज्झे पुत्तेहिं धरिसिओत्ति अत्थइ ताहे सो अमच्चो पुच्छइ किं तुज्झ देवाणुप्पिया ओहया जाव झियाइ ताहे सो भणइ एएहिं अप्पहाणो कओ ताहे भणइ अत्थि पुत्तो अन्नो वि तुब्भं कहिं सुरिंददत्तो नाम कुमारो तं सो वि ताव विन्नासेउ ताहे तं राया पुच्छइ कहं मम पुत्तो ताहे ताणि सिट्ठाणि रहस्साणि ताहे राया तुट्ठो भणइ सेयं तव पुत्ता एते अट्ठ चक्के भेत्तूण रज्जसोक्खं निव्वुइदारियं पावित्तए ताहे सो कुमारो ठाणं आलीढं गहऊण गेण्हइ धणु लक्खाभिमुहं सरं संधेइ ताणि तस्स रूवाणि ते य कुमारा सव्वओ रोडावेंति अन्ने य दोण्णि पुरिसा असिवग्गहत्थो ताहे सो पच्छा मं रन्नो उवज्झायस्स य करेइ सो वि से उवज्झाओ भयं दाएइ एए दोण्णि पुरिसा जइ फिडसि सीसं ते फिडइ तेसिं दोण्ह वि पुरिसाणं तेण चत्तारि ते य वावीसं अगणेंतो ताणं अट्ठण्ह रहचक्काणं छिद्दाणि जाणिऊण एगम्मि छिद्दे नाऊण अविरहियाए दिट्ठीए तंमि लक्खत्तेण अन्नमियमणं आऊणमाणेण साधीतीया अच्छिंमि विद्धा तत्थ उक्किट्ठसीहनादसाधुक्कारो दिन्नो एसा दव्वतितिक्खा एस चेव विन्नासानावे वि उवसंहारो जहा कुमारो तहा साहू, जहा ते चत्तारि तहा चत्तारि कसाया, जहा ते वावीसं कुमारा तहा वावीसं परीसहा, जहा ते रूवे भणुसा तहा रागदोसा, जहा पुत्तलिगा विंधियव्वा तहा आराहणा, जहा निव्वुइदारिया तहा सिद्धितितिक्खत्ति गयं ॥ आव० ४ अ० ।

" आसीदिन्द्रपुरं नाम, नगरं गुरुकं गुणैः ।
तत्राभवच्छ्रियामिन्द्र, इन्द्रदत्तो महीपतिः ॥ १ ॥
प्रीतिपात्रः कलत्राणां, तस्य द्वाविंशतिः सुताः ॥
बभूवुर्भूमिपालस्य, प्राणेभ्योऽप्यतिवल्लभाः ॥ २ ॥
अन्या भार्या भवत्तस्य, नृपस्यामात्यपुत्रिका ॥
सा च तेन परं दृष्टा, पाणिग्राहे प्रकुर्वता ॥ ३ ॥
अथान्यदा कदाचित्सा, ऋतौ स्नाता विलोकिता ॥
राज्ञा पृष्टश्च पार्श्वस्था, यथैषा कस्य का च मे ॥ ४ ॥
ते ऊचुरेष देवी ते, ततो राजा तया सह ॥
रात्रिमेकामुवासाथ, तस्या गर्भोऽभवत्तदा ॥ ५ ॥
सा च पूर्वममात्येन, भणिताऽऽसीद्यदा तव ॥
गर्भो भूतो भवेद्वत्से, तदा त्वं मे निवेदयेः ॥ ६ ॥
ततः सा गर्भसंभूतिं, राजमंत्र्यामथान्तरं ॥
मुहूर्तं राजजल्पं च पितुः सर्वं न्यवेदयत् ॥ ७ ॥
सर्वं शापय तन्मंत्री, व्यलिखत्सोऽपि पत्रके ॥
सम्यक् तां पालयामास, काले जातश्च दारकः ॥ ८ ॥
तद्दिने दासरूपाणि, चत्वार्यपि तद्गृहे ॥

श्रेष्ठिकः पर्वतश्चाय, बहुलीसागरस्तथा ॥ ९ ॥
सुरेन्द्रदत्त इत्येषां, राजसूनोः कृताभिधा ॥
कलागुरोस्तस्य पार्श्वे, कलाः कालेन गृहीतवान् ॥ १० ॥
गृहन्नथ कलास्तस्य, चक्रिरे तानुपद्रवान् ॥
न चासौ नाविभक्त्यान्नृपस्तासु व्यजीगणत् ॥ ११ ॥
ते च द्वाविंशतिः पुत्रा ग्राहमाणाः कलाः किल ॥
निभर्त्सिस्म कलाचार्यं, गाढ़ीस्तस्य तया दडुः ॥ १२ ॥
सूरिणा ताडितास्ते तु, स्वमातृभ्यो न्यवेदयन् ॥
तं च ताः कुपिताः शापे–श्वसुरुद्वेगभाजनम् ॥ १३ ॥
एवं ते वपुरज्ञाना, सूरिणा समुपेक्षिताः ॥
इतश्च मथुरानाथ, आसीत्पर्वतको नृपः ॥ १४ ॥
तत्सुता निर्वृतिर्नाम, यौवनोद्भेद सुन्दरा ॥
वरार्थं तेन सा चाचि, भर्त्तारं वृणु वाञ्छितम् ॥ १५ ॥
सा पुनस्तमनुज्ञाप्य चचालेन्द्रपुरं प्रति ॥
राजपुत्रा यतस्तत्र भूयांसः सन्तिसद्गुणाः ॥ १६ ॥
ततः सेन्द्रपुरं प्राप-दाप्तलोकसमन्विता ॥
तुष्टेन चेन्द्रदत्तेन राज्ञाऽकारि पुरे महः ॥ १७ ॥
निर्वृत्या भणितं राज्ञे, राधावेधं करिष्यति ॥
यः कुमारः स मे भर्ता भविष्यत्यपरो न तु ॥ १८ ॥
तदाकर्ण्य नृपो रंगं कारयमास तत्र च ॥
एकत्राक्षेऽष्ट चक्राणि तत्पुरः पुत्रिका तया ॥ १९ ॥
सा च चक्षुषि बाणेन, भेत्तव्याधो विवर्तिना ॥
ततः सैन्ययुतो राजा, रंगे तस्थौ सपुत्रकः ॥ २० ॥
निर्वृतिश्चैकदेशोऽस्य, स्थिताऽलङ्कृतविग्रहा ॥
यथास्वं च निविष्टेषु, सामंतनागरादिषु ॥ २१ ॥
आदिष्टो ज्येष्ठपुत्रोऽथ, राज्ञा श्रीमालिनामकः ।
भित्त्वा राधां गृहाणेमां, कन्यां राज्यं च पुत्रक ॥ २२ ॥
ततः सोऽशिक्षितत्वेन, साध्वसोत्कंपितविग्रहः ।
शशाक नैव तां भेत्तु-मेवं ते शेषका अपि ॥ २३ ॥
ततो राजा स्वपुत्राणां, मूर्खतां वीक्ष्य तत्क्षणात् ।
शुशोच हस्तविन्यस्तगल्लो मन्युस्तदर्पिक ॥ २४ ॥
ततोऽमात्यस्तमापृच्छत्, देव किं दैन्यवान् भवान् ।
सोऽथोचन्मुनैरेतैरहं मो धर्षितो जने ॥ २५ ॥
ततोऽमात्योऽवदद्भूपं यथान्योऽपि च ते सुतः ।
विद्यते सोऽपि देवेन राधावेधे नियुज्यताम् ॥ २६ ॥
राजाऽवोचत्कुतो मेऽन्यः, सुतोऽमात्योऽप्युवाच तम् ।
महीदिनस्ततः पत्रं दर्शयामास तस्य तत् ॥ २७ ॥
सञ्जातप्रत्ययो राजा सतुष्टस्त वनाण च ।
आनयाऽमात्य तत्पुत्रं, तस्य तं सोऽप्यदर्शयत् ॥ २८ ॥
आश्लिष्य मूर्ध्नि चाघ्राय, तं बभाषे सुतोत्तमम् ।
कन्यां गृहाण राज्यञ्च भित्वा राधां त्वमद्भुतां ॥ २९ ॥
यदादिशति तातस्तत्करोमीत्यभिधाय सः ।
धनुर्वेदोपदेशेन राधां भेत्तुमुपस्थितः ॥ ३० ॥
तान्यस्य चेटरूपाणि ते च द्वाविंशतिः सुताः ।
वहूनामीनदी द्वौ च नाना चक्रुरुपद्रवान् ॥ ३१ ॥
कलाचार्योऽप्यवोचत्तं न चेद्राधां विभेत्स्यति ॥
नरेतौ च शिरो यस्य छेत्स्यते दारुणो मरो ॥ ३२ ॥
ततोऽसावपगण्यैतान् सावधानोऽप्रमादवान् ।
चक्राणामंतरं ज्ञात्वा राधां द्रागिति विव्यधान् ॥ ३३ ॥
ततश्चास्त्रशिक्षितं तूर्यं साधुकारः कृतो जनैः ।
ततश्चास्त्रनिन्नं तूर्यं साधुकारः कृतो जनैः । ततश्चा- [illegible]
राजादिस्तोषितो लोकः दाकन्या च तेन सा ॥ ३४ ॥ पंचा०

श्रावस्तीवास्तव्ये कपिलपितुः काश्यपस्य मित्रे, कपिलस्यो-पाध्याये स्वनामख्याते ब्राह्मणे, उत्त० ७ अ०। तथा च कपिलकथा याम् "सावत्थीए णयरीए विक्खित्तो इन्ददत्तो नाम माहणो इति" उत्त० । तत्कथा कपिलशब्दे । मथुरानगरस्थे स्वनाम-ख्याते पुरोहिते च । तत्कथा यथा-मथुरायां इन्द्रदत्तः पुरोहि-तोऽस्ति स जिनशासनप्रत्यनीकः स्वगवाक्षस्थः सन् अधोनि-र्गच्छतो जैनयतेर्मस्तकोपरि निजचरणं वितनं करोति । एवं निरन्तरं कुर्वाणं तं दृष्ट्वा साधुर्न कोऽपि कुप्यति परमेकः श्रावकः कुपितः तत्पादच्छेदप्रतिज्ञामकरोत् अन्यानि तच्छिद्राणि भव-न्मानेन, तेन श्रावकेण तत्स्वरूपं गुरोः पुरः कथितम् । गुरु-णोक्त सहते सत्कारपुरस्कारपरीषहः साधुरिति । तेन स्व-प्रतिज्ञा कथिता । गुरुभिरुक्तम् । अस्य गृहे किं जायमानमस्ति तेनोक्त नवीनप्रासादे राजा निमन्त्र्यमाणोऽस्ति पुरोहितेन । गुरुभिरुक्तं तर्हि त्वं तत्प्रासादे प्रविशन्तं राजानं करे धृत्वा प्रासादोऽयं पतिष्यतीति कथय । अहं च प्रासादं विद्यया पा-तयिष्यामि । ततस्तेन तथाकृते प्रासादः पतितो राज्ञोक्तं किमिदजातं । श्रेष्ठिनोक्तं महाराज! अनेन तव मारणाय कपट-मपिकृतमभूत् ततो रुष्टेन राज्ञा स पुरोहितस्तस्य श्रेष्ठिनोऽर्पितः स च श्रेष्ठी इन्द्रकीलके तस्य पादं क्षिप्त्वा प्रतिज्ञापूरणार्थं स पिष्टमय पादं कृत्वा छिन्नवान् तत्पाश्च सर्वं तत्पकरं पुरोहि-तेनोक्तमतः परं नैवेदृशं करिष्यामीति । अनुकम्पेन श्रावकेण स मुक्तः । उत्त० २ अ० ॥

इत्थमिंददत्तो पुरोहिओ गयक्खट्ठिओ मिच्छदिट्ठी पडोसयं तस्स साहुस्स मत्थए उवरि पायं कुणंतो संठिए गुरुभत्तिर पायहीणो कओ" ती० ॥

इंददारु–इन्द्रदारु– पु० इन्द्रस्य तद्रूपजस्य नायनं दारु देव-दारु वृक्षे इन्द्रद्रुमादयोऽप्यत्र । वाच० ॥

इंददिन्न–इन्द्रदिन्न–पु० कौटिकगच्छस्थे सुस्थितसुप्रतिबुद्धा परनामधेययोः कौटिककाकन्दकयोः शिष्ये स्वनामख्याते आचार्ये, " सुट्ठियसुप्पडिबुद्धाणं कोडियकाकंदगाणं वग्घा-वच्चसगुत्ताणं अंतेवासी थेरे अज्जइंददिन्ने कासवगुत्ते ॥ इति "—कल्प० । " तदनु च सुदस्थितसुप्रतिबुद्धौ, कौटिककाकन्दकौ कौटिकगच्छनाम सम कायजायेताम् । सुस्थितसुप्रतिबुद्धौ, कौटिकगच्छन' सम भूत् ॥ तत्रेन्द्रदिन्नसूरि-र्भगवान् श्रीदिन्नसंज्ञसूरीन्द्रः ॥ इति गच्छा० ॥

अयं च खरतरगच्छपट्टावल्यनुसारेण वीरजिनस्य संदशः ॥
तपागच्छपट्टावलीप्रमाणतो दशम' ।

इंदपव्वय–इन्द्रपर्वत– पु० इन्द्रनामपर्वते । महेन्द्रपर्वते, इन्द्रपर्णः पर्वतः । नीलपर्णे गिरिभेदे, वाच० ॥

इंदपाडिवया–इन्द्रप्रतिपद्– स्त्री० इन्द्रपुरपूर्णिमाया अन-न्तरभाविन्यामश्वयुजप्रतिपदि तस्यां स्वाध्यायो न कार्य इति— । स्था० ४ ठा० ।

इंदपुर–इन्द्रपुर–न० इन्द्रदत्तनृपस्य भाजनतया स्वनामख्याते नगरे, आव० ४ अ० ९ उ० ॥ का० चू० । आ. म. । इति स्था० । इंदेण जेट्ठरीये आरोवियासि इंदपुरमंमि नगरे । इति विपा० १० अ० । उत्त० । " पुरमिन्दपुरं नाम सत्यारादिन्द्रपुरं चिंत० " ॥ आ० क० ॥ माली पुरस्थे स्वनामख्याते नगरे च ॥ " अन्नदा पुरं नयरं दागमन्तं नाहयं इंदपुरं नगरे दहिवाणिय जाय सिद्धं इति " विपा० ७ अ० ॥

इंदपुग्ग–इन्द्रपुरक–न० (थेमवाडिय) गणस्य चतुर्थे कुलेषु चतुर्थे कुले, । तइ ईड इंदपुरगं च । कल्प०–

इंदपुरोहिय–इन्द्रपुरोहित– पुं०—६ त० । सुराचार्ये बृहस्पतौ–वाच० ।

इंदभूइ–इन्द्रभूति–पुं०–स्वनामख्याते महावीरस्य प्रथमगणधरे [illegible] प्रथमशिष्ये, प्रव० ८ द्वा० । सम० । सूत्र० । "समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूई [illegible] इति । कल्प० । अन्त० । विशे० । "[illegible] इंदभूइत्ति गोयमो [illegible] विनिद्देसो" । चं०प्र० १पा०॥

[illegible] –" इंदभूइसामी पंचसंयसमपरिवारो [illegible] [illegible]

[illegible]

पुनरप्याह ॥

वयेस्त च मुक्खगणो, देवा उ कहमणेण विम्हयं नीया ।
वंदंति संथुणंति य, जेण सव्वामुपुच्छीए ॥

धूर्जटो तत्पादमूले सूर्यवत् सर्वतया युक्ता [illegible] विकासत्वात् देवास्तु कथमनेन विस्मयं नीता येन विस्मयनयेन सर्वज्ञरूपा तं यन्दन्ते संस्तुवन्ति च ।

अहवा जारिसओच्चिय, सो नाणी तारिसा सुरा ते वि ।
अणुसरिसो संजोगो, गामनडाणं च मुरखाणं ॥

अथवा यादृश एव स ज्ञानी तेऽपि सुरास्तादृशा एव मूर्खा इत्यर्थः । ततोऽनुसदृशोऽनुरूपः संयोगस्तस्य ज्ञानिनः एषां च देवानाम । कयोरिवेत्याह– ग्रामनटयोरिव मूर्खयोः ग्रामे मूर्खो नटोऽपि तथाविधविचारविकलत्वात् मूर्खः इति परस्परं तयोः संयोगोऽनुरूपमेवमेतयोरपीति ॥

काउं हयप्पयावं, पुरतो देवाण दाणवाणं च ।
नासे हं नीसेसं, खणेण सव्वन्नुवायं से ॥

देवानां च दानवानां च पुरतोऽस्य तथाविधप्रताप [illegible] कृत्वा क्षणमात्रेण (से) तस्य सर्वज्ञवादं निःशेषं नाशयामि ॥

इय घोत्तूणं पत्तो, रइगणनिसारपरिवुडं वीरं ।
चोत्तिसातिसएहिं, स संकितो वट्टिओ पुरतो ॥

इति पूर्वोक्तयुक्त्या प्राप्तो भगवत्सामीप्यं [illegible] चतुस्त्रिंशदतिशयनिधिं स शङ्कितः पुरतः स्थितः ॥

अथान्तरे ।

आनट्ठो य जिणाणं, जाइजरामरणविप्पमुक्केणं ।
नामेण य गुत्तेण य, सव्वन्नू सव्वदरिसीणं ॥

आभाषितः संबोधितो जिनेन भगवता महावीरेण [illegible] कथमनेनाहमभिज्ञात इत्याह नाम्ना इन्द्रभूते गोत्रेण च यथा हे गौतम ! किं विशिष्टेन जिनेनेत्याह । सर्वज्ञेन सर्वदर्शिना, [illegible]

[illegible]

हे इंदभूइ गोयम ! सागयमुत्तं जिणेण [illegible] ।
सो चिंतेइ [illegible] अहवा [illegible] न याणाइ ॥

हे इन्द्रभूते ! गौतम ! [illegible]

[illegible]

[illegible]

[illegible]

किमने अत्थि जीवो, उयाहु नत्थि त्ति संसओ तुज्झ ।
वेयपयाण य अत्थं, न याणसी तेसिमो अत्थो ॥

हे गौतम ! किं मन्यसे अस्ति जीव उत नास्तीति नन्वयमनुचित एव संशयो यतो ऽयं संशयस्तव विरुद्धवेदपदश्रुतिनिबन्धन इति । तान्यमूनि वेदपदानि " विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय पुनस्तान्येवानुविनश्यति न प्रेत्यसंज्ञास्तीत्यादि " तथा स वै अयमात्मा ज्ञानमय इत्यादीनि च एतेषां च वेदपदानामयमर्थो भवतश्चेतसि विपरिवर्त्तते । विज्ञानमेव घनानन्दादिरूपत्वात् विज्ञानघनः स एव एतेभ्यो ऽध्यक्षतः परिच्छिद्यमानस्वरूपेभ्यः पृथिव्यादिलक्षणेभ्यो भूतेभ्यः समुत्थाय उत्पद्य पुनस्तान्येवानुविनश्यति तान्येव भूतानि अनुसृत्य विनश्यति तत्रैवाव्यक्तरूपतया संलीनो भवतीति भावः न प्रेत्यसंज्ञास्ति मृत्वा पुनर्जन्म प्रेत्येत्युच्यते तत्संज्ञास्ति न परलोकसंज्ञाऽस्तीति भावः । ततः कुतो जीवः युक्त्योपपन्नश्चायमर्थं इति ते मतिः यतो नासौ प्रत्यक्षेण परिगृह्यते अतीन्द्रियत्वात् नाप्यनुमानेन यतस्तल्लिङ्गलिङ्गिसम्बन्धपूर्वकश्च । न चात्र लिङ्गिना सह सम्बन्धः प्रत्यक्षगम्यो लिङ्गिनोऽतीन्द्रियत्वात् । नाप्यनुमानगम्यो ऽनवस्थाप्रसक्तेस्तदपि हि लिङ्गलिङ्गिसम्बन्धग्रहणपूर्वकं तत्रापि चेयमेव वार्त्ता, इत्यनवस्थानुषङ्गः । नाप्यागमगम्यः परस्परविरुद्धार्थतया तथागमानां प्रमाणत्वाभावात् । तथाहि केचिदेवमाहुः "एतावानेव लोकोऽयं, यावदिन्द्रियगोचरः भद्रे वृकपदं पश्य यद्वदन्त्य बहुश्रुताः " इत्यादि । अपरे प्राहुर्नरूपमीश्वरः पुरुषा इत्यादि पुरुषे रूपं निषेधयन्ति अन्तर्भूत आत्मस्वपे. अन्य पुनरेवम् " अकर्ता निर्गुणो भोक्ता " इत्यादि । अपरे एवम् " स वै अयमात्मा ज्ञानमय इत्यादि, नचैते सर्व एव प्रमाणम् परस्परविरोधात् व्यर्थाभिधायकपरस्परविरुद्धवाक्यपुरुषवत् आत्मानं विद्मः किमस्ति नास्तीत्ययं तवाभिप्रायः । तत्र वेदपदानां चार्थं न जानासि च शब्दात् युक्तिहृदयं च । तथाहि वेदपदानामयमर्थः विज्ञानघन एवेति ज्ञानापयोगदर्शनोपयोगरूपविज्ञानं ततोऽनन्यत्वात् आत्मा विज्ञानघनः प्रतिप्रदेशमनन्तविज्ञानपर्यायः संघातात्मकत्वात् वा विज्ञानघन एव शब्दोऽवधारणे विज्ञानघनादनन्यघनत्वात् विज्ञानघन एव एतेभ्यो भूतेभ्यः क्षित्युदकादिभ्यः समुत्थाय कथञ्चिदुत्पद्यते घटविज्ञानपरिणतो हि आत्मा घटाद्भवति तद्विज्ञानक्षयोपशमस्य तत्राहेतुत्वात् अन्यथा निरालम्बनतया तस्य मिथ्यात्वप्रसक्तेरेवं सर्वत्र भावनीयम् । तत एवं तेभ्यः समुत्थाय कथंचिदुत्पद्येति पुनस्तानेव भूतानि अनु विनश्यति ते विवक्षितेषु भूतेषु व्यवहितेषु वा आत्मापि तद्विज्ञानघनात्मना उपरमते अन्यविज्ञानात्मना उत्पद्यते यदि वा सामान्यचैतन्यरूपतयाऽवतिष्ठत इति न प्रेत्यसंज्ञास्ति न प्राक्तनिकघटादिविज्ञानसंज्ञाऽवतिष्ठते । सांप्रतविज्ञानोपयोगाभिभूतत्वात् अथवा एवं व्याख्या विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय पुनस्तान्येवानुविनश्यतीत्येतत्र यतः प्रेत्यसंज्ञास्ति परलोकसंज्ञास्ति । यदप्युक्तं नासौ प्रत्यक्षेण परिगृह्यते इति तदप्यसमीचीनमात्मनः प्रत्यक्षसिद्धत्वाद् गुणस्य ज्ञानस्य स्वसंवेदनप्रमाणसिद्धत्वात्तथाहि स्वसंविदिता एवावग्रहेहापायादय उत्पद्यन्ते क्षीयन्ते वा ततस्तद्गुणस्य स्वसंविदितत्वात् सिद्धमात्मनः प्रत्यक्षत्वम् । अथ मन्येथा भूतगुणश्चैतन्यं तथा वेदेऽप्युक्तम् "एतेभ्यो भूतेभ्यस्समुत्थायेत्यादि" ततः कथं ज्ञानस्य स्वसंविदितत्वे ते आत्मनः प्रत्यक्षत्वं ज्ञानस्यात्मगुणत्वा

भावात्-तदयुक्तम् भूतगुणत्वे सति पृथिव्याः काठिन्यस्येव सर्वत्र सर्वदा चोपलम्भप्रसंगात् । न च सर्वत्र सर्वदा चोपलभ्यते चैतन्यं लोष्ठादौ मृतावस्थायां चानुपलम्भात् । अथ तत्रापि चैतन्यमस्ति केवलं शक्तिरूपेण ततो नोपलभ्यते तदसम्यग्विकल्पद्वयानतिक्रमात् सा-हि शक्तिश्चैतन्याद्विलक्षणा वा चैतन्यमेव यदि विलक्षणा ततः कथमुच्यते शक्तिरूपेण चैतन्यमस्ति न हि पटे विद्यमाने पटरूपेण घटस्तिष्ठतीति वक्तुं शक्यं तथाचाहान्योऽपि "रूपान्तरेण यदि तत्तदेवास्तीति मा रटीः । चैतन्यादन्यरूपस्य भावे तद्विद्यते कथम् " । अथ द्वितीयः पक्षस्तर्हि चैतन्यमेव तत्कथमनुपलभ्यः आवृतत्वादनुपलम्भ इतिचेत्तस्यावृत्तिरावरणं तच्चावरणं किं भूतानां विवक्षितपरिणामाना-मुत परिणामान्तर-माहोस्विदन्यदेव भूतातिरिक्तं किञ्चित् । तत्र न तावद्विवक्षितपरिणामाभावः पक्षान्तु तद्रूपतया तस्यावारकत्वायोगात् अन्यथा तस्याप्यनुद्भूतरूपतया भावरूपतापत्तिर्भावत्वे पृथिव्यादीनामन्यतमो भावो भवेत् "पृथिव्यादीन्येव भूतानि तत्त्वामिति वचनात्" पृथिव्यादीनि च भूतानि चैतन्यस्य व्यञ्जकानि नावारकाणीति कथमावारकत्व तस्योपपत्तिमत्-अथ परिणामान्तरं तदयुक्तं परिणामान्तरस्यापि भूतस्वभावतया भूतवदभ्यञ्जकत्वस्योपपत्तेर्नावारकत्वस्य, अथान्यदेव भूतातिरिक्तं किञ्चित्-तदसमीचीनम् । भूतातिरिक्ताऽभ्युपगमे चान्यापत्त्यैव पृथिव्यादीनि भूतानि तत्त्वामिति तत्त्वसंख्याव्याघातप्रसंगात् अपि चेदं चैतन्यं प्रत्येकं वा भूतानां धर्मः समुदायस्य वा न तावत्प्रत्येकमनुपलम्भात् नहि प्रतिपरमाणु संवेदनमुपलभ्यते । अपि च यदि प्रतिपरमाणु संवेदनं भवेत्तर्हि पुरुषसहस्रचैतन्यवृन्दमिव परस्परं भिन्नस्वभावमिति नैकरूपं भवेत् । अथ चैकरूपमुपलभ्यते अहं पश्यामि अहं करोमीत्येवं सकलशरीराधिष्ठितात्मस्वरूपतयानुभवात् अथ समुदायस्य धर्मस्तदप्ययुक्तम् प्रत्येकमभावे समुदायेऽपि न भवति यथा रेणुषु तैलं स्यादेतत् मदाङ्गेषु प्रत्येकं मदशक्तिरदृष्टापि समुदाये भवन्ती दृश्यते तद्वच्चैतन्यमपि भविष्यति को दोषः तदसम्यक् प्रत्येकमपि मदाङ्गेषु मदशक्त्यनुयायिमाधुर्यादिगुणदर्शनात् तथाहि दृश्यते माधुर्यमिक्षुरसे धातकीपुष्पे च भ्रमजविकलतोत्पादि, न चैवं चैतन्य सामान्यतोऽपि भूतेषु प्रत्येकमुपलभ्यते ततः कथं समुदाये तत्प्रादुर्भवितुमर्हति मा प्रापत्सर्वत्र सर्वभावानामसत्त्वप्रसङ्गात् । किंच यदि चैतन्यं भूतधर्मत्वेन प्रतिपन्नं ततोऽवश्यमस्यानुरूपो धर्मी प्रतिपत्तव्यः अनुरूपाभावे उपयोगकाठिन्ययोरिव परस्परधर्मधर्मिभावोऽनुपपन्नः नच भूतानामनुरूपो धर्मी चैतन्यं स्यात् तथाहि चैतन्यं बोधस्वरूपममूर्त्तं च भूतानि तद्विलक्षणानि ततः कथमेषां परस्परं धर्मधर्मिभावः । नापि चैतन्यमिदं भूतानां कार्यमत्यन्तविलक्षणतया कार्यकारणभावस्यायोगात् यथा चोक्तम् " काठिन्याबोधरूपाणि, भूतान्यध्यक्षसिद्धितः । चेतना तु न तद्रूपा सा कथं तत्फलं भवेत्" अपि च यदि भूतकार्यं चैतन्यं तर्हि विना सत्त्वमपि जगत्प्राणिमयं भवति परिणतिविशेषाभावादिति चेन्नु सोऽपि परिणतिविशेषस्तावत् सर्वसाधारणः प्रवृत्ति सोऽपि हि भूतमात्र निमित्त एव ततः कथं तत्रापि कश्चित् नहिविज्ञानः । [illegible] न विरुद्ध परिणतिविशेष इति पक्षे कठिनकाठिन्य इति चेतनादि वपुष्षु दृश्यते पूर्वादि [illegible] च

[illegible] नियं न शोभनमिति तदयमत्र [illegible] दर्शना [illegible] कचित्कचन्ति [illegible] संस्वेदजा नभसि च मूर्च्छिता [illegible] किञ्च समानयोनिका अपि विचित्रवर्णसंस्थानाः प्राणिनः दृश्यन्ते । तथाहि—[illegible] योनिसंभविनोऽपि केचि- [illegible] विविधवर्णाः संस्थानमप्येतेषां [illegible] कर्मनिमित्तं चैतन्यं तत एकयोनिकाः [illegible] तस्मादात्मन एव तत्तत्क- [illegible] । स्यादेतत् आगच्छन् गच्छन् [illegible] देहे सति संवेदनमुपलभामहे दे- [illegible] न, तस्मादात्मा किन्तु संवेदनमा- [illegible] देहे एव च समाश्रितं कुम्भवित्ययत् नहि [illegible] संभ्रमति आग- [illegible] किंतु [illegible] कुम्भ एव च विशी- [illegible] आत्मा हि [illegible] "मन्त- [illegible] । तिष्ठतम् प्रतिमान्धा [illegible] । तथाहि [illegible] प्रतिबन्धः [illegible] स [illegible] तथा च केचि- [illegible] यदा । [illegible] अनुमेय- [illegible]

[illegible]

एव न तावदाद्यः पक्ष इन्द्रियरूपाद्युपलम्भयिन्द्रियबुद्धि वर्त्तमानार्थग्रहणप्रसक्तेः इन्द्रियं हि वार्त्तमानिके पदार्थे व्याप्रियते तत्सामर्थ्याद्धुपजायमानं मानसमपि ज्ञानं इन्द्रियज्ञानमिव वर्त्तमानार्थग्रहणपर्यवसितसत्ताकमेव भवेत् रूप यदा चक्षूरूपविषये व्याप्रियते तदा रूपे विज्ञानमुपाददाति न शेषकाले ततस्तदपिविज्ञानं वर्त्तमानार्थविषयं वर्त्तमाने पदार्थे चक्षुषो व्यापारात् । रूप विषयव्यापीयजारे च मनोज्ञानं तथो न तत्प्रतिनियतकाशविषयम् एवं शेषेष्वपि इन्द्रियेषु वाच्यम् ततः कथमिव मनोज्ञानस्य वर्त्तमानार्थग्रह प्रसक्तिस्तदसाधीयो यत इन्द्रियाश्रितं तदुच्यते यदिन्द्रियव्यापारमनुसृत्योपजायते इन्द्रियाणां च व्यापारः प्रतिनियते एव वार्त्तमानिके स्वस्वविषये मनोज्ञानमपि यदीन्द्रियव्यापाराश्रितं तत इन्द्रियज्ञानमिव वार्त्तमानिकार्थग्राहकमेव भवेत् भवेद्वा इन्द्रियाश्रितमेव तत्र स्यात् तथा च केचित्पठन्ति "भव- व्यापारमाश्रित्य भवदक्षजमिष्यते । तद्व्यापारो न तत्रेति कथमक्षजतां भवेत् । " अथानीन्द्रिय रूपादिरिति पक्षस्तदप्ययुक्तस्तस्याचेतनत्वात् तन्वचेतनत्वादिति कोऽर्थः यदीन्द्रियविज्ञानरहितत्वादिति तदिष्यते एव यदि नामेन्द्रियविज्ञानं ततो न भवति मनोविज्ञानं तु कस्मान्न भवति । अथ मनोविज्ञानमोत्पादयतीत्यचेतनत्वं तदा तदेव विचार्यमाणमिति प्रतिज्ञार्थैकदेशासिद्धो हेतुः तदप्यसत् अचेतनत्वादिति [illegible] भवति रूपनिमित्तविज्ञाने स्फुराविद्रूपतयानुपलम्भः स्पर्शादयो हि स्पर्शनिमित्तविज्ञाने स्फुराविद्रूपानुपलम्भः [illegible] ज्ञानमुत्पद्यते इति युक्तं केशादयस्तु न मनोज्ञानेन तथा स्फुरद्विद्रूपा उपलभ्यन्ते कथं तेभ्यो मनोज्ञानं भवतीति प्रति- [illegible] सुधियः आह च "चेतयन्तो न दृश्यन्ते केशश्मश्रुनखादयः । ततस्तेभ्यो मनोज्ञानं भवतीत्यतिसाहसम् " अपि च यदि केशादिप्रतिबद्धं मनोज्ञानं ततस्तद्वृद्धौ वृद्धम् एव न स्यात् तदुपघाते चोपहतं भवेत् न च भवति तस्मादयं पक्षः [illegible] । किंच मनोज्ञानस्य सूक्ष्मार्थेनभ्यस्मृतिपाटवादयो विशेषाः अन्वयव्यतिरेकाभ्यां अभ्यासपूर्वका दृष्टाः तथाहि तदेव शास्त्रमीहापोहादिप्रकारेण यदि पुनः पुनः परिभाव्यते ततः सूक्ष्मसूक्ष्मतरार्थावबोधे [illegible] स्मृतिपाटवं चाभ्यस्यन्ते एवं चैकशास्त्रे अभ्यासतः सूक्ष्मार्थेनभ्यासात् [illegible] शास्त्रान्तरेषु प्रभावतैव सूक्ष्मार्थावबोधः स्मृतिपाटवं [illegible] तदभ्यासाहितसूक्ष्मार्थेनभ्यस्यतां मनोज्ञानस्य विशेषदृष्टाः । [illegible] विदित अभ्यासव्यतिरेकेणापि दृश्यन्ते [illegible] इति प्रतिपत्तव्यं [illegible] व्यासव्यासानुगतान्वयनिबन्धेन [illegible] विनिश्चित । ततः सिद्धः परलोकगामी जीव । सिद्धे च तस्मिन् परलोकगामिनि यदि [illegible] ज्ञानस्य देहो भवेत् न च [illegible]

[illegible]

प्रत्येन भवतीति यत्र प्राणापानयोर्हानिहेतुव्यापारयोगात् हासादिवत् तत्रापि प्रवृत्तिकल्पनायां यदि मन्दौ प्राणापानौ विज्ञानमपि स्यात् तदा मन्दं भवेत्; दीर्घौ चेत्तर्हि दीर्घमपि यदि पुनरेवं प्राणापाननिमित्तौ प्राणापानौ प्राणापाननिमित्तं च विज्ञानं नार्हे न्यायसिद्धापदनात् प्राणापानप्रवर्त्तमाना ह्यप्राणापाननिमित्तं च यदि विज्ञानं ततः प्राणापानातिन्हासातिशयत्वभावविज्ञानस्यापि निन्हासातिशयौ स्याताम् अवश्यं हि कारणे परिहीयमाने वर्धमाने च कार्यस्यापि हानिरुपचयश्च भवति यथाम्राने मृत्पिण्डे महान् घटोऽल्पे चाल्पीयान् अन्यथा कारणमेव न स्यात् भवतः प्राणापानातिन्हासातिशयसद्भावे विज्ञानस्यापि निनिन्हासातिशयौ, विपर्ययस्यापि भावात् मरणावस्थायां प्राणापानातिशयसंभवेऽपि विज्ञानस्य न्हासदर्शनात् । स्यादेतत् मरणकाले वातपित्तादिदोषैर्देहस्य विगुणीकृतत्वात् प्राणापानातिशयसंभवेऽपि चैतन्यस्यातिशयस्तयोः स एव मृतावस्थायामपि चैतन्यं देहस्य विगुणीकृतत्वात् तदसमीचीनतरमेवमपि मृतस्यापि पुनरुज्जीवनप्रसक्तेः । तथाहि मृतस्य दोषाः समीभवन्ति समीभवनं च दोषाणामवसीयते ज्वरादिविकारादर्शनात् समत्वं वा रोग्यं तथा चाहुर्वृद्धाः "तेषां समत्वमारोग्यं क्षयवृद्धी विपर्यय" इति । आरोग्यप्राप्तत्वाद्देहस्य पुनरुज्जीवनं भवेत् अन्यथा चेद् कारणमेव चेतसो न स्यात् तद्विकाराभावात्तावत्तत्रानु विधानात् एव हि देहकारणता विकारस्याश्रया स्यात् यदि पुनरुज्जीवनं भवेत् स्यादेतद्युक्तमिदं पुनरुज्जीवनप्रसंगापादानं यतो यद्यपि दोषा देहस्य वैगुण्यमाधाय निवृत्तास्तथापि न तत्कृतस्य वैगुण्यस्य निवृत्तिः न हि दहनकृतो विकारः काष्ठे दहननिवृत्तौ निवर्त्तमानो दृष्टः तदयुक्तमिदं हि कोचित्किञ्चिदनिवर्त्यं विकारारम्भकम् । यथा वह्निः काष्ठे श्यामतामात्रमपि वह्निना कृतं काष्ठे वह्निनिवृत्तौ निवर्त्तते किंचित्पुनः कश्चिन्निवर्त्यविकारारम्भकः यथा स एवाग्निः सुवर्णे तथाहि अग्निना जनितसुवर्णं भवति अग्निनिवृत्तौ निवर्त्तते तत्र वातादयो दोषा निवर्त्यं विकारारम्भकाश्चिकित्साप्रयोगदर्शनात् । यदि पुनरनिवर्त्यं विकारारम्भकाः स्युस्तदा तद्विकारनिवर्त्तनाय चिकित्सा विधीयेत वैफल्यप्रसंगात् न च वाच्यं मरणात् प्राग्दोषा अनिवर्त्यविकारारम्भका मरणकाले च निवर्त्यविकारा इति एकस्य एकत्रैव निवर्त्यानिवर्त्यविकारारम्भकत्वायोगात् । न ह्येकमेव तत्रैव निवर्त्यविकारारम्भकं चानुमवितुमर्हति तथा दर्शनात् । ननु द्विविधो हि व्याधिः साध्योऽसाध्यश्च । तत्र साध्यो निवर्त्यस्तत्रावश्यमेव व्याधिकृत्यं चिकित्सा फलवती असाध्यो ऽनिवर्त्तनीयः स च साध्यासाध्यभेदो न च व्याधिद्वैविध्यप्रतीतेः सकललोकप्रसिद्धत्वात् व्याधिश्च दोषेण कृतस्तत् कथं दोषाणां निवर्त्यानिवर्त्यविकारारम्भकत्वमनुपपन्नमिति तदप्यसत् प्रयत्ने साध्यासाध्यत्वस्य [illegible]

[illegible]

पि व्याधेरसाध्यत्वमर्हतामेव मते संगच्छते न भवतां मृतमात्रस्य वादिनः कश्चित्पुनरसाध्यो व्याधिर्दोषकृतविकारनिवर्त्तनसमर्थौषधस्याभावात् वैद्यस्य वा वैद्यौषधसंपर्काभावे हि व्याधिः प्रसर्पेत् सकलमप्यायुरुपक्रमेत न तु वैद्यौषधसंपर्के नायादेवास्माकमपि पुनरुज्जीवनं भविष्यति न हि मदस्ति किञ्चिदौषधं वैद्यो वा यत्पुनरुज्जीवयति तदप्ययुक्तं वैद्यौषधौ हि दोषविकारनिवर्त्तनार्थमिष्येते न पुनरत्यन्तासतश्चैतन्यस्योत्पादनार्थं तथाभ्युपगमात् दोषकृतास्य विकारा मृतावस्थायां स्वयमेव निवृत्ता ज्वरादिदर्शनात्ततः किं वैद्यौषधान्वेषणेनेति तदवस्थ एव पुनरुज्जीवनप्रसंगः । अपि कश्चिद्दोषाणामुपशमेऽप्यकस्मान्म्रियते कश्चिद्धातिदोषकुष्ठोऽपि जीवति तदेतद्भवन्मते कथमुपपत्तिमर्हतीति तथा च केचिदूचुः "दोषस्योपशमेऽप्यस्ति मरणं कस्यचित्पुनर्जीवनं दोषदुष्टस्याप्येतत्र स्याद्भवन्मते" अर्हतां तु शासने यावदायुःकर्म विजृम्भते तावद्दोषैरतिपीडितोऽपि जीवति आयुःकर्मक्षये च दोषाणामभिक्षितावपि म्रियते तत्र देहमात्रकारणं संवेदनम् । अन्यच्च देहः कारणं संवेदनस्य सहकारिभूतं वा भवेदुपादानभूतं वा यदि सहकारिभूतं तदिष्यत एव देहस्यापि क्षयोपशमहेतुतया कथंचिद्विज्ञानहेतुत्वाभ्युपगमात् । अथोपादानभूतं तदयुक्तमुपादानं हि तत्तस्य यद्विकारेणैव यस्य विकारो यथा मृद्घटस्य न च देहविकारेणैव विकारः संवेदस्य देहविकाराभावेऽपि भयशोकादिना तद्विकारदर्शनात् तत्र देहउपादानं संवेदनस्य तथा च पठन्त्युपादानलक्षणमपरे आश्रित्य हि यद्वस्तुना यः पदार्थो विकार्येत उपादानं तत्तस्य युक्तं गोगवयादिवत् एतेन यदुच्यते मातापितृचैतन्यमेव चेतनस्योपादानमिति तदपि प्रतिक्षिप्तं तयोरपि तद्विकारे विकारित्व तदविकारे वा विकारित्वमिति नियमादर्शनात् । अन्यच्च यत् यस्योपादानं सत्तस्मादभेदेन व्यवह्रियते यथा मृदो घटः मातापितृचैतन्यं सुतचैतन्यस्योपादानं ततः सुतचैतन्यं मातापितृचैतन्यादभेदेन व्यव[illegible]

[illegible]

करणे सति ग्राह्यग्राहकरूपस्य सन्निधिमात्रप्रयोजकत्वं यथा शब्दा यः पिण्डकर्मकरणरूपाणि च सन्ति ग्राह्यग्राहकरूपाणि रूपादीन्द्रियाणि तानि विद्यमानप्रयोजकानीति सचेन्द्रियाणां स्वतन्त्रकर्तृत्वं येन रूपादिग्रहणं प्रति तेषां कर्तृत्वमेवोपपद्येत न करणत्वमचेतनत्वेन स्वतन्त्रकर्तृत्वायोजनात् तथा चात्र प्रयोगः यदचेतनं तन्नोपलब्धं यथा घटोऽचेतनानि च द्रव्येन्द्रियाणि न चायमसिद्धो हेतुः यतः खलु द्रव्येन्द्रियाणि निर्वृत्युपकरणरूपाणि निर्वृत्युपकरणे च पुद्गलमयं पुद्गलमयं च सर्वमचेतनं पुद्गलानां काठिन्याद्यवबोधरूपतया चैतन्यं प्रति धर्मित्वायोगात् धर्मानुरूपो हि सर्वत्रापि धर्मी यथा काठिन्यं प्रति पृथिवी यदि पुनरनुरूपत्वाभावेऽपि धर्मधर्मिभावो भवेत् ततः काठिन्यजलयोरपि स्यादेतत्तत्र भवति तस्मादचेतनाः पुद्गलाः तथा चोक्तं "ग्राहकमनादिममूर्त्तं, विषयपरिच्छेदकं च चैतन्यम् । विपरीतस्वभावाणि च, भूतानि जगत्प्रसिद्धानि ॥ १ ॥ ता धर्मधर्मिभावो, कठिनत्वं चामूर्त्तमपि चैव । अनुरूपत्वाभावे, काठिन्यजलाणि किं न तत्र ॥ २ ॥" ततः स्वतन्त्रकर्तृत्वाभावात् रूपादिग्रहणं प्रतीन्द्रियाणां करणभाव एव न कर्तृभाव इति स्थितम् । अथ चेदमनुमाने स भोक्तृकमिदं शरीरं भोग्यत्वात् ओदनादिवत् भोग्यता च शरीरस्य जीवेन तथा नियतत्वा भुज्यमानत्वात् उभयोरपि च प्रयोगयोः साध्यसाधननियतधर्मसिद्धदृष्टान्ते प्रत्यक्षप्रमाणसिद्धेति भोक्ता हि द्रष्टा सन्ध्यायमाहरूपदोषायकारः । आगमगम्योऽयमेव जीवः तथा चागमः "भरिदि एयगुणजीव, दुल्लीणं भमणकप्पुणा । सिद्ध पव्वति

सव्वन्नु, नाणसिद्धा य साहुणो" अत्र ज्ञानसिद्धाः साधवो भवस्थकेवलिनः शेषं सुगमम् नचागमानां परस्परविरुद्धार्थं तया सर्वेषामप्रामाण्यमभ्युपेयं सर्वज्ञमूलस्यावश्यं प्रमाणत्वेनाभ्युपगमार्हत्वादयाप्यसम्यक् प्रमाणाप्रमाणविभागापरिणतेः प्रेक्षावतां क्षितिप्रसंगात् । अथ कथमेतत् अन्येयं यथायमागमः सर्वज्ञमूल इति उच्यते-यदुक्तोऽर्थः प्रत्यक्षेणानुमानेन वा न बाध्यते नापि पूर्वापरव्याहतः सोऽवसीय सर्वज्ञप्रणीतोऽन्यस्य तथारूपत्वासंभवात् ततस्तस्माद्यत्सिद्धं तत्सर्वं सुसिद्धम् । उक्तञ्च " दिट्ठेणं इट्ठेण य, जंमि विरोहो न हुज्जइ कहिं वि । सो आगमतत्ता जं, नाणं तं सम्मनाणं ति ॥ ततः प्रत्यक्षानुमानागमप्रमाणसिद्धत्वाद्वेदपदप्रतिष्ठितत्वाच्च सौम्य ! अस्ति जीव इति प्रतिपत्तव्यम् ॥ आ० म० द्वि० ॥ (इह वेद पदोपन्यासस्तेन वेदानां प्रमाणत्वेनाङ्गीकृतत्वात्) । आह च-

छिन्नंमि संसयंमि, जाइजरामरणविप्पमुक्केणं ।
सो समणो पव्वइओ, पंचहिँ सह खंडियसएहिँ ॥

उक्त प्रमाणेन जिनेन भगवता वर्द्धमानस्वामिना जरामरणाभ्यामुपलक्षणाभ्यां विप्रमुक्त इव विप्रमुक्तः तेन छिन्ने निराकृते संशये स इन्द्रभूतिः पंचभिः खण्डिकशतैः छात्रशतैः सह श्रमणः प्रव्रजितः सन् साधुः संवृत्त इत्यर्थः । आ० म० द्वि. । आव० ॥ अ.० चू० ।

कल्पसुबोधिन्यामिन्द्रभूतेः कथा विस्तरेण एवं प्रतिपादिता यदा भगवान् महावीरो विहरन् अपापापूर्यां महसेनवने जगाम तत्र च यज्ञं कारयतः सोमिलविप्रस्य गृहे बहवो ब्राह्मणाः मिलिताः (कल्प०) अन्येऽपि उपाध्याय शङ्कर ईश्वर शिवजी जानी गङ्गाधर महीधर भूधर लक्ष्मीधर श्रीधर विष्णु मुकुन्द गोविन्द पुरुषोत्तम नारायण दुवे श्रीपति उमापति विद्यापति गणपति जयदेव व्यास महादेव शिवदेव गङ्गापति गौरीपति त्रिवाडी श्रीकण्ठ नीलकण्ठ हरिहर रामजी रावल मधुसूदन नरसिंह कमलाकर जोसी पूनो रामजी शिवराम इत्यादयो मिलिताः सन्ति अत्रान्तरे च भगवन्नमस्यार्थं मागच्छतः सुरासुरान् विलोक्य ते अचिन्तयन् अहो यज्ञस्य महिमा यदेते सुराः साक्षात्समागताः अथ तान् यज्ञमण्डपं विहाय प्रभुपार्श्वं गच्छतो विलोक्य द्विजाः विषण्णास्तेऽमी सर्वज्ञं वन्दितुं यान्ति इति जनश्रुत्या श्रुत्वा इन्द्रभूतिः सामर्षश्चिन्तयामास । अहो मयि सर्वज्ञे सत्यपि अपरोऽपि स्वं सर्वज्ञं ख्यापयति दुःश्रवमेतत् कर्णकटु कथं नाम श्रूयते । किं च कदाचित्कोऽपि मूर्खः केनाचिद्धूर्तेन वञ्च्यते अनेन सुरा अपि वञ्चिताः यदेवं यज्ञमण्डपं विहाय तत्समीपं गच्छन्ति । अथवा यादृशोऽयं सर्वज्ञस्तादृशा एवैते सुरा अनुरूप एव संयोगः यतः—

" यथानुरूपमिन्द्रि-न्द्रिरेण माकन्ददे.नरो मुनरः ।
अपि च पिचुमन्दमुकुल-मौकुलिकुलमाकुलं मिलति "॥१॥
(तथापि नाहमेतस्य सर्वज्ञाटोपं सहे)
यतः । व्योम्नि सूर्यद्वयं किं स्या-द्गुहायां केसरिद्वयम् ।
प्रत्याकारे च खड्गौ द्वौ, किं सर्वज्ञावहं स च ॥ २ ॥

ततो भगवन्तं वन्दित्वा प्रतिनिवर्तमानान् सोपहास जनान् पप्रच्छ भो भो दृष्टः स सर्वज्ञः कीदृशः किंस्वरूप इति ते तु " यदि त्रिलोकी गणनापरः स्या-त्तस्याः समाप्तिर्यदि नायुषः स्यात् ॥ पारेपरार्ध्यं गणितं यदि स्यात्, गुणैर्यदि नैषोऽगुणोऽपि स स्यात् ॥ १ ॥

इत्याद्युक्ते सति स दध्यौ ॥

नूनमेष महाधूर्तो मायायाः कुलमंदिरम् ॥
कथं लोकसमस्तोऽपि. विभ्रमे पातितोऽमुना " ॥२॥
न क्षमे क्षणमात्रं तु तं सर्वज्ञं कदाचन ॥
तमस्तोममपाकर्तुं. सूर्यो नैव प्रतीक्षते ॥ ३ ॥
वैश्वानरः करस्पर्शं केशरोल्लुञ्चनं हरिः ॥
क्षत्रियश्च रिपुक्षेपं न सहन्ते कदाचन ॥ ४ ॥

गता गौडदेशोद्भवा दूरदेशं जयाज्जयं गौर्जरात्रासमीयुः । मृता मालवीयास्तिलङ्गास्तिलंगो-द्भवा आहिरं पाण्डिता मद्भयेन „ ॥५ ॥ अरे लाटजाताः क्व याताः प्रणष्टाः प्रदिष्टा अपि द्राविडा वीडवातां ॥ अहो वादिलिप्सातुरे मय्यमुस्मिन्, जगत्युत्कटे वादिदुर्भिक्षमेतत् ॥ ६ ॥ " तस्य ममाग्रे कोऽसौ, वादी सर्वज्ञमानमुद्वहति ॥ इति तत्र गन्तुमुक्तं, तमग्निभूतिर्जगादेयम् „ ॥ ७ ॥ " किं तत्र वादिकीटे, तव प्रयासेन यामि बन्धोऽहम् ॥ कमलोन्मूलनहेतो-र्नेतव्यः किं सुरेन्द्रगजः „ ॥ ॥ ८ ॥ अकथयदथेन्द्रभूतिर्यद्यपि मत्तात्मजस्य पवासौ । तदपि प्रवादिनाम श्रुत्वा स्थातुं न शक्नोमि ॥ ९ ॥ त्रिश्च चैव त्रिजगति सहस्रशो निर्जिते मया वादैः ॥ किमचटस्थाल्यामिव कंकुटुकोऽसौ स्थितो वादी ॥ १० ॥

अस्मिन्नजिते सर्वं जगज्जयोद्भूतमपि यशो नश्येत् ।
अल्पमपि शरीरस्थं शल्यं प्राणान् वियोजयति ॥ ११ ॥
छिद्रे स्वल्पेऽपि पोतः किं, पाथोधौ न निमज्जति ।
एकस्मिन्निष्टके कृष्टे, दुर्गः सर्वोऽपि पात्यते ॥ १२ ॥

इत्यादि विचिन्त्य विरचितद्वादशतिलकः स्वर्णयज्ञोपवीतभूषितः स्फारपीताम्बराडम्बरः कैश्चित्पुस्तकपाणिभिः कैश्चित् कमण्डलुपाणिभिः कैश्चिद्दर्भपाणिभिः सरस्वतीकण्ठाभरण वादिविजयलक्ष्मीशरण-वादिमदगञ्जनवादिमुखभञ्जन-वादिगजसिंह-वादीश्वरसिंह-वादिसिंहाष्टापद-वादिविजयविशद-वादिवृन्दभूमिपाल-वादिशिरःकाल-वादिकदलीकृपाण-वादितमभाण-वादिगोधूमघरट्टमर्दित-वादिमरट्ट वादिघटमुद्गर-वादिघूकभास्कर-वादिसमुद्रागस्ति-वादितरुन्मूलनहस्ति-वादिसुरेन्द्र-वादिगरुडगोविन्द-वादिजनराज-वादिकंसकृष्ण-वादिहरिणहरि-वादिज्वरमल्ल-वादिहृदयशल्य-वादिगणजीवक-वादिशलभप्रदीपक-वादिचक्रचूडामणि-पण्डितशिरोमणि-विजितानेकवादिसरस्वतीलब्धप्रसाद इत्यादिविरुदवृन्दमुखरितदिक्चक्रैः पंचभिश्छात्रशतैः परिवृत इन्द्रभूतिर्वीरसमीपं गच्छंश्चिन्तयामास । अहो धृष्टेनानेन किमेतत् कृतम् । यदहं सर्वज्ञाटोपेन प्रकोपितः

यतः " सर्पराजिमुखस्थेन, दवाग्निर्ज्वालितोऽमुना ।
कपिकच्छूलता देह-सौख्यायालिङ्गिता ननु ॥ १ ॥ "
(किं मेतेन अधुना निरुत्तरीकरोमि यतः)
तावद्गर्जति खद्योतस्तावद्गर्जति चन्द्रमाः ।
उदिते तु सहस्रांशौ न, खद्योतो न चन्द्रमाः ॥ २ ॥
स्फारद्रुमातङ्गतुरङ्गपूगाः पलाय्यतामाशु वनादमुष्मात् ॥
साटोपकोपस्फुटकेसरश्रीर्मृगाधिराजोऽयमुपैतवान् यत् ३
मम भाग्यवशादेष, वाद्ययं समुपस्थितः ॥
अद्य तां रसनाकण्डू-मपनेष्ये विनिश्चितम् ॥४॥
लक्षणे मम दक्षत्वं साहित्ये संहिता मतिः ॥
तर्के कर्कशतात्यर्थं क शास्त्रे नास्ति मे श्रमः ॥ ५ ॥
अनेयं किमु यज्ञस्य, किमसाध्यं महात्मनां ॥
क्षुधितस्य न किं खाद्यं किं न वाच्यं खलस्य च ॥ ६ ॥

तथा ममापि त्रैलोक्य-जिष्णोरस्य महौजसः ॥
एतेन किमिदारब्धं तद्गच्छामि जयाम्यहम् ॥ ७ ॥
इत्यादि चिन्तयन् प्रभु-मपेक्ष्य सोपानसंस्थितो दध्यौ ।
किं ब्रह्मा किं विष्णुः सदाशिवः शङ्करः किं वा ॥ ८ ॥
चन्द्रः किं स न यत्कलङ्ककलितः सूर्योऽपि नो तीव्ररुक्
मेरुः किं न स यन्नितान्तकठिनो विष्णुर्न यत् सोऽसितः ॥
ब्रह्मा किं न जरातुरः स च जरानीहो न यत्सोऽनङ्गु-
ह्येनं दोषविवर्जिताखिलगुणाकीर्णोऽस्तिमत्तीर्थकृत् ॥ ९ ॥
हेमसिंहासनासीनं सुरराजनिषेवितम् ॥
दृष्ट्वा वीरं जगत्पूज्यं चिन्तयामास चेतसि ॥ १० ॥
कथं मया महत्त्वं हा, रक्षणीयं पुरार्जितम् ॥
प्रासादं कीलिकाहेतो-र्भङ्क्तुं को नाम वाञ्छति ॥ ४ ॥
एतेन वाजिनेनापि मानहानिरस्तु का मम ॥
जगदीशस्य किं नाम करिष्यामि च सांप्रतम् ॥ ५ ॥
अविचारितकारित्व महो मे मन्दबुद्धितः ॥
जगदीशायनारे य-त्रेतुमेन समागतः ॥ ६ ॥
अस्याग्रेऽहं कथं वक्ष्ये पार्श्वे यास्यामि वा कथम् ॥
संकटे पतितोऽस्मीति शिवा रक्षतु मे यशः ॥ ७ ॥
कथञ्चिदपि भाग्येन चेद्भवेदत्र मे जयः ॥
तदा पण्डितमूर्धन्यो भवामि भुवनत्रये ॥ ८ ॥
इत्यादि चिन्तयन्नेव सुधा मधुरया गिरा ॥
आलापितो जिनेन्द्रेण नामगोत्रोक्तिपूर्वकम् ॥ ९ ॥
हे गौतमेन्द्रभूते त्वं सुखेनागतवानसि ॥
इत्युक्ते अचिन्तयदेषि नामापि किमसौ मम ॥ १० ॥
जगत्त्रितयविख्यातं को वा नाम न वेत्ति माम् ॥
जनस्याबालगोपालं प्रच्छन्नः किं दिवाकरः ॥ ११ ॥
प्रकाशयति गुप्तं चेत्संदेहं मे मनःस्थितम् ॥
तदा जानामि सर्वज्ञ-मन्यथा तु न किञ्चन ॥ १२ ॥
चिन्तयन्तमिति प्रोचे प्रभुः को जीवसंशयः ॥
विभावयसि नो वेद पदार्थं शृणु तान्यथ ॥ १३ ॥
समुद्रो मथ्यमानः किं गङ्गापूरोऽथवा किमु ॥
आदिब्रह्मध्वनिः किं वा वीरवेदध्वनिर्बभौ ॥ १४ ॥

वेदपदानि च " विज्ञानघन एवैतेभ्यो भूतेभ्यः समुत्थाय तान्येवानुविनश्यति न प्रेत्यसंज्ञास्तीति " त्वं तावदेतेषां पदानामर्थमेवं करोषि यत् विज्ञानघनो गमनागमनादिचेष्टावान् आत्मा एतेभ्यो भूतेभ्यः पृथिव्यप्तेजोवाय्वाकाशेभ्यः समुत्थाय प्रकटीभूय मद्याङ्गेभ्यो मदशक्तिरिव ततस्तानि भूतान्येव अनुविनश्यति तत्रैव विलयं याति जले बुद्बुद इव ततो भूतातिरिक्तस्य आत्मनो-ऽभावात् न प्रेत्यसंज्ञाऽस्तीति मृत्वा पुनर्जन्म नास्तीति । परमयुक्तोऽयमर्थः शृणु तावदेतेषामर्थम् । विज्ञानघन इति कोऽर्थः विज्ञानघनो ज्ञानदर्शनोपयोगात्मकं विज्ञानं तन्मयत्वादात्मापि विज्ञानघनः प्रति देशं प्रदेशमनन्तज्ञानपर्यायात्मकत्वात् स च विज्ञानघन उपयोगात्मक आत्मा कथंचिद्भूतेभ्यस्तद्विकारेभ्यो वा घटादिभ्यः समुत्तिष्ठते उत्पद्यत इत्यर्थः । घटादिज्ञानपरिणतो हि जीवो घटादिभ्य एव हेतुभूतेभ्यः भवति घटादिज्ञानपरिणामस्य घटादिवस्तुसापेक्षत्वात् । एवं च एतेभ्यो भूतेभ्यो घटादिवस्तुभ्यस्तत्तदुपयोगरूपतया जीवः समुत्थाय समुत्पद्य तान्येव अनुविनश्यति कोऽर्थः तस्मिन् घटादौ वस्तुनि नष्टे व्यवहिते वा जीवो ऽपि तदुपयोगरूपतया नश्यति अन्योपयोगरूपतया उत्पद्यते सामान्यरूपतया अवतिष्ठते ततश्च न प्रेत्यसंज्ञाऽस्ति कोऽर्थः न प्राक्तनी घटाद्युपयोगरूपा संज्ञा भवति इते वर्तमानोपयोगेन तस्या नाशितत्वादिति । अपरं च स वै अयमात्मा ज्ञानमय इत्यादि, तथा दददकारेर्थः दमो दानं दया इति दकारत्रयं यो वेत्ति स जीवः किंच विद्यमानभोक्तृकमिदं शरीरं भोग्यत्वात् ओदनादिवत् इत्याद्यनुमानेनापि । तथा " क्षीरे घृतं तिले तैलं काष्ठे ऽग्निः सौरभं सुमे । चन्द्रकान्ते सुधा यद्व-त्तथात्माप्यङ्गतः पृथक् " ॥ एवं च प्रभुवचनैश्छिन्नसंदेहः श्रीइन्द्रभूतिः पञ्चशतपरिवारैः प्रव्रजितः । ततः प्रभुणा " उप्पन्नेइ वा १ विगमेइ वा २ धुवेइ वा ३ इति " प्रभुप्रदत्तत्रिपदीं प्राप्य द्वादशाङ्गीं रचितवान् । कल्प० ॥

इन्द्रभूतिवर्णको यथा-

तेणं कालेणं तेणं समएणं समणस्स भगवओ महावीरस्स जेट्ठे अंतेवासी इंदभूती णामं अणगारे गोयमगोत्तेणं सत्तुस्सेहे समचउरंससंठाणसंठिए वज्जरिसहनारायसंघयणे कणगपुलगणिघसपम्हगोरे उग्गतवे दित्ततवे तत्ततवे महातवे उराले घोरे घोरगुणे घोरतवस्सि घोरबंभचेरवासी उच्छूढसरीरे । संखित्तविउलतेउलेस्से चउद्दसपुव्वी चउणाणोवगए सव्वक्खरसण्णिवाती समणस्स भगवओ महावीरस्स अदूरसामंते उड्ढंजाणू अहोसिरे झाणकोट्ठोवगए संजमेणं तवसा अप्पाणं भावेमाणे विहरइ ॥

(तेणमित्यादि) तेन कालेन तेन समयेन श्रमणस्य भगवतो महावीरस्य (जेट्ठेत्ति) प्रथमः (अन्तेवासित्ति) शिष्यः अनेन पदद्वयेन तस्य सकलसंघनायकत्वमाह (इंदभूइत्ति) इन्द्रभूतिरिति मातृपितृकृतं नामधेयं (णामत्ति) विभक्तिपरिणामात् नाम्नेत्यर्थः अन्तेवासी किल विवक्षया श्रावकोऽपि स्यादित्यत आह । (अणगारेत्ति) नास्त्यगारं विद्यते यस्य सोऽनगारः स चाऽगोत्रोऽपि स्यादित्यत आह (गोयमगोत्तेणंति) गौतमस्सगोत्रः इत्यर्थः । स च तत्कालोचितदेहमानापेक्षया न्यूनाधिकदेहोऽपि स्यादित्यत आह (सत्तुस्सेहेति) सप्तहस्तोच्छ्रयः स चैव लक्षणहीनोऽपि स्यादित्यत आह (समचउरंससंठाणसंठिएत्ति) समं न्यूनाधिकं अवयवसकलपुरुषलक्षणोपेतावयवतया तुल्यं तच्च तत्तचतुरस्रं च प्रधानं समचतुरस्रमथवा समाः शरीरलक्षणोक्तप्रमाणा विसंवादिन्यश्चतस्रोऽश्रयो यस्य तत्समचतुरस्रम् । अश्रयस्त्विह चतुर्दिग्भागोपलक्षिताः शरीरावयवा इति । अन्ये त्वाहुः-समा अन्यूनाधिकाश्चतस्रोऽप्यश्रयो यत्र तत् समचतुरस्रम् अश्रयश्च पर्यङ्कासनोपविष्टस्य जानुनोरन्तरम् आसनस्य ललाटोपरिभागस्य चान्तरं दक्षिणस्कन्धस्य वामजानुनश्चान्तरं वामस्कन्धस्य दक्षिणजानुनश्चान्तरमिति अन्ये त्वाहुर्विस्तारोत्सेधयोः समत्वात् समं चतुरस्रं तच्च तत्संस्थानं चाकारः समचतुरस्रसंस्थानं तेन संस्थितो व्यवस्थितो यः स तथा । अयं च दीर्घोऽप्यस्थिरोऽपि स्यादित्यत आह (वज्जरिसहणारायसंघयणेत्ति) इह संहननमस्थिसंचयविशेषः वज्रादीनां लक्षणमिदम्- " रिसहो य होइ पट्टो, वज्जं पुण कीलियं वियाणाहि । उभओमक्कडबंधो णारायं तं, वियाणाहि त्ति " तत्र वज्रं च नाराचं

मात्मप्रदेशैरन्यान् वज्रर्षभनाराचं तत्संहननमस्मिन्संवयति शेषांशुभसमानमपि योगात्तदसौ वज्रर्षभनाराचसंहननः । अन्ये तु कीलिकादिमत्त्वमस्मात्तेन वर्णयन्ति अयञ्च निन्द्यवर्णो ऽपि स्यादित्यत आह (कणगपुलगनिघसपम्हगोरे) कनकस्य सुवर्णस्य (पुलगत्ति) यः पुलकः सवस्तस्य यो निकषः कषपट्टे रेखालक्षणः तथा (पम्हत्ति) पद्मपक्ष्माणि केसराणि तद्वद्गौरो यस्स तथा । वृद्धव्याख्या तु—कनकस्य न लोहादिवत्पुलकः सारो वर्णातिशयस्तत्प्रधानो यो निकषो रेखा तस्य यत्पक्ष्म बहुलत्वं तद्वद्गौरो यः स तथा अथवा कनकस्य यः पुलकोऽकृतत्वे सति बिन्दुस्तस्य निकषो वर्णतः सदृशो यः स तथा (पम्हत्ति) पद्मं यस्य चेह प्रस्तावात्केसराणि गृह्यन्ते ततः पद्मवद्गौरो यः स तथा । ततः पदद्वयस्य कर्मधारयः अयञ्च विशिष्टचेष्टारहितोऽपि स्यादित्यत आह (उग्गतवेत्ति) उग्रमप्रधृष्यं तपोऽनशनादि यस्य स उग्रतपाः यदन्येन प्राकृतपुंसा न शक्यते चिन्तयितुमपि तद्विधेन तपसा युक्त इत्यर्थः (दित्ततवेत्ति) दीप्तं जाज्वल्यमानदहन इव कर्मवनगहनदहनसमर्थतया ज्वलितं तपो धर्मध्यानादि यस्य स तथा (तत्ततवेत्ति) तप्तं तपो येनासौ तप्ततपाः एवं हि तेन तत्तपस्तप्तं येन कर्माणि सन्तापितानि तेन तपसा स्वात्माऽपि तपोरूपः सन्तापितो यतो ऽन्यस्याऽस्पृश्यमिव जातमिति (महातवेत्ति) आशंसादोषरहितत्वात् प्रशस्ततपाः (उरालेत्ति) भीम उग्रादिविशेषणविशिष्टतपःकरणात्पार्श्वस्थानामल्पसत्त्वानां भयानक इत्यर्थः । अन्ये त्वाहुः ॥ (उरालेत्ति) उदारः प्रधानः (घोरेत्ति) घोरो निर्घृणः परीषहेन्द्रियादीनां रिपुगणानां विनाशमाश्रित्य निर्दय इत्यर्थः । अन्ये त्वात्मनिरपेक्षं घोरमाहुः (घोरगुणेत्ति) घोरा अन्यैर्दुरनुचरा गुणा मूलगुणादयो यस्य स तथा (घोरतवस्सिति) घोरैस्तपोभिस्तपस्वी इत्यर्थः (घोरबंभचेरवासित्ति) घोरं दारुणमल्पसत्त्वैर्दुरनुचरं यद्ब्रह्मचर्यं तत्र वस्तुं शीलं यस्य स तथा (उच्छूढसरीरेत्ति) उच्छूढमुज्झितमिवोज्झितं शरीरं येन संस्कारत्यागात्स तथा (संखित्तविउलतेयलेसेत्ति) संक्षिप्ता शरीरान्तर्लीना विपुला विस्तीर्णा [illegible]

[illegible]

—ञ्च आह (उड्ढंजाणुत्ति) ऊर्ध्वे जानुनी यस्यासावूर्ध्वजानुः शुद्धपृथिव्यासनवर्जनादौपग्रहिकनिषद्याया अभावाच्चोत्कुटुकासन इत्यर्थः (अहोसिरेत्ति) अधोमुखो नोर्ध्वं तिर्यग्वा विक्षिप्तदृष्टिः किन्तु नियतभूभागनियमितदृष्टिरिति भावः (झाणकोट्ठोवगएत्ति) ध्यानं धर्म्यं शुक्लं वा तदेव कोष्ठः कुसूलो ध्यानकोष्ठस्तमुपगतस्तत्र प्रविष्टो ध्यानकोष्ठोपगतः यथाहि कोष्ठके धान्यं प्रक्षिप्तमविप्रसृतं भवत्येवं स भगवान् ध्यानतो विप्रकीर्णेन्द्रियान्तःकरणवृत्तिरिति (संजमेणं) संवरेण (तवसा) अनशनादिना चशब्दः समुच्चयार्थो लुप्तोऽत्र द्रष्टव्यः संयमतपोग्रहणं चानयोः प्रधानमोक्षाङ्गत्वख्यापनार्थं प्रधानत्वं च संयमस्य नवकर्मानुपादानहेतुत्वेन तपसश्च पुराणकर्मनिर्जरणहेतुत्वेन भवति चाभिनवकर्मानुपादानात् पुराणकर्म्मक्षपणाच्च सकलकर्म्मक्षयलक्षणो मोक्ष इति (अप्पाणं भावेमाणे विहरइ इति) आत्मानं वासयंस्तिष्ठतीत्यर्थः । भ० १ श० १ उ० । चन्द्र० ॥ यथाग्रहणेन च ... यदयुच्यन्ते अवयवे समुदायोपचारात् यथा देवदत्तस्य ... प्रकृष्टोऽवयवोऽपि देवदत्तः तथा च देवदत्तस्य ... स्पृष्टा लोको वदति देवदत्तो मया स्पृष्ट इति । सू० प्र० ... चन्द्र० (गणधर शब्देऽस्य मातापितृपुरादीनि)

इंदजेसल—इन्द्रजेपज—न० इन्द्रेण प्रकाशितं भेसजम् । ... पञ्चपाम । शब्दरत्न० । वाच० ।

इंदमह—इन्द्रमह—पु० इन्द्रः शक्रस्तस्य महः प्रतिनियत... समायी उत्सव इन्द्रमहः । प्रतिनियतदिवसभाविनि इन्द्र... स्तोत्सार्थे महोत्सवरूपे महामहनेदे, । ज्ञी० ३ प्र० । ज्ञं० । ... आचा० । रा० । "इंदमहेइवा" । भ० श० ९ उ० ३३ । विपा० ... इंदमहो आसोयपुण्णिमाए भवतीति । भा० चू० प्र० ... भाष्य० । व्या० । प्रश्न० । नि० चू० । "इंदाइमहाणं ... नियया कमसो हौंति" ॥ प्रायः प्रतिनियता वर्ष... प्रतिनियतभाविन इन्द्रादिमहा इति । आ० म० प्र० । ... गमकालादेव प्रवृत्त इति । आ० म० प्र० (प्रतिकाल० ... दृष्टव्या शब्दे) ।

इंदमहकामुग—इन्द्रमहकामुक—पु० इन्द्रमहे यथादिकाले का... कामयिता । कुक्कुटे, यतस्तदैव तेषां व्यवायधर्मो लोकानां ... वाच० ॥

इंदमुद्धाभिसित्त—इन्द्रमूर्द्धाभिषिक्त—पु० यदैवतानक्षत्र... दशादिवसेषु स्वनामख्याते सप्तमे दिवसे, "इंदमुद्धाभिसित्ते ... चं० १० पाहु० । ज्यो० । जं० ॥

इंदय—इन्द्रक—पु. इन्द्रार्थे, क्या. ६ ग० ।

इंदयणिरय—इन्द्रकनिरय—पु० निरयेन्द्रकसमरानिरये, क्या ३३ ...

इंदयाम—इन्द्रयाम—पु. इन्द्रे, । "पवयणस्स इंदयामा" नि० ...

इंदलट्ठि—इन्द्रयष्टि—स्त्री० इन्द्रयष्टौ, निष्क्रमणे इन्द्र... विमुक्तनिवसना ॥ रा० १ म० ॥

इंदवसा—इन्द्रवशा—स्त्री० स्वनामख्यातायां ... वृत्ते इन्द्रवज्रायास्तूपके यस्तुत्वभेदे, वाच० । वृत्तर० ...

इंदवंसा—इन्द्रवंशा—स्त्री० स्वनामख्यातायां ... ज० वृत्ते इन्द्रवज्रास्तूपके यस्तुत्वभेदे, वाच० ॥

इंदसु—इन्द्रसू—स्त्री० ... आनन्दस्य जातायाम । कल्प० १३ अ० ॥

इंदवागरण-इन्द्रव्याकरण-न० शब्दशास्त्रभेदे, कल्प० ।

तच्च भगवत इत्थंभेदेषस्य समये संजातम् ॥

अह नं अम्मा पियरो, जाणित्ता अहियअट्ठवासं तु ।

कयकोउयअलंकारं, लेहायरियस्स उवणेंति ॥

अथ भीवणानन्तरं किंचित्कालातिक्रमे भगवन्तमधिकाष्टवर्षं मातापितरौ ज्ञात्वा कृतानि कौतुकानि रक्षादीनि अलङ्काराश्च केयूरादयो यस्य स तथा तं प्रवरहस्तिस्कन्धगतं तु परितो-मुक्तातपत्रमाल्यदाम्ना छत्रेण ध्रियमाणेन चामराभ्यां वीज्यमान मिश्रतितिपरिजनसमेतं लेखाचार्याय उपाध्यायाय उपनयत. । तदनन्तरं यो " उवणेंतु " उपनीतवन्तौ उपाध्यायस्य महार्घ्यं सिंहासनं रचितं भवान्तरे देवराजस्य शक्रासनकम्पो बभूव । अथावधिना च प्रयोजनविधि विज्ञाय शक्रो स्वल्प-त्वसंदेहविवर्जितं भुवनत्रयगुरुं प्रति मातापित्रोर्येन भगवन्त-मपि लेखाचार्यायापनेतुमभ्युद्यतावेति संप्रधार्यागत्य च उपाध्यायपरिकल्पिते महदासने भगवन्तं निवेश्य शब्दलक्षणं पृष्टवान् । कल्प० ॥

अमुमेवार्थं प्रतिपादयति ।

सक्को य तस्समक्खं, भयवंतं आसणे निवेसित्ता ।

सद्दस्स लक्खणं पुच्छे, वागरणं अवयवा इंदं ॥

शक्रो देवराजस्तत्समक्षं लेखाचार्यसमक्षं भगवन्तं तीर्थक रमासने निवेश्य शब्दलक्षणं पृच्छति भगवता च व्याकरण मभ्यधायि । " व्याक्रियन्ते लौकिकाः सामयिकाश्च शब्दा अने-नेति व्याकरणं " शब्दशास्त्रं तदवयवाः केचन उपाध्यायेन गृहीतास्ते च सर्वलोकेऽस्मिन् ऐन्द्रं व्याकरणं संजातम् । आ० म० द्वि० । आ० चू० ॥

इंदसत्तु-इन्द्रशत्रु-पुं० इन्द्रः शत्रुः शातयिता यस्य । वृत्रासुरे, वाच० ॥

इंदसम्म (न्) इन्द्रशर्मन्-पुं० आस्तिकग्रामस्थस्य शूलपा णियक्षस्यार्चके ब्राह्मणे , " इन्द्रशर्मा भूनिन्द्रस्त्या भार्यैस्त-स्यार्चकः कृत. " इति ॥ आ० क० । आ० चू० । " तस्य इंदसम्मो नाम परियारगो कओ " ॥ आ० म० द्वि० । मोराकसन्निवे-शस्थे स्वनामख्याते गृहपतौ च (तत्कथा महावीरस्य मोराक-सन्निवेशं गतस्य विहारसमये-महावीरशब्दे वक्ष्यते)

इंदसग्गह-इन्द्रशक्रह-पुं० इन्द्रजातः वर्षाकालजातशलभः । इन्द्रगोपे, वाच० ॥

इंदसिरि-इन्द्रश्री-स्त्री० पंचालदेशस्थकाम्पिल्यनगरनिवासिनो ब्रह्म (राज) दत्तस्य भार्यायाम्, उत्त० १३ अ० ।

ऐन्द्रश्री-स्त्री० इन्द्रो जीवस्तस्येयमैन्द्री सा चासौ श्रीश्चैन्द्रश्रीः आत्मगुणसम्पदाम्, "ऐन्द्रश्रीसुखमग्नेन,लीलालग्नमिवाखिलम् सच्चिदानन्दमग्नेन, पूर्णं जगदवेक्ष्यते ।१। " अष्ट० १ अ० ।

इंदसेढि-ऐन्द्रश्रेणि-स्त्री० इन्द्राणामियमैन्द्री सा चासौ श्रेणि श्चेति ऐन्द्रश्रेणी। इन्द्रपङ्क्तौ, " ऐन्द्रश्रेणिनता प्रतापभवनं भव्याङ्गिनेत्रामृत सिद्धान्तोपनिषद्विचारचतुरैः प्रीत्या प्रमाणी कृता । मूर्तिः स्फूर्त्तिमती सदा विजयते जैनेश्वरी विस्फुरन् मोहोन्मादघनप्रमादमदिरामत्तैरनालोकिता " ॥ १ ॥ प्रति० ।

इंदसेणा-इन्द्रसेना-स्त्री० ६ स० । इन्द्रस्य कटके, " गंधव्वनट्ट हयगय-रहनरभणियाणसव्वइंदाणं । पमाणियाणि चमरा, महिसा य अहोनिवासीणं" ॥४५॥ संघ० वृ० । (स्वरूपमधिस-

. तयश्च अणिय शब्दे) जंबूमंदरोत्तरवर्तिन्यां रक्तवतीमहानदी-समुपयान्त्यांमहानद्याम, । स्था० १० ठा० ।

इंदा-इन्द्रा-स्त्री० इदि रन् इन्द्रवारुण्याम्, । राजनि ० । श-च्याम्, शब्दर० । वाच० ॥ जम्बूमन्दरोत्तरवर्तिन्यां रक्तवती महानदीं समुपयान्त्याम्महानद्याम, स्था० १० ठा० । धर णस्य नागकुमारेन्द्रस्य स्वनामख्यातायामग्रमहिष्याम्, स्था. ६ ठा० ।

ऐन्द्री-स्त्री. इन्द्रो देवता यस्याः सा ऐन्द्री । पूर्वस्यान्दिशि स्था० १० ठा० । भ० । विशे० । " इंदा विजयदाराणुसा रतो " ॥ ऐन्द्री दिक् विजयद्वारानुसारतः प्रतिपत्तव्या यत्र विजयद्वारं सा ऐन्द्रीति भावार्थः । आ०म० द्वि० ॥ या रुचकात् विजयद्वारानुसारेण विनिर्गता दिक् सा ऐन्द्री । ऐन्द्री नामपू र्वेत्यर्थः ॥ आ० म० द्वि० ॥

इंदाणी-इन्द्राणी-स्त्री० इन्द्रस्य पत्नी । ङीप् आनुक् च । इन्द्र स्याग्रमहिष्याम्, । स्था० ४ ठा. ।

इंदायरिय-इन्द्राचार्य-पुं० योगविधिकारके स्वनामख्याते-आचार्ये, जैनइ० ॥

इंदासण-इन्द्रासन-पुं० इन्द्र आत्मा अस्यते विक्षिप्यतेऽनेन असु क्षेपे करणे ल्युट् । (सिद्धि) सविसर्गके तत्संयते हि आत्मनो विक्षिप्तत्वात्तस्य तथात्वम् । पञ्चमात्रिकस्य प्रस्तारे आदिलघुके दोषगुरुद्वयात्मके प्रथमे भेदे, वाच० ॥

इंदाहिट्ठिय-इन्द्राधिष्ठित-त्रि० इन्द्रयुते, " इंदाहिट्ठिया "
[illegible] । भ० ३ श० १ उ० ।
[illegible] तमिन्द्राधि-
[illegible] १० ठा० ।

इंदाहीण-इन्द्राधीन-त्रि० इन्द्रवश्ये, भ० ३ श० १ उ० ।

इंदाहीणकज्ज-इन्द्राधीनकार्य-त्रि० इन्द्रवश्यकार्ये, भ० ३ श० १ उ० ॥

इंदिय-इन्द्रिय-न० इदि परमैश्वर्ये इदितो नुम् इन्दनादिन्द्र आत्मा (जीव) सर्वे विषयेष्वपि (ज्ञान) भोगलक्षण-परमैश्वर्ययोगात् तस्य लिङ्गं चिह्नमविनाभाविलिङ्गमव्याप्त्यनाम प्रदर्शनादुपलम्भनाद व्यञ्जनाच्च जीवस्य लिङ्गमिन्द्रियं लिङ्गमि न्द्रियविषयोपलम्भनात् ज्ञायकत्वसिद्धिः सन्निधौ उपयोगलक्ष-णो जीव इति जीवत्वसिद्धिः । अष्ट० । आ० म० द्वि० । तेन दृष्टं सृष्टं जुष्टं दत्तमिति वा इन्द्रियम् । स्था० ५ ठा० । इन्द्रि यमिति निपातनसूत्राद्रूपनिष्पत्तिः-नं० । जी० । विशे० । पा० । पं०सं० । इन्द्रशब्दादियप्रत्यय इति । प्रज्ञा०।५पद।आ०चू०॥ श्रोत्रादौ, । उत्त० १६ अ० । सूत्र० । नयनवदनमयनस्य नासिकादौ, उत्त०१६अ० "नो निग्गंथे इत्थीणं इंदियाइं मणोहराइं मणोरमाइं आलोइत्ता निज्झाइत्ता भवति " उत्त०

इंदो जीवो सव्वो-वलद्धिभोगपरमेसरत्तणओ ।

सोत्ताइभेयमिंदिय-मिह तल्लिंगाइ भावाओ ॥

इदि परमैश्वर्ये इन्दनात्परमैश्वर्ययोगादिन्द्रो जीव सर्वैश्वर्यं सस्य मूल इत्याह (सव्वो इत्यादि) ज्ञानावरणाद्यभावे सर्वस्यापि वस्तुन उपलम्भनाभोगेषु सर्वस्यापि त्रिजगत्प्रभव वस्तुनः परिभोगाच्च परमेश्वरो जीव इति तस्य परमैश्वर्यं तल्लिङ्ग-इव जीवलिङ्गं चिह्नं तेन दृष्टं वा निपातनादिन्द्रियमुच्यते

[illegible] । तत्र श्रोत्रादीन्द्रियं श्रोत्रनयनादि उपम- [illegible] । विशे० ॥

[illegible] । स्था० । सूत्र० । पञ्च ज्ञानेन्द्रियाणि बुद्धीन्द्रियाणि चक्षु- [illegible] पञ्च कर्मेन्द्रियाणि एकादशं मन इति सांख्या० । सूत्र० १ श्रु० १ अ० ।

[illegible] उक्तम् । तद्यथा—

कइ णं भंते ! इंदिया पण्णत्ता ? गोयमा ! पंच इंदिया पण्णत्ता, तं जहा— सोइंदिए जाव फासिंदिए ॥

[illegible] विषयाः शब्दादयः [illegible] । [illegible]

१—[illegible]
२—[illegible]
३—[illegible]
४—[illegible]
५—[illegible]
६—[illegible]
७—[illegible]
८—[illegible]
९—[illegible]
१०—[illegible]
११—[illegible]
१२—[illegible]
१३—[illegible]
१४—[illegible]

[illegible]

[illegible] गोयमा ! [illegible]

[illegible]

स्युपकरणे ऽप्येन्द्रियमनुपयोगो भावेन्द्रियमिति । तत्र निर्वृत्तिर्नाम प्रतिविशिष्टः संस्थानविशेषः सापि द्विविधा बाह्याभ्यन्तरा च तत्र बाह्या पर्पटिकादिरूपा सा च विचित्रा न प्रतिनियतरूपतयोपदेष्टुं शक्यते ॥ तथाहि । मनुष्यस्य श्रोत्रं नेत्रयोः पार्श्वतो भावित्री भ्रुवौ चोपरितनश्रवणबन्धापेक्षया समे वाजिनो नेत्रयोरुपरि तीक्ष्णे चाग्रभागे इत्यादि जातिभेदान्नानाविधा आभ्यन्तरा तु निर्वृत्तिः सर्वेषामपि जन्तूनां समाना एव तामेवाधिकृत्य च इयमागमानि संस्थानादिविषयाणि सूत्राणि [illegible] यन्ने स्पर्शनेन्द्रियस्य निर्वृत्तेर्बाह्याभ्यन्तरभेदो न प्रतिपत्तव्यः पूर्वसूरिभिर्निषेधात् । प्रज्ञा० १५ पद । भा० म० द्वि० । तत्परत्र सटीकायामनभ्युपगमात् । जी० १ प्रति० ।

इन्द्रियाणां संस्थानमाह ।

पुष्पं कलंबुयाए, धन्न-मसूरातिमुत्तचंदे य ।
होइ खुरप्पनाणा, किई य सोइंदियाईणं ॥

श्रोत्रस्यान्तर्निर्वृत्तिः कदम्बपुष्पाकारमांसगोलकरूपा प्रज्ञप्ता । चक्षुषस्तु धान्यमसूराकारा, घ्राणस्य अतिमुक्तकपुष्पचन्द्रकाकारा, रसनस्य क्षुरप्राकारा, स्पर्शने तु नानाकारनिर्वृत्तिरिति श्रोत्रादीनां तन्निर्वृत्त्याकार इति । विशे० ।

तथाच प्रज्ञापनायाः पञ्चदशे पदे ।

सोइंदिए णं भंते ! किं संठिए पण्णत्ते ? गोयमा ! कलंबुयापुप्फसंठाणसंठिए पण्णत्ते । चक्खिंदिए णं पुच्छा गोयमा ! मसूरचंदसंठाणसंठिए पण्णत्ते, घाणिंदिए णं पुच्छा गोयमा ! अइमुत्तगचंदसंठाणसंठिए पण्णत्ते, जिब्भिंदिए णं पुच्छा गोयमा ! खुरप्पसंठाणसंठिए पण्णत्ते, फासिंदिए णं पुच्छा गोयमा ! नाणासंठाणसंठिए पण्णत्ते,

इत्थि (त्थी) लिंग-स्त्रीलिङ्ग-न० स्त्रिया लिङ्गं स्त्रीलिङ्गम् । स्त्रीत्वे, तच्च त्रिधा वेदः शरीरनिर्वृत्तिः नेपथ्यं च । प्रज्ञा० १ पद० । आ० म० प्र० । नं० । त्रिधा स्त्रीलिङ्गं तत्कार्यं यस्य तत् स्त्रीलिङ्गं शब्दलक्षणप्रसिद्धे शब्दभेदे,पुं० ६ त स्त्री० स च स्त्री सर्वाणस्त्रीलिङ्गादि-अनु० । लिङ्गेन स्त्रतादौ स० । वाच० ।

इत्थि (त्थी) लिंगसिद्ध-स्त्रीलिङ्गसिद्ध-पुं० स्त्रिया लिङ्गं स्त्रीलिङ्गं स्त्रीत्वस्योपलक्षणमित्यर्थः । तच्च त्रिधा । वेदः शरीरनिर्वृत्तिर्नेपथ्यं च । तत्र इह शरीरनिर्वृत्त्या प्रयोजनं न वेदनेपथ्याभ्यां वेदे सति सिद्धत्वाभावात् नेपथ्यस्य चाप्रमाणत्वात् । आह च नन्द्यध्ययनचूर्णिकृत्" इत्थीए लिंगं इत्थिलिंगं इत्थिउवलक्खणं ति वुत्तं भवइ तं च तिविहं वेदो सरीरनिव्वत्ति नेवत्थं च इह सरीरनिव्वत्तीए अहिगारो न वेयनेवत्थेहिं ति" । ततस्तस्मिन् लिङ्गे वर्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः । प्रज्ञा० १ पद० । आ० म० प्र० । नं० । सिद्धभेदे, तथा च ललितविस्तरायाम् (तीर्थसिद्धातीर्थसिद्धतीर्थकरसिद्धा अतीर्थकरसिद्धाः स्वयंबुद्धप्रत्येकबुद्धसिद्धबुद्धबोधितसिद्धाप्रतिपाद्योक्तम्) एते च सर्वेऽपि स्त्रीलिङ्गसिद्धाः केचित् २ पुंल्लिङ्गसिद्धाः केचिन्नपुंसकलिङ्गसिद्धाः इति आह तीर्थकरा अपि लिङ्गसिद्धा भवन्तीत्याह यत उक्तं सिद्धप्राभृते " सव्वत्थोवा तित्थयरी सिद्धा तित्थगरितित्थणो तित्थगरसिद्धा संखेज्जगुणा इति " ल० ॥

स्त्रीणां सिद्धिर्यथा ।

एगोवि णमुक्कारो, वीरवरवसहस्स वद्धमाणस्स ।
संसारसागराओ, तारइ नरं व नारिं वा ॥

इति महावीरस्तुतिप्रतिपाद्योक्तम् । स्त्रीग्रहणं तासामपि तद्भव एव संसारक्षयो भवतीति ज्ञापनार्थं वचः । यथोक्तं यापनीयतन्त्रेण "णो खलु इत्थि अजीवो, ण यावि अभव्वा ण यावि दंसणविरोहिणी, णो अमाणुसा, णो अणारिउप्पत्ती, णो असंखेज्जाउया, णो अइकूरमई, णोण उवसंतमोहा, णो ण सुद्धाचारा णो असुद्धबोंदी ववसायवज्जिया, णो अपुव्वकरणविरोहिणी, णो ऽणवगुणठाणरहिया, णो अजोग्गा लद्धिए, णो अकल्लाणभायणं ति, कहं न उत्तमधम्मसाहिगत्ति" तत्र न खल्विति । नैव स्त्री अजीवा वर्तते । किन्तु जीव एव जीवस्य चोत्तमधर्मसाधकत्वाविरोधस्तथादर्शनात् । न जीवोऽपि सर्व उत्तमधर्मसाधको भवत्यभव्येन व्यभिचारात् । तद्व्यपोहायाह न चास्व भव्यजातिप्रतिषेधोऽयं । यद्यपि काचिदभव्या तथापि सर्वैवाभव्या न भवति संसारनिर्वेदनिर्वाणधर्मद्वेषशुश्रूषादिदर्शनात् । भव्योऽपि कश्चिद्दर्शनविरोधी यो न सेत्स्यति तन्निरासायाह । नो दर्शनविरोधिनी । दर्शनमिह सम्यग्दर्शनं परिगृह्यते तत्त्वार्थश्रद्धानरूपं न तद्विरोधिन्येवास्तिक्यादिदर्शनात् । दर्शनाविरोधिन्यपि अमानुषी भवेत् एव तत्प्रतिषेधायाह । नो अमानुषी । मानुष्यजातौ भावात् । विशिष्टकरचरणोरुग्रीवाद्यवयवसन्निवेशादर्शनात् । मानुष्यप्यनार्योत्पत्तिरनिष्ट तदपनोदायाह ॥ नो अनार्योत्पत्तिः अनार्येष्वप्युत्पत्तेः तथा तास्वदर्शनात् । आर्योत्पत्तिरप्यसंख्येयायुर्नाधिकृतसाधनायेत्येतदधिकृत्याह । नो असंख्येयायुः । सर्वत्र संख्येयायुष्कायापि भावात् तथादर्शनात् । संख्येयायुरपि क्रूरमतिः प्रतिषिद्धा नप्रियाचिकीर्षयाह । नातिक्रूरमतिः । सप्तमनरकायुर्निबन्धनरौद्रध्यानाभावात् ॥ तदभावश्च तत्स्वाभावाच्च इतियत् । न तेन तस्य प्रतिषेधाभावात् तत्कारणवद्वितरकरणाभावेनानिष्टप्रसङ्गात् । अतः उपशान्तमोहापि इतिग्रहणमाशुन्दरैव तदपोहायाह । नो न उपशान्तमोहा काचिदुपशान्तमोहापि संभवति तथा दर्शनात् । उपशान्तमोहाप्यशुद्धाचारा गर्हिता तत्प्रतिक्षेपायाह । नो अशुद्धाचारा काचित् शुद्धाचारापि भवन्त्यौचित्येन परकरणवर्जनाद्याचारदर्शनात् । शुद्धाचाराप्यशुद्धबों-

दिग्माध्वी तद्वत्वोदायाह । नो अयुद्ध्यादिः । काचित् युद्धा तनुरपि भवति । प्राक्तनी तु येन्नः स्वसंजेमाद्युष्य दर्शनात् । पश्चात्तनादिदेशेषु युद्धयादिरपि व्यवसायवर्जिता निन्दितेव तथिवमायाह । नो व्यवसायवर्जिता काचिच्चरमाक् व्यवसायिनी शास्त्रसत्प्रवृत्तिदर्शनात् । व्यवसायायाप्यपूर्वकरणविरोधिन्येव तत्प्रतिषेधमाह । नो अपूर्वकरणविरोधिनी । अपूर्वकरणात्रंनत्वस्य । स्त्रीजातावपि प्रतिपादितत्वात् । अपूर्वकरणमप्यपि नवगुणस्थानरहिता नेत्यशिल्पेव दर्शितत्वमाह । नो नवगुणस्थानरहिता तत्संभवस्य तस्याः प्रतिपादितत्वात् । नवगुणस्थानसंगतापि अयोग्या अकारणमधिकृतविधिविरोधेभ्य इत्याह । योग्यता सत्येः । कल्याणस्थादिरूपायाः कासांचित्येनदानीमपि दर्शनात् कथं हारसादृग्न्निरोधः तथाविधविप्रहे तत्तो दोषात् । धर्मविरोधिनी तु कालगम्यप्रभावो मायी विरुद्ध एव । सर्वविरोध्याप्यकल्याणभाजनोपचाराणामितिविनार्येत्साधनायात्माभिधाय आह नाकल्याणभाजनं तीर्थकरजननात् नातः परं कल्याणमस्ति एवमतः कथं तो न कर्मसंन्यासि । किं गुणमधर्मसाधिकेव धर्मनसत्कायांपि सर्वनायद्गुणसंयमान्विनियोगमधर्मसाधिकेति सिद्धान्तः । केचन प्रभावधायं सति च केवले नियमतो मोक्ष इति । ल० ।

एतेन यदाहुराचार्याः—न स्त्रीणां निर्वाणमिति तदपास्तं द्रष्टव्यम् । स्त्रीनिर्वाणस्य साक्षादेन सूत्रेणाभिधानात् । तत्प्रतिषेधस्य युक्त्यनुपपन्नत्वात् । तथाहि—मुक्तिपथो ज्ञानदर्शनचारित्राणि । "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्गः इति वचनात्" सम्यग्दर्शनादीनि पुरुषाणामिव स्त्रीणामप्यविकलानि दृश्यन्ते । तथाहि दृश्यन्ते स्त्रियोऽपि जगत्प्रथितप्रवचनार्थमविरोधयमानाः श्रद्धते च, षडावश्यककालिकोत्कालिकादिनेदभिन्नं श्रुतं, परिपालयन्ति चानवद्यप्रकारमष्टादशनियमं, धारयन्ति च देवासुराणामपि दुर्धरं ब्रह्मचर्यं, तप्यन्ते च तपांसि मासक्षपणादीनि, ततः कथमिव न तासां मोक्षसंभवः ।

(मत०)—अत्र स्त्रीणां सम्यग्दर्शनं ज्ञानं च पुरुषस्येव संयमाभावात् तथाहि स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यम् यथा पिशुनाद्यन्यस्याभिनवकस्त्रिय इव पुरुषाणामभिभावनीया भवेयुः । लोके च गर्हां उपजायेत तत्रोऽवश्यं ताभिर्वस्त्रं परिभोक्तव्यम् । वस्त्रपरिभोगे च सपरिग्रहता सपरिग्रहत्वे च संयमाभाव इति ॥

(सिद्ध०-वृ०.)यदुक्तमदीक्षितेऽवस्त्रपरिग्रहत्वात् संयमाभाव इति तदसमीचीनं यतो हि परमार्थेन मूर्च्छैवाभिधीयते "मूर्च्छा परिग्रहो मूर्च्छा" इति वचनात् । तथाहि मूर्च्छा रहितो भरतचक्रवर्त्ती आदर्शगृहे सर्वालङ्कारविभूषितोऽपि निष्परिग्रहो गीयते । अन्यथा केवलोत्पादो न स्यादेव । अपि च—यदि मूर्च्छा अन्तरेणापि वस्त्रसंसर्गमात्रं परिग्रहो भवेत् तर्हि जिनकल्पप्रतिपन्नस्य कस्यचित् शीतकालेऽनुचरत्र उपसर्गं प्रपन्नस्य केनचित् वस्त्रेऽपि निक्षिप्ते परिग्रहता प्रसज्यते । न च तत्रेष्टं परिग्रहता भवेत् । अधीयते हि तस्य मुक्तिः तत्समाधौ पर्यवसानं किन्तु मूर्च्छैव । तथा च स्त्रीणां वस्त्रेषु न किमपि धर्मोपकरणबुद्ध्या मूर्च्छा सम्भवति [illegible] । न च तन्न वस्त्रप्रतिलेखना अपि [illegible] ध्यानाशं ददृत्सिद्धं तत्र [illegible] धर्मपरित्रुद्धा मतम् [illegible]

स्त्रीणामपि सम्यग् दर्शनादिकं रत्नत्रयं परं न तत्संभवमात्रेण मुक्तिपदप्रापकं भवति किन्तु प्रकर्षप्राप्तमेव रत्नत्रयं सर्वथा [illegible] विशेषेण मुक्तिपदप्राप्तिकारणम् [illegible] स्त्रीणामसम्भवी इति न निर्वाणमिति । तदयुक्तं स्त्रीषु रत्नत्रयप्रकर्षाभावसाधकस्य प्रमाणस्याभावात् [illegible] प्रत्यक्षं [illegible] अनुमानस्याप्यसम्भवात् । [illegible] तथा [illegible] मुक्तिपदप्राप्तिर्न [illegible] मयनार्थ । [illegible] पुरुषेष्वपि प्रसङ्ग ॥

(मत०) ननु [illegible]

[illegible]

(सिद्ध०-वृ०) [illegible]

[illegible] ॥ ५५ ॥

[illegible]

इत्थिपरिन्न [illegible]

[illegible]

मर्द लिङ्गं स्त्रीत्वम्योत्पत्तक्षमित्यर्थः । तच्च त्रिधा । वेदः शरीरनिर्वृत्तिर्नेपथ्यं च । तत्र इह शरीरनिर्वृत्त्या प्रयोजनं न वेदनेपथ्याभ्यां वेदे सति सिद्धत्वाभावात् नेपथ्यस्य चाप्रमाणत्वात् । आह च नन्दध्ययनचूर्णिकृत् " इत्थीए लिंगं इत्थिलिंगं इत्थि उवलक्खणं ति वुत्तं भवइ तं च तिविहं वेदो सरीरनिव्वत्ती नेवत्थं च इह सरीरनिव्वत्तीए अहिगारो न वेदनेवत्थेहिं ति " । ततस्तस्मिन् लिङ्गे वर्तमानाः सन्तो ये सिद्धास्ते स्त्रीलिङ्गसिद्धाः । प्रज्ञा० १ पद० । आ० म० प्र० । न० । सिद्धभेदे, तत्र च स्त्रीलिङ्गसिद्धत्वम् (तीर्थसिद्धातीर्थसिद्धतीर्थंकरसिद्धाऽतीर्थंकरसिद्धाः स्वयंबुद्धसिद्धप्रत्येकबुद्धसिद्धबुद्धबोधितसिद्धादिशब्दोक्तम्) एवं च सत्यपि स्त्रीलिङ्गसिद्धाः केचित् २ पुंलिङ्गसिद्धाः केचिन्नपुंसकलिङ्गसिद्धाः इति आह नन्दिकारः अपि लिङ्गसिद्धा नपुंसकादिरपि [illegible] सिद्धप्राभृते " मनुष्यो वा तिर्यग्री सिद्धा तिर्यगतिनियोः तिर्यग्गतिसिद्धा सर्वेभ्योऽल्पा इति " प्र० ॥

स्त्रीणां सिद्धिर्यथा ।

एगेहिं अणुन्नासे, वीरस्स रयहरस्स वद्धमाणस्स ।
संपत्तणाणगभो, तारइ नरं व नारिं वा ॥

[illegible]

दिरसाध्वी तदपनोदायाह । नो अशुद्धयादिः । काचित् शुद्धा तनुरपि भवति । प्राकर्म्मी तु येषतः ससज्जनायशुध्यदर्शनात् । कक्षास्तनादिदेशेषु शुद्धयादिरपि व्यवसायवर्जिता निन्दितैव तन्निरासायाह । नो व्यवसायवर्जिता काचित्परलोकव्यवसायिनो शास्त्रार्थप्रवृत्तिदर्शनात् सव्यवसायाप्यपूर्वकरणविरोधिन्येव तत्प्रतिषेधमाह । नो अपूर्वकरणविरोधिनी । अपूर्वकरणासंभवस्य । स्त्रीजातावपि प्रतिपादितत्वात् । अपूर्वकरणवत्यपि नवगुणस्थानरहिता नेष्टसिद्ध्ये इष्टसिध्यर्थमाह । नो नवगुणस्थानरहिता तत्संभवस्य तस्याः प्रतिपादितत्वात् । नवगुणस्थानसंगतापि लब्ध्ययोग्या अकारणमधिकृतविधिरित्येतत्प्रतिक्षेपायाह । नायोग्या लब्धेः । आमर्षौषध्यादिरूपायाः कासाञ्चिदिदानीमपि दर्शनात् कथं द्वादशाङ्गप्रतिषेधः तथाविधविग्रहे ततो दोषात् । श्रेणिपरिणतौ तु कालगर्भवद्भावतो भावो विरुद्ध एव । लब्धियोग्याप्यकल्याणभाजनोपघाताभावाभिश्रवितार्थसाधनायालमित्यत आह नाकल्याणभाजनं तीर्थंकरजननात् नातः परं कल्याणमस्ति यत एवमतः कथं नोत्तमधर्मसाधिकेत्युत्तमधर्मसाधिकेव अनेनतत्त्वकाशोपक्षेपेणावद्गुणस्वयमान्विनैवोत्तमधर्मसाधिकेति विद्वांसः । केवलसाधकश्चायं सति च केवले नियमान्मोक्ष इति । ल० ।

एतेन यदाहुर्दिगम्बराः–न स्त्रीणां निर्वाणमिति तदपास्तं द्रष्टव्यम् । स्त्रीनिर्वाणस्य साक्षादनेन सूत्रेणाभिधानात् । तत्प्रतिषेधस्य युक्त्यनुपपन्नत्वात् । तथाहि–मुक्तिपथो ज्ञानदर्शनचारित्राणि । "सम्यग्दर्शनज्ञानचारित्राणि मोक्षमार्ग इति वचनात्" सम्यग्दर्शनादीनि पुरुषाणामिव स्त्रीणामप्यविकलानि दृश्यन्ते । तथाहि दृश्यन्ते स्त्रियोऽपि सकलमपि प्रवचनार्थमभिरोचयमानाः जानते च षडावश्यककालिकोत्कालिकादिभेदभिन्नं श्रुतं, परिपालयन्ति सप्तदशप्रकारसकलङ्कसंयमं, धारयन्ति च देवासुराणामपि दुर्धरं ब्रह्मचर्यं, तप्यन्ते च तपांसि मासक्षपणादीनि, ततः कथमिव न तासां मोक्षसंभवः ।

(नग्नः)-यद्यप्यस्ति स्त्रीणां सम्यग्दर्शनं ज्ञानं वा न पुनश्चारित्रं संयमाभावात् तथाहि स्त्रीणामवश्यं वस्त्रपरिभोगेन भवितव्यमन्यथा विवृताङ्ग्यस्ता स्तिर्यक्स्त्रिय इव पुरुषाणामभिभावनीया भवेयुः । लोके च गर्होपजायेत ततोऽवश्यं ताभिर्वस्त्रं परिभोक्तव्यम् । वस्त्रपरिभोगे च सपरिग्रहता सपरिग्रहत्वे च संयमाभाव इति ॥

(सैद्धान्तिकः)तदसमीचीनं सम्यक्सिद्धान्तापरिज्ञानात्परिग्रहो हि परमार्थतो मूर्च्छाभिधीयते "मुच्छा परिग्गहो वुत्तो" इति वचनात् । तथाहि मूर्च्छारहितो भरतश्चक्रवर्त्ती मातृः पुरोप्यादर्शकगृहेऽवनिष्ठमानो निष्परिग्रहो गीयते । अन्यथा केवलोत्पादो न संभवेत् । अपिच–यदि मूर्च्छाया अभावेऽपि वस्त्रसंसर्गमात्रं परिग्रहो भवेत्ततो जिनकल्पप्रतिपन्नस्य कस्यचित्साधोरनुपास्कआनुषक्तो प्रपतति शीते केनापि धर्मार्थिना शिरसि वस्त्रे प्रक्षिप्ते तस्य सपरिग्रहता भवेत् । नचैतदिष्टं तस्मान्न वस्त्रसंसर्गमात्रं परिग्रहः किन्तु मूर्च्छा । सा च स्त्रीणां वस्त्रादिषु न विद्यते धर्मोपकरणमात्रतया तस्योपादानात् । न खलु ता वस्त्रमन्तरेणात्मानं रक्षयितुमीशते नापि शीतकालादिषु स्वाध्यायादिकं कर्त्तुं ततो दीर्घतरसंयमपरिपालनाय यतनया वस्त्रं परिभुञ्जाना न ताः परिग्रहवन्त्यः । अदोच्येत संभवतितमां स्त्रीणामपि सम्यग् दर्शनादिकं रत्नत्रयं परं न तत्संभवमात्रेण मुक्तिपदप्रापकं भवति किन्तु प्रकर्षप्राप्तमन्यथा दीक्षानन्तरमेव सर्वेषामप्यविशेषेण मुक्तिपदप्राप्तिप्रसक्तिः सम्यग्दर्शनादिरत्नत्रयप्रकर्षश्च स्त्रीणामसम्भवी ततो न निर्वाणमिति । तदप्ययुक्तं स्त्रीषु रत्नत्रयप्रकर्षस्यासम्भवाभिधानस्य सम्भवग्राहकं प्रमाणं विजृम्भते देशकालविप्रकृष्टेषु प्रत्यक्षस्याप्रवृत्तेस्तदप्रवृत्तौ चानुमानस्याप्यसम्भवात् । नापि तासु रत्नत्रयप्रकर्षासम्भवप्रतिपादकः कोप्यागमो विद्यते प्रत्युत सम्भवप्रतिपादकः स्यात् २ ऽस्ति यथा इदमेव प्रस्तुतं सूत्रं ततो न तासां रत्नत्रयप्रकर्षासम्भवोऽथ मन्येथाः स्वभावत एवातपेनेवच्छाया विरुध्यते स्त्रीत्वेन सह रत्नत्रयप्रकर्षस्ततस्तदसंभवोऽनुमीयते तदयुक्तमुक्तं युक्तिविरोधात् तथाहि रत्नत्रयप्रकर्षः स उच्यते ततोऽनन्तरमुक्तिपदप्राप्तिः स चायोग्यवस्था चरमसमयभावी अयोग्यवस्था चास्मादृशामप्रत्यक्षा ततः कथं विरोधगतिः नहि अदृष्टेन सह विरोधप्रतिपत्तुं शक्यते मा प्रापत् पुरुषेष्वपि प्रसङ्गः ॥

(नग्नः) ननु जगति सर्वोत्कृष्टपदप्राप्तिः सर्वोत्कृष्टेनाध्यवसायेनावाप्यते नान्यथा एतयोश्चानयोरप्यावयोरागमप्रामाण्यबलतः सिद्धम् । सर्वोत्कृष्टदुःखस्थानं सर्वोत्कृष्टसुखस्थानं च । तत्र सर्वोत्कृष्टदुःखस्थानं सप्तमनरकपृथ्वी अतः परं परमदुःखस्थानस्याभावात् । सर्वोत्कृष्टसुखस्थानं तु निःश्रेयसम् । तत्र स्त्रीणां सप्तमनरकपृथिवीगमनमागमे निषिद्धं निषेधस्य च कारणं सप्तमनरकप्रायोग्यतथाविधसर्वोत्कृष्टमनोवीर्यपरिणत्यभावः । अतः सप्तमपृथिवीगमनवत्तदभावात् संमूर्च्छिमादिवत् । अपिच यासां पादलब्ध्या विकुर्वणत्वादिलब्धौ पूर्वगतश्रुताधिगमे च न सामर्थ्यं गतिस्तासां मोक्षगमनसामर्थ्यमित्यतिदुःश्रद्धेयम् ॥

(सैद्धान्तिकः)तदेतदयुक्तं यतो यदि नाम स्त्रीणां सप्तमनरकपृथिवीगमनं प्रति सर्वोत्कृष्टमनोवीर्यपरिणत्यभावस्तत एतावता कथमवसीयते निःश्रेयसमपि प्रति तासां सर्वोत्कृष्टमनोवीर्यपरिणत्यभावः । नहि यो भूमिकर्षणादिकं कर्म कर्त्तुं न शक्नोति स शास्त्राण्यप्यवगाहितुं न शक्नोतीति प्रत्येतुं शक्यं प्रत्यक्षविरोधात् । अथ संमूर्च्छिमादिषूभयमपि सर्वोत्कृष्टमनोवीर्यपरिणत्यभावो दृष्टस्ततोऽत्राविनाभावोऽवसीयते । ननु यदि तत्र दृष्टस्तर्हि कथमविनाभावोऽवसीयते न खलु बहिर्व्याप्तिमात्रेण हेतुर्गमको भवति किन्त्वन्तर्व्याप्त्या, अन्तर्व्याप्तिश्च प्रतिबन्धबलेन । नचात्र प्रतिबन्धो विद्यते न खलु सप्तमपृथिवीगमनं निर्वाणगमनस्य कारणम् नापि सप्तमपृथिवीगमनाविनाभावि निर्वाणगमनम् चरमशरीरिणां सप्तमपृथिवीगमनमन्तरेणैव निर्वाणगमनभावात् । न च प्रतिबन्धमन्तरेण एकस्याभावेऽन्यस्याभावः, अन्यथा घटाभावे पटस्यापि मा भूत् । स च तत्र कश्चिदभावे सर्वस्याभावप्रसङ्गः । यद्येवं तर्हि कथं संमूर्च्छिमादिषु निर्वाणगमनाभाव इति । उच्यते-तथा भवस्वाभाव्यात् । तथाहि संमूर्च्छिमादयो भवस्वभावत एव न सम्यग्दर्शनादिकं यथावत्प्रतिलब्धुं शक्नुवन्ति ततो न तेषां निर्वाणसंभवः । स्त्रियस्तु मनुष्यत्वेन यथावत्सम्यग्दर्शनादिरत्नत्रयसम्पदोपेतास्ततस्तासां न निर्वाणगमनाभावः । अपिच भुजपरिसर्पा द्वितीयामेव पृथिवीं यावद्गच्छन्ति न परतः परपृथ्वीगमनहेतुमनोवीर्यपरिणत्यभावात् तेषां यावत् सहस्रारं पञ्चन्द्रा...

अथ च सर्वेषूर्ध्वमुत्कर्षेण ...

विषय मनोवीर्यपरिण...

...स्त्वम् । आह

महत्त्वारम् । गच्छन्ति च तिर्यञ्च-स्तदधोगत्यूनता हेतुः ॥१॥ तदाच सति सिद्धं स्त्रीपुंसामधोगतिवैषम्येऽपि निर्वाणं समम् । यदप्युक्तमपि च यासां वादलब्ध्यादि तदप्यश्लीलं वादविकुर्वणत्वादिलब्धिविरहेऽपि विशिष्टपूर्वगतश्रुताभावेऽपि माषतुषादीनां निःश्रेयसपदाधिगमश्रवणादाहच वादविकुर्वणत्वादिलब्धिविरहश्रुते कनीयसि च जिनकल्पमनःपर्यवविरहेऽपि न सिद्धिविरोधोऽस्ति। अपिच यदि वादादिलब्ध्यभाववत् निःश्रेयसाभावोऽपि स्त्रीणामभविष्यत् ततस्तथैव सिद्धान्ते प्रत्यपादयिष्यत् यथा जंबूयुगलात् केवलज्ञानाभावो, न च प्रतिपाद्यते तस्मादुपपद्यते स्त्रीणां निर्वाणमिति कृतं प्रसङ्गेन। प्रज्ञा० १ पद । नं० ॥

रत्नाकरावतारिकायामपि अथ दिक्पटाः प्रकटयन्ति भवत्वेतावदास्वरूपो मोक्षः स तूपात्तस्त्रीशरीरस्यात्मनः इति न मृष्यामहे । न खलु स्त्रियो मुक्तिभाजो भवन्ति । तथाच प्रभाचन्द्रः । स्त्रीणां न मोक्षः पुरुषेभ्यो हीनत्वान्नपुंसकादिवदिति। अत्र ब्रूमः सामान्येनात्र धर्मित्वेनोपात्ताः स्त्रियो विवादास्पदीभूता वा प्राचि पक्षे पक्षैकदेशासिद्धसाध्यता असंख्यातवर्षायुष्कदुष्षमादिकालोत्पन्नतिर्यगादिभव्यादिस्त्रीणां त्वयं सौतामस्माभिरपि मोक्षाभावस्याभिधानात्, द्वितीये तु न्यूनता पक्षस्य विवादास्पदीभूतेति विशेषणं विना नियतस्त्रीलाभाभावात् । प्रकरणादेव तल्लाभे पक्षोपादनमपि तत एव कार्यं न स्यात् तथाप्युपादाने नियतस्यैव तस्योपादानमवदातं यथा धानुष्कस्य नियतस्यैव लक्ष्यस्योपदानमिति हेतुरतः पुरुषापकर्षोऽपि वर्णितो गुणस्यः किं सम्यग्दर्शनादिरत्नत्रयाभावेन विशिष्टसामर्थ्यासत्त्वेन पुरुषानभिवन्द्यत्वेन स्मारणाद्यकर्तृत्वेनामहर्द्धिकत्वेन मायादिप्रकर्षवत्त्वेन वा । प्राचि प्रकारे पुनः स्त्रीणां रत्नत्रयाभावः सचीवरपरिग्रहत्वेन चारित्राभावादिति चेत्तदनुपपन्नम् । यतः परिग्रहरूपता चीवरस्य शरीरसंपर्कमात्रेण परिभुज्यमानत्वेन मूर्च्छाहेतुत्वेन वा भवेत् । प्रथमपक्षे ह्रिन्यादिना शरीरसंपर्किणाप्यपरिग्रहेण व्यभिचारः । द्वितीयप्रकारे चीवरपरिभोगस्तासामशक्यत्यागतया गुरूपदेशाद्वा । नाद्यः पक्षो यतः संयमस्यापि प्राणानपि त्यजन्त्यो या संदृश्यन्ते तासामेकान्तिकाल्पीनिका वस्त्रसंवरपिनीनां वस्त्रचीवरं प्रति का नामाशक्यत्यागता । अपरं निस्वाध कार्थिदिदानीमपि प्रेक्ष्यन्त एव द्वितीयपक्षोऽपि न सङ्गः यतो निर्ग्रन्थजनेन दिग्वरसिंहा परमगुरुणा भगवता [illegible] यदेव भवने [illegible] चीवरोपकरणं "मा कप्पइ निग्गंथीए अचेलाए होत्तए" इत्यादिना" यदिदं प्रति[illegible] [illegible] । तदा [illegible]

पार्जनगोचरेण सत्त्वेन भवितव्यमिति नियमः समस्त्यन्यथा पङ्ग्वामनात्यन्तरोगिणः पुमांसोऽपि स्त्रीभिरभिभूयमाना दृश्यन्त इति तेऽपि तुच्छशरीरसत्त्वाः कथं तथाविधसिद्धिनिबन्धनसत्त्वकभाजो भवेयुः । यथा तु तेषां शरीरसामर्थ्यासत्त्वेऽपि मोक्षसाधनसामर्थ्यमविरुद्धं तथा स्त्रीणामपि । मत्स्यपि पक्षे मोक्षाभ्युपगमे गृहिणः कुतो न मोक्ष इति चेन्न मत्स्वसद्भावाद्धि गृही पक्षे ममत्वरहितो, ममत्वमेव परिग्रहः । सति हि ममत्वे नग्नोऽपि परिग्रहवान् भवति शरीरेऽपि तद्भावात् । आर्यिकायाश्च ममत्वाभावादुपसर्गोपासक्तमिवाम्बरमपरिग्रहः । न हि यतेरपि ग्रामं गृहं वनं वा प्रतिपन्नमनो ममत्वादन्यच्छरणमस्ति नच निगृहीतात्मनां महात्मनां कस्मिंचित्क्वचिदपि मूर्च्छास्ति । तथाहि "निर्वाणस्त्रीप्रमयपरमप्रीतिनीमस्पृहाणां, मूर्च्छा तासां कथमिव भवेत्क्वापि संसारभागे । भोगे रागे रहसि सजने सज्जने दुर्जने वा, यासां स्वान्तं किमपि भजते नैव वैषम्यमुद्राम् । उक्तञ्च " अवि अप्पणो वि देहंमि, नायरंति ममाइयंति" एतेन मूर्च्छाहेतुत्वेनेत्यपि पक्षः प्रतिक्षिप्तः शरीरवच्चीवरस्यापि कस्मिंश्चित्प्रति मूर्च्छाहेतुत्वाभावेन परिग्रहरूपत्वाभावात् । तन्न सम्यग्रत्नत्रयाभावेन स्त्रीणां पुरुषेभ्योऽपकर्षः नापि विशिष्टसामर्थ्यासत्त्वेन, यतस्तदपि तासां किं सप्तमपृथ्वीगमनाभावेन वादादिलब्धिरहितत्वेनाऽल्पश्रुतत्वेनानुपस्थाप्यता पाराञ्चितकशून्यत्वेन वा भवेत् । न तावदाद्यः पक्षो यतोऽत्र सप्तमपृथ्वीगमनाभावो यस्मिन्नेव जन्मनि तासां मुक्तिगामित्वं तत्रैवोच्यते सामान्येन वा प्राचि पक्षे चरमशरीरिभिरनैकान्तः । द्वितीयेत्वयमाशयो यथैव स्त्रीणां सप्तमपृथ्वीगमनसमर्थतीव्रतराशुभपरिणामे सामर्थ्याभावादपकर्षस्तथा मुक्तिगमनयोग्योत्कृष्टशुभपरिणामेऽपि चरमशरीरिणान्तु प्रसन्नचन्द्रराजर्षिप्रमुखाणामुभयत्रापि सामर्थ्यास्तित्वान्नापकर्षस्तदयुक्तं यतो नायमविनाभावः प्रामाणिको यदुत्कृष्टाशुभगत्युपार्जनसामर्थ्याभावे सत्युत्कृष्टशुभगत्युपार्जनसामर्थ्येनापि न भवितव्यम् । अन्यथा प्रकृष्टशुभगत्युपार्जनसामर्थ्याभावे प्रकृष्टाशुभगत्युपार्जनसामर्थ्यं नास्तीत्यपि किं न स्यात्तथा चानन्त्यानां सप्तमपृथिवीगमनं न भवेत् । अथ वादादिलब्धिरहितत्वेन स्त्रीणां विशिष्टसामर्थ्याभावं यत्र खल्वैहिकक्रियादिविशेषा वारणादिलब्धीनामपि हेतुः संयमविशेषरूपं सामर्थ्यं नास्ति तत्र मोक्षहेतुस्तद्भविष्यतीति कः सुधीः श्रद्धीत तदचारु व्यभिचारात् । माषतुषादीनां तदभावेऽपि विशिष्टसामर्थ्योपलब्धेः । नच लब्धीनां संयमविशेषहेतुकत्वमागमिकं कर्मोदयक्षयक्षयोपशमोपशमहेतुकतया तासां तत्रोदितत्वात्तथा चावाचि "उदयखयखओवसमो-वसमस मुत्था बहुप्पगाराओ । एवं परिणामवसा, लद्धीओ हवंति जीवाणं" चक्रवर्तित्वबलदेववासुदेवत्वादिस्थानयोऽपि हि लब्धयो नच संयमसद्भावनिबन्धनास्तत्प्राप्तिः सन्तु वा तन्निबन्धनाल्लब्धयस्तथापि स्त्रीषु तासां सर्वासामभावोऽभिधीयते नियतानामेव च । नाद्यपक्षधरत्वादिलब्धीनां कासांचिदेव तासु प्रतिषेधादामर्षौषध्यादीनां तु भूयसीनां भावात् । द्वितीयपक्षे तु व्यभिचारः पुरुषाणां सर्ववादादिलब्ध्यभावेऽपि विशिष्टसामर्थ्यस्वीकारात् । अकेवलानामेषामेव चक्रवर्त्यादीनामपि च मोक्षसंभवात् अल्पश्रुतत्वमपि मुक्त्यवाप्त्यानुगुणविशिष्टसामर्थ्यं माषतुषादिभिर्व्यभिचारितमित्यनुद्घोष्यमेव । अनुपस्थाप्यता पाराञ्चितकशून्यत्वेनेत्यप्ययुक्तं, यतो न तन्निषेधाद्विशिष्टसामर्थ्याभावः प्रतीयते योग्यतापि हि चित्रः शास्त्रे नि-

शुष्युपदेशः उक्तंच। 'संवरनिर्जररूपो बहुप्रकारस्तपोविधिः शास्त्रे रोगचिकित्साविधिरिव कस्यापि कथंचिदुपकारी" पुरुषान् निबन्धन्त्वमपि योषितो नापकर्षाय। यतस्तदपि सामान्येन गुणाधिकपुरुषापेक्षं वा। आद्ये असिद्धतादोषः तीर्थकरजनन्यादयो हि पुरन्दरादिभिरपि प्रणता किमङ्ग! शेषपुरुषैः। द्वितीये तु शिष्या अपि आचार्यैर्नाभिवन्द्यन्त एवेति तेऽपि ततोऽपकृष्यमाणत्वेन निर्वृत्तिभाजो न भवेयुः। नचैवं चाण्डरुद्रादिशिष्याणां शास्त्रे तच्छ्रवणादिति सूक्ष्मेहेतोर्व्यभिचारः। एतेन स्मरणाद्यकर्तृकत्वमपि प्रतिक्षिप्तम्। अथ पुरुषविषयं स्मारणाद्यकर्तृत्वमत्र विवक्षितं नतु स्मारणाद्यकर्तृत्वमात्रम्। न च स्त्रियः कदाचन पुंसां स्मारणादीन् कुर्वन्तीति न व्यभिचार इति चेत्तर्हि पुरुषेति विशेषणं करणीयं करणेऽप्यसिद्धतादोषः स्त्रीणामपि कासांचित्पारगतागमरहस्यवासितसत्त्वानां क्वापि तथाविधावसरे समुच्छृङ्खलप्रवृत्तिपराधीनसाधुस्मारणादेरविरोधात्। अथामहर्द्धिकत्वेन स्त्रीणां पुरुषेभ्योऽपकर्षः सोऽपि किमाध्यात्मिकीं समृद्धिमाश्रित्य बाह्यां वा। नाध्यात्मिकीं सम्यग्दर्शनादिरत्नत्रयाद्यात्मिकां तासामपि सद्भावात्। नापि बाह्यामेवं हि महत्यास्तीर्थकरलक्ष्म्या गणधरादयश्चक्रवर्त्यादिलक्ष्म्याश्चेतरक्षत्रियादयो न भाजनमिति तेषामप्यमहर्द्धिकत्वेनापकृष्यमाणत्वान्मुक्त्यभावो भवेत्। अथ यासौ पुरुषवर्गस्य महती समृद्धिस्तीर्थकरत्वलक्षणा सा स्त्रीषु नास्तीत्यमहर्द्धिकत्वमासां विवक्ष्यते तदानीमप्यसिद्धता स्त्रीणामपि परमपुण्यपात्रभूतानां कासांचित्तीर्थकृत्त्वाविरोधात्तद्विरोधसाधकप्रमाणस्य कस्याप्यभावात्तस्याद्यापि विवादास्पदत्वादनुमानान्तरस्य चाभावात्। मायादिप्रकर्षवत्त्वेनत्वप्यप्रशस्यं तस्य स्त्रीपुंसयोस्तुल्यत्वदर्शनादागमे च श्रवणात् श्रूयते हि चरमशरीरिणामपि नारदादीनां मायादिप्रकर्षवत्त्वं तत्र पुरुषेभ्यो हीनत्वं स्त्रीनिर्वाणनिषेधे साधीयान् हेतुः यत्पुनर्निर्वाणकारणं ज्ञानादिपरमप्रकर्षः स्त्रीषु नास्ति, परमप्रकर्षत्वात् सप्तमपृथ्वीगमनकारणापुण्यपरमप्रकर्षवदिति तेनैवोक्तं तत्र मोहनीयस्थितिपरमप्रकर्षेण स्त्रीवेदादिपरमप्रकर्षेण च व्यभिचारः। नास्ति स्त्रीणां मोक्षः परिग्रहवत्त्वात् गृहस्थवदित्यपि न पेशलं धर्मोपकरणचीवरस्यापरिग्रहत्वेन प्रसाधितत्वादिति स्त्रीनिर्वाणे संक्षेपेण बाधकोद्धारः। साधकोपन्यासस्तु मनुष्यस्त्री काचिन्निर्वाणयोग्याविकलतत्कारणत्वात्पुरुषवत्। निर्वाणस्य हि कारणमविकलं सम्यग्दर्शनादिरत्नत्रयं तच्च तासु विद्यत एवेत्यादित एवोक्तमिति। नासिद्धमेतद्विपक्षादपुसकादेरत्यन्तव्यावृत्तत्वान्न विरुद्धमनैकान्तिकं वा तथा मनुष्यस्त्रीजातिः कयाचिद्व्यक्त्या मुक्त्यविकलकारणवत्या तद्वती प्रव्रज्याधिकारित्वात्पुरुषवत्। न चैतदसिद्धं साधनं "गुव्विणी बालवच्छा य पव्वावेउं न कप्पइ त्ति" सिद्धान्तेन तासां तदधिकारित्वप्रतिपादनात्तद्विशेषनिषेधस्य शेषाभ्यनुज्ञानान्तरीयकत्वात् दृश्यन्ते च सांप्रतमप्येता कृतशिरोलुञ्चना रजोहरणपिच्छिका मार्गानुसारीत्यनुष्ठानश्रद्धालुतामतिस्वसिद्धत्वोऽधिकारि(?) कुतो नैतासां प्रव्रज्याधिकारित्वसिद्धिर्यतो न मुक्तिः स्यादिति। रत्ना० ७ परि० ॥

इत्थि (स्त्री) लिंगसिद्धकेवलनाण-स्त्रीलिङ्गसिद्धकेवलज्ञान-न० स्त्रीलिङ्गे वर्तमाना ये सिद्धास्तेषां केवलज्ञानं स्त्रीलिङ्गसिद्धकेवलज्ञानम्। केवलज्ञानभेदे,। आ० म० प्र०। इत्थिलिंगेण सिद्धाणं जं नाणं तं इत्थिलिंगसिद्धकेवलनाणंति। आ० चू० १ अ० ॥

इत्थि (स्त्री) वउ-स्त्रीवाक्-स्त्री० खट्वामालेत्यादिलक्षणायां स्त्रीलिङ्गप्रतिपादिकायाम्भाषायाम्,-प्रज्ञा० ११ पद० ॥

इत्थि (स्त्री) वयण-स्त्रीवचन-न० वचनभेदे,-स्त्रीवचनं वीणा कन्यादीति। आचा० २ श्रु० १ अ० ३ उ०। प्रज्ञा० ॥

इत्थि (स्त्री) वस-स्त्रीवश-पु० ६ त० स्त्रीवशीभूते, रुयायत्तायां च। वाच०। ध्य०। " इत्थी वसंगया बाला " स्त्रीवशङ्गता यतो युवतीनामाज्ञायां वर्तन्ते बाला अज्ञा रागद्वेषोपहतचेतस इति। सूत्र० १ श्रु० ३ अ० ४ उ०।

स्त्रीवशङ्गतानामधमत्वञ्च यथा-

सकंगुलि वग्गहावे, किंकरे तित्थएहायए चेव।
गच्छावरं खिहदसु-एएपुरिसाधमाउत्त ॥

जदा इत्थी भणितो रुंधेहि तदा भणति अहं उट्ठेमि ताव तुमं अधिकरणीति त्थारं ठवेहित्ति तस्स त्थारं ठवणीते सरंगुलीतो भणति इत्थीयवणाओ दग माडेति सो य भोगत्थं किनो घयपमाय य सुहसुत्ते पगे रोएंतो आवेमिसि धम्ुरावो किंकरो पनाते छाधितो इत्थी भणति किंकरेमि त्ति जं भणति तं करेतित्ति तित्थएहाय तो जयामि ति भणति व तदा इत्थी भणाति गच्छ तलागं गच्छ एहातो कम्मं भेजुमा गच्छाहित्ति गद्दावरंखी भोयणकाले परिवेसणाए इतो धाहित्ति भणिताहे गिद्धो स्वयिकमतो भोयणं उट्ठेत्ति इत्थी भणितो कम्मं करेहित्ति ताहे पडिभणति इदं भगवं इदंत्ति गेण्ह भत्तयं पुत्तमरं एयं गेण्ह आ कम्मं करेमीत्यर्थः। एते त्थ पुरिसा अधमा। नि० चू० १५ उ०।

धि तेसिं गामनगराणं, जेसिं इत्थी पणायिगा।
ते य धिक्कया पुरिसा, जे इत्थीए वसंगया ॥

धिगिन्द्रावसानेषां ग्रामनगराणां येषां स्त्रीप्रणायिका प्रवर्त्तेन स्वतन्त्रतया नायिका अत्र धिग्योगे द्वितीयाप्राप्तावपि षष्ठी प्राकृतत्वात्तथा तेऽपि पुरुषा धिक्कृता धिक्कारं प्राप्तवन्तो ये स्त्रीणां वशायत्ततां गताः। तथा।

इत्थीओ बलवं जत्थ, गामेसु नगरेसु वा।
सो गामो नगरं वावी, खिप्पमेव विणिस्सइ ॥

यत्र ग्रामेषु नगरेषु वा स्त्रियो बलवन्तः स ग्रामो नगरं वा क्षिप्रमेव विनश्यति। बहुवचनेनोपक्रमेऽपि जातौ बहुवचनमेकवचनं भवतीति ज्ञापनार्थः॥ व्य० प्र० १ उ०।

इत्थि (स्त्री) विग्गह-स्त्रीविग्रह-पु०-शरीरे,। व्य-उ० २ उ०। आचा०।

इत्थि (स्त्री) विण्णवणा-स्त्रीविज्ञापना-स्त्री० पुरुषनिमन्त्रणायाम, (स्त्रीसम्बन्धे) सूत्र० १ श्रु० ३ अ० ४ उ० (अत्र दोषादोषविचारः इत्थी शब्दे)

इत्थि (स्त्री) विप्पजह-स्त्रीविप्रजह-पु० स्त्रियो विविधैः प्रकारैः प्रकर्षेण च जहाति त्यजतीति स्त्रीविप्रजहः स्त्र्यादयो बहुत्वमिति बहुवचनात्स्थः। स्त्रीपरित्यागवति, " आरंसु मे परिज्जिया इत्थीविप्पजहे अणगारे " इति-दश० ८ अ०।

इत्थि (स्त्री) विप्परियासिया-स्त्रीविपर्यासिका-स्त्री० स्वात्मनि क्रियाविशेषे, "इत्थिय विप्परियासो इत्थीविप्परियासो। स्त्रीरूपं क्रिया ब्रह्मचर्यविनाशः इत्यर्थः विपर्यासो भम करेमिति " दशा० चू० ४ अ० ॥

इत्थि (त्थी) विलोयण-स्त्रीविलोचन-न० तैतिलापरनामधेये चक्षुसंज्ञके करणभेदे, विशे० (तदानयनादिकरणशब्दे वक्ष्यते)

इत्थि(त्थी)वेय-स्त्रीवेद-पुं०स्त्रियं यथावस्थितस्वभावतस्तत्सम्बन्धविपाकतश्च वेदयति ज्ञापयतीति स्त्रीवेदः । वैयायिकादिके स्त्रीस्वभावाविर्भावके कामशास्त्रे,।"सुपुरिसा इत्थिवेय खेयण्णा" स्त्रीवेदे खेदज्ञाः स्त्रीवेदो मायाबहुल इति निपुणा अपि स्त्रीणां वशं व्रजन्तीति।सूत्र० १ श्रु०४ अ० १ उ० । वेद्यत इति वेदः स्त्रियाः वेदः स्त्रीवेदः स्त्रियाः पुमांसं प्रत्यभिलाषः । तद्विपाकवेद्यं कर्म्माऽपि स्त्रीवेदः।स्त्रियाः पुमांसं प्रत्यभिलाषे, तद्विपाकवेद्ये नोकषायवेदनीयकर्म्मविशेषे च । प्रज्ञा० २३ पद० । यद्वशात्स्त्रियाः पुरुषं प्रत्यभिलाषो भवति । यथा पित्तवशान्मधुरद्रव्यं प्रति स फुंफुमादाहसमः यथा २ ज्वाल्यते तथा २ ज्वलति दहति च एवमबलापि यथा २ संस्पृश्यते पुरुषेण तथा २ अस्या अधिकतरोऽभिलाषो जायते भुज्यमानायान्तु उपकारीपदाहतुल्योऽभिलाषो मन्द इति स्त्रीवेदोदयः।कर्म्म०।स्था०। पं० सं०।सम्प्रति स्त्रीवेदकर्मोदयजनितो यः स्त्रीवेदस्तत्किंस्वरूप इत्यावेदयन्नाह।

इत्थिवेदेणं भंते ! किंपकारे पं० गो० फुंफुअग्गिसमाणे पण्णत्ते सेत्तं इत्थियाओ ॥

(इत्थीवेदे णं भंते इत्यादि) स्त्रीवेदेणमिति पूर्ववत् भदन्त किंप्रकारः किंस्वरूपः प्रज्ञप्तः । भगवानाह गौतम ! फुंफुकाग्निसमानः फुंफुका शब्दो देशीवचनत्वात् कारीषवाचकस्ततः कारीषाग्निसमानः परिमलनमदनदाहरूप इत्यर्थः प्रज्ञप्तः । जी० २ प्रति० ॥ (स्त्रीवेदस्य स्थितिः ठिई शब्दे । स्त्रीणां स्वभावादि इत्थी शब्दे) ॥

इत्थि (त्थी) वेयण्ण-स्त्रीवेदज्ञ-पुं० स्त्रीवेदो मायाप्रधान इत्येवं निपुणे, । सूत्र० १ श्रु० ४ अ० १ उ० ॥

इत्थि(त्थी) संकिलिट्ठ-स्त्रीसंक्लिष्ट-त्रि० स्त्रीप्रतिसेविनि, प्रव०।

इत्थि (त्थी) संग-स्त्रीसङ्ग-पुं० स्त्रीषु प्रसङ्गे, सूत्र० २ श्रु० २ अ० ॥ (तच्च प्रधानं संसारकारणमिति इत्थी शब्दे)

इत्थि (त्थी) संथव-स्त्रीसंस्तव-पुं० स्त्रीभिः सह संवासे, सूत्र० १ श्रु०४ अ० १ उ० ।(स च साधुभिर्न विधेय इति इत्थी शब्दे)

इत्थि (त्थी) संपरिवुड-स्त्रीसंपरिवृत-त्रि० स्त्रीभिः समन्तात्परिवेष्टिते, " समंता परिवेढिओ परिवुडो भण्णति परिमाण जाव [illegible] पंच वा [illegible] परतो [illegible] अप[illegible] [illegible] [illegible] [illegible] य दोसा एस [illegible] इमा णिज्जुत्तीगाहा—

[illegible] [illegible] मज्झे, मणंसि [illegible] वट्टंतो ॥
[illegible] [illegible], [illegible] अणुमंतो ॥९०॥

[illegible] [illegible] [illegible] [illegible] परिवुडो भण्णति । नि० चू० २ उ० ॥

इत्थि (त्थी) संवास-स्त्रीसंवास-पुं० स्त्रीभिः सार्द्धं परिभोगे,

[illegible] [illegible], [illegible] [illegible] ॥
[illegible] [illegible] [illegible], संवासेण [illegible] ॥९१॥

([illegible]) [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] [illegible]

कान्तिर्यं परित्यज्य संयमशरीराक्रियन्ति । सूत्र० १ श्रु०४ अ० १ उ० । स्त्रीभिः सार्द्धमेकत्र वसतौ, ॥

एवं विवेगमादाय, संवासो न विकप्पए दविए ॥

तदेवमनन्तरोक्तया नीत्या विपाकं स्वानुष्ठानमादाय प्राप्य विवेकमिति वा कश्चित्पावस्तद्विपाकं विवेकआदाय गृहीत्वा स्त्रीभिआत्मपरिपन्थिनीभिः सार्द्धं संवासो यत्नतिरेकत्र न कल्पते न युज्यते कस्मिन्द्रव्यभूते मुक्तिगमनयोग्ये रागद्वेषरहिते वा साधौ यतस्ताभिः सार्धं संवासोऽवश्यं विवेकिनामपि सदनुष्ठानविघातकारीति । सूत्र० १ श्रु० ४ अ० १ उ० ।

इत्थि (त्थी) संसत्त-स्त्रीसंसक्त-त्रि० स्त्रीभिः संगते, " ऊरु कोप्परमादीहिं स घट्टंतो संसत्तो भवति दिट्ठीए वा परोप्परं संसत्तो संगतो इति " तथा च निर्युक्तिः संसत्ते ऊरुगादि घट्टंतो इति ॥

दुविधं च होति मज्झं, संसत्ता दिट्ठिदिट्ठिअंतो वा ॥
भावो व तासु णिहितो, एमे वि त्थीए पुरिसेसु॥९२॥

च सद्दाओ संसत्तं पि दुविधं ऊरुगादि घट्टंतो संसत्तो दिट्ठिए वा इत्थीए वा मज्झे अहवा संसत्तस्स इमं वक्खाणं तेण तासु भावो णिहितो णिवेसितो ताहिं वा तम्मि णि सेवितो परस्पर गृह्णानीत्यर्थः । नि०चू० । स्त्रीभिः समाकीर्णे (सेविते) स्थानादौ च । स्था.१०ठा. (तच्च साधुभिर्वर्जनीयमिति बंभचेरगुत्ति शब्दे)

इत्थि (त्थी) सद्धा-स्त्रीश्रद्धा-स्त्री० स्त्रीश्रद्धाने, सूत्र० १ श्रु० ४ अ० १ उ० । (तत्कथादिकं इत्थी शब्दे)

इत्थि (त्थी) सहाव-स्त्रीस्वभाव-पुं० स्त्रीया इव स्वभावो यस्य । अन्तःपुररक्षके महल्लके, ६ त० स्त्रीणां शीले च । वाच० । सूत्र० । (स्त्रीस्वभावपरिज्ञाने कथानकं इत्थी शब्दे)

इत्थि (त्थी) सेवा-स्त्रीसेवा-स्त्री-६ त० स्त्रीसम्भोगे, व्यवायमधर्मेण नारीसेवने, । वाच० । स्त्रीसेवादय इह परत्र वा अकल्याणकारिण इति । व्य० । " अन्नपानैर्हरेद्वालां यौवनस्थां विभूषया । वेश्यां स्त्रीमुपचारेण वृद्धां कर्कशसेवया " इति-आ० म० द्वि० । आ० चू० ।

इत्थी-स्त्री-स्त्री०स्त्यायतेस्तृणातेर्वा ड्रट् टित्वाद्ङीपि स्त्रीति प्रव० ८६ द्वा० । उत्त० । " स्त्रिया इत्थी " १३० इति सूत्रेण स्त्रीशब्दस्य इत्थी इत्यादेशो वा-पक्षे-थीति । प्रा० ८ अ०२पा० योषिति,-अनु० । पंचा० । तं० ।

(१५) स्त्रीपुरुषकस्य परिग्रहित्वं तासु सर्वेन्द्रियगुप्तेन भाव्यम्।
(१६) स्त्रीकरस्पर्शादिनिषेधः।
(१७) स्त्रिया सार्द्धं विहारस्वाध्यायाहारोच्चारप्रस्रवणपरिष्ठापनिका धर्मकथादिनिषेधः।
(१८) स्त्रीणां निर्यानादिनिषेधः।
(१९) स्त्रीस्थानदूषणं तत्प्रसङ्गत्यागस्तत्सङ्गातिक्रमे गुणाश्च।
(२०) मतान्तरीयपूर्वपक्षदूषणानि ।

(१) स्त्रीलक्षणं तच्छब्दनिक्षेपो यथा ।

" योनेर्मृदुत्वमस्थैर्य-मुग्धता क्लीवता स्तनौ । पुंस्कामितेति लिङ्गानि सप्त स्त्रीत्वे प्रचक्षते इति । तथान्यत्राप्युक्तम् । "स्तनकेशवती स्त्री स्यादिति " । स्था० ३ ठा० । जी० । स्त्रीशब्दस्य निक्षेपो यथा–तत्र नाम स्थापने क्षुण्णत्वादनादृत्य स्त्रीशब्दस्य द्रव्यादिनिक्षेपार्थं निर्युक्तिकार आह—

दव्वाभिलाव चिंधे, दव्वे भावे य इत्थिणिक्खेवो ।
अहिलावे तह सिद्धी, भावे वेयंमि उवउत्तो ॥ ५६ ॥

तत्र द्रव्यस्त्री द्वेधा । आगमतो नो आगमतश्च । आगमतः स्त्रीपदार्थज्ञस्तत्र चानुपयुक्तोऽनुपयोगो द्रव्यमिति कृत्वा नो आगमतो ज्ञशरीरभव्यशरीरव्यतिरिक्ता त्रिधा । एकभविका बद्धाऽऽयुष्काभिमुखनामगोत्रा चेति । चिह्नयते ज्ञायतेऽनेनेति चिह्नं स्तननेपथ्यादिकं चिह्नं मात्रेण स्त्रीचिह्नं स्त्री । अपगतस्त्रीवेदछद्मस्थः केवली वा अन्यो वा स्त्रीवेषधारी यः कश्चिदिति । वेद स्त्री तु पुरुषाभिलाषरूपः स्त्रीवेदोदयः । अभिलापनार्थी तु निर्युक्तिकृदेव गाथापश्चार्द्धेनाह । अभिलाप्यते इत्यभिलापः स्त्रीलिङ्गाभिधानशब्दः । तद्यथा । शाला माला सिद्धिरिति । भावस्त्री तु द्वेधा । आगमतो नो आगमतश्च । आगमतः स्त्रीपदार्थज्ञस्तत्र चोपयुक्त उपयोगो भाव इति कृत्वा नो आगमतस्तु भावविषये निक्षेपे वेदे स्त्रीवेदरूपे वस्तुन्युपयुक्ता तदुपयोगानन्यत्वाद्भावस्त्री भवति । यथा अग्न्यावुपयुक्तो माणवकोऽग्निरेव भवत्येवमत्रापि । यदि वा स्त्रीवेदनिवर्तकान्युदयप्राप्तानि यानि कर्माणि तेषूपयुक्तेति तान्यनुभवन्ति भावस्त्रीति एतावानेव स्त्रियो निक्षेप इति । सूत्र० १ श्रु० ४ अ० १ उ० ।

(२) स्त्रीवक्तव्यता तद्भेदवर्णनञ्च ।

से किं तं इत्थीओ २ तिविहाओ पण्णत्ताओ तंजहा तिरिक्खजोणित्थीओ मणुस्सित्थीओ देवित्थीओ से किं तं तिरिक्खजोणित्थीओ २ तिविधाओ पण्णत्ताओ तंजहा जलयरीओ थलयरीओ खहयरीओ । से किं तं जलयरीओ २ पंचविधाउ पण्णत्ताउ तंजहा मच्छीउ जाव सुंसुमारीउ सेत्तं जलयरीउ । से किं तं थलयरीउ २ दुविहाउ पण्णत्ताओ तंजहा चउप्पदीउ य परिसप्पिणीउ य । से किं तं चउप्पदीउ २ चउव्विहाउ पण्णत्ता तंजहा एगखुरीउ जाव सणप्फईउ । सेकिंतं परिसप्पिणीउ २ दुविहा पण्णत्ता तंजहा उरगपरिसप्पिणीउ य भुयगपरिसप्पिणीओ य । से किं तं उरगपरिसप्पिणीओ २ तिविधाओ पण्णत्ताओ तंजहा अहीओ अयगरीओ महोरगीओ सेत्तं उरगपरिसप्पिणी । से किं तं भुयपरिसप्पिणी २ अणेगविधाओ पण्णत्ताओ तंजहा गोहीओ णउलीओ सेधाओ सेल्लाओ सरडीओ सेरंधीओ सावाओ खराओ पंचलोइयाओ चउप्पइयाओ मूसियाओ मुगुंसियाओ घरोलियाओ गोहियाओ जोहियाओ विरालियाओ सेत्तं भुयपरिसप्पिणीओ । से किं तं खहयरीओ २ चउव्विहा पण्णत्ताओ तंजहा चम्मपंखीओ जाव सेत्तं खहयरीओ सेत्तं तिरिक्खजोणित्थियाओ । से किं तं मणुस्सित्थियाओ २ तिविधाओ पण्णत्ताओ तंजहा कम्मभूमियाओ अकम्मभूमियाओ अंतरदीवियाओ । से किं तं अंतरदीवियाओ २ अट्ठावीसतिविधाओ पण्णत्ता तंजहा एगुरूईओ आभासीओ जाव सुद्धदंताओ सेत्तं अंतरदीवे । से किं तं अकम्मभूमियाओ २ तीसतिविधाओ पण्णत्ता तंजहा पंचसु हेमवएसु पंचसु एरण्णवएसु पंचसु हरिवासेसु पंचसु रम्मगवासेसु पंचसु देवकुरूसु पंचसु उत्तरकुरूसु सेत्तं अकम्मभूमगमणुस्सीओ । से किं तं कम्मभूमियाओ २ पण्णरसविधाओ पण्णत्ताओ तंजहा पंचसु भरहेसु पंचसु एरवएसु पंचसु महाविदेहेसु सेत्तं कम्मभूमगमणुस्सीओ २ ।

(सेकिंतमित्यादि) अथ कास्ताः स्त्रियः सूरिराह स्त्रियस्त्रिविधाः प्रज्ञप्तास्तिर्यग्योनिस्त्रियो मनुष्यस्त्रियो देवस्त्रियश्च (सेकिंतमित्यादि) तिर्यग्योनिस्त्रियस्त्रिविधास्तद्यथा जलचर्यः स्थलचर्यः खचर्यश्च (सेकिंतमित्यादि) मनुष्यस्त्रियोऽपि त्रिविधास्तद्यथा कर्मभूमिका अकर्मभूमिका अन्तरद्वीपिकाश्च । कृष्यादिकर्मप्रधाना भूमिः कर्मभूमिः भरतादिका पञ्चदशधा तत्र जाताः कर्मभूमिजा एवमकर्मभूमिजा नवरमकर्मभूमिर्भोगभूमिरित्यर्थः । देवकुर्वादिका त्रिंशद्विधा अन्तरे मध्ये समुद्रस्य द्वीपा ये ते तथा तेषु जाता आन्तरद्वीपास्त एवान्तरद्वीपिकाः । स्था० ३ ठा० ॥

से किं तं देवित्थियाओ २ चउव्विहाओ पण्णत्ताओ तंजहा भवनवासिदेवित्थियाओ वाणमंतरदेवित्थियाओ जोतिसियदेवित्थियाओ वेमाणियदेवित्थियाओ से किं तं भवणवासिदेवित्थियाओ २ दसविधाओ पण्णत्ताओ तंजहा असुरकुमारभवणवासिदेवित्थियाओ जाव थणितकुमार–भवणवासिदेवित्थियाओ सेत्तं भवणवासिदेवित्थियाओ । से किं तं वाणमंतरदेवित्थियाओ २ अट्ठविधाओ पण्णत्ताओ तंजहा पिसायवाणमंतरदेवित्थियाओ जाव सेत्तं वाणमंतरदेवित्थियाओ । से किं तं जोतिसियदेवित्थियाओ २ पंचविहाओ पण्णत्ताओ तंजहा चंदविमाणजोतिसियदेवित्थियाओ सूरविमाणदेवित्थियाओ गहविमाणदेवित्थियाओ णक्खत्तविमाणदेवित्थियाओ ताराविमाणजोतिसियदेवित्थियाओ सेत्तं जोतिसियदेवित्थियाओ । से किं तं वेमाणियदेवित्थियाओ २ दुविहाओ पण्णत्ताओ तंजहा सोहम्मकप्पवेमाणियदेवित्थियाओ ईसाणकप्पवेमाणियदेवित्थियाओ सेत्तं वेमाणित्थियाओ । जी० २ प्रति० । (सुगमत्वाट्टीका म

स्त्रियो देवमानुषभेदाद्द्विविधा
प्रस्तरक्षेप्यचित्रादिनिर्मिताः ।
च स्त्री [illegible]

[illegible] कतिविधा मस्तकात् [illegible] बेति। पुनर्वैवंक्त त्रिविधा भवन्ना- [illegible] पदं श्रेणिनृपनकृत्वा [illegible] बेति। सू० १ उ०। [illegible] "[illegible] दुविधा [illegible] [illegible] कस्मरिया [illegible] [illegible] ति [illegible]। नि० चू० १६ उ०॥

चत्तारि धूमसिहाओ पन्नत्ताओ तंजहा वामा णामेगा वामावत्ता।४। एवामेव चत्तारि इत्थियाओ पन्नत्ता तंजहा वामा णामेगा वामावत्ता।४। चत्तारि अग्गिसिहाओ पन्नत्ताओ तंजहा वामा णामेगा वामावत्ता।४। एवामेव चत्तारि इत्थियाओ पन्नत्ताओ तंजहा वामा णामेगा वामावत्ता।४। चत्तारि वायमंडलिया पन्नत्ताओ तंजहा वामा णामेगा वामावत्ता।४। एवामेव चत्तारि इत्थियाओ पन्नत्ताओ तंजहा वामा णामेगा वामावत्ता॥४॥

[illegible]

चत्तारि कूडागारसालाओ पन्नत्ताओ तंजहा गुत्ता णामेगा गुत्तदुवारा, गुत्ता णामेगा अगुत्तदुवारा, अगुत्ता णामेगा गुत्तदुवारा, अगुत्ता णामेगा अगुत्तदुवारा। एवामेव चत्तारि इत्थीओ पन्नत्ताओ तंजहा गुत्ता णामेगा गुत्तिंदिया [illegible] ॥४॥

[illegible]

पद्मगन्धा च मीनगन्धा च चित्रिणी। शङ्खिनी क्षारगन्धा च मदगन्धा च हस्तिनी।१। ताश्च स्त्रीणामुक्तस्वभावत्वं "गिमदो इन्दियत्ति" प्रोत्साहिता भवन्तीति। औप०॥

(३) स्त्रीणां स्वभावादि परिज्ञानस्यावश्यकता तत्स्वरूपवर्णनञ्च

तत्र स्वभावपरिज्ञानं यथा॥

जस्सित्थिओ परिण्णाया सव्वकम्मावहाओ से दक्खू॥

यस्य स्त्रियः स्वरूपतस्तद्विपाकतश्च परिज्ञाता भवन्ति। सर्वकर्माण्यावहन्तीति सर्वकर्मावहाः सर्वपापोपादानभूताः स एवा द्राक्षीत् स एव यथावस्थितं संसारस्वभावं ज्ञातवानिति। एतदुक्तं भवति स्त्रीस्वभावपरिज्ञानेन तत्परिहारेण च स भगवान् परमार्थदर्शीति। आचा० १ श्रु० ३ अ० १ उ०।

स्त्रीणां स्वभावादिपरिज्ञानञ्च निर्युक्तौ यथा॥

सुहसायगसमणा, कीरंति अप्पसत्तिया पुरिसा॥
दीसंति सूरवादी, णारीवसगा ण ते सूरा॥६१॥

[illegible] स्त्रीभि- [illegible] स्त्रीनामापि [illegible] क्रियन्ते। तथा [illegible]। शूरमात्मानं वदितुं शीलं येषां ते [illegible] नारीवशगा [illegible] ते शूरा इति। [illegible]

[illegible]

धर्मे श्रुतचारित्राख्ये दृढा निश्चला मतिर्यस्य स तथा पर्यभूतः स इन्द्रियनोइन्द्रियारिजयाच्छूरस्तथा सात्त्विको महासत्त्वोपेतोऽस्मावेव धीरः स्वकर्मदारणसमर्थोऽसावेवेति किमिति यतो नैव धर्मनिरुत्साहः सदनुष्ठाननिरुद्यमः सत्पुरुषाचीर्णमार्गपरिभ्रष्टः पुरुषः सुष्ठु दमदान्तोऽपि शूरो भवतीति ॥

एतानेव दोषान् पुरुषसंबन्धेन स्त्रीणामपि दर्शयितुमाह ।

एते चेव य दोसा, पुरिससमाए वि इत्थियाणं पि ।
तम्हाण अप्पमाओ, विरागमग्गंमि तासिं तु ॥६३॥

ये प्राक् शीलप्रध्वंसादयः स्त्रीपरिचयादिभ्यः पुरुषाणामभिहिता एत एव न न्यूनाधिकाः पुरुषेण सह यः समयः संबन्धस्तस्मिन् स्त्रीणामपि यस्माद्दोषा भवन्ति तस्मात्तासामपि विरागमार्गे प्रवृत्तानां पुरुषपरिचयादिपरिहारलक्षणोऽप्रमाद एव श्रेयानिति । स्त्रीपरिज्ञाध्ययने च विस्तरेण स्वापरिज्ञानम्प्रतिपादितम् तद्यथा—

जे मायरं च पियरं च, विप्पजहा य पुव्वसंजोगं ।
एगे सहिते चरिस्सामि, आरतमेहुणो विवित्तेसु ॥१॥

यः कश्चिदुत्तमसत्त्वो मातरं पितरं जननीं जनयितारमेतद्ग्रहणादन्यदपि भ्रातृपुत्रादिकं पूर्वसंयोगं तथा श्वश्रूश्वशुरादिकं पश्चात्संयोगञ्च विप्रहाय त्यक्त्वा चकारौ समुच्चयार्थौ एको मातापित्राद्यभिष्वङ्गवर्जितः कषायरहितो वा तथा सहितो ज्ञानदर्शनचारित्रैः स्वस्मै वा हितः स्वहितः परमार्थानुष्ठानविधायी चरिष्यामि संयमं करिष्यामीत्येवं कृतप्रतिज्ञः । तामेव प्रतिज्ञां सर्वप्रधानभूतां लेशतो दर्शयति आरतमुपरतं मैथुनं कामाभिलाषो यस्यासावारतमैथुनस्तदेवंभूतो विविक्तेषु स्त्रीपशुपण्डकवर्जितेषु स्थानेषु चरिष्यामीत्येवं सम्यगुत्थानेनोत्थाय विहरतीति क्वचित्पाठो (विवित्तेसित्ति) विविक्तं स्त्रीपण्डकादिविवर्जितं स्थानं संयमानुपरोध्येषितुं शीलमस्य तथेति ।

तस्यैवं कृतप्रतिज्ञस्य साधोर्यद्भवत्यविवेकिस्त्रीजनाचद्दर्शयितुमाह—

सुहुमे णं तं परक्कम्म, छन्नपएण इत्थिओ मंदा ।
उवायं पि ता उ जाणंसु, जहा लिस्संति भिक्खुणो एगे ॥२॥

तं महापुरुषं साधुं सूक्ष्मेणापरकार्यव्यपदेशभूतेन छन्नपदेनेति छद्मना कपटजालेन पराक्रम्य तत्समीपमागत्य यदि वा पराक्रम्येति शीलस्खलनयोग्यतापत्त्या अभिभूय काः स्त्रियः कूलवालकादीनामिव मागधगणिकाद्या नानाविधकपटशतकरणदक्षा विविधविब्बोकवत्यो भावमन्दाः कामोद्रेकविधायितया सदसद्विवेकविकलाः समीपमागत्य शीलात् ध्वंसयन्ति । एतदुक्तं भवति भ्रातृपुत्रव्यपदेशेन साधुसमीपमागत्य संयमाद्भ्रंशयन्ति तथा चोक्तम् । " पियपुत्ते भाइकिङ्गा, णत्तू च किङ्गा य सयणकिङ्गा य ॥ एते जोव्वणकिङ्गा, पच्छन्नपइमहिलियाणं " यदि वा छन्नपदेनेति गुप्ताभिमानेन । तद्यथा । "काले प्रसुप्तस्य जनार्दनस्य, मेघान्धकारासु च शर्वरीषु मिथ्या न भाषामि विशालनेत्रे, ते प्रत्यया ये प्रथमाक्षरेषु" इत्यादि ॥ ताः स्त्रियो मायाप्रधानाः प्रतारणोपायमपि जानन्त्युत्पन्नप्रतिभतया विदन्ति । पाठान्तरं वा ज्ञातवन्त्यः यथा श्लिष्यन्ते विवेकिनोऽपि साधव एके तथाविधकर्मोदयात्तासु सङ्गमुपयान्ति ॥

तानेव सूक्ष्मप्रतारणोपायान् दर्शयितुमाह—

पासे भिसं णिसीयंति, अभिक्खणं पोसवत्थं परिहिंति ।
कायं अहे वि दंसंति, बाहू उद्धट्टु कक्खमणुव्वजे ॥३॥

पार्श्वे समीपे भृशमत्यर्थमुरुपीडमतिस्नेहमाविष्कुर्वन्त्यो निषीदन्ति विश्रम्भमापादयितुमुपविशन्तीति । तथा कामं पुष्णातीति पोषं कामोत्कोचकारि शोभनमित्यर्थः । तच्च तद्वस्त्रं तदभीक्ष्णमनवरतं तेन शिथिलादिव्यपदेशेन परिदधति स्वाभिलाषमावेदयन्त्यः साधुप्रतारणार्थं परिधानं शिथिलीकृत्य पुनर्निबध्नन्तीति । तथाऽधःकायमूर्वादिकमनङ्गोद्दीपनाय दर्शयन्ति प्रकटयन्ति तथा बाहुमुद्धृत्य कक्षामादर्श्यानुकूलं साध्वाभिमुखं व्रजेत् गच्छेत् संभावनायां लिङ् संभाव्यते एतदनङ्गप्रत्यङ्गसंदर्शकत्वं स्त्रीणामिति ॥ ३ ॥ अपिच—

सयणासणेहिं जोगेहिं, इत्थिओ एगता णिमंतंति ॥
एयाणि चेव से जाणे, पासाणि विरूवरूवाणि ॥४॥

शय्यतेऽस्मिन्निति शयनं पर्यङ्कादि तथाऽऽस्यतेऽस्मिन्नित्यासनमासन्दकादीत्येवमादिना योग्येनोपभोगार्हेण कालोचितेन स्त्रियो योषित एकदेति विविक्तदेशकालादौ निमन्त्रयन्त्यभ्युपगमं ग्राहयन्ति । इदमुक्तं भवति । शयनासनाद्युपभोगं प्रति साधुं प्रार्थयन्ति । एतानेव शयनासननिमन्त्रणरूपान् स साधुर्विदितवेद्यः परमार्थदर्शी जानीयादवबुध्येत । स्त्रीसंबन्धिकारिणः पाशयन्ति बध्नन्तीति पाशा स्तान्विरूपरूपान् नानाप्रकारानिति । इदमुक्तं भवति । स्त्रियो ह्यासन्नगामिन्यो भवन्ति । तथाचोक्तं । "अंबं वा निंबं वा, अब्भासगुणेन आरुहइ वल्ली । एवं इत्थी तो वि, जं आसन्नं तमिच्छंति " । १ । तदेवं भूताः स्त्रियो ज्ञात्वा न ताभिः सार्धं साधुः सङ्गं कुर्याद्यतस्तदुपचारादिकः सङ्गो दुष्परिहार्यो भवति ; तदुक्तं । " जं इच्छसि घेत्तुं जे, पुव्विं तं आमिसेण गिण्हाहि । आमिसपासनिबद्धो, काहिइ कज्जं अकज्जं वा ॥ २ ॥ ४ ॥ किञ्च—

नो तासु चक्खु संधेज्जा, नो वि य साहसं समभिजाणे ॥
णो सहियं पि विहरेज्जा, एवमप्पा सुरक्खिओ होइ ॥५॥

[illegible]

स्मतिमात्रिरीक्षते योषिदङ्गमस्थिरया । अस्निग्धया दृशाऽवज्ञया ह्यकुपितोऽपि कुपित इव ॥ १ ॥ तथा नापि च साहसमकार्यकरणं तत्प्रार्थनया समनुजानीयात्प्रतिपद्येत । तथा हसति साहसमेतत्संग्रामावतरणवद्यच्चरकपातादिविपाकवेदिनोऽपि साधोर्योषिदासजनमिति । तथा नैव स्त्रीभिः सार्धं ग्रामादौ विहरेत् गच्छेत् । अपि शब्दात्र ताभिः सार्धं विविक्तासनो भवेत्ततो महापापस्थानमेतद्यतीनां यत् स्त्रीभिः सहसाङ्गत्यमिति ॥ तथाचोक्तम् "मात्रा स्वस्रा दुहित्रा वा न विविक्तासनो भवेत् ॥ बलवानिन्द्रियग्रामः पण्डितोऽप्यत्र मुह्यति ॥ १ ॥ एवमनेन स्त्रीसङ्गवर्जनेनात्मा समस्तापायस्थानेभ्यो

[illegible]

आमंतिय उस्सविय, भिक्खुआयसा निमंतंति ॥
एताणि चेव से जाणे, सद्दाणि विरूवरूवाणि ॥ ६ ॥

स्त्रियो हि स्वभावेनैवाकर्तव्यप्रवणाः साधुमामन्त्र्य यथाहममुकस्यां वेलायां भवदन्तिकमागमिष्यामीत्येवं संकेतं ग्राहयित्वा तथा (उस्सवियत्ति) संस्थाप्योच्चावचैर्विश्रम्भजनकैरालापैर्विश्रम्भे पातयित्वा पुनरकार्यकरणायात्मना निमन्त्रयन्त्या-

स्त्रमनोपभोगेन साधुमभ्युपगमं कारयन्ति। यदि वा साधोर्वस्त्रापहरणार्थं ता एव योषितः प्रोचुस्तद्यथा भर्तारमामन्त्र्यापृच्छ्याहमिहायाता तया संस्थाप्य भोजनपदधावनशयनादिकया क्रिययोपचर्य ततस्त्वान्तिकमागतेत्यतो भवता सर्वा मद्भर्तृजनितामाशङ्कां परित्यज्य निर्भयेन भाव्यमित्येवमादिभिर्वचोभिर्विश्रम्भमुत्पाद्य भिक्षुमात्मना निमन्त्रयन्ते। युष्मदीयमिदं शरीरकं यादृक्कस्य क्षोदीयसो गरीयसो वा कार्यस्य क्षमं तत्रैव निमज्जनामित्येवमुपप्रलोभयन्ति। स च भिक्षुरवगतपरमार्थ एतानेव विरूपरूपान्नानाप्रकारान् शब्दादीन् विषयान् तत्स्वरूपनिरूपणतो ज्ञपरिज्ञया जानीयादवगच्छेत् स्त्रीसंसर्गापादिताः शब्दादयो विषया दुर्गतिगमनैकहेतवः सन्मार्गार्गलारूपा इत्येवमवबुध्येत। तथा प्रत्याख्यानपरिज्ञया च तद्विपाकावगमेन परिहरेदिति। ६।

(४) स्त्रीसम्बन्धे दोषा यथा—

मणबंधणेहिं णेगेहिं, कलुणविणीयमुवगसित्ताणं ॥
अदु मंजुलाइं भासंति, आणवयंति भिन्नकहाहिं ॥७॥

मनो बध्येत यैस्तानि मनोबन्धनानि मञ्जुलालापस्निग्धावलोकनाङ्गप्रत्यङ्गप्रकटनादीनि। तथाचोक्तं। "णाहपियकंतसामियदइयजियाओ तुमं मह पिओ त्ति। जीए जीयामि अहं पहवसि तं मे सरीरस्स ॥ १ ॥ इत्यादिभिरनेकैः प्रपञ्चैः करुणालापविनयपूर्वकम् (उवगसित्ताणंति) उपसंश्लिष्य समीपमागत्याथ तदनन्तरं मञ्जुलानि पेशलानि विश्रम्भजनकानि कामोत्कोचकानि वा भाषन्ते। तदुक्तं "मितमहुररिभियजंपुल्लएहिं ईसीकडक्खहसिएहिं। सविगारेहि य रागं हिययं पिहियं मयच्छीए ॥१॥ तथा भिन्नकथाभी रहस्यालापैर्मैथुनसंबद्धैर्वचोभिः साधोश्चित्तमादाय तमकार्यकरणं प्रत्याज्ञापयन्ति प्रवर्तयन्ति स्ववशं वा ज्ञात्वा कर्मकरवदाज्ञां कारयन्तीति ॥ ७ ॥ अपिच-

सीहं जहा व कुणिमेणं, निब्भयमेगचरंति पासेणं ॥
एवित्थियाउ बंधंति, संवुडं एगतियमणगारं ॥ ८ ॥

यथेति दृष्टान्तोपदर्शनार्थे। यथा बन्धनविधिज्ञाः सिंहं पिशितादिना कुणिमेनोपप्रलोभ्य निर्भयं गतभीकं निर्भयत्वादेवैकचरं पाशेन गलयन्त्रादिना बध्नन्ति बद्ध्वा च बहुप्रकारं कदर्थयन्त्येवं स्त्रियो नानाविधैरुपायैः पेशलभाषणादिभिः (एगतियंति) कंचन तथाविधमनगारं साधुं संवृतमपि मनोवाक्कायगुप्तमपि बध्नन्ति स्ववशं कुर्वन्तीति। संवृतग्रहणं च स्त्रीणां सामर्थ्योपदर्शनार्थम् यथाहि। संवृतोऽपि ताभिर्बध्यते किं पुनरपरोऽसंवृत इति ॥ ८ ॥ किञ्च।

अह तत्थ पुणो णमयंती, रहकारो व णेमि आणुपुव्वी ॥
बद्धे मिए व पासेणं, फंदंते वि ण मुच्चए ताहे ॥९॥

अथेति स्ववशीकरणादनन्तरं पुनस्तत्र स्वाभिप्रेते वस्तुनि नमयन्ति प्रह्वं कुर्वन्ति। यथा रथकारो वर्धकिर्नेमिकाष्ठं चक्रबाह्यभ्रमिरूपमानुपूर्व्या नमयत्येवं ता अपि साधुं स्वकार्यानुकूल्ये प्रवर्तयन्ति। स च साधुर्मृगवत् पाशेन बद्धो मोक्षार्थं स्पन्दमानोऽपि ततः पाशान्न मुच्यत इति ॥ ९ ॥ किञ्च।

अह सेऽणुतप्पई पच्छा, भोच्चा पायसं व विसमिस्सं ॥
एवं विवेगमादाय, संवासो न वि कप्पए दविए ॥ १० ॥

अथासौ साधुः स्त्रीपाशावबद्धो मृगवत् कूटके पतितः सन् कुटुम्बकृते अहर्निशं क्लिश्यमानः पश्चादनुतप्यते। तथाहि। गृहान्तर्गतानामेतदपवर्त्यं संताप्यते। तद्यथा। "कोवाय धोको समभिसु पोट्टो वणाहिं काहो धिज्जइ विमणो जग्धारुण्ड पहियरा परिणीयरा कोयडुमारओ पतियणो जीयन्त रूपएहिं परवंधइ पंचइ जारओ"। तथा "यन्मया परिजनस्यार्थे कृतं कर्म सुदारुणम् ॥ एकाकी तेन दह्येऽहं गतास्ते फलभागिनः" ॥ १ ॥ इत्येवं बहुप्रकारं महामोहात्मके कुटुम्बकूटके पतिता अनुतप्यन्ते। अमुमेवार्थं दृष्टान्तेन स्पष्टयति। यथा कश्चिद्विषमिश्रं भोजनं भुक्त्वा पश्चात्तत्कृतावेगाकुलितोऽनुतप्यते। तद्यथा। किमेतन्मया पापेन साम्प्रतेक्षिणा सुखरसिकतया विपाककटुकमेवंभूतं भोजनमास्वादितमिति। एवमसावपि पुत्रपौत्रदुहितृजामातृस्वसृभ्रातृव्यभागिनेयादीनां भोजनपरिधानपरिणयनालङ्कारजातमृतकर्मतद्व्याधिचिकित्साचिन्ताकुलोऽपगतस्वशरीरकर्तव्यः प्रनष्टैहिकामुष्मिकानुष्ठानोऽहर्निशं। तद्व्यापारव्याकुलितमतिः परितप्यते। तदेवमनन्तरोक्तया नीत्या विपाकं स्वानुष्ठानस्यादाय प्राप्य विवेकमिति वा क्वचित्पाठस्तद्विपाकं विवेकं चादाय गृहीत्वा स्त्रीभिर्द्रव्यरूपाभिः पर्यायरूपिणीभिः सार्धं संवासो वसतिरेकत्र न कल्प्यते न युज्यते कस्मिन्द्रव्यभूते मुक्तिगमनयोग्ये रागद्वेषरहिते वा साधौ। यतस्ताभिः सार्धं संवासोऽवश्यं विवेकिनामपि सदनुष्ठानविघातकारीति ॥ १० ॥

स्त्रीसंबन्धदोषानुपदर्श्योपसंहरन्नाह।

तम्हा उ वज्जए इत्थी, विसलित्तं व कंटगं नच्चा ॥
ओए कुलाणि वसवत्ती, आघाते ण से वि णिग्गंथे ॥ ११ ॥

यस्माद्विपाककटुः स्त्रीभिः सह संपर्कस्तस्मात्कारणात् स्त्रियो वर्जयेत्। तुशब्दात्तदालापमपि न कुर्यात्। किंवदित्याह। विषोपलिप्तं कण्टकमिव ज्ञात्वाऽवगम्य स्त्रियं वर्जयेदिति। अपिच। विषदिग्धकण्टकः शरीरावयवे लग्नः सन्ननर्थमापादयेत् स्त्रियस्तु स्मरणादपि। तदुक्तं। "विषस्य विषयाणां च दूरमत्यन्तमन्तरम्। उपभुक्तं विषं हन्ति विषयाः स्मरणादपि" ॥ १ ॥ तथा "वरि विसखइयं न विसय, सुहु इक्कसि विसिण मरंति ॥ विसयामिसपुणघारिया, णरणरएहिं पडंति" ॥ १ ॥ तथौजएकोऽसहायः सन् कुलानि गृहस्थानां गृहाणि गत्वा स्त्रीणां वशवर्ती तन्निर्दिष्टवेलागमनेन तदानुकूल्यं भजमानो धर्ममाख्याति योऽसावपि न निर्ग्रन्थो न सम्यक् प्रव्रजितो निषिद्धाचरणसेवनादवश्यं तत्रापायसंभवादिति। यदा पुनः काचित्कुतश्चिन्निमित्तादागन्तुमसमर्था वृद्धा वा भवेत्तदा परिसहायः साध्वभावे एकाक्यपि गत्वाऽपरस्त्रीवृन्दमध्यगताया पुरुषसमन्विताया वा स्त्रीनिन्दाविषयजुगुप्साप्रधानं वैराग्यजननं विधिना धर्मं कथयेदपीति ॥ ११ ॥

अन्वयव्यतिरेकाभ्यामुक्तोऽर्थः सुगमो भवतीत्यभिप्रायवानाह।

जे एय उंछमणुगिद्धा, अन्नयरा हुंति कुसीलाणं ॥
सुतवस्सिए वि से भिक्खू नो विहरे सहणमित्थीसु ॥ १२ ॥

ये मन्दमतयः पश्चात्कृतसदनुष्ठानाः सांप्रतेक्षिण एतदनन्तरोक्तम् (उंछंति) जुगुप्सनीयं गर्ह्यं तदत्र स्त्रीसंस्तवादिकमेकाकी स्त्रीधर्मकथनादिकं वा कृत्यं। तदनु तस्मात्ते ये गृद्धा अध्युपपन्ना मूर्छितास्ते हि कुशीलानां पार्श्वस्थावसन्नकुशीलसंसक्तयथाच्छन्दरूपाणामन्यतरा भवन्ति यदि वा काथिकपश्यकसंप्रसारकमामकरूपाणां वा कुशीलानामन्यतरा भवन्ति तन्मध्यवर्तिनस्तेऽपि कुशीला भवन्तीत्यर्थः। यत एवमतः सुतपस्व्यपि विकृष्टतपोनिष्टप्तदेहोऽपि भिक्षुः साधुरात्महितमिच्छ-

न स्त्रीभिः समाधिपरिपन्थिनीभिः सह न विहरेत् कचिदप्येकत्रापि संतिष्ठेत तृतीयार्थे सप्तमी । णमिति वाक्यालंकारे । ज्वलिताङ्गारपुञ्जवद्दूरतः स्त्रियो वर्जयेदिति भावः ॥ १ ॥

(५) कतमाभिः पुनः स्त्रीभिः सार्धं न विहर्तव्य-मित्येतदाशङ्क्याह ॥

अवि धूयराहि सुण्हाहिं, धातीहिं अदुव दासीहिं ॥
महतीहि वा कुमारीहिं, संथवं से न कुज्जा अणगारे ॥ १३ ॥

अपिशब्दः प्रत्येकमभिसंबध्यते । (धूयराहित्ति) दुहितृभिरपि सार्धं न विहरेत्तथा स्नुषाः सुतभार्यास्ताभिरपि सार्धं न विविक्तासनादौ स्थातव्यम् । तथा धात्र्यः पञ्चप्रकाराः स्तन्यदायिन्यो जननीकल्पास्ताभिश्च सार्के न स्थेयम् । अथवा सतां तावदपरा योषितो या अप्येता दास्यो घटयोषितः सर्वापसदास्ताभिरपि सह संपर्कं परिहरेत् । तथा महतीभिः कुमारीभिर्वाशब्दाल्लघ्वीभिश्च सार्धं संस्तवं परिचयं प्रत्यासत्तिरूपं सोऽनगारो न कुर्यादिति । यद्यपि तस्यानगारस्य तस्यां दुहितरि स्नुषादौ वा न चित्तान्यथात्वमुत्पद्यते तथापि च तत्र विविक्तासनादावपरस्य शङ्कोत्पद्यते अतस्तच्छङ्कानिरासार्थं स्त्रीसंपर्कः परिहर्तव्य इति ॥ १३ ॥

अपरस्य शङ्का यथोत्पद्यते तथा दर्शयितुमाह ॥

अदुणा इणं च सुहीणं वा, अप्पियं दट्टु एगता होंति ॥
गिद्धा सत्ता कामेहिं, रक्खण पोसणे मणुस्सोसि ॥ १४ ॥

विविक्तयोषिता सार्धमनगारमथैकदा दृष्ट्वा योषिज्ज्ञातीनां सुहृदां वा अप्रियं चित्तदुःखासिका भवत्येवं च ते समाशङ्केरन् यथा सत्त्वाः प्राणिन इच्छामदनकामैर्गृद्धा अध्युपपन्नास्तथाऽयं भूतोऽप्ययं श्रमणः स्त्रीवदनावलोकनासक्तचेताः परित्यक्तनिजव्यापारोऽनया सार्धं निर्ह्रीकास्तिष्ठति । तदुक्तम् । मुण्डं शिरो वदनमेतदनिष्टगन्धि, भिक्षाटनेन भरणं च हतोदरस्य । गात्रं मलेन मलिनं गतसर्वशोभं, चित्रं तथापि मनसो मदनेऽस्ति वाञ्छा ॥ १ ॥ तथातिक्रमधाध्मातमानसास्त्वेयमूचुर्यथा रक्षणं पोषणं चेति विगृह्य समाहारद्वन्द्वः तस्मिन् रक्षणपोषणे सदादरं कुरु । यतस्त्वमस्या मनुष्योऽसि मनुष्यो वर्तसे यदि वा परं यथमस्या रक्षणपोषणव्यापृतास्त्वमेव मनुष्यो वर्तसे यतस्त्वयैव सार्धमियमेकाकिन्यहर्निशं परित्यक्तनिजव्यापारा तिष्ठतीति ॥ १४ ॥

किंचान्यत् ॥

समणं पि दट्टु दासीणं तत्थ वि ताव एगे कुप्पंति ॥
अदु भोयणेहि णत्थेहिं, इत्थिदोससंकिणो होंति ॥ १५ ॥

श्राम्यतीति श्रमणः साधुः अपिशब्दो भिन्नक्रमः । तमुदासीनमपि रागद्वेषविरहान्मध्यस्थमपि दृष्ट्वा श्रमणग्रहणं तपःखिन्नदेहोपलक्षणार्थं तदेवंभूतेऽपि विषयद्वेषिण्यपि साधौ तावदेके केचन रहस्यस्त्रीजल्पनस्तदोषत्वात्कुप्यन्ति । यदि वा पाठान्तरं " समणं दट्ठुणुदासीणं " श्रमणं प्रव्रजन्तं उदासीनं परित्यक्तनिजव्यापारं स्त्रिया सह जल्पन्तं दृष्ट्वोपलभ्य तत्रापि एके केचन तावत् कुप्यन्ति किंपुनः कृतविकारमिति भावः । अथवा स्त्रीदोषाशङ्किनश्च ते भवन्ति ते चामी स्त्रीदोषाः भोजनैर्नानाविधैराहारैर्न्यस्तैः साध्वर्थमुपकल्पितैरेतदर्थमेव संस्कृतैरियमेनमुपचरति तेनायमहर्निशमिहागच्छतीति । यदि वा भोजनैः श्वशुरादीनां न्यस्तैरर्धदत्तैः सद्भिः सा वधूः साध्वागमनेन समाकुलीभूता ..

यतस्ते स्त्रीदोषाशङ्किनो भवेयुर्यथेयं दुःशीलाऽनेनैव सहास्त इति । निदर्शनमत्र यथा कयाचिद्वध्वा ग्राममध्यप्रारब्धनटप्रेक्षणैकगतचित्तया पतिश्वशुरयोर्भोजनार्थमुपविष्टयोस्तण्डुला इति कृत्वा राइकाः संस्कृत्य दत्तास्ततोऽसौ श्वशुरेणोपलक्षिता निजपतिना कुपितेन ताडिता अन्यपुरुषगतचित्तेत्याशङ्क्य स्वगृहान्निर्धाटितेति ॥ १५ ॥

कुव्वंति संथवं ताहिं, पब्भट्ठा समाहिजोगेहिं ॥
तम्हा समणा ण समेंति आयहियाए संनिसेज्जाओ ॥ १६ ॥

ताभिः स्त्रीभिः सन्मार्गभ्रष्टाभिः सह संस्तवं तद्गृहगमनालापदानसंप्रेक्षणादिरूपं परिचयं तथाविधमोहोदयात्कुर्वन्ति विदधति । किंभूताः प्रकर्षेण भ्रष्टाः स्खलिताः समाधियोगेभ्यः समाधिर्धर्मध्यानं तदर्थं तत्प्रधाना वा योगाः मनोवाक्कायव्यापारास्तेभ्यः प्रच्युताः शीतलविहारिण इति । यस्मात् स्त्रीसंस्तवात्समाधियोगपरिभ्रंशो भवति तस्मात्कारणात् श्रमणाः सत्साधवो (ण समेंति) न गच्छन्ति । सच्छोभनाः सुखोत्पादकतयाऽनुकूलत्वाच्चिरपद्या इव निषद्या स्त्रीभिः कृता माया यदि वा स्त्रीवसतिरिति आत्महिताय स्वहितं मन्यमानाः एतच्च स्त्रीसंपर्कपरिहरणं तासामप्यैहिकामुष्मिकापायपरिहारादिति । क्वचित्पश्चार्धमेवं पठ्यते । तम्हा " समणाउ जहाहि अहिताओ सन्निसेज्जाओ " अयमस्यार्थः यस्मात्स्त्रीसंबन्धोऽनर्थाय भवति तस्मात् हे श्रमण साधो तु शब्दो विशेषणार्थः विशेषेण सन्निषद्या स्त्रीवसतिस्तत्कृतोपचाररूपा वा माया आत्महिताद्धेतोर्जहाहि परित्यजेति ॥ १६ ॥

किं केचन त्युपगम्यापि प्रव्रज्यायां स्त्रीसम्बन्धं ।

कुर्युर्येनैवमुच्यते ओमित्याह ॥

बहवे गिहाई अवहट्टु, मिस्सीभावं पत्थुया य एगे ।
धुवमग्गमेव पवयं–ति वाया वीरियं कुसीलाणं ॥ १७ ॥

बहवः केचन गृहाण्यपहृत्य परित्यज्य पुनस्तथाविधमोहोदयान्मिश्रीभाव इति द्रव्यलिङ्गमात्रस्त्वाद्भावतस्तु गृहस्थसमकल्पा इत्येवंभूता मिश्रीभावं प्रस्तुताः समनुप्राप्ता न गृहस्था एकान्ततो नापि प्रव्रजितास्तदेवंभूता अपि सन्तो ध्रुवो मोक्षः संयमो वा तन्मार्गमेव प्रवदन्ति तथाहि ते वक्तारो भवन्ति यथाऽयमेवास्मदारब्धो मध्यमः पन्थाः श्रेयान् तथा ह्यनेन प्रवृत्तानां प्रव्रज्यानिर्वहणं भवतीति तदेतत्कुशीलानां वाचाकृतं वीर्यं नानुष्ठानकृतम् । तथाहि–ते द्रव्यलिङ्गधारिणो वाङ्मात्रेणैव वयं प्रव्रजिता इति ब्रुवते नतु तेषां सातगौरवविषयसुखप्रतिबद्धानां शीतलविहारिणां सदनुष्ठानकृतं वीर्यमस्तीति ॥ १७ ॥ अपिच ॥

सुद्धं रवति परिसाए, अह रहस्सम्मि दुक्कडं करेंति ।
जाणंति य णं तहाविया, माइल्ले महासढेऽयंति ॥ १८ ॥

स कुशीलो वाङ्मात्रेणाविष्कृतवीर्यः पर्षदि व्यवस्थितो धर्मदेशनावसरे सत्यात्मानं शुद्धमपगतदोषमात्मानमात्मीयानुष्ठानं वा रौति भाषते । अथाऽनन्तरं रहस्येकान्ते दुष्कृतं पापं तत्कारणं वा असदनुष्ठानं करोति विदधाति तच्च तस्यासदनुष्ठानं गोपायतोऽपि जानन्ति विदन्ति के ..

विदन्तीति तथाविदः ..
र्यः । यदि वा सर्वज्ञः ..
सर्वं तेषां न वेत्ति तथा..

हि न पर्यन्ते यदि वा मायावी महापापकारीयमित्येवं तथावि- [illegible] जानन्ति । तथाहि प्रच्छन्नकार्यकारी न मां कश्चि- [illegible] मन्यते अथ च तं तद्विदो वदन्ति । [illegible] । "न य लोणं लोणिज्जइ न य तोप्पिज्जइ घयं च तेल्लं वा । किह सक्का वंचेउं, अप्पा अणुहूय कल्लाणो" ॥ १ ॥ १८ ॥
[illegible] ॥

सयं दुक्कडं च न वदति, आइट्ठो वि पकत्थति बाले ।
वेयाणुवीइमाकासी, चोइज्जंतो गिलाइ से भुज्जो ॥१९॥

[illegible] यदुक्तं कृतं तदपरेणाचार्यादिना पृष्टो न वदति न कथयति [illegible] कार्याणि स च प्रच्छन्नकार्यं मायावी [illegible] यदा परेणादिष्टोऽपि [illegible] अभ्युपगमेन [illegible] भ्यस्ये इत्येवं [illegible] । तथा [illegible] पुनःपुनश्चोद्यमानोऽसौ [illegible] । तथा चोक्तम् । " [illegible] " इति अपिच ।

[illegible] ॥ २० ॥

[illegible]

अवि हत्थपादच्छेदाए, अदुवा वद्धमंस उक्कंते ।
अवि तेयसा भितावणाणि, तच्छिय खारसिंचणाइं च ॥
स्त्रीसंपर्को हि संसर्गिणां हस्तपादच्छेदनाय भवति । अपि संभावने संभाव्यत एतन्मोहातुराणां संबन्धात्हस्तपादच्छेदादिकम् । अथवा वर्ध्रमांसोत्कर्तनमपि तेजसाभितापनानि स्त्रीसंबन्धिनिरुक्तेर्जितराजपुरुषैर्मेदिकाण्यपि क्रियन्ते या दारिकास्तया वास्या [illegible] क्षारोदकसेचनानि च प्रापयन्तीति ॥ २१ ॥ अपिच—

अदु कण्णनासच्छेदं, कंठच्छेदणं तितिक्खंति ॥
इत्थ पावसंतत्ता, न य विंति पुणो न काहिंति ॥२२॥

पर्याप्तस्यापि । एतस्याश्च द्विपञ्चाशत्सयोगिकेवलिसमुद्घातगतौदारिकमिश्रकाययोगे वर्तमाने उदीरकः एतेन च द्विपञ्चाशत्यर्थिकनामसहिता त्रिपञ्चाशत्कस्थमिदं वक्तव्यम् । अस्या अप्युदीरकाः सयोगकेवलितीर्थकरोदारिकमिश्रकाययोगे वर्तमाना वेदितव्याः । तथा सैव द्विपञ्चाशत् पराघातः उच्छ्वासनामप्रशस्तान्यतरविहायोगतिः सुस्वरदुःस्वरयोरन्यतरत्सामान्ति प्रक्षिप्तपञ्चाशत् षट्पञ्चाशद्भवति । एष च सयोगिकेवल्यौदारिककाययोगे वर्तमान उदीरकः तत्पञ्चाशद्पयाप्तकत्वेऽपि द्विपञ्चाशत् उच्छ्वासेऽपि च निरुद्धे एतु पञ्चाशत् अत्र द्विपञ्चाशदायुःपञ्चाशदादिषु शेषेषु तु पञ्चसु तीर्थकृताम् । सर्वेषामुक्तानि केवलिनामुदीरणास्थानानि । सर्वेन्द्रियाणामुदीरणास्थानानि पञ्च । तद्यथा चतुर्विंशतिः पञ्चविंशतिः षड्विंशतिः सप्तविंशतिः द्विपञ्चाशत् त्रिपञ्चाशदेति तत्र तिर्यग्गतितिर्यगानुपूर्वी । एकेन्द्रियजातिः बादरसूक्ष्मयोरेकतरयोः पर्याप्तापर्याप्तयोरेकतरत् दुर्भगमनादेयशःकीर्त्ययशःकीर्त्योरेकतरमित्येता ध्रुवोदयाः । आयुष्कर्मप्रदेशोदीरणाभिर्वर्णादिप्रकृतिभिः सह सम्मिश्रा चतुर्विंशतिर्भवन्ति । अत्र च भङ्गाः पञ्च । तद्यथा बादरसूक्ष्मयोः प्रत्येकं पर्याप्तापर्याप्ताभ्यामयशःकीर्त्या सह चत्वारि, बादरपर्याप्तयशःकीर्तिमिश्रकः । सूक्ष्मापर्याप्तस्य सह यशःकीर्तिरुदयो न भवति, तदभावाच्च तदौदारिकादि कृत्वा तदधिना विकल्पा न भवन्ति । एषा चतुर्विंशतिरपान्तरालगतौ वर्तमानस्य वेदितव्या । ततः शरीरस्थस्यौदारिकशरीरौदारिकसंघातौदारिकबन्धनहुण्डसंस्थानोपघातप्रत्येकसाधारणाभ्यामयशःकीर्त्या सह द्वौ सूक्ष्मस्य पर्याप्तापर्याप्तस्य प्रत्येकसाधारणाभ्यां यशःकीर्त्या सह चत्वारि इति एवं बादरवायुकायिकस्य वैक्रियं कुर्वतः औदारिकशरीरस्थाने वैक्रियषट्कमपनेतव्यम् । ततश्च तस्य पञ्चविंशतिरुदीरणा योग्या भवन्ति केवलमिह बादरपर्याप्तप्रत्येकायशःकीर्तिपदैः एष एव भङ्गः तैजसकायिकवायुकायिकयोर्हि साधारणयशःकीर्त्योरुदयो न भवति तदभावात्तदधिना भङ्गा न प्राप्यन्ते । सर्वे भङ्गाः षट्पञ्चाशद्भवन्ति ततः शरीरपर्याप्तस्य पराघाते उच्छ्वासे क्षिप्ते षड्विंशतिर्भवति । अत्र भङ्गाः षट् । तथा बादरस्य प्रत्येकसाधारणयशः कीर्त्ययशःकीर्त्या च बादरवायुकायिकस्य च वैक्रियं कुर्वतः शरीरपर्याप्त्या पर्याप्तस्य उच्छ्वासे प्रक्षिप्ते च प्राणापानैः एव भङ्गः । सर्वसंख्यया षड्विंशतेः सप्त भङ्गाः । ततः प्राणापानपर्याप्त्या पर्याप्तस्य उच्छ्वासे क्षिप्ते त्रिपञ्चाशद्भवति । अत्रापि भङ्गाः षट् । तद्यथा [illegible] सहितस्य प्रत्येकसाधारणयशःकीर्त्ययशःकीर्त्या भङ्गौ । बादरवायुकायिकस्य वैक्रियं कुर्वतः प्राणापानपर्याप्त्या पर्याप्तस्य उच्छ्वासे क्षिप्ते सप्तविंशतिर्भवति । तत्र च प्राग्वदेक एव भङ्गः । आयुर्वर्जविपाकोदये आतपोद्योतयोः एकतरस्योदीरणा न प्रवर्तते । एवमन्यत्राऽपि भङ्गा अत्र सर्वसंख्यया द्विपञ्चाशदुत्तरशतं भङ्गाः ।

प्राणापानपर्याप्त्या पर्याप्तस्य उच्छ्वासमविसृष्टे द्विपञ्चाशत् । प्राणापानयोरनन्तरमस्मिन् क्षिप्ते त्रिपञ्चाशद्भवति अत्र भङ्गाः षट् । अत्र भङ्गा ये प्रागपर्याप्तस्य नामद्विपञ्चाशत्यादिभिः द्विपञ्चाशदादिभिः सर्वसंख्यया वैक्रियिकानां भङ्गा द्विपञ्चाशत् द्वीन्द्रियाणामुदीरणास्थानानि षट् । तत्र द्विपञ्चाशदादिषूदीरणास्थानानि वर्तमानस्यावसेयाः । अत्र च भङ्गास्त्रय तद्यथा अपर्याप्तकनामोदये वर्तमानस्य यशःकीर्त्या सह एको भङ्गः पर्याप्तकनामोदये वर्तमानस्य यशःकीर्त्ययशःकीर्त्या द्वाविंशति । ततः शरीरस्थस्यौदारिकशरीरसंस्थानसंघातौदारिकबन्धनहुण्डसंस्थानसेवार्तसंहननोपघातप्रत्येकमित्येतेषु प्रक्षिप्तेषु द्विपञ्चाशत् । अत्र च भङ्गास्त्रय एव पूर्वोक्ता एव । ततः शरीरपर्याप्त्या पर्याप्तस्य विहायोगतिपराघातयोः प्रक्षिप्तयोः अष्टाविंशतिर्भवति । अत्र यशःकीर्त्ययशःकीर्त्या द्वौ भङ्गौ । ततः प्राणापानपर्याप्त्या पर्याप्तस्य उच्छ्वासे क्षिप्ते एकोनत्रिंशद् भवति । अत्रापि द्वौ भङ्गौ । [illegible]

[illegible]

स्ताप्रशस्तान्यतरविहायोगती च प्रक्षिप्तायां चतुःपञ्चाशद्भवति । अत्र पर्याप्तानां प्राक् चतुश्चत्वारिंशतं भङ्गकानामुक्तम् । तदयमुक्तविहायोगतिद्विकगुणितमवगन्तव्यम् तथा च सन्यत्र भङ्गानां द्वे शते अष्टाशीत्यधिके भवतः मतान्तरेण पुनः पञ्च शतानि षट्सप्तत्यधिकानि ततः प्राणापानपर्याप्तापर्याप्तस्य उच्छ्वासे क्षिप्ते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव भङ्गानां द्वे शते अष्टाशीत्यधिके मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि ततः प्राणापानपर्याप्तापर्याप्तस्य उच्छ्वासे क्षिप्ते पञ्चपञ्चाशद्भवति अत्रापि प्रागिव सर्वसंख्यया पञ्चाशति स्वमतेन भङ्गकानां पञ्च शतानि षट्सप्तत्यधिकानि । मतान्तरेण तु द्विपञ्चाशदधिकानि एकादश शतानि । ततो भाषापर्याप्तापर्याप्तस्य सुस्वरदुःस्वरयोरन्यतरस्मिन् क्षिप्ते षट्पञ्चाशद्भवति । तत्र स्वमतचिन्तायां उच्छ्वासेन द्वे शते अष्टाशीत्यधिके भङ्गकानां प्राक् लब्धे ते इह स्वरद्विके तु गण्यते ततो लब्धानि पञ्च शतानि षट्सप्तत्यधिकानि । मतान्तरेण पुनरिह द्विपञ्चाशद्भवति । अत्र स्वमतचिन्तायां प्रागिव द्वे शते अष्टाशीत्यधिके भङ्गकानां मतान्तरेण पञ्च शतानि षट्सप्तत्यधिकानि सर्वसंख्यया स्वमतेन षट्पञ्चाशति भङ्गा अष्टशतानि चतुःषष्ट्यधिकानि । मतान्तरेण सप्तदश शतान्यष्टाविंशत्यधिकानि ततः स्वरसहितायां षट्पञ्चाशतशतानि षट्सप्तत्यधिकानि । मतान्तरेण द्विपञ्चाशदधिकानि एकादश शतानि त एवात्रापि द्रष्टव्याः । तथा तथामेव तिर्यक्पञ्चेन्द्रियाणां वैक्रियं कुर्वतामुदीरणास्थानानि पञ्च भवन्ति तद्यथा एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् षट्पञ्चाशच्चेति । तत्र वैक्रियसप्तकं समचतुरस्रसंस्थानमुपघातं प्रत्येकमिति प्रकृतिदशकं प्रागुक्तायां तिर्यक्पञ्चेन्द्रियाणां प्रायोग्यायां द्विचत्वारिंशत्प्रक्षिप्यते तिर्यगानुपूर्वी चापनीयते तत एकपञ्चाशद्भवति । अत्र सुभगादेययुगलदुर्भगानादेययुगलयशःकीर्त्ययशःकीर्तिपर्याप्तिपदैश्चत्वारो भङ्गाः । मतान्तरेण पुनः सुभगदुर्भगाभ्यामादेयानादेयाभ्यां यशःकीर्त्ययशःकीर्तिभ्यां च पर्याप्तकेन सहाष्टौ भङ्गाः ततः शरीरपर्याप्तापर्याप्तस्य पराघाते प्रशस्तविहायोगतौ च प्रक्षिप्तायां [त्रि]पञ्चाशद्भवति । अत्रापि प्रागिव चत्वारो भङ्गाः । मतान्तरेण पुनरष्टौ तत आनापानपर्याप्तापर्याप्तस्य उच्छ्वासनाम्नि प्रक्षिप्ते चतुःपञ्चाशद्भवति । अत्रापि प्रागिव स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ सर्वसंख्यया चतुःपञ्चाशत् । स्वमतेनाष्टौ भङ्गा । मतान्तरेण षोडश । ततो भाषापर्याप्तापर्याप्तस्य उच्छ्वासस्वरसहितायां पञ्चपञ्चाशति [illegible] क्षिप्ते षट्पञ्चाशद्भवति [illegible] भङ्गाः स्वमतेन चत्वारो मतान्तरेणाष्टौ । सर्वसंख्यया वैक्रियं कुर्वतां तिर्यक्पञ्चेन्द्रियाणां भङ्गा अष्टाविंशतिः मतान्तरेण षट्पञ्चाशत् । सामान्येन तिर्यक्पञ्चेन्द्रियाणां स्वमतेन [illegible] द्वादशाधिकानि, मतान्तरेण [illegible] द्विपञ्चाशदधिकानि ।

[illegible]

मम ० | १ | ८ | ७ | ५ | ७ | ३ | ५७३ | ११०७ वैक्रि[यम]पि कुर्वतां मनुष्याणामुदीरणास्थानानि पञ्च भवन्ति । त[द्य]था एकपञ्चाशत् त्रिपञ्चाशच्चतुःपञ्चाशत् षट्पञ्चाशच्चेति । तत्र एकपञ्चाशत् त्रिपञ्चाशच्च यथा प्राग्वैक्रियं कुर्व[तां ति]र्यक्पञ्चेन्द्रियाणामुक्तं तथात्रापि द्रष्टव्या चतुःपञ्चाशत् उच्छ्वासमसहि[तं] प्रागिव स्वमतेन चत्वारो भङ्गाः मतान्तरेणाष्टौ । [उत्तर]वैक्रियं कुर्वतां संयतानामुद्योतनामोदयं गच्छति तान्यं[तरे]ण सह चतुःपञ्चाशदुच्छ्वासमप्रशस्त एक एव भङ्गो भवति संयतानां दुर्भगानादेयायशःकीर्त्युदयाभावात् । सर्वसंख्यया चतुःपञ्चाशत् । स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ । अथवा संयतानां स्वरे अनुदिते उद्योते [उ]दिते पञ्चपञ्चाशद्भवति । अत्रापि प्रागिव एक एव भ[ङ्गः] सर्वसंख्यया पञ्चपञ्चाशति स्वमतेन पञ्च भङ्गा मतान्तरेण नव पञ्चपञ्चाशति सुस्वरसहितायामुद्योते [क्षि]प्ते षट्पञ्चाशद् भवति तस्याप्येक एव प्रशस्तो भङ्गः सर्वसंख्यया वैक्रियमनुष्याणामन्यमतेनैकोनविंशतिभङ्गा मतान्तरेण पञ्चविंशत् ।

संयत्याहारकं कुर्वतामुदीरणास्थानान्युच्यन्ते आहारकमि[श्रा]णामुदीरणास्थानानि पञ्च । तद्यथा एकपञ्चाशत् त्रिपञ्चा[श]च्चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । तत्र [आहा]रकसप्तकं समचतुरस्रसंस्थानमुपघातं प्रत्येकमिति प्रकृति[द]शकं प्रागुक्तायां मनुष्यगतिप्रायोग्यायां द्विचत्वारिंशति [प्रक्षि]प्यते मनुष्यानुपूर्वी चापनीयते । ततः एकपञ्चाशद्[भवति] केवलमिह सर्वाण्यपि पदानि प्रशस्तानि एवेति कृत्वा एक एव भङ्गः । शरीरपर्याप्तापर्याप्तस्य प्रशस्तविहायोगतिपरा[घा]तयोः प्रक्षिप्तयोस्त्रिपञ्चाशद्भवति । अत्राप्येक एव भ[ङ्गः] शरीरपर्याप्तः । ततः प्राणापानपर्याप्तापर्याप्तस्य उच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्राप्येक एव भङ्गः । सर्वसंख्यया चतुःपञ्चाशति द्वौ भङ्गौ ततो भाषापर्याप्तापर्याप्त उच्छ्वा[स]सहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति अत्रापि प्राग्वदेक एव भङ्गः । अथवा प्राणापानपर्याप्तापर्याप्त[स्य] स्वरे अनुदिते उद्योतनाम्नि उदिते पञ्चपञ्चाशद् भवति अ[त्रा]प्येक एव भङ्गः सर्वसंख्यया पञ्चपञ्चाशति द्वौ भङ्गौ । त[तो] भाषापर्याप्तापर्याप्तस्य स्वरसहितायां पञ्चपञ्चाशति [उद्]योते क्षिप्ते षट्पञ्चाशद्भवति । अत्राप्येक एव भङ्गः आहार[क]शरीरिणः सर्वसंख्यया सप्त भङ्गाः । तदेव मनुष्याणां सा[मा]न्यवैक्रियशरीराहारकशरीरकेवलिनां भङ्गाः सर्वसंख्य[या] त्रयोदश शतानि चतुस्त्रिंशदधिकानि भवन्ति । परमतेन [प]ञ्चशतानि पञ्चाशदधिकानि ।

देवानामुदीरणास्थानानि षट् । तद्यथा द्विचत्वारिंशत् [एक]पञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् [षट्]पञ्चाशच्चेति । तत्र देवगतिदेवानुपूर्वीपञ्चेन्द्रियजाति[त्र]सनामबादरनामपर्याप्तनामसुभगादेययुगलदुर्भगानादेय[यु]गलयोरेकतरं युगलं यशःकीर्त्ययशःकीर्त्योरेकतरं नव[ध्रु]वोदयाभिः सह [illegible] द्विचत्वारिंशद्भवति । अत्र सुभगादेयदुर्भगानादेययुग[ल]यशःकीर्तिभ्यां चाष्टौ भङ्गाः ततः शरीरस्थस्य वैक्रियस[प्तकं] समचतुरस्रसंस्थानमुपघातं प्रत्येकमित्येता दश प्रकृतयः [प्रक्षि]प्यन्ते देवानुपूर्वी चापनीयते । ततः एकपञ्चाशत् भव[ति] अत्रापि प्रागिव स्वमतेन चत्वारो भङ्गाः मतान्तरेणा[ष्टौ] ततः शरीरपर्याप्तापर्याप्तस्य पराघातप्रशस्तविहायोग[ति]

प्रक्षिप्यते: त्रिकभङ्गानयति । अत्रापि प्रागिव स्वमतेन चत्वारो भङ्गा मतान्तरेणाष्टौ । इयानां प्रशस्तविहायोगतेरुदया भावात् तदाश्रिता भङ्गा न प्राप्यन्ते । ततः प्राणापानपर्याप्त्या पर्याप्तस्य उच्छ्वासे क्षिप्ते चतुःपञ्चाशद्भवति । अत्रापि स्वमतेन चत्वारो भङ्गाः मतान्तरेणाष्टौ । अथवा शरीरपर्याप्त्या पर्याप्तस्य उच्छ्वासे अनुदिते उद्योतनाम्नि तूदिते चतुःपञ्चाशत् अत्रापि प्रागिव स्वमतेन भङ्गाश्चत्वारो, मतान्तरेणाष्टौ । अथवा शरीरपर्याप्त्या पर्याप्तस्य उच्छ्वासे अनुदिते उद्योतनाम्नि तूदिते च सर्वसंख्यया चतुःपञ्चाशत् स्वमतेनाष्टौ भङ्गा मतान्तरेण षोडश ततो भाषापर्याप्त्या पर्याप्तस्य सुस्वरसहितायां चतुःपञ्चाशति सुस्वरे क्षिप्ते पञ्चपञ्चाशद्भवति अत्रापि स्वमतेन भङ्गाश्चत्वारो मतान्तरेणाष्टौ सर्वसंख्यया पञ्चपञ्चाशत् । स्वमतेनाष्टौ भङ्गा मतान्तरेणापि तु षोडश भाषापर्याप्त्या पर्याप्तस्य सुस्वरसहितायां पञ्चपञ्चाशति उद्योते क्षिप्ते षट्पञ्चाशद्भवति । अत्रापि स्वमतेनैव चत्वारो भङ्गाः मतान्तरेणाष्टौ सर्वसंख्यया इयानां स्वमतेन द्वात्रिंशद्भङ्गाः मतान्तरेण चतुःषष्टिः । नैरयिकाणामुदीरणा-स्थानानि पञ्च । तद्यथा-[illegible] पञ्चाशद् [illegible] त्रिकानुपूर्व्यौ [illegible] । तत्र नरकगतिनर-[illegible] सह [illegible] च सर्वाण्यपि पदानि [illegible] भङ्गः । ततः शरीरस्थस्य वैक्रियाङ्गोपाङ्ग[illegible] तत्प्रत्येकमिति [illegible] प्रक्षिप्यते । नरकानुपूर्वी चापनी-[illegible] पर्याप्तस्य [illegible] एव भङ्गः । तत, [illegible] भवति । अत्राप्येक एव भङ्गः । तत प्राणा-पान[illegible]पर्याप्तस्य उच्छ्वासे क्षिप्ते अष्टपञ्चाशद्भवति । अत्राप्येक एव भङ्गः । ततो भाषापर्याप्त्या पर्याप्तस्य दुःस्वरे क्षिप्ते एकोनषष्टिर्भवति । अत्राप्येक एव भङ्गः । सर्वसंख्यया [illegible] पञ्च भङ्गाः । [illegible] नामकर्मणोऽदीरणा-

[illegible] दर्शयति ।

गुणिसु नामस्स ता, सत्त तिन्नि अट्ठ य छप्पं च ।
अप्पमत्ते दो एग, पंचसु एगम्मि अट्ठ ॥ ६०५ ॥

[illegible] गुणस्थानेषु मिथ्यादृष्टिप्रभृतिषु [illegible] स्थानानि भवन्ति । तत्र मिथ्यादृष्टौ [illegible] । तद्यथा [illegible] [illegible] । अमूनि च [illegible] [illegible] । तद्यथा [illegible] । [illegible]

[illegible]

द्वादशानां चत्वारि चतुष्पदानि ।

[illegible]

कृत्य एकः । देवानधिकृत्य चत्वारः । ये पुनः सुभगादेययोर्दुर्भगानादेययोश्च केवलकेवलयोरप्युदयमिच्छन्ति तन्मतेन द्विचत्वारिंशति त्रिचत्वारिंशद्भङ्गाः । यतस्तन्मतेन तिर्यक्पञ्चेन्द्रियानधिकृत्य नव, मनुष्यानधिकृत्य नव, देवानधिकृत्याष्टौ भङ्गाः प्राप्यन्ते शेषं तथैव । पञ्चाशत्येकादश भङ्गास्ते चैकेन्द्रियान्देवानधिकृत्य प्राप्यन्ते । अन्यत्र पञ्चाशतः प्राप्यमाणत्वात् । एकपञ्चाशत्येकविंशति भङ्गाः । तत्र नैरयिकानधिकृत्य चत्वारो वैक्रियमनुष्यानधिकृत्य चत्वारः आहारकशरीरिणः संयतानधिकृत्य नव देवानाश्रित्य चत्वार इत्येकविंशतिः । मतान्तरेण पुनर्वैक्रियतिर्यङ्मनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्त इत्येकपञ्चाशति तदपेक्षया त्रयस्त्रिंशद्भङ्गाः । (सत्तरसतिसयपत्ति) त्रिंशद्द्वादशाधिका त्रिंशति भङ्गानां द्विपञ्चाशति रवगन्तव्याः । तत्र एकेन्द्रियानाश्रित्य त्रयोदश द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं प्राप्यते इति नव । तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्चचत्वारिंशतं मनुष्याननधिकृत्य पञ्चचत्वारिंशतम् । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियान् मनुष्यांश्चाधिकृत्य प्रत्येकं द्वे द्वे शते भङ्गानामेकोनसप्तत्यधिके प्राप्येते इति तदपेक्षया द्विपञ्चाशद्भङ्गानां शतानि षट् प्राप्यन्ते । त्रिपञ्चाशति भङ्गानामेकविंशतिः तद्यथा मनुष्यांश्चाधिकृत्य प्रत्येकं द्वे द्वे शते भङ्गानामेकोनसप्तत्यधिके प्राप्येते तदपेक्षया मनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इति तदपेक्षया त्रिपञ्चाशति त्रयस्त्रिंशद्भङ्गाः चतुःपञ्चाशति भङ्गानां षट् शतानि षडुत्तराणि तद्यथा नैरयिकाणां प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इति तदपेक्षया त्रिपञ्चाशति त्रयस्त्रिंशद्भङ्गाः चतुःपञ्चाशति भङ्गानां षट्तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ स्वभावस्थान्मनुष्यानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रियमनुष्यानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ स्वभावस्थान् मनुष्यानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रियमनुष्यानधिकृत्य चत्वारः संयतान् वैक्रियशरीरिणः संयतानधिकृत्य द्वौ देवानधिकृत्योद्योतेन सहैकः । आहारकशरीरिणः संयतानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि वैक्रियमनुष्यानधिकृत्य नव देवानधिकृत्य षोडश भङ्गाः प्राप्यन्ते शेषं तथैवेति तदपेक्षया चतुःसप्तत्यधिकानि द्वादश शतानि पञ्चशतानि भङ्गानां नव शतानि [illegible]धिकानि । तद्यथा नैरयिकानधिकृत्यैकः [illegible] द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारः २ इत्येवं भवन्ति द्वादश । तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य प्रत्येकं [illegible] इति द्वादश तिर्यक्पञ्चेन्द्रियान स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रियशरीरिणो [illegible] वैक्रियसंयतानधिकृत्योद्योतेन सहैकः आहारकशरीरिणः [illegible] देवानधिकृत्य [illegible] । मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्वि[illegible] । वैक्रियतिर्यक्पञ्चेन्द्रिया[illegible] पञ्च शतानि [illegible] वैक्रियमनुष्यानधिकृत्य नव देवानधिकृत्य [illegible] तदपेक्षया [illegible] [illegible] [illegible]

यचतुरिन्द्रियानधिकृत्य प्रत्येकं षट् प्राप्यन्ते इति अष्टादश । तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्याष्टौ शतानि चतुर्दशशतानि चतुःसप्तत्यधिकानि वैक्रियशरीरिणोऽधिकृत्य चत्वारः मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियशरीरिणः संयतानधिकृत्योद्योतेन सहैकः । आहारकशरीरिणः संयतानधिकृत्यैकः तीर्थकरमाश्रित्यैकः देवानधिकृत्य चत्वारः । अत्र मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य सप्तदश शतानि भङ्गानां भवन्ति सप्तपञ्चाशद्भङ्गानां पञ्चाशति एकोननवत्यधिकानि प्रत्येकं चत्वारः २ प्राप्यन्ते इति द्वादश । तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि एकादश शतानि भङ्गानां प्राप्यन्ते षट्सप्तत्यधिकानि तीर्थकरमाश्रित्यैक इति । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकानि एकादश शतानि भङ्गानां प्राप्यन्ते शेषं तथैवेति । तदपेक्षया सप्तपञ्चाशत् पञ्चषष्ट्यधिकान्येकादश शतानि भङ्गानां भवन्ति ।

(अनयोर्व्याख्या पुस्तकान्तरे एवं दृश्यते । तद्यथा)

" स्थानक्रमेण एकचत्वारिंशत्येको भङ्गः । स च तीर्थकरकेवलिनः द्विचत्वारिंशति त्रिशद्भङ्गाः । तत्र नैरयिकानधिकृत्य एकः एकेन्द्रियानधिकृत्य पञ्च द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं त्रिकं प्राप्यते इति नव । तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च, मनुष्यानप्यधिकृत्य पञ्च, तीर्थकरमधिकृत्य एकः देवानधिकृत्य चत्वारः । ये पुनः सुभगादेययोर्दुर्भगानादेययोश्च केवलकेवलयोरप्युदयमिच्छन्ति तन्मतेन द्विचत्वारिंशति द्विचत्वारिंशद्भङ्गाः यतस्तन्मतेन तिर्यक्पञ्चेन्द्रियाण्यधिकृत्य नव, मनुष्यानधिकृत्य नव, देवानधिकृत्याष्टौ भङ्गाः प्राप्यन्ते शेषं तथैव । पञ्चाशत्येकादश भङ्गास्ते चैकेन्द्रियानेवाधिकृत्य प्राप्यन्ते अन्यत्र पञ्चाशतो अप्राप्यमाणत्वात् एकपञ्चाशत्येकविंशति भङ्गाः तत्र नैरयिकानधिकृत्य चत्वारो वैक्रियमनुष्यानप्यधिकृत्य चत्वारः आहारकशरीरिणः संयतानधिकृत्य एकः देवानाश्रित्य चत्वार इति इत्येकविंशतिः । मतान्तरेण पुनर्वैक्रियतिर्यङ्मनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इत्येकपञ्चाशति तदपेक्षया त्रयस्त्रिंशद्भङ्गाः (सत्तरसतिसयपत्ति) सप्तनवत्यधिका त्रिंशतिभङ्गानां द्विपञ्चाशत्यवगन्तव्या । तत्र एकेन्द्रियानाश्रित्य त्रयोदश द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं त्रिकं प्राप्यते इति नव, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्चचत्वारिंशतं मनुष्यानप्यधिकृत्य पञ्चचत्वारिंशतमिति । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियान् मनुष्यांश्चाधिकृत्य प्रत्येकं द्वे द्वे शते भङ्गानामेकोननवत्यधिके प्राप्येते इति तदपेक्षया द्विपञ्चाशति भङ्गानां शतानि षट् प्राप्यन्ते । त्रिपञ्चाशति भङ्गानामेकविंशतिः । तद्यथा नैरयिकानधिकृत्य एकः एकेन्द्रियानधिकृत्य षट् वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य चत्वारः वैक्रियमनुष्यानप्यधिकृत्य चत्वारः आहारकशरीरिणोऽधिकृत्य पुनरेकस्तीर्थकरमप्याश्रित्यैकः देवानप्यधिकृत्य चत्वारः अत्रापि मतान्तरेण वैक्रियतिर्यक्पञ्चेन्द्रियमनुष्यदेवानधिकृत्य प्रत्येकमष्टावष्टौ भङ्गाः प्राप्यन्ते इति तदपेक्षया त्रिपञ्चाशति त्रयस्त्रिंशद्भङ्गाः चतुःपञ्चाशति भङ्गानां षट् शतानि षडुत्तराणि । तद्यथा नैरयिकानधिकृत्यैकः द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं षट् प्राप्यन्ते इति षट् । तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ स्वभावस्थान्मनुष्यानधिकृत्य द्वे शते अष्टाशीत्यधिके वैक्रिय-

मनुष्यानधिकृत्य चत्वारः संयतान् वैक्रियशरीरिणोऽधिकृत्य चत्वारः । संयतानधिकृत्य द्वौ, देवानधिकृत्योद्योतेन सहैकः, आहारकशरीरिणः संयतानधिकृत्य द्वौ, देवानधिकृत्य षोडश, मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि प्राप्यन्त इति । अत्रापि मतान्तरेण प्राकृततिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि वैक्रियमनुष्यानधिकृत्य नव, देवानधिकृत्य षोडश भङ्गाः प्राप्यन्ते शेषं तथैवेति । सर्वसंख्यया चतुःपञ्चाशानि द्व्यधिकानि द्वादश शतानि पञ्च शतानि भङ्गानां नव शतानि एकाधिकानि तथथा नैरयिकानधिकृत्यैकः द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारः प्राप्यन्त इति द्वादश । तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्य प्रत्येकं चत्वारः प्राप्यन्ते इति द्वादश । तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि वैक्रियशरीरिणोऽधिकृत्याष्टौ, मनुष्यान् स्वभावस्थानधिकृत्य द्वे शते अष्टाशीत्यधिके, वैक्रियशरीरिणोऽधिकृत्य चत्वारः वैक्रियसंयतानधिकृत्योद्योतेन सहैकः, आहारकशरीरिणोऽधिकृत्य द्वौ, तीर्थकरमधिकृत्यैकः, देवानधिकृत्याष्टाविति । मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकान्येकादश शतानि वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्य षोडश मनुष्यान् स्वभावस्थानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि, वैक्रियमनुष्यानधिकृत्य नव, देवानधिकृत्य षोडश भङ्गाः प्राप्यन्ते । शेषं तथैवेति तदेवं सर्वसंख्यया पञ्चाशच्छतानि पञ्चाशीत्यधिकानि सप्तदश शतानि षट्पञ्चाशानि भङ्गानामेकोनसप्तत्यधिकानि चतुर्दश शतानि तथथा द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं षट् प्राप्यन्ते इति अष्टादश, तिर्यक्पञ्चेन्द्रियान् स्वभावस्थानधिकृत्याष्टौ शतानि चतुःषष्ट्यधिकानि, वैक्रियशरीरिणोऽधिकृत्य चत्वारः मनुष्यानधिकृत्य पञ्च शतानि षट्सप्तत्यधिकानि वैक्रियशरीरिणः संयतानधिकृत्य उद्योतेन सह एकः, आहारकशरीरिणः संयतानधिकृत्य एकः तीर्थकरमधिकृत्यैकः, देवानधिकृत्य चत्वारः । अत्र मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य सप्तदश शतान्यष्टाविंशत्यधिकानि, वैक्रियतिर्यक्पञ्चेन्द्रियानधिकृत्याष्टौ, मनुष्यानधिकृत्य द्विपञ्चाशदधिकानि भङ्गानां भवन्ति । सप्तपञ्चाशानि भङ्गानां पञ्चशती एकोननवत्यधिका । तथथा द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियानधिकृत्य प्रत्येकं चत्वारः २ प्राप्यन्ते इति द्वादश, तिर्यक्पञ्चेन्द्रियानधिकृत्य पञ्चाश (तानि) नि एकादश शतानि भङ्गानां प्राप्यन्ते षट्सप्तत्यधिकानि । तीर्थकरमाश्रित्यैक इति । अत्रापि मतान्तरेण तिर्यक्पञ्चेन्द्रियानधिकृत्य द्विपञ्चाशदधिकानि एकादश शतानि भङ्गानां प्राप्यन्ते । शेषं तथैवेति । तदेवं सर्वसंख्यया सप्तपञ्चाशानि पञ्चषष्ट्यधिकान्येकादश शतानि भङ्गानां भवन्ति " ॥

सम्प्रति गतिमाश्रित्य स्थानप्ररूपणां करोति ।

पणनवगक्काणि, गइपुव्वाणि सेसकम्माणं ।

एगेगमेव णेयं य, णाहितित्थे य पगईओ ॥१५४॥

नरकगतावुदीरणास्थानानि पञ्च तथथा द्विचत्वारिंशत् एकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशच्चेति । तिर्यग्गतावेकचत्वारिंशत् वर्ज्यानि शेषाणि सर्वो[illegible]स्थानानि मनुष्यगतावपि अयोगिकेवल्यादीन[illegible]वर्ज्यानि शेषाणि सर्वोदीरणास्थानानि देवगतौ[illegible] स्थानानि मनुष्यगतिसयोगिकेवलौ तथथा द्विचत्वारिंशदेकपञ्चाशत् त्रिपञ्चाशत् चतुःपञ्चाशत् पञ्चपञ्चाशत् षट्पञ्चाशच्चेति । एतानि च सर्वाण्यपि प्राक् सप्रपञ्चं भावितानीति नेह भूयो भाव्यन्ते । तदेवमुक्तानि नामकर्मणः सप्रपञ्चमुदीरणास्थानानि । संप्रति शेषकर्मणामुदीरणास्थानप्रतिपादनार्थमाह (सेसकम्माणन्ति) शेषकर्मणां ज्ञानावरणवेदनीयायुर्गोत्रान्तरायलक्षणानामुदीरणास्थानमेकैकमवगन्तव्यं तथथा ज्ञानावरणान्तरायोः पञ्चप्रकृत्यात्मकमेकैकमुदीरणास्थानं वेदनीयायुर्गोत्राणान्तु एकमानेकप्रकृत्यात्मकं नहीमीषां द्व्यादिकाः प्रकृतयो युगपदुदीर्यन्ते युगपदुदयाभावात् एतच्च ज्ञानावरणीयवेदनीयानामेकैकमुदीरणास्थानं प्राग्गुणैकैकप्रकृत्युदीरणायां स्वामित्वं साधयित्वा निश्चित्य गुणस्थानेषु नारकादिषु गतिषु स्वयमेव ज्ञेय ज्ञातव्यम् । तदेवमुक्ताः प्रकृत्युदीरणाः । सम्प्रति स्थित्युदीरणाभिधानावसरस्तत्र चेति सर्वाधिकारास्तथथा लक्षणं भेदः साद्यनादिप्ररूपणा अद्धाच्छेदः स्वामित्वं चेति ॥

तत्र लक्षणभेदयोः प्रतिपादनार्थमाह ।

संपत्तिए य उदये, पओगओ दिस्सए उइरणा सा ।

सेचिकाठिईहिं जाहीं, दुविहा मूलोत्तगाए य ॥१५३॥

इह द्विविध उदयः संप्राप्त्युदयोऽसंप्राप्त्युदयश्च । तत्र यत्कर्म दलिकं कालप्राप्त सदनुभूयते स संप्राप्त्युदयः । तथाहि कालक्रमेण कर्मदलिकस्योदये हेतुद्रव्यक्षेत्रादिसामग्रीसंप्राप्तौ सत्यामुदयः संप्राप्त्युदयः । यत्पुनरकालप्राप्तं कर्म तद्दलिकमुदीरणा । तथा चाह या स्थितिरकालप्राप्तापि सती प्रयोगेण उदीरणाप्रयोगेण संप्राप्त्युदये पूर्वोक्तस्वरूपे प्रक्षिप्ता सती दृश्यते केवलचक्षुषा सा स्थित्युदीरणा । एष लक्षणनिर्देशः । अधुना भेद उच्यते (सेचिकेत्यादि) इह यासां स्थितीनां भेदः परिकल्पना सम्भवति ताः पुरुषपरिभाषया सेचिका इत्युच्यन्ते ताश्च द्विधा उदीरणायाः प्रायोग्याः अप्रायोग्याश्च काश्चाप्रायोग्या इति चेदुच्यते बन्धावलिकागता संक्रमावलिकागताश्च उदयावलिकागताश्च प्रायोग्याः "सकम्मबंध उदयबद्धावलिवइक्कंता बन्धाइ" इति वचनप्रामाण्यात् शेषाश्च सर्वा अपि प्रायः प्रायोग्याः तत्रोदये सति यासां प्रकृतीनामुत्कृष्टबन्धः संभवति [illegible] मुत्कर्षत आवलिका द्विकहीना सर्वोत्कृष्टा स्थिति[illegible]प्रायोग्या तथाहि उदये बन्धानां मु[illegible]प्रायोग्याः । आवलिकाद्विकहीनायाश्च [illegible] समयास्तावन्त उदीरणायाः प्रभेदाः तथाहि [illegible] उपरिवर्तिनी समयमात्रा स्थितिः [illegible]स्य तावन्मात्रा शेषीकृता तिष्ठति [illegible]कस्यापि त्रिसमयमात्रा एव । [illegible] कस्यापि सर्वोत्कृष्टा स्थितिरिति । [illegible] सेचिकास्थितिस्य उदीरणा[illegible] मीत्य आवलिकाद्विक[illegible] धैः उदीरणाप्रयोगेण [illegible] मायती मायत्रेकसमया [illegible] । [illegible] प्ररूपणा । संप्रति [illegible] उत्तरप्रकृतिविषया [illegible] च ।

तत्र मूलप्रकृ[illegible]

मूलठिइ [illegible]

वेइज्जि [illegible]

मूलस्थितिशब्दात्प्राकृतत्वात् प्रत्येकं षष्ठीविभक्तिलोपः ततोऽयमर्थः मूलप्रकृतीनां मध्ये मोहस्य मोहनीयस्थितेरुदीरणा अजघन्या चतुर्विधा चतुःप्रकारा तद्यथा सादिरनादिर्ध्रुवाऽध्रुवा च। तथामोहनीयस्य जघन्या स्थित्युदीरणा सूक्ष्मसंपराय क्षपकस्य स्वगुणस्थानकसमयादिकावलिका शेषे वर्तमानस्य भवति शेषकालं त्वजघन्या सामाशेषे वर्तमानस्य भवति। ततोऽन्यत्र सर्वत्राप्यजघन्या सा चोपशान्तमोहगुणस्थानकेषु न भवति ततः प्रतिपाते च भवति ततोऽसौ सादिः तत्स्थानमप्राप्तस्य पुनरनादिः। ध्रुवा अभव्यानाम्, अध्रुवा भव्यानां, शेषा ज्ञानावरणदर्शनावरणनामगोत्रान्तरायाणां स्थित्युदीरणा। अजघन्या त्रिधा त्रिप्रकारा तद्यथा अनादिर्ध्रुवा अध्रुवा च तथाहि ज्ञानावरणदर्शनावरणान्तरायाणां जघन्या स्थित्युदीरणा क्षीणकषायस्य स्वगुणस्थानसमयाधिकावलिका शेषे वर्तमानस्य भवति शेषकालं त्वजघन्या सा चानादिः सदैव भावात् ध्रुवाध्रुवे पूर्ववत्। नामगोत्रयोस्तु जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये सा चानादिरध्रुवा च। ततोऽन्या सर्वाप्यजघन्या सा चानादिः ध्रुवाध्रुवे पूर्ववत्। वेदनीयायुर्जघन्या स्थित्युदीरणा द्विधा तद्यथा सादिरध्रुवा च तथा सर्वा हि वेदनीयस्य जघन्या स्थित्युदीरणा एकेन्द्रियस्य सर्वस्तोकस्थितिसत्कर्मणो लभ्यते ततस्तस्यैव समयान्तरे प्रवर्धमानसत्कर्मणोऽजघन्या ततः पुनरपि जघन्येति जघन्या। अजघन्या च सादिरध्रुवा च आयुषः पर्यन्तावलिकायां न भवति परभवोत्पत्तिसमये च भवति सा च सादिरध्रुवा च। तथा सर्वासां प्रकृतीनां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विधा द्विप्रकारा यथा सादयो ध्रुवाश्च तथाहि सर्वासामपि कर्मणामायुर्वर्जानामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टसंक्लेशे वर्तमानस्य कियत्कालं प्राप्यते। ततः समयान्तरे तस्याप्यनुत्कृष्टा ततः पुनरपि समयान्तरे उत्कृष्टा संक्लेशे विशुद्ध्या प्रायः प्रतिसमयपरावर्तमानत्वात् ततो द्वे अपि साद्यध्रुवे। जघन्या च द्विधा प्रागेव भाविता आयुषां तु विकल्पाः सर्वे अपि सादयोऽध्रुवाश्च मन्तव्याः। तदेवं कृता मूलप्रकृतिविषया साद्यनादिप्ररूपणा।

सम्प्रत्युत्तरप्रकृतीनां विषये तामाह ।

मिच्छत्तस्स चउद्धा, अजहन्ना धुवउदीरणाण तिहा ।
सेसविगप्पा दुविहा, सव्वविगप्पाय सेसाणं ॥२५५॥

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

[illegible]

त्रिंशत्संख्याकानां नाम च प्रकृतीनां जघन्या स्थित्युदीरणा सयोगिकेवलिचरमसमये सा च सादिरध्रुवा च ततोऽन्या सर्वाप्यजघन्या सा चानादिः। ध्रुवाध्रुवे पूर्ववत्। एतासां मिथ्यात्वादिप्रकृतीनामष्टचत्वारिंशत्संख्याकानां शेषविकल्पा उत्कृष्टानुत्कृष्टजघन्यलक्षणा द्विप्रकारास्तद्यथा सादयो ध्रुवाश्च तथा ह्येतासामुत्कृष्टा स्थित्युदीरणा मिथ्यादृष्टेरुत्कृष्टसंक्लेशे वर्तमानस्य कियत्कालं लभ्यते ततः समयान्तरं तस्याप्यनुत्कृष्टा ततो द्वे अपि साद्यध्रुवे जघन्या च प्रागेव भाविता (सव्वविगप्पा य सेसाणं ति) शेषाणां शेषप्रकृतीनां दशोत्तरशतसंख्यानां सर्वे विकल्पा उत्कृष्टानुत्कृष्टजघन्यरूपा विकल्पास्तद्यथा सादयो ध्रुवाश्च साद्यध्रुवत्वं चाध्रुवोदयत्वे ज्ञातव्यम् कृता साद्यनादिप्ररूपणा ॥

संप्रत्यद्धाच्छेदस्य स्वामित्वस्य च प्रतिपादनार्थमाह ॥

अद्धाओ सामित्तं, ठिइ संकमे जहा नवरि ॥
तेवइस्सु निरइयगई, एवा विनिसुहिढिम्मखीईस्सु ॥२५६॥

अद्धाच्छेदः स्वामित्वं च यथा स्थितिसंक्रमेऽभिहितं तथैवात्राप्यवगन्तव्यं नवरमयं विशेषसंक्रमकरणे तदा वेद्येष्वपि स्थितिसंक्रम उक्तः। उदयाभावेऽपि संक्रमस्य भावात्। उदीरणा पुनरियं तदुदयेष्वेव वेदितव्या। उदयाभावे उदीरणाया अभावात्। इदमपि संक्षिप्तमुक्तमिति किंचिद्विशेषतो भाव्यते। तत्र येषां कर्मणामुदये सति बन्धोत्कृष्टा स्थितिस्तेषां ज्ञानावरणपञ्चकान्तरायपञ्चकदर्शनावरणचतुष्टयतैजससप्तकवर्णादिविंशतिनिर्माणस्थिराशुभागुरुलघुमिथ्यात्वषोडशकषायत्रसबादरपर्याप्तप्रत्येकदुःस्वरदुर्भगानादेयायशःकीर्तिवैक्रियसप्तकपञ्चेन्द्रियजातिहुण्डोपघातपराघातोच्छ्वासतपोद्योताप्रशस्तविहायोगतिनीचैर्गोत्ररूपाणां षडशीतिसंख्यानां बन्धावलिकायामतीतायामुदयावलिकातः उपरितनी सर्वापि स्थितिः उदीरणाप्रायोग्या केवलं तानि कर्माणि वेद्यमानानां वेदितव्या। उदयवत्स्वेवोदीरणायाः सम्भवात्। बन्धावलिकारहिता च सर्वा स्थितिः। इह आवलिकाद्विकरूपोऽद्धाच्छेदस्तदुदयवत उदीरणा स्वामिनः येषां तु कर्मणां मनुष्यगतिसातवेदनीयस्थिरादिषट्कहास्यादिषट्कवेदत्रयचतुर्नोकषाययोगतिप्रथमसंस्थानपञ्चकप्रथमसंहनन पञ्चकोच्चैर्गोत्ररूपाणामेकोनत्रिंशत्संख्याकानामुदये सति संक्रमेणोत्कृष्टा स्थितिः। तेषामावलिकाद्विकहीना सर्वा स्थितिरुदीरणा प्रायोग्या केवलं तानि कर्माणि वेद्यमाना वेदितव्या अत्र बन्धावलिका संक्रमावलिकारहिता च सर्वा स्थितिर्यस्थितिरिह आवलिकात्रिकरूपोऽद्धाच्छेदस्तदुदयवन्तस्तदुदीरणास्वामिनः। एवमुत्तरत्रापि यावत् यावानुदीरणाया अयोग्यः कालस्तावानद्धाच्छेदस्तदुदयवन्तस्तदुदीरणास्वामिनो वेदितव्याः। तथा सप्ततिसागरोपमकोटीप्रमाणा मिथ्यात्वस्य स्थितिर्मिथ्यादृष्टिना बद्धा च ततः अन्तर्मुहूर्तकालं यावत्तन्मिथ्यात्वमनुभूय सम्यक्त्वं प्रतिपद्येत ततः सम्यक्त्वं सम्यग्मिथ्यात्वे चान्तर्मुहूर्तोना मिथ्यात्वस्थितिः सकलापि संक्रमयति संक्रमावलिकायां चातीतायामुदीरणायोग्या तत्र संक्रमावलिकाधिकोऽपि सान्तर्मुहूर्तो नव ततः सम्यक्त्वस्य मुख्यतः सम्यक्त्वस्यान्तर्मुहूर्तोना सप्ततिसागरोपमकोटीप्रमाणा उत्कृष्टा स्थितिरुदीरणा योग्या तत्र कश्चित् सम्यक्त्वेऽन्तर्मुहूर्तं स्थित्वा सम्यग्मिथ्यात्वं गच्छति ततः सम्यग्मिथ्यात्वमनुभवतः सम्यग्मिथ्यात्व-

स्यान्तर्मुहूर्त्तं द्विकोना सप्ततिसागरोपमकोटाकोटिप्रमाणा उत्कृष्टा स्थितिरुदीरणायोग्या भवति । तथा आहारकसप्तमप्रमत्तेन सता तद्योग्योत्कृष्टसंक्लेशेनोत्कृष्टस्थितिकं बद्धमाहारकोत्कृष्टस्थितिकं सूक्ष्मप्रकृत्यन्तरदलिकं च तत्र संक्रमितमतस्तस्योत्कृष्टा तत्सागरोपमकोटाकोटीस्थितिकं जाते पश्चादनन्तरमन्तर्मुहूर्त्तमतिक्रम्य आहारकशरीरमारभते । तदारभमाणो लब्ध्युपजीवनेनौत्सुक्यभावतः प्रमादवान् भवति ततस्तस्य प्रमत्तस्य सत आहारकशरीरमुत्पादयतः आहारकसमयादन्तर्मुहूर्त्तोना उत्कृष्टा स्थितिरुदीरणायोग्या । अत्र प्रमत्तस्य सत आहारकशरीरारम्भात् उत्कृष्टस्थित्युदीरणास्वामित्वमप्रमत्तसंयत एव वेदितव्यः । शेषप्रकृतीनां सूत्रकृदेव विशेषमाचष्टे (निरयगइत्यादि) नरकगतेरपिशब्दात् नरकानुपूर्व्याश्च तिर्यक्पञ्चेन्द्रियो मनुष्यो वा उत्कृष्टां स्थितिं बद्ध्वा उत्कृष्टस्थितिबन्धानन्तरं चान्तर्मुहूर्त्तं व्यतिक्रान्ते सति निरयेषु अधस्तनपृथिवीषु मध्ये अन्यतरस्यां समुत्पन्नस्तस्य प्रथमसमये नरकगतेरन्तर्मुहूर्त्तहीने सर्वापि स्थितिर्विंशतिसागरोपमकोटाकोटीप्रमाणा उदीरणा योग्या भवति । नरकानुपूर्वी चापान्तरालगतौ समयत्रये यावदुत्कृष्टा स्थितिरुदीरणायोग्या भवति । अधस्तनपृथिवीग्रहणं किं प्रयोजनमिति चेदुच्यते । इह नरकगत्यादीनामुत्कृष्टां स्थितिं बध्नन् अवश्यं कृष्णलेश्यापरिणामोपेतो भवति कृष्णलेश्यापरिणामः पञ्चमपृथिव्यामुत्पद्यते । मध्यमकृष्णलेश्यापरिणामः षष्ठपृथिव्यामुत्कृष्टकृष्णलेश्यापरिणामः सप्तमपृथिव्यामित्यधस्तनपृथिवीग्रहणं कृतम् ॥

देवगतिं देवमणुआ-णुपुव्वि आयावविगलसुहुमतिगं ।
अंतोमुहुत्तभग्गा, ताव एगूणं तदुक्कस्सं ॥ २५७ ॥

देवगतिदेवानुपूर्वीमनुष्यानुपूर्वीणामातपस्य विकलत्रिकस्य द्वीन्द्रियत्रीन्द्रियचतुरिन्द्रियजातिरूपस्य सूक्ष्मत्रिकस्य सूक्ष्मसाधारणापर्याप्तकलक्षणस्य स्वस्वोदये वर्त्तमाना अन्तर्मुहूर्त्तभग्ना उत्कृष्टा स्थितिबन्धाध्यवसायादन्तर्मुहूर्त्तं कालं यावत्परिभ्रष्टाः सन्तस्तावदूनामन्तर्मुहूर्त्तोनां तदुत्कृष्टां देवगत्यादीनामुत्कृष्टां स्थितिमुदीरयन्ति । इयमत्र भावना । इह कश्चित् तथाविधपरिणामविशेषभावतो नरकगतेरुत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटीप्रमाणां बद्धुमारभते ततस्तस्यां देवगतिस्थितौ बध्यमानायामावलिका उपरि बन्धावलिकाहीना आवलिकामात्रहीना जाता देवगतिं च बध्नन् जघन्येनाप्यन्तर्मुहूर्त्तं कालं यावत् बध्नाति बन्धानन्तरं च कालं कृत्वा अनन्तरसमये देवो जातस्ततस्तस्य देवत्वमनुभवतो देवगतिरन्तर्मुहूर्त्तोना विंशतिसागरोपमकोटाकोटीप्रमाणा उत्कृष्टा स्थित्युदीरणायोग्या भवति । ननु कथमन्तर्मुहूर्त्तावलिकाद्विकाधिकान्तर्मुहूर्त्तोना प्राप्नोति कथमुच्यते अन्तर्मुहूर्त्तोनेति नैष दोषः यत आवलिकाद्विकेनेति तदन्तर्मुहूर्त्तमेव केवलं गृहीतमन्तर्गतत्वमित्येव देवानुपूर्व्या अपि वाच्यम् । तथा कश्चिन्नरकानुपूर्व्या उत्कृष्टां स्थितिं विंशतिसागरोपमकोटाकोटीप्रमाणं बध्वा ततः शुभपरिणामविशेषतो मनुष्यानुपूर्व्या उत्कृष्टां स्थितिं पञ्चदशसागरोपमकोटाकोटीप्रमाणं बद्धुमारभते ततस्तस्यां मनुष्यानुपूर्व्याः स्थितौ बध्यमानायामावलिकाया उपरि बन्धावलिकाहीनामावलिकामुपरितनीं सकलामपि नरकानुपूर्व्याः स्थितिं संक्रमयति ततो मनुष्यानुपूर्व्या अपि विंशतिसागरोपमकोटाकोटीप्रमाणा स्थितिरावलिकामात्रहीना जाता मनुष्यानुपूर्वीं च बध्नन् जघन्येनाप्यन्तर्मुहूर्त्तं कालं यावद्बध्नाति तदन्तर्मुहूर्त्तमावलिकोनविंशतिसागरोपमकोटाकोटीप्रमाणा उदीरणा योग्या । ननु मनुष्यगतेरपि पञ्चदशसागरोपमकोटाकोट्यो बन्धेनोत्कृष्टा स्थितिः प्राप्यते तथा मनुष्यानुपूर्व्या अपि नरकस्या अपि विंशतिस्तत उभयोरपि संक्रमोत्कृष्टे संक्रमोत्कृष्टत्वात् विशेषे च कथं मनुष्यगतेरिव मनुष्यानुपूर्व्या अपि आवलिकात्रिकहीनोत्कृष्टा स्थितिरुदीरणायोग्या न भवति तत्र युक्तं मनुष्यानुपूर्व्या अनुदयसंक्रमोत्कृष्टत्वात् तदुक्तं " मणुयाणुपुव्विमीसग, आहारग देवजुयलविगलाणि । सुहुमाइतिगं तित्थं अणुदय संकमण उक्कोसा ॥" अनुदयः संक्रमोत्कृष्टानां च जघन्यतोऽप्यन्तर्मुहूर्त्तोनाया यथोत्कृष्टस्थितेरुदीरणायोग्यत्वात् मनुष्यगतिस्तूदयसंक्रमोत्कृष्टा तदुक्तं " मणुयगई सायसम्मं थिरहास छच्च वेय सुभ । खगई रिसभ चउरंसग पणुच्च उदसंकमुक्कोसा ॥" ततस्तस्या आवलिकात्रिकहीने चोत्कृष्टा स्थितिरुदीरणायोग्या भवति एवमातपादीनामप्यन्तर्मुहूर्त्तोना उत्कृष्टा स्थितिरुदीरणा योग्या भवतु आतपनाम्नोऽनुबन्धोत्कृष्टं ततस्तस्य स्थितीनां प्रकृतीनामन्तर्मुहूर्त्तोना उत्कृष्टा स्थितिरुदीरणायोग्या भवतु आतपनाम्नोऽनुबन्धोत्कृष्टा ततस्तस्य बन्धोदयावलिकाद्विकरहिते चोत्कृष्टस्थितिरुदीरणा प्रायोग्या भावनीया । ननु अनुदयसंक्रमोत्कृष्टा स्थितीनां प्रकृतीनामन्तर्मुहूर्त्तोना उत्कृष्टास्थितिरुदीरणा योग्या भवतु कथमुच्यते अन्तर्मुहूर्त्तोनेति उच्यते इह देव एवोत्कृष्टे संक्लेशे वर्त्तमान एकेन्द्रियाणामेकेन्द्रियप्रायोग्याणामातपस्थावरैकेन्द्रियजातीनामुत्कृष्टां स्थितिं बध्नाति नान्यः स च तां बध्वा तत्रैव देवभवे अन्तर्मुहूर्त्तं कालं यावत् अवतिष्ठते ततः कालं कृत्वा बादरपृथ्वीकायिकेषु मध्ये समुत्पद्यते समुत्पन्नस्सन् शरीरपर्याप्त्या पर्याप्त आतपनामोदये वर्त्तमानस्तदुदीरयति तत एवं सति तस्यान्तर्मुहूर्त्तोनैवोत्कृष्टा स्थितिरुदीरणा योग्या न भवति आतपग्रहणं चोपलक्षणं तेनान्यासामपि स्थावरैकेन्द्रियजातिनरकद्विकतिर्यग्द्विकौदारिकसप्तकान्त्यसंहननिद्रापञ्चकरूपाणामेकोनविंशतिसंख्याकानामनुदयबन्धोत्कृष्टानामन्तर्मुहूर्त्तोना उत्कृष्टा स्थितिरुदीरणायोग्या वेदितव्या । तत्र स्थावरैकेन्द्रियजातिनरकद्विकानां भावना कृता शेषाणां क्रियते । तत्र नारकास्तिर्यग्द्विकौदारिकसप्तकान्त्यसंहननानामुत्कृष्टां स्थितिं बध्वा ततो मध्यमपरिणामस्तत्र तत्र चान्तर्मुहूर्त्ते गते सति निद्रोदये उत्कृष्टोदीरणां करोति ।

निद्दपयलस पच्छामं, खिज्जइमे जहन्नगं इत्तो ।
थावर जहन्नसंते, ए तसं आहिगं व बंधंतो ॥२५८॥
गंतूणावलिमित्तं, कसाय बारसगभय दुगंछाणं ।
निद्दा य पंचगस्स य, आया उज्जो य नामस्स ॥२५९॥

इह पूर्वं तीर्थकरनाम्नः स्थितिः शुभैरध्यवसायैरपवर्त्यापवर्त्य पल्योपमासंख्येयभागमात्रा शेषीकृता ततोऽनन्तरसमये उत्पन्नकेवलज्ञानः स तामुदीरयति उदीरयतश्च प्रथमसमये उत्कृष्टा उदीरणा सर्वदैव च इयन्मात्रैव स्थितिरुत्कृष्टा तीर्थकरनाम्नः उदीरणायोग्या प्राप्यते नाधिकेति । तदेवमुत्कृष्टस्थित्युदीरणास्वामित्वमुक्तम् । सम्प्रति जघन्यस्थित्युदीरणास्वामित्वमाह । (जहण्णगं इत्तो त्ति) इत ऊर्ध्वं जघन्यं जघन्यस्थित्युदीरणायाः स्वामित्वमभिधीयते प्रतिज्ञातमेव निर्वाहयति । (जावसजहन्नेत्यादि) स्थावरस्य सतोऽसज्जघन्यस्थित्युदीरणा सर्वस्तोका स्थितिसत्कर्म तेन समधिकं या मनाग्मात्र-

जातिनामकर्मा स एव जघन्यस्थितिकर्मा स्थावर एकेन्द्रियो बध्नन् बन्धावलिकायामतीतायामित्यर्थः । आद्य द्वादशकषायभयजुगुप्सातिर्यग्द्विकतैजसकार्मणवर्णादिनवकागुरुलघूपघातनिर्माणस्थिरास्थिरशुभाशुभोपघातनाम्नामेकविंशतिप्रकृतीनां जघन्यां स्थित्युदीरणां करोति इहातपोद्योतवर्जनामैकोनविंशतिप्रकृतीनां ध्रुवबन्धित्वादातपोद्योतयोस्तु प्रतिपक्षाभावात् अन्यत्र जघन्यतरा स्थितिर्न प्राप्यते ततः एकेन्द्रिय एव यथोक्तस्वरूपम् । आसां प्रकृतीनां जघन्यस्थित्युदीरणास्वामी ।

एगिंदिय जोग्गाणं, इयरा बंधित्त आलिगं गंतुं ।

एगिंदिय गए त-द्विय जाइणमवि एवं ॥ २६० ॥

एकेन्द्रियाणामेव उदीरणा संप्रति या योग्याः प्रकृतयस्ता एकेन्द्रिययोग्याः । एकेन्द्रिया जातिस्थावराः सूक्ष्मसाधारणनामानस्तासामेकेन्द्रियो जघन्यास्मिन् स्थितिः सत्सत्कर्मा इतरा एकेन्द्रियजात्यादिप्रतिपक्षभूता द्वीन्द्रियजात्यादिकाः प्रकृतीर्बध्नाति । तद्यथा एकेन्द्रियजातिद्वीन्द्रियजातित्रीन्द्रियजातिचतुरिन्द्रियजातिस्थावरसूक्ष्मसाधारणानां त्रसबादरप्रत्येकनामानि ततः एकेन्द्रियजात्यादीनि बध्नाति ततो बन्धावलिकां यावत् अतिक्रम्य बन्धावलिकायाश्चरमसमये एकेन्द्रियजात्यादीनां जघन्यां स्थित्युदीरणां करोति । इयमत्र भावना एकेन्द्रियः सर्वजघन्यस्थितिसत्कर्मा द्वीन्द्रियजातीः सर्वा अपि परिपाट्या बध्नाति ततस्तावद्बन्धानन्तरमेकेन्द्रियजातिं वेदयितुमारभते ततो बन्धावलिकायाश्चरमसमये पूर्वबद्धायाश्च एकेन्द्रियजातेर्जघन्यां स्थित्युदीरणां करोति । इह बन्धावलिकाया अनन्तरसमये बन्धावलिका प्रथमसमयबद्धा । अपि च सा उदीरणामायाति ततो जघन्या स्थित्युदीरणा न प्राप्यते इति कृत्वा बन्धावलिका चरमसमयं यावत् उक्तं यावता कालेन प्रतिपक्षभूताः प्रकृतीर्बध्नाति तावता कालेनैकेन्द्रियजातिस्थितिर्भवति ततस्ता-[illegible] प्रतिपक्षभूतप्रकृतिबन्धोपादानम् । एवं स्थावरसूक्ष्मसाधारणनामान्यपि भावना कर्तव्या केवलमेतेषां प्रतिपक्षभूताः प्रकृतयः त्रसबादरप्रत्येकनामानो वाच्याः । (एगिंदियगएत्ति) जातिनामानि द्वीन्द्रियादिजातिनामान्यपि एवं पूर्वोक्तप्रकारेण एकेन्द्रियादागतस्य स्थितिकएके-[illegible] जघन्यस्थितिका जघन्या स्थित्युदीरणा करोति । भावार्थः पुनरयम् । एकेन्द्रियो जघन्यस्थितिसत्कर्मा एकेन्द्रियभवादुद्वृत्त्य द्वीन्द्रियेषु मध्ये समुत्पन्नस्ततः पूर्वबद्धो द्वीन्द्रियजातिं [illegible] । अनुत्पत्तिप्रथमसमयादारभ्य च एकेन्द्रियजातिं बध्नाति बहुषु [illegible]

[illegible]

इत्यादि गाथा ।

[illegible] ॥ २६१ ॥

[illegible]

एकेन्द्रियभवादुद्वृत्त्य पर्याप्तसंज्ञिपञ्चेन्द्रियेषु मध्ये समुत्पन्न उत्पत्तिप्रथमसमयादारभ्य च सातवेदनीयमनुभवन् असातवेदनीयं बृहत्तरमन्तर्मुहूर्त्तं कालं यावत् बध्नाति ततः पुनरपि सातं वेदयितुमारभते ततो बन्धावलिकायाश्चरमसमये पूर्वबद्धस्य सातवेदनीयस्य जघन्यां स्थित्युदीरणां करोति एवमसातवेदनीयस्यापि द्रष्टव्यं केवलं सातवेदनीयस्थाने असातवेदनीयमुच्चारणीयम् । असातवेदनीयस्य सातवेदनीयमिति हास्यरत्यरतिशोकानामपि भावना कार्या आसमाप्तम । अपर्याप्तकनाम एकेन्द्रियो जघन्यस्थितिसत्कर्मा एकेन्द्रियभवादुद्वृत्त्य पर्याप्तसंज्ञिपञ्चेन्द्रियमध्ये समुत्पन्न उत्पत्तिप्रथमसमयादारभ्य च पर्याप्तकनाम बृहत्तरमन्तर्मुहूर्त्तं कालं यावद्बध्नाति ततः पुनरपि अपर्याप्तकनाम वेदयितुमारभते बन्धावलिकायाश्चरमसमये पूर्वबद्धस्यापर्याप्तकनाम्नो जघन्यां स्थित्युदीरणां करोति संहननपञ्चकस्य तु मध्ये वेद्यमानं संहननं मुक्त्वा शेषसंहननं प्रत्येकं बन्धकालोऽतिदीर्घो वक्तव्यः । ततो वेद्यमानसंहननस्य बन्धे बन्धावलिकाचरमसमये स्थित्युदीरणा नीचैर्गोत्रमसातवेदिवद्वक्तव्यम् । तथा तेजस्कायिको वायुकायिको बादरसर्वजघन्यस्थितिसत्कर्मा पर्याप्तसंज्ञितिर्यक्पञ्चेन्द्रियेषु मध्ये समुत्पन्नस्ततो बृहत्तरमन्तर्मुहूर्त्तं कालं यावन्मनुजगतिं बध्नाति तद्बन्धानन्तरं च तिर्यग्गतिं वेदयितुमारभते । तत आवलिकायाश्चरमसमये तस्यास्तिर्यग्गतेर्जघन्यां स्थित्युदीरणां करोति एवं तिर्यगानुपूर्व्या अपि वक्तव्यं नवरमपान्तरालगतौ तृतीयसमये जघन्या स्थित्युदीरणा वाच्या अयशःकीर्तिदुर्भगानादेयानां चासातवेदवद्भावना कार्या केवलमिह प्रतिपक्षप्रकृतीनां यशःकीर्तिसुभगादेयानां बन्धो वाच्यः ।

अमणागयस्स चिरठिइअंते, सुरनरयगइउवंगाणं ।

अणुपुव्वीतिसमइग, नराण एगिंदिआगयगे ॥२६२॥

अमनस्कादसंज्ञिपञ्चेन्द्रियादुद्वृत्य देवेषु वा मध्ये समागतस्य सुरगतिनरकगतिवैक्रियाङ्गोपाङ्गनाम्नां स्वस्वायुर्दीर्घस्थित्यन्ते जघन्या स्थित्युदीरणा । एतदुक्तं भवति असंज्ञिपञ्चेन्द्रियः सर्वजघन्यां सुरगतिस्थितिं बद्ध्वा बन्धानन्तरं च दीर्घकालं तथैव स्थित्वा देवेषु नारकेषु वा मध्ये पल्योपमासंख्येयभागमात्रायुःस्थितिकः समुत्पन्नस्ततस्तस्य देवस्य नारकस्य वा स्वस्वायुषश्चिरस्थित्यन्ते चरमसमये वर्त्तमानस्य यथायोगं देवगतिनरकगतिवैक्रियाङ्गोपाङ्गनाम्नां जघन्या स्थित्युदीरणा स एवासंज्ञिपञ्चेन्द्रियो देवस्य नारकस्य वा भवस्यापान्तरालगतौ वर्त्तमानो यथासंख्यं देवानुपूर्वीनरकानुपूर्व्योश्च तृतीयसमये जघन्यां स्थित्युदीरणां करोति । (नराण एगिंदिआगयगेत्ति) एकेन्द्रियः सर्वजघन्यमनुष्यानुपूर्वीस्थितिसत्कर्मा एकेन्द्रियभवादुद्वृत्त्य मनुष्येषु मध्ये उत्पद्यमानोऽपान्तरालगतौ वर्त्तमानो मनुष्यानुपूर्व्यास्तृतीयसमये जघन्यस्थित्युदीरणास्वामी । भवति ।

समयाहिगआलिगाए, पढमठिईए उ सेसवेलाए ।

मिच्छत्ते वेएसु य, संजलणासु वि य सम्मत्ते ॥२६३॥

इह सम्यक्त्वे कृते अन्तरकरणे स्थितिः प्रथमा स्थितिरित्युच्यते । उपरितनी तु द्वितीयेति । तत्र प्रथमस्थितेः समयाधिकावलिकामात्रायां मिथ्यात्ववेदसंज्वलनसम्यक्त्वानां जघन्यस्थित्युदीरणा भवति नवरं सम्यक्त्वस्य क्षपणे उपशमे वा जघन्या स्थित्युदीरणा वक्तव्या ।

पल्लासंखियभागूणुदहि, एगिंदिआगए मिस्से ।

वेयगनाणंतर-ग्गिट्टाए पंचिदियस्स तदा ॥२६४॥

पल्योपमासंख्येयभागोनः उदधिः एकं सागरोपमं तावन्मात्रं सम्यग्मिथ्यात्वस्थितिसत्कर्मा एकेन्द्रियभवात् उद्धृत्य पञ्चेन्द्रियमध्ये समुत्पन्नस्य यतः समयादारभ्य अन्तर्मुहूर्त्तानन्तरं सम्यग्मिथ्यात्वोदीरणापर्याप्तः भवति तस्मिन् सम्यग्मिथ्यात्वं प्रतिपन्नस्य चरमसमये सम्यग्मिथ्यात्वस्य जघन्या स्थित्युदीरणा एकेन्द्रियसत्कर्मणो जघन्यस्थितिसत्कर्मणश्च सकाशाद् बध्यमानं सम्यग्मिथ्यात्वमुदीरणायोग्यं न भवति यावत् आवलिकामात्रं तस्मिन् पूर्ववत्स्थिते मिथ्यात्वोदयसमनन्तरमनन्तरभवात् । तथा वै. वाक्पर्यासिमार्गेणास्यागतापेक्ष प्रभवति स वै चतुरिन्द्रियो यस्य वैक्रियषट्कस्य वैक्रियशरीरवैक्रियसंघातवैक्रियबन्धनचतुष्टयरूपस्य तद् द्वितीयनरकगतिगामित्वेन विसंयोजनासमासः प्राकृतत्वात् स्त्रीत्वनिर्देशः । इहापि च " पल्यासंख्येयभागेन " इत्यनुवर्तते ततश्च द्वितीयनरकगतिवैक्रियषट्कस्य पल्योपमासंख्येयभागहीनस्य पवनस्य बादरवायुकायिकस्य तस्य वैक्रियपर्यन्तसमये जघन्या स्थित्युदीरणा । एतदुक्तं भवति बादरवायुकायिकः पल्योपमासंख्येयभागहीनसागरोपमद्वितीयनरकगतिवैक्रियषट्कस्य जघन्यस्थितिसत्कर्म बद्ध्वा वैक्रियमारभ्य चरमसमये वैक्रियारम्भे चरमसमये वर्त्तमानो जघन्यस्थित्युदीरणां करोति अनन्तरसमयं च वैक्रियषट्कमेकेन्द्रियसत्कर्म जघन्यमप्यावलिकया स्तोकतरमिति कृत्वा उदीरणायोग्यं न भवति । किंचान्यत् ।

चउरुवसमित्तु मोहं, मिच्छं खवेत्तु तेत्तीसा ।

उक्कोसंजमद्धा, अंते सुतणुउवंगाणं ॥२६५॥

संसारपरिभ्रमणेन चतुरो वारान् प्रथम मोहनीयमुपशमय्य ततो मिथ्यात्वमुपगम्य मिथ्यात्वं सम्यक्त्वं सम्यग्मिथ्यात्वं चापि क्षपयित्वा त्रयस्त्रिंशत्सागरोपमस्थितिको देवो जातः । ततो देवभवाच्च्युत्वा मनुष्येषु मध्ये समुत्पन्नस्ततो वर्षाष्टकानन्तरं सप्तमसंयमप्रतिपत्त्यप्रमत्तभावे चाहारकसप्तकं बध्नाति ततो देशोनां पूर्वकोटिं यावत्संयमं परिपाल्य संयतस्ततो देशोनपूर्वकोटिपर्यन्ते आहारकशरीरं कृत्वा (सुत्तणुत्ति) आहारकशरीरस्य (उवंगत्ति) आहारकाङ्गोपाङ्गं बहुवचनादाहारकबन्धनचतुष्टयाहारकसंघातपरिग्रहः तेषां जघन्यां स्थित्युदीरणां करोति इह मोहोपशमं कुर्वन् शुभनामकर्मप्रकृतीनां घातादिभिः प्रभूतं स्थितिसत्कर्म घातयति । देवत्वे चापवर्तनाकरणेनापवर्तयति ततः आहारकसप्तकं बन्धकाले स्तोकमेव स्थितिसत्कर्म संक्रमयति ततो देशोनपूर्वकोटिमुपादानम् ।

छउमत्थ खीणरागे, चउदससमयाहि गालिगठिइए ।

सगाणुदीरणंते, जिगमुहुत्तो ठिईकालो ॥२६६॥

छद्मस्थक्षीणरागस्य पञ्चविधज्ञानावरणचक्षुरचक्षुरवधिकेवलदर्शनावरणपञ्चविधान्तरायलक्षणानां चतुर्दशप्रकृतीनां समयाधिकावलिकाशेषायां स्थितौ जघन्या स्थित्युदीरणा शेषाणां च प्रकृतीनां मनुजगतिपञ्चेन्द्रियजातिप्रथमसंहननौदारिकसप्तकसंस्थानषट्कोपघातप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकशुभगसुस्वरादेययशःकीर्तितीर्थकरोच्चैर्गोत्रलक्षणानां द्वाविंशत्प्रकृतीनां च उदीरणायां प्रवर्त्तितप्रकृतीनां सयोगिकेवलिगुणस्थानकस्य चरमसमये जघन्या स्थित्युदीरणा तस्याश्च जघन्यायाः कालो भिन्नमुहूर्त्तोऽन्तर्मुहूर्त्तमित्यर्थः । आयुषामप्युदीरणान्ते जघन्या स्थित्युदीरणा । संप्रति भागोदीरणावसरस्तत्र च इमे अर्थाधिकारास्तद्यथा संज्ञाशुभाशुभविपाकशुभनतर्थमाह ।

अणुभागुदीरणाए, सन्ना य सुभासुभविवागो य ।

अणुभागबंधभणिआ, ताणत्तं पच्चया चेमे ॥२६७॥

अनुभागोदीरणायां संज्ञाशुभाशुभविपाकश्च यथा शतकाख्ये ग्रन्थे अनुभागबन्धाभिधानावसरे भणितास्तथा ऽत्रापि द्रष्टव्याः । तत्र संज्ञा द्विविधा स्थानसंज्ञा घातिसंज्ञा च । संज्ञा चतुर्विधा एकस्थानको द्विस्थानकस्त्रिस्थानकश्चतुःस्थानकश्च । घातिसंज्ञा त्रिप्रकारा तद्यथा सर्वघाती देशघाती अघाती च । तथा शुभकर्मणामनुभागः क्षीरखण्डोपमः । अशुभकर्मणां त्वशुभघाति घोषातकीनिम्बरसोपमः । एषा च स्थानसंज्ञा घातिसंज्ञा शुभाशुभप्ररूपणा च प्रागनुभागसंक्रमाभिधानावसरे सप्रपञ्चं कृतेति न भूयोऽभिधीयते । विपाकश्चतुर्विधः पुद्गलविपाकः क्षेत्रविपाको भवविपाको जीवविपाकश्च । तत्र पुद्गलानधिकृत्य यस्य रसस्य विपाकोदयः स पुद्गलविपाकः । स च संस्थानषट्कसंहननषट्कातपशरीरपञ्चकाङ्गोपाङ्गत्रयोद्योतनिर्माणस्थिरास्थिरवर्णादिचतुष्कागुरुलघुशुभाशुभपराघातोपघातप्रत्येकसाधारणनाम्नां षट्त्रिंशत्प्रकृतीनामवगन्तव्यः । तथाहि संस्थाननामादीनि औदारिकादिपुद्गलानेवाधिकृत्य स्वविपाकमुपदर्शयन्ति ततस्तासां रसः पुद्गलविपाक एव । नन्वनया युक्त्या रत्यरत्योरपि रसः पुद्गलविपाक एव प्राप्नोति । तथाहि कण्टकादिसंस्पर्शादरतिविपाकोदयो भवति स्रक्चन्दनादिसंस्पर्शात्तु रतेः तत्कथं स नोक्तः । उच्यते रत्यरतिविपाकस्य पुद्गलव्यभिचारात् । तथाहि कण्टकादिसंस्पर्शव्यतिरेकेऽपि प्रियस्मरणादिना कदाचिदुरत्योर्विपाकोदयो दृश्यन्ते ततोऽनयोरनुभागजीवविपाक एव युक्तो न पुद्गलविपाक एवं क्रोधादिविपाको भावनीयः । उक्तं च ।

अरइ रईणं उदयो किन्न भवे पोग्गलानि संपप्प ।

अप्पुट्ठेहि वि किसो एव कोहाइयाणं पि ॥

अस्याश्चाक्षरगमनिका । अरतिरत्योरुदयो विपाकोदयः पुद्गलान् प्राप्य किन्न भवति भवत्येवेति भावः । ततः कथं तयोः रसपुद्गलविपाको नोच्यते अत्राचार्यः काका प्रत्युत्तरमाह (अप्पुट्ठेहि वि कसो) अत्र सप्तम्यर्थे तृतीया ततोऽयमर्थः । अस्पृष्टेष्वपि पुद्गलेषु किं न तयोरत्यरत्योर्विपाकोदयो भवति भवत्येवेति भावः । ततः पुद्गलव्यभिचारात् तयो रसपुद्गलविपाको न भवति किं तु जीवविपाक एव एवं क्रोधादीनामपि वाच्यम् । तथा क्षेत्रमधिकृत्य यस्य रसस्य विपाकोदयः स रस क्षेत्रविपाकः । स च चतसृणामानुपूर्वीणामवगन्तव्यः । तथा भवमधिकृत्य यस्य रसस्य विपाकोदयः स रसो भवविपाकः स च चतुर्णामायुषामवसेयः । अथोच्यते ततः कथं तासां रसो भवविपाको नाभिधीयते तदयुक्तं व्यभिचारात् । तथाहि आयुषां स्वभवमन्तरेण परभवे संक्रमेणाप्युदयो भवति ततः सर्वथा स्वभवाव्यभिचारात्तानि भवविपाकान्युच्यन्ते गतीनां पुनः

विपाकशून्याः । उक्तं च " आउच्चमयविवागाई गईत भाउस्स परभवे जम्हा । नो सव्वहा वि उदओ गईण पुण संकमणाहि " सुगमा शेषाणां त्वष्टसप्ततिसंख्यानां प्रकृतीनां जीवविपाको रसः जीवमधिकृत्य विपाको यस्यासौ जीवविपाकः (नाणत्तं पच्चयमित्ति) नानात्वं विशेषो यस्तत्र शतकाख्ये ग्रन्थे अनुभागबन्धेनोक्तं तदिह वक्ष्ये उक्तस्य च विशेषमित्यर्थस्तया तत्र बन्धमाश्रित्य ग्रन्थे एवं मिथ्यात्वादयः प्रत्ययाः उक्ताः । इह उदीरणामाश्रित्य ग्रन्थे एवं वक्ष्यमाणा ज्ञातव्याः तत्र नानात्वप्ररूपणार्थमाह ।

मीसुदुट्ठाणे सव्वघाइ, दुट्ठाण एगट्ठाणे य ।
सम्मत्तमंतरायं च, देसघाई अचक्खुअ ॥ ६८ ॥

सम्यङ्मिथ्यात्वं स्थानसंज्ञामधिकृत्य द्विस्थानकं द्विस्थानकरसोपेतं घातिसंज्ञामधिकृत्य सर्वघातिसम्यक्त्वं पुनरुत्कृष्टोदीरणामधिकृत्य द्विस्थानकरसोपेतं जघन्योदीरणां त्वधिकृत्य एकस्थानकं घातिसंज्ञामधिकृत्य च देशघाति वेदितव्यम् । एतच्च तत्र सर्वथा नोक्तं किंचिदिहैव यत्र तत्राऽनुसारेण भावबन्धमाश्रित्य शुभाशुभप्ररूपणा कृता । नच सम्यक्त्वसम्यङ्मिथ्यात्वयोर्बन्धः संभवति तत एतद्वर्जा एव तत्राशुभप्रकृतयो निर्दिष्टाः उदीरणा त्वेतयोरपि भवति तत इह विशेषेणैव तयोरुपादानम् । तथान्तरायपञ्चकमप्युत्कृष्टमनुभागोदीरणामधिकृत्य त्रिस्थानके एकस्थानके च घातिसंज्ञामधिकृत्य देशघाति वेदितव्यम् । बन्धं प्रतीत्य पुनश्चतुःप्रकारेऽपि रसस्तद्यथा-चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च । अचक्षुर्दर्शनं घातिसंज्ञामधिकृत्य देशघाति ।

ठाणेसु चउसु अपुमं, दुट्ठाणे कक्खडमगुरुअं च ।
आणुपुव्वीओ तीसं, नरतिरियगत जोगा य ॥ ६९ ॥

नपुंसकवेदो बन्धं प्रतीत्य त्रिप्रकारं रसं । तद्यथा चतुःस्थानके त्रिस्थानके द्विस्थानके च । अत्र तूत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानके अनुत्कृष्टां त्वधिकृत्य चतुःस्थानके त्रिस्थानके एकस्थानके च । ननु बन्धाभावे कथमुदीरणायामेकस्थानको रसो नपुंसकवेदस्य प्राप्यते उच्यते क्षपणाकाले रसघातं कुर्वतः तस्य एकस्थानकस्यापि रससंभवात् । तथा कर्कशनाम गुरुनाम च बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च । इह त्वनुभागोदीरणामधिकृत्य द्विस्थानके तदा यतश्च आनुपूर्व्यो यावत्तिर्यग्मनुष्योदयं प्रति एकान्तयोग्या द्विशत् प्रकृतयस्तद्यथा-मनुष्यायुस्तिर्यगायुर्गतिर्मनुष्यगतिरेकेन्द्रियजातिर्द्वीन्द्रियजातिस्त्रीन्द्रियजातिचतुरिन्द्रियजातिश्चौदारिकसप्तकम् । आद्यन्तवर्जसंस्थानचतुष्टयसंहननषट्कमातपस्थावरसूक्ष्मपर्याप्तसाधारणं चेति । ता अपि बन्धं प्रतीत्य चतुःस्थानके त्रिस्थानके द्विस्थानके च । इह त्वनुभागोदीरणामुत्कृष्टानुत्कृष्टां चाधिकृत्य द्विस्थानके रसे वेदितव्याः ।

सेसा एगट्ठाणे, दुट्ठाणे वा अणंतगुणवग्गू अंता ।
उक्कन्नियं दुगमाई, इक्कसरं तु अमोगतणाणाणि ॥ ७० ॥

सर्वाऽपि इह पुरुषवेदोऽनुभागोदीरणामुत्कृष्टामधिकृत्य द्विस्थानके अनुत्कृष्टां त्वधिकृत्य द्विस्थानके एकस्थानके वा प्राप्यन्ते । एवमचक्षुर्दर्शनावरणं च बन्धं प्रतीत्य पुनः सर्वं चतुःस्थानके त्रिस्थानके द्विस्थानके वा पुरुषवेदः स्वचक्षुर्दर्शनावरणे चक्षुर्दर्शनावरणं च चतुःप्रकारं पुंवे । तत्र चतुःस्थानके त्रिस्थानके द्विस्थानके एकस्थानके च । ननु " देसघाई अचक्खुत्ति " प्रागभिहितं कथमिदं पुनरचक्षुर्दर्शनावरणोपादानमुच्यते स्थाननियमार्थम् । पूर्वं हि देशघातित्वमेवाचक्षुर्दर्शनावरणस्योक्तमत्र तु स्थाननियमः । (जम्मतिगलत्ति) यस्य जीवस्य एकमप्यक्षरं सर्वसंपरिज्ञानं वर्तते तस्य श्रुतकेवलिनो मतिश्रुतावधिदर्शनावरणप्रकृतीनामनुभागोदीरणायामेकस्थानको रसः प्राप्यते संज्वलनानां तु बन्धे अनुभागोदीरणायां च चतुःप्रकारोऽपि रसः । तद्यथा । चतुःस्थानकः त्रिस्थानको द्विस्थानक एकस्थानकश्च ।

मणनाणं सेससमं, मीसगसम्मत्तपावियं पावेसु ।
अट्ठाणवच्चियहीणा, उक्कोसाणुभागुदीरणा तुणइ ॥ ७१ ॥

मनःपर्यायज्ञानं शेषैः कर्मभिः समं वेदितव्यम् । इयमत्र भावना । यथा शेषकर्मणामनुभागोदीरणा चतुःस्थानकस्य त्रिस्थानकस्य द्विस्थानकस्य चरमस्य भवति तथा मनःपर्यायज्ञानावरणकर्मणामनुभागोदीरणा वरणस्यापि द्रष्टव्या एवं पुनर्मनःपर्यायज्ञानावरणस्य चतुःप्रकारोऽपि रसो भवति शेषकर्मणां तु बन्धे त्रिप्रकारस्तद्यथा चतुःस्थानकस्त्रिस्थानको द्विस्थानकश्च । तानि च शेषकर्माण्यमूनि । तद्यथा केवलज्ञानावरणं निद्रापञ्चकं केवलदर्शनावरणं च सातासातवेदनीये, मिथ्यात्वं द्वादश कषायाः षट् नोकषायाः नरकायुर्देवायुः नरकगतिर्देवगतिः पञ्चेन्द्रियजातिस्तैजससप्तकं वैक्रियसप्तकमाहारकसप्तकं समचतुरस्रसंस्थानं हुण्डकसंस्थानं वर्णपञ्चकं गन्धादिकं रसपञ्चकं स्निग्धरूक्षमृदुलघुशीतोष्णरूपं षट्कम् अगुरुलघूपघातं पराघातमुच्छ्वासोद्योतप्रशस्ताप्रशस्तविहायोगतित्रसबादरपर्याप्तप्रत्येकस्थिरास्थिरशुभाशुभसुभगदुर्भगसुस्वरदुःस्वरादेयानादेययशःकीर्तिनिर्माणतीर्थकरोच्चैर्गोत्रनीचैर्गोत्राणि च । एतेषां च एकोत्तरशतं संख्यानां शेषकर्मणामुत्कृष्टामनुभागोदीरणामधिकृत्य चतुःस्थानको रसः । अनुत्कृष्टां त्वधिकृत्य चतुःस्थानकस्त्रिस्थानको द्विस्थानकश्च मतिश्रुतावधिमनःपर्यायज्ञानावरणचक्षुरचक्षुरवधिदर्शनावरणानामुत्कृष्टामनुभागोदीरणामधिकृत्य रसः स च घाती अनुत्कृष्टां त्वधिकृत्य सर्वघाती देशघाती वा केवलज्ञानावरणनिद्रापञ्चकमिथ्यात्वद्वादशकषायाणामुत्कृष्टामनुत्कृष्टां वा अनुभागोदीरणामधिकृत्य रसघाती सर्वघाती सातासातवेदनीयायुश्चतुष्टयसकलनामप्रकृतिगोत्रद्विकानामुत्कृष्टामनुत्कृष्टां वा उदीरणामधिकृत्य रसः सर्वघाती अनुत्कृष्टां त्वधिकृत्य सर्वघाती वा प्रतिपत्तव्यः । इदानीमशुभप्रकृतिविषयविशेषमाह (मीसगसम्मत्तेत्ति) अपि च सम्यङ्मिथ्यात्वं सम्यक्त्वं चानुभागोदीरणामधिकृत्य पापेषु पापकर्मसु मध्ये अवगन्तव्यम् । घातिस्वभावतया तयो रसस्य अशुभत्वात् शेषप्रकृतयस्तु यथाशतकग्रन्थे अनुभागबन्धे शुभाशुभा प्रोक्तास्तथाऽप्यवगन्तव्याः । कीदृशे अनुभागसत्कर्मणि वर्तमान उत्कृष्टामनुभागोदीरणां करोति उच्यते-(अट्ठाणवच्चियहीणत्ति) अनुभागसत्कर्मणि षट्स्थानपतितः पतितहीनादपि उत्कृष्टामनुभागोदीरणां करोति उच्यते प्रवर्त्तते एतदुक्तं भवति यस्योत्कृष्टमनुभागं सत्कर्म तस्मिन् अनन्तभागहीने वा संख्यातभागहीने वा असंख्येयगुणहीने वा अनन्तगुणहीने वा उत्कृष्टा अनुभागोदीरणा प्रवर्त्तते यतोऽनन्तानन्तस्पर्द्धकानामनुभाग

क्षपके अनन्तानि स्पर्धकानि उत्कृष्टरसान्यपि तिष्ठन्ति । ततो ऽनन्तभागेऽपि क्षेत्रे मूलानुभागसत्कर्मापेक्षयाऽनन्तगुणहीना उत्कृष्टानुभागोदीरणा लभ्यते किं पुनरसंख्येयगुणहीनादावनुभागकर्मणीति ।

संप्रति विपाके विशेषमाह ।

विरियंतरायकेवल–दंसणमोहणीयणाणवरणाणं ।
असमत्थपज्जएसु, सव्वदव्वेसु वि विवागो ॥२७२॥

वीर्यान्तरायकेवलदर्शनावरणाष्टाविंशतिविधमोहनीयपञ्चविधज्ञानावरणानां पञ्चत्रिंशत्प्रकृतीनां समस्तपर्यायेषु सर्वद्रव्येषु सर्वजीवद्रव्येषु विपाकः । तथाहि इमा वीर्यान्तरायाः पञ्चत्रिंशत् प्रकृतयो द्रव्यतः सकलमपि जीवद्रव्यमुपघ्नन्ति पर्यायतस्तु न सर्वानपि यथा मेघपटलैर्निचिततरैरपि सर्वात्मनान्तरितयोरपि सूर्याचन्द्रमसोर्न तत्प्रभा सर्वथा अपनेतुं शक्यते उक्तं च "सुट्ठु वि मेहसमुदए, होइ पहा चंदसूराणं" तथा अत्रापि भावनीयम् ।

गुरुलघुगाणंतपए, सिएसु चक्खुस्स रूवदव्वेसु ।
ओहिस्स गहणधारण, जो गइससंतरायाणं ॥२७३॥

चक्षुरचक्षुर्दर्शनावरणगुरुलघुकाः अनन्तप्रदेशकाः स्कन्धास्तेषु विपाकः अवधिदर्शनावरणस्य रूपिद्रव्येषु दानान्तरायाणां दानलाभभोगोपभोगान्तरायाणां ग्रहणधारणयोग्येषु पुद्गलद्रव्येषु विपाको न शेषेषु यावत्येव हि विषये चक्षुर्दर्शनादीनि व्याप्रियन्ते तावत्येव विषये चक्षुर्दर्शनावरणादीन्यपि तत उक्तरूपो विषयनियमो न विरुध्यते । शेषप्रकृतीनां तु यथा प्राग्विपाकोऽभिहितः पुद्गलविपाकादिस्तथैवात्रावगन्तव्यः । संप्रति प्रत्ययप्ररूपणा कर्तव्या प्रत्ययोऽपि द्विधा परिणामप्रत्ययो भवप्रत्ययश्च । तत्र परिणामप्रत्ययमधिकृत्याह ॥

वेउव्वीय तेयग, कम्मवण्णरसगंधनिद्धलुक्खाउ ॥
सीउण्हथिरसुभेयर, अगुरुलहुगा य नरतिरिय ॥२७४॥

वैक्रियसप्तकं तैजसकार्मणग्रहणात्तैजससप्तकं गृहीतम् । तथा वर्णपञ्चकं गन्धद्विकं रसपञ्चकं स्निग्धरूक्षशीतोष्णस्थिरास्थिरशुभाशुभागुरुलघूनि चानुभागोदीरणामधिकृत्य तिर्यग्मनुष्याणां परिणामप्रत्ययानि वैक्रियसप्तकं तिर्यङ्मनुष्यगतिमनुष्याणां गुणविशेषसमुत्थलब्धिप्रत्ययं ततस्तदुदीरणापि तेषां गुणपरिणामप्रत्यया तैजससप्तकादयस्तु तिर्यङ्मनुष्यैरन्यथाऽन्यथा विपरिणमय्य उदीर्यन्ते ततस्तासामपि प्रकृतीनामनुभागोदीरणा तिर्यग्मनुष्याणां परिणामप्रत्यया ।

चउरंस मउय लहुगा, परघाउज्जोयइट्ठखगइसरा ॥
पत्तेगतणू उत्तरतणू, सो दोसोवि य नराईया ॥२७५॥

समचतुरस्रसंस्थानमृदुलघुपराघातोद्योतप्रशस्तविहायोगतिसुस्वरप्रत्येकनामानोऽष्टौ प्रकृतयः । उत्तरतनुर्वैक्रियाहारकशरीरयोरनुभागोदीरणामधिकृत्य परिणाममधिकृत्य परिणामप्रत्यया वेदितव्या यत उत्तरवैक्रिये आहारके वा शरीरे सति समचतुरस्रसंस्थानमनुभागोदीरणां प्रवर्तमाना उत्तरवैक्रियादिशरीरपरिणामापेक्षा । तत्र यद्यपि परिणामप्रत्यया वेदितव्या तथा तृतीया तनुराहारकशरीरमाहारकशरीरप्रारम्भकाहारकसमर्थ गृहीतं द्रष्टव्यम् । तत्रानुभागोदीरणामधिकृत्य परिणामप्रत्ययं वेदितव्यम् । आहारकसप्तकं हि मनुष्याणां गुणपरिणामप्रत्ययं भवति । ततस्तदनुभागोदीरणामधिकृत्य परिणामप्रत्ययं वेदितव्यम् । आहारकसप्तकं हि मनुष्याणां गुणपरिणामप्रत्ययं भवति ततस्तदनुभागोदीरणापि गुणपरिणामप्रत्ययैवेति ॥

देसविरयविरयाणं, सुभगाएज्जसकित्तिउच्चाणं ॥
पुव्वाणुपुव्विगाए, असंखभागो त्थियाईणं ॥२७६॥

देशविरतानां विरतानां च सुभगादेयशःकीर्त्युच्चैर्गोत्राणामनुभागोदीरणा परिणामकृता तथाहि सुभगादिप्रत्ययकृतदुर्भगादिप्रकृत्युदये पुनरपि यो देशविरतिं वा प्रतिपद्यते तस्यापि देशविरत्यादिगुणप्रभावतः सुभगादीनामेव प्रकृतीनामुपघातपूर्वकमुदीरणायोग्या गुणपरिणामे च प्रत्ययतो वेदितव्या । इदमुक्तं भवति । स्त्रीवेदादीनामतिप्रशस्तानुभागस्पर्धकादारभ्य क्रमेण संख्येयो भागो देशविरतादीनामुदीरणायोग्यो गुणप्रत्ययतो भवति । शेषस्त्वनुभागोदीरणेति ।

तित्थंकरयाईण य, परिणामपच्चयाणि सेसाओ ।
भवपच्चया उ पुव्वा, वियपुव्वभंगमाणं ॥२७७॥

प्पत्तिया-औत्पत्तिकी-स्त्री० उत्पत्तिरेव न शास्त्राभ्यासकर्मपरिशीलनादिकं प्रयोजनं यस्याः सा औत्पत्तिकी तदस्य प्रयोजनमिति इकण् ॥ नं० ॥ अदृष्टाश्रुताननुभूतविषयाद्कस्माद् भवनशीलायां बुद्धौ, स्था० । ननु सर्वस्याः बुद्धेः कारणं क्षयोपशमः तत्कथमुच्यते उत्पत्तिरेव प्रयोजनमस्या इति उच्यते क्षायोपशमः सर्वबुद्धिसाधारणः ततो नासौ भेदेन प्रतिपत्तिनिबन्धनं भवति । अथ च बुद्ध्यन्तरभेदेन प्रतिपत्त्यर्थं व्यपदेशान्तरं कर्तुमारब्धं तत्र व्यपदेशान्तरनिमित्तमत्र न किमपि विनयादिकं विद्यते केवलमेवमेव तथोत्पत्तिरिति सैव साक्षान्निर्दिष्टा । नं० ॥

औत्पत्तिक्या लक्षणम् ।

पुव्वमदिट्ठमसुयम-वेइयतक्खणविसुद्धगहिअत्था ।
अव्वाहयफलजोगा, बुद्धी ओप्पत्तिया नाम ॥२॥

पूर्वं बुद्ध्युत्पादात्प्राक् स्वयं चक्षुषा न दृष्टो नाप्यन्यतः श्रुतो मनसाऽप्यविदितोऽपर्यालोचितस्तस्मिन् क्षणे बुद्ध्युत्पादकाले विशुद्धो यथावस्थितो गृहीतोऽवधारितोऽर्थो यस्याः सा तथा। पुव्वमदिट्ठेत्यादौ मकारोऽलाक्षणिकः । तथा अव्याहतेन अबाधितेन फलेन परिच्छेद्येनार्थेन योगो यस्याः सा अव्याहतफलयोगा बुद्धिरौत्पत्तिकी नाम । सम्प्रति विनेयजनानुग्रहायास्याः स्वरूपप्रतिपादनार्थमुदाहरणान्याह ।

भरहसिलपणियरुक्खे, खुड्डगपडसरडकायउच्चारे ।
गयघयणगोलखंभे, खुड्डगमग्गित्थिपइपुत्ते ॥ ३ ॥
भरहसिलमिंढ कुक्कुड, तिलवालुयहत्थिअगडवणसंडे ।
पायसअइया पत्ते, खाडहिलापंचपियरो य ॥ ४ ॥
महुसित्थमुद्दिअंकेइ, नाणए भिक्खुचेडगनिहाणे ।
सिक्खा य अत्थसत्थे, इच्छायमहं सयसहस्से ॥ ५ ॥

आसामर्थः कथानकेभ्योऽवसेयः । तानि च कथानकानि विस्तरतोऽभिधीयमानानि ग्रन्थगौरवमापादयन्ति ततः संक्षेपेणोच्यन्ते । उज्जयिनी नाम पुरी तस्याः समीपवर्ती कश्चिन्नटानामेको ग्रामः तत्र च भरतो नाम नटः तस्य भार्या परासुरभूत् तनयश्चास्य रोहकाभिधोऽद्याप्यल्पवयास्ततस्तेन स्वस्य तनयस्य च शुश्रूषाकरणायान्या समानिन्ये वधूः । सा च रोहकस्य सम्यग् न वर्तते ततो रोहकेण सा प्रत्यपादि मातर्न मे त्वं सम्यग् वर्तसे ततो ज्ञास्यसीति ततः सा सेर्ष्यमाह रे रोहक ! किं करिष्यसि ? रोहकोऽप्याह । तत्करिष्यामि येन त्वं मम पादयोरागत्य लगिष्यसीति ततः साऽवमत्य तूष्णीमतिष्ठत् रोहकोऽपि तत्कालादारभ्य गाढसंजातामर्षोऽन्यदा निशि सहसा पितरमेवमवादीत् भो भो पितरेष पलायमानो गोहो याति तत एवं बालकवचः श्रुत्वा पितुराशङ्का समुदपादि नूनं विनष्टा मे महेलेति तत एवमाशङ्कावशात्तस्यामनुरागः शिथिलो बभूव । ततो न तां सम्यक् समाभाषते नापि विशेषतस्तस्यै पुष्पताम्बूलादिकं प्रयच्छति दूरतः पुनरपास्तं शयनादि ततः सा चिन्तयामास नूनमिदं बालकविचेष्टितम् अन्यथा कथमकाण्ड एवैष दोषाभावे पराङ्मुखो जातः ततो बालकमेवमवादीत् वत्स रोहक ! किमिदं त्वया चेष्टितं तव पिता मे सम्प्रति दूरं पराङ्मुखीभूतः रोहक आह किमिति तर्हि त्वं सम्यग् न वर्तसे तयोक्तमित ऊर्ध्वं सम्यग् वर्तिष्ये । ततो बालक आह सत्यं तर्हि मा खेदमाकार्षीस्तथा करिष्ये यथा मे पिता तथैव त्वयि वर्तते इति ततः सा तत्कालादारभ्य सम्यग् वर्तितुं प्रवृत्ता । रोहकोऽप्यन्यदा निशि निशाकरप्रकाशितायां प्राकृतत्वदाद्भावापनोदाय बालभावं प्रकटयन् निजच्छायामङ्गुल्यग्रेण दर्शयन् पितरमेवमाह भो पितरेष गोहो याति गोहो यातीति । तत एवमुक्तः स पिता परपुरुषप्रवेशाशङ्कितः निष्कृष्टाकारं कृपाणमुद्गीर्य प्राधावत रे कथय कुत्र यातीति ततः स बालको बालक्रीडां प्रकटयन्नङ्गुल्यग्रेण निजच्छायां दर्शयति पितरेष गोहो यातीति ततः स व्रीडित्वा प्रत्यावृत्तश्चिन्तयति स्म च स्वचेतसि प्राक्तनोऽपि पुरुषो नूनमेवंविध एवासीदिति धिग्मया बालकवचनादलीकं संभाव्य विप्रियमेतावन्तं कालं कृतमस्यां भार्यायामिति पश्चात्तापात्स्वतरमस्यामनुरक्तो बभूव । सोऽपि रोहको मया विप्रियं कृतमासीदस्या इति कदाचिदेषा मां विषादिना मारयिष्यतीति विचिन्त्य सदैव पित्रा सह भुङ्क्ते न कदाचिदपि केवलः । अन्यदा च पित्रा सहोज्जयिनीं पुरीमगमत् दृष्टा च तेन त्रिदशपुरीवोज्जयिनी सविस्मयचेतसा च सकलाऽपि यथावत्परिभाविता । ततः पित्रा सह नगर्या निर्यातुमारेभे पिता च तत्र किमपि विस्मृतमिति रोहकं सिप्रातटेऽवस्थाप्य तदानयनाय भूयोऽपि नगरीं प्राविक्षत् । रोहकोऽपि च तत्र सिप्राभिधसिन्धुसैकते बालचापलवशात् सप्राकारां परिपूर्णामपि पुरं सिकताभिरालिखत् । इतश्च राजा अश्ववाहनिकायामश्वं वाहयन् कथंचिदेकाकी भूतस्तेन पथा समागन्तुं प्रावर्तत तं च स्वलिखितनगरीमध्येन समागच्छन्तं रोहकः प्रवादीत् भो राजपुत्र माऽनेन पथा समागमः । तेनोक्तं किमिति । रोहक आह । किं त्वं राजकुलमिदं न पश्यसि । ततः स राजा कौतुकवशात्सकलामपि नगरीं तदालिखितामवैक्षत पप्रच्छ च तं बालकं रे अन्यदाऽपि त्वया नगरी दृष्टाऽऽसीत् न वा । रोहकः प्राह नैव कदाचित्केवलमहमद्यैव ग्रामादिहागतः । ततश्चिन्तयामास राजा अहो बालकस्य प्रज्ञातिशयः । ततः पृष्टो रोहकः वत्स किं ते नाम क्व वा ग्राम इति । तेनोक्तं रोहक इति मम नाम प्रत्यासन्ने च नटग्रामे वसामीति । अत्रान्तरे समागतो रोहकस्य पिता चलितौ च स्वग्रामं प्रति द्वावपि राजा च स्वस्थानमगमत् चिन्तयति स्म च ममैकोनानि मन्त्रिणां पञ्चशतानि विद्यन्ते तद्यदि सकलमन्त्रिमण्डलमूर्धाभिषिक्तो महाप्रज्ञातिशायी परमो मन्त्री संपद्यते ततो मे राज्यं सुखेनैधते बुद्धिबलोपेतो हि राजा प्रायः शेषबलस्वल्पबलोऽपि न परराज्यस्थानं भवति परांश्च राज्ञो लीलया विजयते । एवं चिन्तयित्वा कतिपयदिनानन्तरं रोहकबुद्धिपरीक्षानिमित्तं सामान्यतो ग्रामप्रधानपुरुषानुद्दिश्यैवमादिष्टवान् यथा युष्मद्ग्रामस्य बहिरतीव महती शिला वर्तते तामनुत्पाट्य राजयोग्यमण्डपाच्छादनं कुरुत । तत एवमादिष्टे सकलोऽपि ग्रामलोको राजादेशं कर्तुमशक्यं परिभावयन्नाकुलीभूतमानसो बहिः समायामेकत्र मिलितवान् पृच्छति स्म परस्परं किमिदानीं कर्तव्यं दुष्टो राजादेशोऽस्माकमापतितो राजादेशाकरणे च महाननर्थोपनिपातः । एवं च चिन्तया व्याकुलीभूतानां तेषां मध्यन्दिनमागतं रोहकश्च पितरमन्तरेण न भुङ्क्ते पिता च ग्राममेलापके मिलितो वर्तते । ततः स क्षुधार्त्तः पीडितः पितुः समीपे समागत्य रोदितुं प्रावर्तत पीडितोऽहमतीव क्षुधया ततः समागच्छ गृहे भोजनायेति । भरतः प्राह वत्स ! सुखितोऽसि त्वं न किमपि ग्रामकष्टं जानासि । स प्राह पितः किं तदिति । ततो भरतो राजादेशं सविस्तरमचकथत् । ततो निजबुद्धिप्रागल्भ्यवशात् झटिति कार्यस्य साध्यतां परिभाव्य तेनोक्तं मा व्याकुलीभवत यूयं खनत शिलाया अधोविभागमण्डपनिष्पादनाय स्तम्भांश्च यथास्थानं निवेशयत

पादिना प्रकारेणातीव रमणीयाः

ग्रामलोकः। स्वगृहे भोजनाय भुक्त्वा च समागतः शिलाप्रदेशे प्रारब्धं तत्र कर्म कतिपयदिनैश्च निष्पादितः परिपूर्णो मण्डपः। कृता च शिला तस्य आच्छादनं निवेदितं राज्ञे राजनियुक्तैः पुरुषैर्देव निष्पादितो ग्रामेण देवादेशः। राजा प्राह कथमिति ततस्ते सर्वमपि मण्डपनिष्पादनप्रकारं कथयामासुः। राजा पप्रच्छ कस्येयं बुद्धिस्ते ऽप्यादिपुर्देव ! भरतपुत्रस्य एषा रोहकस्य औत्पत्तिकी बुद्धिः। एवं सर्वेष्वपि संविधानकेषु योजनीयं ततो भूयोऽपि राजा रोहकबुद्धिपरीक्षार्थं मेढकमेकं प्रेषितवान्। एष यावत्पलप्रमाणः संप्रति वर्तते पक्षातिक्रमेऽपि तावत्पलप्रमाण एव समर्पणीयो न न्यूनो नाप्यधिक इति तत एवं राजादेशे समागते सति सर्वोऽपि ग्रामो व्याकुलीभूतचेता बहिः सभायामेकत्र मिलितवान् सगौरवमाकारितो रोहकः भाषितश्च ग्रामप्रधानैः पुरुषैः वत्स ! प्राचीनमपि दुष्टराजादेशसिन्धुं त्वयैव निजबुद्धिसेतुबन्धेन समुत्तारितः सर्वोऽपि ग्रामः। ततः संप्रत्यपि प्रगुणीकुरु निजबुद्धिसेतुबन्धेनास्यापि दुष्टराजादेशसिन्धोः पारमधिगच्छाम इति। तत उवाच रोहको वृकं प्रत्यासन्नं धृत्वा मेण्ढकमेनं यवसदानेन पुष्टीकुरुत यवसं हि भक्षयन्नेष न दुर्बलो भविष्यति वृकं च दृष्ट्वा न वृद्धिमास्यते तदस्मै तथैव कृतवन्तः पक्षातिक्रमे च तं राज्ञः समर्पयामासुः तोलितं च तावत्पलप्रमाण एव जातः। ततो भूयोऽपि कतिपयदिनान्तरं राज्ञा कुर्कुटः प्रेषितः एष द्वितीयं कुर्कुटं विना योधयितव्य इति एवं संप्राप्ते राजादेशे मिलितः सर्वोऽपि ग्रामो बहिः सभायामाकारितो रोहकः कथितश्च राजादेशः। ततो रोहकेणादर्शको महाप्रमाण आनायितो निर्मृष्टश्च भूत्या सम्यक् ततो धृतः पुरो राजकुर्कुटस्य ततः स राजकुर्कुटः प्रतिबिम्बमात्मीयमादर्शे दृष्ट्वा मत्प्रतिपक्षोऽयमपरः कुर्कुट इति मत्वा साहङ्कारं योद्धुं प्रवृत्तो अहङ्कारो हि प्रायस्तिरश्चो भवन्ति। एवं च यत्कुर्कुटमन्तरेण योधिते राजकुर्कुटे विस्मितः सर्वोऽपि ग्रामलोकः संपादितो राजादेशः निवेदितं च राज्ञे निजपुरुषैः। ततः पुनरपि कतिपयदिवसातिक्रमे राजा निजादेशं प्रेषित- [illegible] समीपे सर्वतो [illegible] वालुका विद्यते ततः [illegible] वालुकामया दवरकाः कृत्वा शीघ्रं प्रेषणीया इति एवं राजादेशे समागते मिलितः सर्वोऽपि बहिः सभायां ग्रामः [illegible] रोहकेण [illegible] [illegible] राजादेशमाकर्ण्य [illegible] [illegible] [illegible]

तनो राज्ञा भणितं किं रे मृतो हस्ती ततो ग्रामलोक आह देवपादा एवं ब्रुवते न वयमिति। तत एवमुक्ते राजा मौनमवधाय स्थितः। आगतो ग्रामलोकः स्वग्रामे। ततो भूयः कतिपयदिनातिक्रमे राजा समादिष्टवानस्ति युष्माकं ग्रामे सुस्वादुजलसंपूर्णः कूपः स इह मन्तव्यं प्रेषणीय इति। एवमादिष्टो ग्रामो रोहकं पृष्टवान्। रोहक आह। एष ग्रामेयकः कूपो, ग्रामेयकश्च स्वभावाद्भीरुर्भवति न च सजातीयमन्तरेण विश्वासमुपगच्छति ततो नागरिकः कश्चिदेकः कूपः प्रेष्यतां येन तत्रैव विश्वस्य तेन सह समागमिष्यति इत्येवं [illegible] मुत्कलिताः राजनियुक्ताः पुरुषाः तैश्च राज्ञे निवेदितं ततः स्वचेतसि रोहकस्य बुद्ध्यतिशयं परिभाव्य मौनमवलम्ब्य स्थितः। ततो भूयोऽपि कतिपयदिवसातिक्रमे निर्दिष्टवान् वनखण्डो ग्रामस्य पूर्वस्यां दिशि वर्तमानः पश्चिमायां दिशि कर्तव्य इति अस्मिन्नपि राजादेशे समागते ग्रामो रोहकबुद्ध्या वनखण्डस्य पूर्वस्यां दिशि व्यवतिष्ठते ततो जातो ग्रामस्य पश्चिमायां दिशि वनखण्डः निवेदितं च राज्ञे राजनियुक्तैः पुरुषैः। ततः पुनरपि कालान्तरे राजा समादिष्टवान् वह्निसंपर्कमन्तरेण पायसं पक्तव्यमिति तत्रापि सर्वो ग्राम एकत्र मिलितो रोहकमपृच्छत् रोहकश्चोक्तवान् तन्दुलानतीव जलेन भिन्नान् कृत्वा दिनकरकरनिकरसन्ततकरीषपलालादीनामुष्मणि तन्दुलजलस्थाली निवेशयतां येन परमान्नं संपद्यते तथैव कृतं एतच्च निवेदितं राज्ञो विस्मितं तस्य चेतः। ततो राजा रोहकस्य बुद्ध्यतिशयमवगम्य तदाकारणाय [illegible] बालकेन महादेशाः सर्वेऽपि प्रायः स्वबुद्धिवशात् [illegible] स तेन चावश्यमागन्तव्यम् परं न शुक्लपक्षे न कृष्णपक्षे न रात्रौ न दिवा न छायया नाप्यातपेन नाकाशेन न पादाभ्यां न पथा नाप्युत्पथेन न स्नातेन नास्नातेन तत एवं स रोहकः कण्ठस्नानं कृत्वा गन्त्रीचक्रस्य मध्यभूमिभागे [illegible] चरणमारूढो धृतचालनीरूपातपत्रः संध्यासमयेऽमावास्या[illegible]संगमे नरेन्द्रपार्श्वमगमत्। स च रिक्तहस्तो न प्रवेष्टव्यो देवतानां गुरूणामिति लोकश्रुतिं परिभाव्य पृथिवीपिण्डमेकं [illegible] गतः प्रणतो राजा मुक्तश्च तत्पुरतः पृथिवीपिण्डस्ततः पृष्टो रोहकः। रे रोहक ! किमेतत् ? रोहकः प्राह देव ! देवपादाः पृथिवीपतयः ततो मया पृथिवी समानीता। श्रुत्वा चेदं प्रथमदर्शने मङ्गलवचः तुतोष राजा मुत्कलितः शेषग्रामलोकः रोहकः पुनरात्मसमीपे शायितः गते च यामिन्याः प्रथमे यामे रोहकः शब्दितो राज्ञा, रे रोहक ! जागर्षि किं वा स्वपिषि। देव ! जागर्मि रे किं चिन्तयसि स प्राह देव अश्वत्थपत्राणां किं वृन्तो महान् उत शिखा इति तत एवमुक्ते राजा संशयमापन्नो वदति [illegible] चिन्तितं कोऽत्र निश्चयः। ततो राजा तमेव पृष्टवान् रे कथय कोऽत्र निर्णय इति रोहकोऽवादीत् यावदद्यापि शिखाग्रभागं न शोषमुपयान्ति तावद् द्वे अपि समे ततो राज्ञा पार्श्ववर्ती [illegible] जनः पृष्टः सर्वैरप्यविसंवादितं ततो [illegible] तूष्णीं स्थितः [illegible] रोहक सुप्तवान् द्वितीये च यामे गते राज्ञा शब्दितः पृष्टश्च रे किं जागर्षि किं वा स्वपिषि रोहकः प्राह देव ! जागर्मि किं रे चिन्तयसि देव ! [illegible] [illegible] रे रोहक ! [illegible] [illegible] पुनरपि रोहक सुप्तवान् [illegible] राज्ञा शब्दितः रे किं जागर्षि किं [illegible] देव ! जागर्मि किं रे चिन्तयसि [illegible] [illegible]

नैपुण्येन देव स्वपिमीति ततो रोहकः पुनः प्राभातिके च मङ्गलतू- र्यनिस्वने सर्वत्र प्रसरमधिरोहति राजा प्रबोधमुपजगाम त- स्मिंश्चावसरे रोहकः स च निद्राभरमुपारूढो न प्रतिवचनं दत्त- वान्। ततो राजा लीलाकम्बिकया मनाक् तं स्पृष्टवान् ततः सोऽप- गतनिद्रो जातः पृष्टश्च रे किं स्वपिषि स प्राह देव जागर्मि किं रे तर्हि तूष्णीमास्से देव! चिन्तयन्। किं चिन्त- यसि देव एतच्चिन्तयामि कतिभिर्जातो देव इति। तत एवमुक्ते राजा सव्रीडं मनाक् तूष्णीमतिष्ठत् ततः क्षणानन्तरं पृष्टवान् क- थय रे कतिभिरहं जात इति। स प्राह देव पञ्चभिः राजा भूयो- ऽपि पृष्टवान् केन केनेति रोहक आह एकेन तावद्वैश्रमणेन वैश्र- मणस्येव तव दानशक्तेर्दर्शनात्। द्वितीयेन चाण्डालेन वैरिस- मूहं प्रति चाण्डालस्येव कोपदर्शनात्। तृतीयेन रजकेन यतो रजक इव वस्त्रं परिनिपीड्य तस्य सर्वस्वमपहरन् दृश्यसे। चतु- र्थेन वृश्चिकेन यन्मामपि बालकं निद्राभरसुप्तं लीलाकम्बिकाग्रेण वृश्चिक इव निर्दयं तुदसि। पञ्चमेन निजपित्रा येन यथावस्थितं न्यायं सम्यक्परिपालयसि। एवमुक्ते राजा तूष्णीमास्थाय प्रा- भातिककृत्यमकार्षीत् जननीं च नमस्कृत्यैकान्ते पृष्टवान्। कथ- य मातः! कतिभिरहं जात इति सा प्राह वत्स! किमेतत् प्रष्टव्यं निजपित्रा त्वं जातः। ततो रोहकोक्तं राजा कथितवान् वदति च मातः स रोहकः प्रायोऽलीकबुद्धिर्न भवतीति। ततः कथय सम्यक् तत्त्वमिति तत एवमतिनिर्बन्धीकृते सति सा कथया- मास। यदा त्वद्गर्भाधानमासीत् तदाऽहं बहिरुद्याने वैश्रमणपू- जनाय गतवती वैश्रमणं च यक्षमतिशायिरूपं दृष्ट्वा हस्तसंस्पर्शेन च संजाततन्मदोन्मादा भोगाय तं स्पृहितवती। अपान्तराले च समागच्छन्ती चण्डालयुवानमेकमतिरूपमपश्यं ततस्तमपि भो- गाय स्पृहयामि स्म। ततोऽर्वाक्काले प्राप्ते समागच्छन्ती तथैव रज- कं दृष्ट्वाऽभिलषितवती। ततो गृहमागता सती तथाविधोत्सव- वशात् वृश्चिकं कणिक्कामयं भक्षणाय हस्ते न्यस्तवती। ततस्त- त्संस्पर्शतो जातकामोद्रेका तमपि भोगायाभिलषितवती। तत एवं यदि स्पृहामात्रेणापि पितरः संभवन्ति तर्हि सन्तु परमार्थतः पुनरेक एव ते पिता सकलजगत्प्रसिद्ध इति। तत एवमुक्ते राजा जननीं प्रणम्य रोहकबुद्धिविस्मितचेताः स्वावास- मागतमगमत्। रोहकं च सर्वेषां मन्त्रिणां मूर्द्धाभिषिक्त- मन्त्रिणमकार्षीत्, तदेवं भरतशिलेति व्याख्यातम् ॥ १ ॥

संप्रति पणितमिति व्याख्यायते। द्वौ पुरुषौ एको ग्रामेयकः अप- रो नागरिकः। ततो ग्रामेयकः स्वग्रामाच्चिर्भिटिका आनयन् नगरीद्वारे यत्नेन तं प्रति नागरिकः प्राह यदेताः सर्वा अपि तव चिर्भिटिका भक्षयामि ततः किं मे प्रयच्छसीति ग्रामेयकः आह योऽनेन नगरीद्वारेण मोदको न याति तं प्रयच्छामि ततो द्वाभ्यामपि बद्धं पणितं कृताः साक्षिणो जनाः ततो नागरिकेण ताः सर्वा अपि चिर्भिटिकाः भक्षयित्वा २ भक्षिता मुक्ताः ततः स ग्रामेयकं प्रति भक्षिताः सर्वा अपि त्वदीयाः चिर्भिटिकास्ततो मे प्रयच्छ यथा प्रतिज्ञातं मोदकमिति। ग्रामेयकः प्राह न मे चि- र्भिटिका भक्षिताः ततः कथं ते प्रयच्छामि मोदकमिति नागरिक आह। भक्षिता मया सर्वा अपि चिर्भिटिका यदि न प्रत्येषि तर्हि प्रत्ययमुत्पादयामीति। तेनोक्तमुत्पादय प्रत्ययम् ततो द्वाभ्यामपि विपणिवीथ्यां विस्तारिता विक्रयाय चिर्भिटिकाः समागतो जन पश्यति ताश्च चिर्भिटिका विलोक्य ब्रवीति ननु भक्षिताः सर्वा अपि त्वदीया चिर्भिटिकास्तत एवं [illegible] साक्षिणो ग्रामेयकस्य च प्रतीतिरुत्पन्ना [illegible] कथं नु अस्य मया [illegible] ततः स [illegible] कम्पमानो विनयनम्रो [illegible] ततो द्वे रूपके [illegible] [illegible]

[illegible] ॥ १ ॥

(उप्पत्तिय) [illegible]

ऽम्बरमलयं प्रातरादित्यबिम्बमिव दश दिशः प्रकाशय-न्तङ्गजं पासमनुसारस्य च दौहदानुसारेण अभय इति नाम चक्रे। सोऽपि चाभयकुमारो नन्दनवनान्तर्गतकल्पपादप इव तत्र सुखेन परिवर्द्धमानो द्वासप्ततिकलाकलापमपि यथाकालं गृहीतवान्। अन्यदा च स्वमातरं पप्रच्छ मातः! कथं मे पिताऽदृश्यः इति ततः सा कथयामास मूलत आरभ्य सर्वं यथावस्थितं वृत्तान्तं दर्शयामास च श्रेणिकनामाक्षराणि। ततो मातृवचनानन्तरं श्रेणिकनृपपार्श्वगमनाय ज्ञानमभयकुमारेण यथा मे पिता राजगृहे राज्यं करोति इति वचः च ज्ञात्वा मातरमभाणीत् गच्छामो राजगृहे सार्थेन सह वयमिति। सा अभ्यधात् वत्स! यदभिरुचितं तत्कर्तव्यमिति ततोऽभयकुमारः स्वमात्रा सह सार्थेन समं चलितः प्राप्तो राजगृहस्य बहिः प्रदेशं ततोऽभयकुमारस्तत्र मातरं विमुच्य किं प्रकारेण संप्रति पुरे कार्यं वा राज्ञा दर्शनीय इति चिन्तयन् राजगृहं प्रविष्टः। तत्र पुरप्रवेशे एव निर्जलकूपतटे समस्तो लोकः समुदायेनावतिष्ठते पृष्टं चाभयकुमारेण किमिति लोकेनोक्तम्। [illegible]

[illegible]

सरटः प्रविष्टः ततो गृहं गतो महतीमधृतिं कुर्वन् दुर्बलो बभूव वैद्यं च पप्रच्छ वैद्यश्च ज्ञातवानसंभवेन केवलमस्य कथंचिदाशङ्का समुदपादि ततः सोऽवादीत् यदि मे शतं रूपकाणां प्रयच्छसि ततोऽहं त्वां निराकुलीकरोमीति प्रतिपन्नं ततो वैद्यो विरेचकौषधं प्रदाय तस्य लाक्षारसरञ्जितं कृत्वा सरटं घटे प्रक्षिप्य तस्मिन् घटे पुरीषोत्सर्गं कारितवान् ततो वैद्येन दर्शितः तस्य पुरीषमध्यगतो सरटो व्यपगता तस्य सर्वा शङ्का जातो बलिष्ठशरीरो वैद्यस्यौत्पत्तिकी बुद्धिः ॥ ६ ॥

(कायत्ति) काकोदाहरणं तद्भावना वेन्नातटे नगरे केनापि सौगतेन कोऽपि श्वेतपटक्षुल्लकः पृष्टः भो क्षुल्लक! यत्र किल तवार्हन्तः सर्वज्ञास्तत्पुत्रकाश्च यूयं तत्कथय कियन्तोऽत्र पुरे वसन्ति वायसाः ततः क्षुल्लकश्चिन्तयामास शठोऽयं प्रतिशठाचरणेन निर्लोठनीयः ततः स्वबुद्धिवशात् इदं पठितवान् " सट्ठिं कागसहस्सा, इह यं विन्नायडे परिवसंति। जइ ऊणगा पवसिया, अब्भहिया पाहुणा आया " ततः स भिक्षुः प्रत्युत्तरं दातुमशक्नुवन् लकुटाहतशिरस्क इव शिरः कण्डूयमानो मौनमाधाय गत इति क्षुल्लकस्यौत्पत्तिकी बुद्धिः। अथवा अपरो वायसदृष्टान्तः कोऽपि क्षुल्लकः केनापि भागवतेन दुष्टबुद्ध्या पृष्टो भोः क्षुल्लक! किमेष काको विष्ठामितस्ततो विकिरति क्षुल्लकोऽपि तस्य दुष्टबुद्धितामवगम्य तत्कर्मणैव प्रत्युत्तरं दत्तवान् युष्मत्सिद्धान्ते च जले स्थले च सर्वव्यापी विष्णुरभ्युपगम्यते ततो [illegible] एषोऽपि वायसोऽचिन्तयत् किमस्मिन् पुरीषे समस्ति विष्णुर्वा नेति ततः स एवमुक्तो बाणाहतमर्मप्रदेश इव घूर्णितो [illegible] तथा धूमायमानो गतः इति क्षुल्लकस्यौत्पत्तिकी बुद्धिः ॥ ७—८ ॥

(उच्चारेत्ति) उच्चारोदाहरणं तद्भावना क्वचित्पुरे कोऽपि धिग्जातीयः, तस्य भार्या अभिनवयौवनोद्भेदरमणीया [illegible]

[illegible]

प्रत्यासन्नवर्त्ती तं प्रति राजा निजदेवीं प्रशंसति अहो निरामया मे देवी या न कदाचिदपि वातनिसर्गं विदधाति । विटः प्राह देव ! न भवतीदं जातुचित् । राजा अवादीत् कथं विट आह देव धूर्त्ता देवी ततो यदा सुगन्धिपुष्पाणि चूर्णवासान् वा समर्पयति नासिकाग्रे तदा ज्ञातव्यं वातमुज्झतीति ततोऽन्यदा राज्ञा तथैव परिभावितं सम्यगवगतं च हसितं ततो देवी हसननिमित्तकथनाय निर्बन्धं कृतवती ततो राजाऽतिनिर्बन्धे कृते पूर्ववृत्तान्तमचकथत् । ततश्चुकोप तस्मै विटाय देवी आज्ञप्तो देशत्यागेन । तेनापि ज्ञातं नूनमकथयत् पूर्ववृत्तान्तं देवो देव्यास्तेन मे चुकोप देवी । ततो महान्तमुपानहां भरमादाय गतो देवीसकाशं विज्ञपयामास देवीम् । देवि ! यामो देशान्तराणि देवी उपानहां भरं पार्श्वे स्थितं दृष्ट्वा पृष्टवती रे किमेष उपानहांभरः । सोऽप्याह देवि यावन्ति देशान्तराण्येतावतीभिरुपानद्भिर्गन्तुं शक्ष्यामि तावत्सु देव्याः कीर्तिर्विस्तारणीया तत एवमुक्ते मा मे सर्वत्राप्यपकीर्तिर्जायतेति परिभाव्य देवी बलात् तं धारयामास । विटस्यौत्पत्तिकी बुद्धिः ॥ ११ ॥

(गोलोत्ति) गोलकोदाहरणं तद्भावना लाक्षागोलकः कस्यापि बालकस्य कथमपि नासिकामध्ये प्रविष्टः तन्मातापितरावतीव आर्त्तौ बभूवतुः दर्शितो बालकः सुवर्णकारस्य तेन च सुवर्णकारेण मनाक्प्रतापितया लोहशलाकया शनैः २ यत्नतो लाक्षागोलको मनाक् प्रताप्य सर्वोऽपि समाकृष्टः सुवर्णकारस्यौत्पत्तिकी बुद्धिः ।१२। (खंभत्ति) स्तम्भोदाहरणं तद्भावना । राजा मन्त्रिणमेकं गवेषयन् महाविस्तीर्णतटाकमध्ये स्तम्भमेकं निक्षेपयामास तत एवं घोषणां कारितवान् यो नाम तटस्थितोऽमुं स्तम्भं दवरकेण बध्नाति तस्मै राजा शतसहस्रं प्रयच्छति तत एवं घोषणां श्रुत्वा कोऽपि पुमान् एकस्मिन् तटप्रदेशे कीलकं भूमौ प्रक्षिप्य दवरकेण बध्वा तेन दवरकेण सह सर्वतस्तटे परिभ्रामयन् मध्यस्थितं तं स्तम्भं बद्ध- [illegible] त्करोति तदहं कुशलत्वमाः सर्वं करोमीति राज्ञः समस्तप्रतिज्ञां श्रुतवती राजा च तत्प्रतिज्ञासूचकं पटहमुद्घोषयामास । तत्र च कोऽपि क्षुल्लको भिक्षार्थमटन् पटहशब्दं श्रुतवान् धृतश्च प्रतिज्ञार्थः ततो धृतवान् पटहं प्रतिपन्नो राजसमस्तव्यवहारो गतो राजकुले क्षुल्लकतनस्तं लघु दृष्ट्वा सा परिव्राजिकाऽऽत्मीयं मुखं विवृत्यावज्ञयाऽभिधत्ते कथय कुतो गिलामि तत एवमुक्ते क्षुल्लकः स्वं मेढ्रं दर्शितवान् ततो हसितं सर्वैरपि जनैः दृष्टं च जिता परिव्राजिका तस्या एवं कर्त्तुमशक्यत्वात् ततः क्षुल्लकः कायिकया पद्मालिखितवान् सा कर्त्तुं न शक्नोति ततो जिता परिव्राजिका । क्षुल्लकस्यौत्पत्तिकी बुद्धिः ।१४।

(मग्गत्ति) मार्गोदाहरणं तद्भावना कोऽपि पुरुषो निजभार्यां गृहीत्वा वाहनेन ग्रामान्तरं गच्छति अपान्तराले च कस्मिंश्चित्प्रदेशे शरीरचिन्तानिमित्तं तद्भार्या वाहनादुत्तीर्णवती तस्यां च शरीरचिन्तानिमित्तं कियद्भूभागं गतायां तत्प्रदेशवर्त्तिनी काचिद्व्यन्तरी पुरुषस्य रूपसौन्दर्यादिकमवलोक्य कामातुरा तद्रूपेणागत्य वाहनं विलग्ना सा च तद्भार्या शरीरचिन्तां विधाय यावद्वाहनसमीपमागच्छति तावद्द्वितीयां स्वसमानरूपां वाहनस्थां पश्यति सा च व्यन्तरी पुरुषं प्रत्याह एषा काचिद् व्यन्तरी मदीयं रूपमास्थाय त्वत्सकाशमागच्छति [illegible]

ततः स पुरुषः तथैव कृतवान् । सा व्यन्तरी [illegible] समागच्छति पुरुषोऽपि तामागच्छन्तीं दृष्ट्वा भूयोऽपि मन्दं २ खेटयामास [illegible]

परस्परं कलहः ग्रामे च प्राप्ते जातः ततो राजकुले व्यवहारः पुरुषश्च निर्णयमकुर्वन्नुदासीनो वर्त्तते । ततः कारणिकैः पुरुषो दूरे व्यवस्थापितो भणिते च द्वे अपि स्त्रियौ युवयोर्मध्ये या काचित् प्रथमं हस्तेन संस्पृशति तस्याः पतिरेष न शेषायाः । ततो व्यन्तरी दूरतः हस्तं प्रसार्य प्रथमं स्पृष्टवती ततो ज्ञातं कारणिकैरेषा व्यन्तरीति । ततो निर्घाटिता द्वितीया च समर्पिता भर्त्रे । कारणिकानामौत्पत्तिकी बुद्धिः ।१५। (इत्थित्ति) स्त्र्युदाहरणं तद्भावना मूलदेवकण्डरीकौ सह पथा गच्छतः इतश्च कोऽपि सभार्यकः पुरुषः तेनैव पथा गन्तुं [illegible] मूलदेवस्य यदीमां मे संपादयसि तदाऽहं जीवामि [illegible] मूलदेवोऽभ्यधात् [illegible] ।

[illegible]

[illegible] द्वयोरपि तयोरौत्पत्तिकी बुद्धिः ॥ १६ ॥

(पडत्ति) [illegible] दिशि । [illegible] दिशि । [illegible]

[illegible] की बुद्धिः ॥ १७ ॥

(पुत्तत्ति) पुत्रोदाहरणं तद्भावना [illegible]

गृहस्वामिनी द्वितीया तु वक्ति का त्वं ममैव पुत्रः ततोऽहमेव गृहस्वामिनीति । एवं तयोः परस्परं कलहे जाते राजकुले व्यवहारो जातः । ततोऽमात्यः प्रतिपादयामास निजपुरुषान् सो पूर्वं द्रव्यं समस्तं विभज्य ततो दारकं द्वौ भागौ करपत्रेण कृत्वा चैकं खण्डमेकस्यै समर्पयत द्वितीयं द्वितीयस्यै । तत एतदमात्यवाक्यं शिरसि महाज्वालासहस्रावलीढवज्रोपनिपातकल्पं पुत्रमाता श्रुत्वा सोत्कम्पहृदयान्तः प्रविष्टतिर्यक्शल्येव दुःखं वक्तुं प्रवृत्ता हे स्वामिन्! महामात्य न ममैष पुत्रो न मे किञ्चिदर्थेन प्रयोजनमेतस्या एव पुत्रो भवत्वियं गृहस्वामिनी च अहं पुनरमुं पुत्रं दूरस्थितापि परगृहेषु दारिद्र्यमपि कुर्वती जीवन्तं द्रक्ष्यामि तावता च कृतकृत्यमात्मानं प्रपत्स्ये । पुत्रेण विना पुनरधुनापि समस्तोऽपि मे जीवलोकोऽस्तमुपयाति इतरा च न किमपि वक्ति ततोऽमात्येन तां दुःखार्त्तां परिभाव्य उक्तमेतस्याः पुत्रो नास्या इति । सैव च सर्वस्य स्वामिनी कृता द्वितीया तु निर्धाटिता अमात्यस्यौत्पत्तिकी बुद्धिः १८ भरहसिलमेंढ इत्यादिका च गाथा रोहक संविधानकसूचिका सा च प्रागुक्तकथानकानुसारेण स्वयमेव व्याख्येया । (महुसित्थमित्यादि) मधुयुक्तं सिक्थं तदृष्टान्तभावना कश्चित्कौलिकः तस्य भार्या स्वैरिणी सा चान्यदा केनापि पुरुषेण सह कस्मिन्प्रदेशे जालिकामध्ये मैथुनं सेवितवती मैथुनस्थितया च तया उपरि भ्रामरमुत्पन्नं दृष्टं कालमात्रानन्तरं च गृहे समागता । द्वितीयदिवसे च स्वभर्तारं मदनं क्रीणन्तं निवारितो मा क्रीणीहि मदनं मधुना भ्रामरमुत्पन्नं दर्शयामि । ततः स क्रयणाद्विनिवृत्तो गतौ च तौ द्वावपि तां जालिं न पश्यति सा कथमपि कौलिकी भ्रामरं न दृष्टवती ततो येन संस्थानेन मैथुनं सेवितवती तेन संस्थानेन स्थिता ततो भ्रामरं दृष्टवती दर्शयामास च कौलिकाय कौलिकोऽपि च तथारूपं संस्थानमवलोक्य ज्ञातवान्नूनमेषा दुराचारिणीति । कौलिकभार्याया औत्पत्तिकी बुद्धिः ॥ १९ ॥

(मुद्दियत्ति) मुद्रिकोदाहरणं तद्भावना कस्मिन्पुरे कोऽपि पुरोधाः सर्वत्र ख्यातसत्यवृत्तिर्यथा परकीयानिक्षेपानादाय प्रभूतकालातिक्रमेऽपि तथास्थितानेव समर्पयतीति एतच्च श्रुत्वा कोऽपि द्रमकः तस्मै स्वनिक्षेपं समर्प्य देशान्तरं प्रभूतमगमत् प्रभूतकालातिक्रमे च भूयोऽपि तत्रागतो याचते स्वं निक्षेपं पुरोधाश्च सुतरां प्रत्याख्यति कस्त्वं कीदृशो वा तव निक्षेप इति । ततः स रङ्को वराकः स्वनिक्षेपमलभमानः शून्यचित्तो बभूव । अन्यदा च तेनामात्यो गच्छन् दृष्टो याचितश्च देहि मे पुरोहित ! सुवर्णसहस्रप्रमाणं निक्षेपमिति । तत एतदाकर्ण्य अमात्यः [illegible] बभूव । [illegible] राज्ञः [illegible] द्रमकोऽपि राजा [illegible] पुरोधा देहि तस्मै द्रमकाय स्वं निक्षेपमिति । पुरोहितोऽवादीत् देव ! तस्याहं न किमपि गृह्णामि । ततो राजा [illegible] । पुरोधसि च स्वगृहं गते राजा विजने तं द्रमकं पृष्टवान् रे वद ! सत्यमिति ततस्तेन [illegible] [illegible] ततोऽन्यदा राजा पुरोधसा समं [illegible] ततो राजा [illegible] पुरोधा न [illegible] नाममुद्रां [illegible] [illegible]

लकः प्रहितः । आकारितो द्रमकः पार्श्वे चोपवेशितः पुरोधा द्रमकोऽपि तथात्मीयं नवलकं दृष्ट्वा प्रमुदितहृदयो विकसितलोचनोऽपगतचित्तशून्यताभावः सहर्षं राजानं विज्ञप्तुं प्रवृत्तो देव ! देवपादानां पुरत एवमाकारो मदीयो नवलकस्ततो राजा तस्मै समर्पयामास । पुरोधसो जिह्वाच्छेदमकारयत् । राज्ञः औत्पत्तिकी बुद्धिः ॥ २० ॥

(अंकत्ति) अङ्कदृष्टान्तभावना कोऽपि पार्श्वे कस्यचित्सहस्रकं निक्षिप्तवान् तेन च निक्षेपग्राहिणा तं नवलकमधस्ताच्छित्वा कूटरूपकाणां संभृतः तथैव च सीवितः । ततः कालान्तरं तस्य पार्श्वान्निक्षेपस्वामिना स्वनिक्षेपो गृहीतः परिभाव्य मस्तकः तथैव दृश्यते मुद्रादिकं तत उद्घाटिता मुद्रा यावद्रूपकान् परिभावयति तावत्सर्वानपि कूटान्पश्यति ततो राजकुलेन तयोर्व्यवहारः । पृष्टः कारणिकैर्निक्षेपस्वामी कति संख्यास्तव नवलके रूपका आसीरन् स प्राह सहस्रं ततो रूपकाणां सहस्रं तेन भृतः स नवलकः स च परिपूर्णः कथं यावन्मात्रमधस्ताच्छिन्नस्तावन्न्यून इति उपरि सीवितुं न शक्यन्ते ततो ज्ञातं कारणिकैः नूनमस्यापहृता रूपकाः ततो दापितो रूपकसहस्रमितरो नवलकस्वामिनः । कारणिकानामौत्पत्तिकी बुद्धिः ॥ २१ ॥

(णाणत्ति) कोऽपि कस्यापि पार्श्वे सुवर्णपणानां नवलकं निक्षिप्तवान् ततो गतो देशान्तरं प्रभूते च कालातिक्रान्ते निक्षेपग्राहिणा तस्मान्नवलकात्जात्यसुवर्णमयान् पणान् गृहीत्वा हीनवर्णपणान् तावत्संख्याकान् तत्र प्रक्षिप्तवान् तथैव च स नवलकस्तेन सीवितः ततः कतिपयदिनानन्तरं स नवलकस्वामी देशान्तरादागतः स्वं च नवलकं तस्य पार्श्वे याचितवान् सोऽपि समर्पयामास परिभावितं तेन मुद्रादिकं तथैव दृष्टम् । ततो मुद्रां स्फोटयित्वा यावत्पणान्परिभावयति तावद्धीनवर्णसुवर्णमयान् पश्यति ततो बभूव राजकुले व्यवहारः पृष्टं च कारणिकैः कः कालः आसीत् यत्र त्वया नवलको मुक्त इति । नवलकस्वामी प्राह । अमुक इति ततः कारणिकैरुक्तं स चिरन्तनकालोऽमुकतनकाले कृता दृश्यन्तेऽमी पणास्ततो मिथ्याभाषी नूनं निक्षेपग्राहीति दण्डितो दापितश्च तस्य तावत्पणानिति । कारणिकानामौत्पत्तिकी बुद्धिः ॥ २२ ॥

(भिक्खुत्ति) भिक्षूदाहरणं तद्भावना कोऽपि कस्यापि भिक्षोः पार्श्वे सुवर्णसहस्रं निक्षिप्तवान् कालान्तरे याचते स च भिक्षुः [illegible] [illegible] या ददामीति विप्रतारयति ततोऽनेन तथा [illegible] प्रतिपन्नं निश्चितं दापयिष्यामि । ततो द्यूतकारा रक्तपटवेषेण सुवर्णखोटिकां गृहीत्वा समागता वदन्ति च वयं चैत्यवन्दनाय देशान्तरे यियासवो यूयं परमसत्यव्रताः अत एताः सुवर्णखोटिका युष्मत्पार्श्वे स्थास्यन्ति एतावति अत्रान्तरे पूर्वं संकेतितः स पुरुषः आगत्य याचते स्म निजं ! [illegible] [illegible] ततो निक्षेपाक्षेपमुच्चैः [illegible] का अकरणतया समर्पिता तस्य स्थापनिका तस्मै । सा एतामर्पयामि [illegible] [illegible] स्वसुवर्णखोटिकां गृहीत्वा गताः द्यूतकाराणामौत्पत्तिकी बुद्धिः २३ ।

(चेडगनिहाणत्ति) चेटकौ बालकौ निधानं [illegible] [illegible] द्वौ पुरुषौ परस्परं प्रतिपन्नमित्रभावावन्यदा [illegible] [illegible] निधानमुपलब्धं तत एकः मायावी [illegible] [illegible] [illegible] द्वितीयदिने [illegible] [illegible] [illegible] [illegible] [illegible] [illegible] । ततो मायावी मायया [illegible]

न्तुं प्रयत्नेन वदति च हा हीनपुण्या वयं दैवेन वञ्चिता ऽस्माकं समुत्पाटिते यन्निधानमुपदिश्याङ्गारका दर्शिताः पुनः पुनश्च द्वितीयमुखमवलोकते ततो द्वितीयेन ज्ञातं नूनमनेन हृत धनमिति ततस्तेनाप्याकारसंवरणं कृत्वा सत्याशुद्धाम्भनार्थमूचे मा वयस्य खेदं कार्षीः न खलु खेदं पुनर्निधानप्रत्यागमनहेतुः । ततो गतौ द्वावपि स्वं गृहं ततो द्वितीयेन तस्य मायाविनो लेप्यमयी सजीवेव प्रतिमा कारिता द्वौ च गृहीतौ मर्कटौ प्रतिमायाश्चोत्सङ्गे हस्ते शिरसि स्कन्धे चान्यत्र च यथायोग्यं तयोर्मर्कटयोर्भक्ष्यं मुक्तवान् तौ च मर्कटौ क्षुधार्ताविति तत्रागत्य प्रतिमाया उत्सङ्गादौ भक्ष्यं भक्षितवन्तौ एवं च प्रतिदिनं करणे तयोस्तादृश्ये च दौस्थी समजनि । ततोऽन्यदा किमपि पर्वाधिकृत्य मायाविनो द्वावपि पुत्रौ भोजनाय निमन्त्रितौ समागतौ च भोजनवेलायां तद्गृहे भोजितौ च तेन महागौरवेण भोजनानन्तरं च तौ महता सुखेनान्यत्र संगोपितौ । ततस्तोकदिनावसाने मायावी स्वपुत्रशोधिकरणाय तद्गृहमागतः ततो द्वितीयस्तं प्रति ब्रूते मित्र! तौ तव पुत्रौ मर्कटावभूतां ततः सखेदं विस्मितचेता गृहमध्यं प्राविशत् ततो लेप्यमयीं प्रतिमामपसार्य तत्स्थाने समुपवेशितो मुक्तौ स्वस्थानात् मर्कटौ च किलकिलायमानौ तस्योत्सङ्गे शिरसि स्कन्धे चागत्य विलग्नौ । ततो मित्रमवादीत् भो वयस्य! तावेतौ तव पुत्रौ तथाच पश्य तव स्नेहमात्मीयं दर्शयतः । ततः स मायावी प्राह वयस्य ! किं मानुषावकस्मान्मर्कटकौ जातौ वयस्य आह भवतः कर्मप्रातिकूल्यवशात् तथाहि किं सुवर्णमङ्गारी भवति परमावयोः कर्मप्रातिकूल्यादेतदपि जात तथा तव पुत्रावपि मर्कटावभूतामिति । ततो मायावी चिन्तयामास नूनमहं ज्ञातोऽनेन ततो यद्युच्चैः शब्दं करिष्ये ततोऽहं राजग्राह्यो भविष्यामि पुत्रौ चान्यथा मे न भवतः ततस्तेन सर्वं यथावस्थितं निवेदितं दत्तश्च भागः इतरेण च समर्पितौ पुत्रौ तस्यौत्पत्तिकी बुद्धिः ॥ २४ ॥

(सिक्खत्ति) शिक्षा धनुर्वेदे तदुदाहरणभावना कोऽपि पुमानतीव धनुर्वेदकुशलः स परिभ्रमन्नेकत्रेश्वरपुत्रान् शिक्षयितुं प्रावर्तत तेभ्यश्चेश्वरपुत्रेभ्यः प्रभूतं द्रव्यं प्राप्तवान् ततः पित्रादयस्तेषां चिन्तयामासुः प्रभूतमेतस्मै दत्तवन्तः । ततो यदासौ यास्यति तदैनं मारयित्वा सर्वं ग्रहीष्यामः एतच्च कथमपि तेन ज्ञातं ततः स्वबन्धूनां ग्रामान्तरवासिनां कथमपि ज्ञापितं यथाहममुकस्यां रात्रौ नद्यां गोमयपिण्डान् प्रक्षेप्स्यामि भवद्भिस्ते ग्राह्या इति । ततस्तैस्तथैव प्रतिपन्नं ततो द्रव्येन संवलिता गोमयपिण्डास्तेन कृताः आतपेन शोषितास्तत ईश्वरपुत्रान् प्रत्युवाच यथैषोऽस्माकं विधिर्विवक्षितपर्वणि स्नानमन्त्रपुरस्सरं ते सर्वेऽपि गोमयपिण्डा नद्यां प्रक्षेप्यास्ततः समागतो गृहं तेऽपि गोमयपिण्डा नीता बन्धुभिः स्वग्रामे । ततः कतिपयदिनातिक्रमे तानीश्वरपुत्रान् तेषां च पित्रादीन् प्रत्येकं मुत्कलयात्मानं च वसुमात्रपरिग्रहोपेतं दर्शयन् सर्वजनसमक्षं स्वग्रामं जगाम पित्रादिभिश्च परिभावितो नास्य पार्श्वे किमप्यस्तीति न मारितः । तस्यौत्पत्तिकी बुद्धिः २५ (अत्थसत्थेति) अर्थशास्त्रमर्थविषयं नीतिशास्त्रं तद्दृष्टान्तभावना । कोऽपि वणिक् तस्य द्वे पत्न्यौ एकस्याः पुत्रोऽपरा वन्ध्या परं साऽपि पुत्रं सम्यक् परिपालयति ततः पुत्रो विशेषं न बुध्यते यथेयं मे जननी नेयमिति सोऽपि वणिक् सभार्यापुत्रो देशान्तरमगमत् । यत्र सुमतिस्वामिनस्तीर्थकृतो जन्मभूमिः तत्र गतमात्र एव च दिवं गतः सपत्न्योश्च परस्परं कलहोऽभूत् एका ब्रूते ममैष पुत्रः ततोऽहं गृहस्वामिनी द्वितीया ब्रूतेऽहमिति ततो राजकुले व्यवहारो जातः तथापि न निर्वलति एतच्च भगवति सुमतिस्वामिनि तीर्थंकरे गर्भस्थिते जनन्या मङ्गलादेव्या जज्ञे तत आकारिते द्वे अपि ते सपत्न्यौ ततो देव्या प्रत्यपादि कतिपयदिनानन्तरं मे पुत्रो भविष्यति स च वृद्धिमधिरूढोऽस्याशोकपादपस्याधस्तादुपविष्टो युष्माकं व्यवहारं छेत्स्यति । तत एतावन्तं कालं यावदविशेषेण खादतां पिबतामिति ततो न यस्याः पुत्रः साऽचिन्तयत् लब्धस्तावदेतावान् कालः पश्चाद्यद्भविष्यति तन्न जानीमः । ततो हृष्टवदनयाऽनया प्रतिपन्नं ततो देव्या ज्ञातं नैषा पुत्रस्य मातेति निर्भर्त्सिता द्वितीया च गृहस्वामिनी कृता । देव्या औत्पत्तिकी बुद्धिः ॥ २६ ॥

(इत्थीसमहेत्ति) काऽपि स्त्री तस्या भर्त्ता पञ्चत्वमुपागतः सा च वृद्धिप्रयुक्तं लोकेभ्यो न लभते ततः पतिमित्रं भणितवती मम दापय लोकेभ्यो धनमिति । ततस्तेनोक्तं यदि मम भाग प्रयच्छसि । तयोक्तं यदिच्छसि तन्मह्यं दद्या इति ततस्तेन लोकेभ्यः सर्वं द्रव्यमुद्ग्राहित तस्यै स्तोकं प्रयच्छति सा नेच्छति *ततो जातो राजकुले व्यवहारः ततः कारणिकैर्यदुद्ग्राहितं द्रव्यं तत्सर्वमानायितं कृतौ द्वौ भागौ एको महान् द्वितीयोऽल्प इति* ततः पृष्टः कारणिकैः पुरुषः कं भागं त्वमिच्छसि स प्राह महान्तमिति । ततः कारणिकैरक्षरार्थो विचारितो यदिच्छसि तन्मह्यं दद्या इति त्वं चेच्छसि महान्तं भागं ततो महान् भाग एतस्या द्वितीयस्तु तवेति । कारणिकानामौत्पत्तिकी बुद्धिः ।२७

(सयसहस्सत्ति) कोऽपि परिव्राजकः तस्य रौप्यमयं महाप्रमाणं भाजनं खोरयसंज्ञं स च यदेकवारं शृणोति तत्सर्वं तथैवाऽवधारयति ततः स निजप्रज्ञागर्वमुद्वहन् सर्वत्र प्रतिज्ञां कृतवान् यो नाम ममापूर्वं श्रावयति तस्मै ददामीदं निजभाजनमिति । न च कोऽप्यपूर्वं श्रावयितुं शक्नोति स हि यत्किमपि शृणोति तत्सर्वमस्खलितं तथैवानुवदति । वदति चायमपीदं मया श्रुतं कथमन्यथाहमस्खलितं भणामीति एतत्सर्वं ख्यातिमगमत् ततः केनापि सिद्धपुत्रकेण ज्ञातप्रतिज्ञेन स प्रत्युक्तमपूर्वं श्रावयिष्यामि । ततो मिलितो भूयान् लोको राजसमक्षं व्यवहारो बभूव । ततः सिद्धपुत्रोऽपाठीत् । "तुज्झ पिया मह पिउणो, धारेइ अणूणगं सयसहस्सं । जइ सुयपुव्वं दिज्जउ, अह न सुयं खोरयं देसु" जितः परिव्राजकः सिद्धपुत्रेण । सिद्धपुत्रस्यौत्पत्तिकी बुद्धिः ॥ २८ ॥ न० ॥ आ० म० द्वि० । आ० चू० । आ० क० ।

उप्पयंत-उत्पतत्-त्रि० ऊर्ध्वं पतति, "उप्पयंताणि पतता समंता पुरक्कम्मोदयोपगया" प्रश्न० १ द्वा० ।

उप्पयण-उत्पतन-न० उत्-पत ल्युट् ऊर्ध्वगमने, स्था० १० ठा० ।

उप्पयणिवय-उत्पातनिपात-पुं० उत्पात आकाशे उल्लङ्घनं निपातस्तस्मादवपतनम् (जं० ४ वक्ष०) उत्पातपूर्वो निपातो यस्मिन् स उत्पातनिपातः । नाट्यविधिभेदे, "उप्पयणिवयपवत्तं संकुचियं पसारियरयारइयं भंतं संभं णामं दिव्वं णट्टविहिं उवदंसेति " रा० । जी० ।

उप्पयणी-उत्पतनी-स्त्री० विद्याभेदे, यां जपन् स्वत एव पतत्यन्यं चोत्पातयति ॥ सूत्र० २ श्रु० २ अ० ।

उप्पयमाण-उत्पतत्- त्रि० ऊर्ध्वं पतति, स्त्रियाम् । "उप्पयमाणी विव धरणितलाउ" उत्पतन्ती ऊर्ध्वं यान्ती । ज्ञा० १ अ० ।

उप्परिवाडी-उत्परिपाटी- स्त्री० विपर्यासे, " उप्परिवाडी गहणे, चाउम्मासा भवे लहुगा " ग० १ अधि० ।

उप्परिवाडीकरण-उत्परिपाटीकरण-न० ... रिवाडी करणे, दोसा सम्म तदा करणे " ...

उप्पल-उत्पल-न० उद्-पल्-अच् प्राकृते " कगटडतदपशषस ×क×पा मूर्ध्वे लुक्" ८।२।७७ इति संयोगादेर्लुक् । प्रा० । पद्मविशे० । " फुल्लुप्पलकमलकोमलुम्मिलियं " ज्ञा० १ अ० । विं० । कल्प० । औ० । गर्दभके, श्वेतकुमुदे, आ० म० प्र० । " पक्कंतरेसु बहूइं पउमाइं जाव सयसहस्सपत्ताइं" जी०३प्रति० । ग०। ईषन्नीले उत्पले,जं० १ वक्ष०।नीलोत्पले, जी० ३ प्रति। प्र०। तं०।स०।आचा०।रक्तकमले, कल्प०। उत्पलं त्रिविधं नीलं रक्तं श्वेतञ्च । वाच० । अत एव उत्पलशब्दस्य,नीलोत्पलं रक्तकमलं गर्दभकं नीलोत्पलादीन्येवं विभिन्ना अर्था उपलभ्यन्ते (उत्पलस्य उपपातः परिमाणमपहार उच्चत्वं पायत्समुद्घात उद्वर्तनाः द्वात्रिंशता द्वारैर्वणफड शब्दे वक्ष्यते) कुष्ठे गन्धद्रव्यविशेषे,। "पउमुप्पलगंधिए " स० । तच्च उत्पलं कुष्ठमिति प्रसिद्धम् ॥ जं० ३ वक्ष० । जी० । तं० । चतुरशीतावुत्पलाङ्गशतसहस्रेषु, जी० ३ प्रति० । अनु० । स्था० । दशमे कल्पे चतुर्थविमाने च । स० । स्वनामख्याते पार्श्वापत्यीये परिव्राजके, पुं० । अस्थिकग्रामे वीरभगवति शूलपाणियक्षेणोपसृष्टे, " तत्थ उप्पलो नाम पुव्वणो पासावच्चिज्जो परिव्वायगो अट्ठंगमहानिमित्तजाणगो जणपासातो सोऊण मा तित्थगरो होज्जा अद्धिइं पकरेइ । आ०म०द्वि० । आ० क० । " तत्थ उप्पलो नाम पच्छाकडो परिव्वाओ पासावच्चिज्जो णेमित्तिओ भोमउप्पातसुमिणअंतलिक्खअंगसरलक्खणवंजणअट्ठंगमहानिमित्तजाणओ । आ० चू०१अ० । वल्कान्तं पलं मांसम् । अन्या० स० । मांसशून्ये, त्रि० । वाच० स्वनामख्याते द्वीपसमुद्रे च । प्रज्ञा० १५ पद० ।

उप्पलंग-उत्पलाङ्ग-न० चतुरशीतौ हुहुकशतसहस्रेषु, जी० ३ प्रति० । जं० । स्था० ।

उप्पलकंद-उत्पलकन्द-पुं० मूलबीजे कन्दभेदे, स्था० ५ ठा० ।

उप्पलगुम्मा-उत्पलगुल्मा-स्त्री० जम्बूसुदर्शनाया दक्षिणपूर्वस्यां पूर्वदिशि नन्दापुष्करिण्याम्, जी० ३ प्रति० ।

उप्पलणाल-उत्पलनाल-न० नीलोत्पलादेराधारे,आचा०२श्रु०१अ०

उप्पलवेंटग-उत्पलवृन्तक-पुं० उत्पलवृन्तानि नियमविशेषाद् गृहीतया भिक्षत्वेन येषां सन्ति ते उत्पलवृन्तिकाः । आजीविकश्रमणभेदेषु, औ० ॥

उप्पलहत्थग-उत्पलहस्तक-पुं० उत्पलाख्यजलजकुसुमविशेषे, । भ०७ म० द्वि० । जीवा० । रा० ।

उप्पला-उत्पला-स्त्री० शङ्खभार्यायाम्, स्था०८ ठा० । "तस्सणं संखस्स सन्तेकलनगस्स उप्पला णामं भारिया होत्था सुकुमाल जाव सुरूवा समणोवासिया अभिगयजीवाजीवा जाव विहरइ" भ० १२ श० १ उ० । (संखशब्देऽन्यत्) कालस्य पिशाचेन्द्रस्य तृतीयाग्रमहिष्याम्, भ० १० श० ५ उ० । (तस्या [illegible] अग्गमहिसी शब्दे उक्ता)भीमानिधानकृत्याकारे [illegible] मृत्वा नरकं गत्वा ततो [illegible] दारके उत्पन्ना । विपा० [illegible] शब्दे उक्ता)जम्ब्वाः सुदर्शनाया दक्षि- [illegible] पुष्करिण्याम्, । जी० ३ प्रति० । [illegible] जलजकुसुमविशेषे, "प- [illegible]

[illegible]

उप्पव्वइय-उत्प्रव्रजित-त्रि० उत्प्रव्रज्य निर्गते, उत्प्रव्रजितमुण्डसारूपी गृहस्थश्च । ध० ३ अधि० ।

उप्पह-उत्पथ-पुं० उन्मार्गे, " आवन्ने उप्पहं जं तु " सूत्र० १ श्रु० १ अ० । औ० । " पंथा च उप्पहं नेति " नि० चू० १ उ० कदर्ये पथि, वाच० ।

उप्पहजाइ-उत्पथयायिन्-पुं० न० उन्मार्गगामिनि पुंसि, मनुष्ये शिक्षाचरोपे, परसमयगते वा पुरुषे च । स्था० ३ ठा० ।

उप्पहेम-देशी० । महाराष्ट्रादि देशविशेषप्रसिद्धे, प्र० ।

उप्पा-उत्पाद-पुं० प्राकृते स्त्रीत्वं तथारूपत्वं च " एगा उप्पा " प्राकृतत्वादुत्पादः स चैकसमये एकपर्यायापेक्षया वा एक युगपदुत्पादद्वयादिरस्ति अनपेक्षितनानाविशेषकसदर्थत्वेन वैक- ऽसाविति । स्था० १ ठा० ।

उप्पाइत्ता-उत्पादयितृ-त्रि० उत्पादनशीले, स्था० ७ ठा० । उत्पादके, स्था० ४ ठा० ।

उत्पादयितुम्-अव्य० संपादयितुमित्यर्थे, "उप्पाइत्ता णं ह- ...व्वए पुष्फुपमाणं " स्था० ४ ठा० ।

उप्पाइय-औत्पातिक- त्रि० उत्पादने निर्वृत्तमौत्पातिकम् । पांशुपातादौ, तन्निमित्तके अस्वाध्याये च । आव० ४ अ० । रुधिरवृष्ट्यादीनामनिष्टसूचकानां हेतुप्वनर्थेषु, "उप्पाइयवाही" उत्पाद- ऽनिष्टसूचकरुधिरवृष्ट्यादयस्तद्धेतुका ये व्याध्यस्ते औत्पातिकास्त

उप्पाइयपवण-औत्पातिकपवन-पुं०उत्पातजनितवायौ,प्रश्न०५।

उप्पाइयपव्वय-औत्पातिकपर्वत- पुं० अस्वाभाविके, " उप्पाइयपव्वयं व चंकमंतं सक्खं मत्तं गुलुगुलुतं " स्वाभाविकपर्वतो हि न चङ्क्रमते अत उच्यते औत्पातिकपर्वतमिव चङ्क्रमन्तं पाठान्तरेण तु औत्पातिकपर्वतमिव । औ० । ज्ञा० ॥

उप्पाइयाविच्छिन्नकोउहल्लत्त-उत्पादिताविच्छिन्नकौतूहलत्व- न० श्रोतॄणां स्वविषये उत्पादितं जनितमविच्छिन्नं कौतुकं येन तत्तथा । तद्भावस्तत्त्वम् । श्रोतृषु स्वविषयाद्भुतविस्मयकारितारूपे षट्त्रिंशे सत्यवचनातिशये, रा० ॥

उप्पाडण-उत्पाटन- न० उद्-पट्-णिच्-ल्युट्-उन्मूलने, ज्ञा० १ ज्ञा० । उत्खनने, " सकृदुत्पाटनतः, शालिरपि फलावह पुंसः " पो० १४ विव० । नि० चू० ॥

उप्पाडिय-उत्पाटित- त्रि० उन्मूलिते, " उप्पाडियनयणसंभमसणासणस्स " आ० क० ॥

उप्पाय-उत्पात- पुं० न० उत्पतनमुत्पातः । उद्-पत्-घञ्-ऊर्ध्वगमने, स्था० १ ठा० । प्रकृतिविकारे, तद्रूपे सहजरुधिरवृष्ट्यादौ, तत्प्रतिपादनपरे शास्त्रे च । यथा राष्ट्रोत्पातादि स्था० ९ ठा० । प्रश्न० । स० । अनु० । सूत्र० । आव० । " साहिय दंसण जम्मि जायइ भन्नइ समुप्पायं " सहजरुधिरवृष्ट्यादि दर्शने जायते तदुत्पातानिधं निमित्तम् । आदिशब्दादस्थिवृष्ट्यादिपरिग्रहः । यथा " मज्जानि रुधिरास्थीनि, धान्याङ्गारवसास्तथा । वर्षेत यत्र, भयं विद्याच्चतुर्विधमित्यादि । प्रव० । [illegible] द्विविकारयम् विस्तरतः परिणामत उत्पातः " [illegible] [illegible] । मंसंमिसाहरिं, मरेज्ज [illegible] रुधिरं गुत्तं " इत्येवं रूपे उत्पाते उत्पातयाधिके [illegible] ग० वृ० । भाव० ॥ (विस्तरतोवर्णनमस्याउत्पाय शब्दे [illegible] [illegible] विषयेषु दर्शितोगृहस्थहितासु च । शुभाशुभसूचकं [illegible] दिव्यान्तरिक्षभौमभेदात् त्रिविधः । स च वृहत्संहितायां [illegible]

धनवैरुत्पातात्, पर्णैः प्रोषात नानद् वदये । तेषां सहेपोऽयं, मदनोऽन्यचमुपातः ॥ भयचारेण नराणा-मुपसर्गाः पापसंश्रयाकुर्वन्ति । मेनूनयन्ति दिव्या-न्तरिक्षजे।भासनदुत्पाताः ॥ मनुजानामपचारा-दपरक्ता देवताः सृजन्त्येतान् । तन्मनिघाताय नृपः, शान्तिं राष्ट्रे प्रयुञ्जीत। दिव्यं ग्रहर्क्षवैकृत-मुल्कानिर्घातपवनपरिवेषाः । गन्धर्वपुरपुरन्दर-चापादि यदान्तरिक्षं तत् ॥ भौमं चरस्थिरभवं, तच्छान्तिभिराहतं शममुपैति । नाभसमुत्पन्नकोपशमन-मुत्पातपरिदिनेषु भौमेषु ॥ पाकमुपयाति दैवं परिकल्पनमथवा नृपतेः । दैवतयात्राशकट-ध्वजयुगकेतुजन्दपस्नानि ॥ संपर्यानमनसादन-महाश्च तृदेशापशुभेदाः । अपिपर्यापिनृत्य-प्रोत्कूर्न तद् द्विजार्तानाम् ॥ मङ्गलसोकपाशोऽन्यं स्थूलामनिष्टं सत् । गुरुमितत्वानश्च्युतं पुरोपसो विपत्तुं व लोकानाम् ॥ स्कन्दविशाखमनुष्यं माएडलिकानां नरेन्द्राणाम् । येद्व्यासे मन्त्रिणि विनायके वैकृते चमूनाथे ॥ धातरि सविश्वकर्मणि लोकानाभावाय निर्दिष्टम् । देवकुमारकुमारीवनिताप्रेष्येषु वैकृतं यत्स्यात् ॥ तन्नरपतेः कुमारककुमारिकास्त्रीपरिजनानाम् । रक्षःपिशाचगुह्यकनागानामेतदेव निर्देश्यम् ॥ मासैश्चाप्यष्टभिः सर्वेषामेव फलपाकः ॥ राष्ट्रस्यानभि' प्रदीप्यते दीप्यते च नेन्धनवान् । मनुजेश्वरस्य पीडा स्यान्नरपाद्रस्य विहेया ॥ जलमांसाद्युज्ज्वलने नृपतिवधः प्रहरणे रणो रौद्रः । सैन्यग्रामपुरेषु च नाशो वह्नेर्भयं कुरुते ॥ प्रासादतलतोरण-केत्यादिष्वनलरन्ध्रेषु । तडितां वा पतनात् पञ्चत्वमाप्यागमो नियमात् ॥ धूमोऽनग्निसमुत्थो रजस्तमश्चाहितं महाभयदम् । व्यभ्रे निशि उडुनाशो दर्शनमपि चाह्नि दोषकरम् ॥ नगरचतुष्पादाण्डजमनुजानां भयकरं ज्वलनमाहुः । धूमाग्निविस्फुलिङ्गैः शय्याम्बरकेशगैर्मृत्युः ॥ आयुधज्वलनसर्पणस्वनाः कोशनिर्गमनवेपनानि वा । वैकृतानि यदि वायुधेऽपराण्याशु रौद्ररणसंकुलं वदेत् । इत्यग्निवैकृतम् ।

शाखाभङ्गेऽकस्माद् वृक्षाणां निर्दिशेद्रणोद्योगम् । हसने देशभ्रंशं रुदिते च व्याधिबाहुल्यम् ॥ राष्ट्रविभेदस्त्वनृतौ बालवधोऽतिव कुसुमिते बाले । वृक्षात् क्षीरस्रावे सर्वद्रव्यक्षयो भवति ॥ मद्ये वाहननाशः संग्रामः शोणिते मधुनि रोगः । स्नेहे दुर्भिक्षभयं महद्भयं निःसृते सलिले ॥ शुष्कविरोहे वीर्यान्नसंक्षयः शोषणे च विपर्यासः । पतितानामुत्थाने स्वयं भयं दैवजनितं च ॥ पूजितवृक्षे ह्यनृतौ कुसुमफलं नृपवधाय निर्दिष्टम् । धूमस्तस्मिन् ज्वाला यथा भवेन्नृपवधायैव ॥ सर्वेषु तरुषु वापि-जनसङ्क्षयो विनिर्दिष्टः। वृक्षाणां वैकृत्ये दशभिर्मासैः फलविपाकः ॥ इति वृक्षवैकृतम्

नालेऽब्जयवादीनामेकस्मिन् द्वित्रिसम्भवो मरणम् । कथयति तदधिपतीनां यमलं जातं च कुसुमफलम् ॥ अतिवृद्धिः शस्यानां नानाफलकुसुमसंभवो वृक्षे । भवति हि यद्येकस्मिन् परचक्रस्यागमो नियमात् ॥ अर्धेन यदा तैलं भवति तिलानामतैलता वा स्यात् । अन्नस्य च वैरस्यं तदा च विन्द्याद्भयं सुमहत् ॥ विकृतं कुसुमफलं वा ग्रामादथवा पुराद्बहिः कार्यम् । इति शस्यवैकृतम् ।

दुर्भिक्षमनावृष्ट्यामतिवृष्ट्यां क्षुद्भयं सपरचक्रम् । रोगो ह्यनृतुभवायां नृपवधोऽनभ्रजातायाम् ॥ शीतोष्णविपर्यासे नो सम्यगृतुषु संभवत्स्वपि । षण्मासात्प्राक् परचक्रं रोगभयं दैवजनितं च ॥ अन्यर्तौ सप्ताहं प्रबन्धवर्षे प्रधाननृपमरणम् । रक्तं शस्त्रोद्योगो मांसा

. . . . .

ऽस्थिवृष्टौ शस्यानामीति सञ्जननम् ॥ धान्यमृतवसौद्राणां दग्धो रुधिरोष्णवारिणां वर्षे । देशविनाशो ज्ञेयोऽशृग्वर्षे चापि नृपयुद्धम् ॥ यद्यमलेऽर्के छाया न दृश्यते दृश्यते प्रतीपा वा । देशस्य तदा सुमहद्भयमायातं विनिर्देश्यम् ॥ व्यभ्रे नभसीन्द्रधनुर्दिवा यदा दृश्यतेऽथवा रात्रौ । प्राच्यामपरस्यां वा तदा भवेत् क्षुद्भयं सुमहत् ॥ सूर्येन्दुपर्जन्यसमीरणानां योगः स्मृतो वृष्टिविकारकाले ॥ इति वृष्टिवैकृतम् । अपसर्पणं नदीनां नगरादचिरेण शून्यतां कुरुते । शोषश्चाशोष्याणामन्येषां वा ह्रदादीनाम् ॥ स्नेहासृङ्मांसवहाः सङ्कुलकलुषाः प्रतीपगाश्चापि । परचक्रस्यागमनं नद्यः कथयन्ति षण्मासात् ॥ ज्वालां धूमक्वाथरुदितोत्क्रुष्टानि चैव कूपानाम् । गीतप्रजल्पितानि च जनमरकाय प्रदिष्टानि ॥ तोयोत्पत्तिरखाते गन्धरसविपर्यये च तोयानाम् । सलिलाशयविकृतौ वा महद्भयं तत्र शुभकृत्यम् ॥ इति जलवैकृतम् ॥ प्रसवविकारे स्त्रीणां द्वित्रिचतुःप्रभृतिसम्प्रसूतौ वा । हीनातिरिक्तकाले च देशकुलसङ्क्षयो भवति ॥ वडवोष्ट्रमहिषगोहस्तिनीषु यमलोद्भवे मरणमेषाम् ॥ इति प्रसववैकृतम् ॥ परयोनावभिगमनं भवति तिरश्चामसाधु धेनूनाम् । उक्षाणां चान्योऽन्यं पिबति श्वा वा सुरभिसुतम् ॥ मासत्रयेण विद्यात् तस्मिन्निःसंशयं परागमनम् ॥ इति चतुष्पादवैकृतम् ॥ यानं वाहवियुक्तं यदि गच्छेन्न व्रजेच्च वाहयुतम् । राष्ट्रभयं भवति तदा चक्राणां सादभङ्गे च ॥ अनभिहितूर्यनादः शब्दो वा ताडितेषु यदि न स्यात् । व्युत्पत्तौ वा तेषां परागमो नृपतिमरणं वा ॥ गीतरवतूर्यनादा नभसि यदा वा चरस्थिरान्यत्वम् ॥ मृत्युस्तदा गदा वा विस्वरतूर्ये पराभिभवः । गोलाङ्गलयोर्भङ्गे दर्वीशूर्पाद्युपस्करविकारे ॥ क्रोष्टुकनादे च तथा शस्त्रभयं मुनिवचश्चेदम् । इति वायव्यवैकृतम् ॥ पुरपक्षिणो वनचरा वन्या वा निर्भया विशन्ति पुरं नक्तं वा दिवसचरा क्षपाचरा वा चरन्त्यह्नि । सन्ध्याद्वयेऽपि मण्डलमावध्नन्तो मृगा विहङ्गा वा । दीप्तायां दिश्यथवा क्रोशन्तः संहता भयदाः ॥ श्वानः प्ररुदन्त इव द्वारे वा सन्निरम्बुका दीनाः । प्रविशेद्यदेन्द्रभवने कपोतकः कौशिको यदि वा ॥ कुक्कुटरुतं प्रदोषे हेमन्तादौ च कोकिलालापः । प्रतिलोममण्डलचराः श्येनाद्याश्चाम्बरे भयदाः ॥ गृहचैत्यतोरणेषु द्वारेषु च पक्षिसङ्घसंपाताः । मधुवल्मीकाम्भोरुहसमुद्भवाश्चापि नाशाय ॥ श्वभिरस्थिशवावयव-प्रवेशनं मन्दिरेषु मरकाय । पशुशस्त्रव्याहारे नृपमृत्युरुक्तवानृषिभिः ॥ इति मृगपक्ष्यादिवैकृतम् ॥ शक्रध्वजेन्द्रकीलस्तम्भद्वारप्रपातभङ्गेषु । तद्वत् कपाटतोरणकेतूनां नरपतेर्मरणम् ॥ सन्ध्याद्वयस्य दीप्तिर्धूमोत्पत्तिश्च काननेऽनग्नौ । छिद्राभावे भूमेर्दरणं कम्पश्च भयकारी ॥ पाषण्डानां नास्तिकानां च भक्तः साध्वाचारप्रोज्झितः क्रोधशीलः । ईर्ष्युः क्रूरो विग्रहासक्तचेता यस्मिन् राजा तस्य देशस्य नाशः ॥ प्रहर हर छिन्धि भिन्धीत्यायुधकाष्ठाश्मपाणयो बालाः । निगदन्तः प्रहरन्ते तत्रापि भयं भवत्याशु ॥ अङ्गारगैरिकाद्यैर्विकृतप्रेताभिलेखनं यस्मिन् । नायकचित्रितमथवा क्षयं क्षयं याति न चिरेण ॥ लूतापटाद्यावरणं न सन्ध्ययोः पूजितं कलहयुक्तम् । नित्योच्छिष्टस्त्रीकं च यद्गृहं तत्क्षयं याति ॥ हृष्टेषु यातुधानेषु निर्दिशेज्जनकमाशु मरणमृतम् ॥ इति शक्रध्वजेन्द्रकीलादि वैकृतम् ॥

नरपतिदेशविनाशे केतोरुदयेऽथवा गृहेऽर्केन्दोः । उत्पातानां प्रभवः स्वर्तुभवाश्चाप्यदोषाय ॥ ये च न दोषान् जनयन्त्युत्पातास्तानृतुस्वभावकृतान् । ऋषिपुत्रकृतैः श्लोकैर्विद्यादेतैः समासोक्तैः ॥ वज्राशनिमहीकम्पसन्ध्यानिर्घातनिस्वनाः । परिवेषरजोधूमरक्तार्कास्तमनोदयाः ॥ द्रुमेभ्योऽन्नरसस्नेहबहुपुष्पफलोद्गमाः । गोपक्षिमदवृद्धिश्च शिवाय मधुमाधवे ॥ ताराोल्कापातकलुषं कपिलार्केन्दुमण्डलम् । अनग्निज्वलनस्फोटधूमरेण्वनिलाहतम् ॥

[illegible] मत्वं ततः [illegible]नम् । मरितो चाम्बुसं- [illegible] शुभं वदेत् ॥ [illegible]धर्वेपविपिस्तुप्फविपे- [illegible] । [illegible] रमन्नं दर्शं [illegible]॥ मपेनस्तृदपानानां [illegible] । मार्गं [illegible]दानो घरांशु न भयावहम् ॥ [illegible]दर्शनम् । नक्षत्राणां ग्रहाणां च [illegible] च [illegible] ॥ [illegible]निर्घोषा घनगर्जनमानुषु । म- [illegible] स्मृतः ॥ [illegible] न- [illegible] । [illegible]दर्शने यागमानुषी ॥ [illegible] । [illegible] सूर्योदयास्ती च [illegible] विरूपाद्भुतदर्शनम् । [illegible] ॥ [illegible] च विकाराः [illegible] । [illegible] । अतोऽन्यत्र [illegible] । [illegible] च या गाथाः [illegible] च [illegible] । [illegible] ॥ [illegible] । [illegible] (४१ [illegible]) [illegible] च । [illegible] समागमे [illegible] । [illegible] च [illegible] । [illegible] ॥ [illegible]

[illegible]

यीष्याम । [illegible] सौम्यैरपुनोर्विप्रयुक्तो [illegible] चन्द्रः ॥ [illegible] च [illegible] दक्षिणेन न [illegible]दितहन्त्यपात् यद्गुरक्त [illegible] । परिघ इति मेघरेखा या तिर्यग्नास्करोदयेऽस्ते वा । [illegible] प्रतिसूर्यो [illegible]ज्यरिन्द्रचापनिभः ॥ उदयेऽस्ते [illegible] दीर्घा [illegible] । [illegible], [illegible] दीर्घम् ॥ [illegible] तेजःपरिहानिसुखाक्रान्तारक्तोदयं [illegible] । [illegible] विद्धैरेतैः शुभाशुभं वाच्यम् । [illegible] सर्व [illegible] ॥ [illegible] परिघो [illegible] विमलं [illegible] स्निग्धा दीधितयः [illegible] । [illegible] वा यदा, [illegible] समये मेघो महाभ्रादयेत ॥ [illegible] विद्वैर्विधः । यस्मिन् देशे [illegible] वाहिनी समुत्पन्नि [illegible] । [illegible] महान्, [illegible] ॥ [illegible] यदि वास्तमये, [illegible] । [illegible] तदा [illegible], [illegible] ॥ [illegible] पुरा, [illegible] च । [illegible] धत्ते [illegible] वा ॥ [illegible] स्मिन् सर्वं [illegible] पुनरुक्तवर्जम् । [illegible] । [illegible] । [illegible] दिनानि [illegible] । [illegible] ॥ [illegible] स्थां० । धा०व० ।

[illegible]-पुं० [illegible] । [illegible] । प्राकृताने, [illegible] १ [illegible] १ [illegible] ।

[illegible] ।

प्रयोग[illegible] स्या–[illegible] द्विविधस्तथाः ।

[illegible] निषमान्समुदायशा[illegible] । १७ ॥

[illegible] । [illegible] । १ । [illegible] । २ । [illegible] । [illegible] । [illegible] च [illegible] ।

[illegible], [illegible] च [illegible] ।

[illegible] । २३ ॥

[illegible]

[illegible] ।

[illegible] ॥ [illegible] ॥

स्वाभाविकश्च द्विविध उत्पादः । एकः समुदयकृतः प्राक्प्रतिपादितावयवारब्धो घटादिवत् । अपरश्चैकत्विकोऽनुत्पादितामूर्तिमद्द्रव्यावयवारब्ध आकाशादिवत् । आकाशादीनां च यथावगाहो घटादिद्रव्यनिमित्तोऽवगाहनादिक्रियोत्पादो नियमादनेकान्तो भवेत् । स्यगाहकजन्तूत्पादद्रव्यसन्निधानतोऽस्थिरधर्माधर्माद्यवगाहनगतिस्थितिक्रियोत्पत्तिनिमित्तभावोत्पत्तिरित्यभिप्रायः ॥ सम्म० ॥ (आगासशब्दे तत्प्रदेशिकता दर्शिता)

अथोत्पादस्य द्वितीयभेदं कथयन्नाह ॥

विश्रसा हि विना यत्नं, जायते द्विविधः स च ।

तत्राद्येऽचेतनस्कन्ध–जन्यः समुदयोऽभ्रिपः ॥ २० ॥

सचित्तमिश्रजश्चान्यः, स्याद्देकत्वप्रकारकः ।

शरीराणां च वर्णादि, सुनिर्धारो जवन्यतः ॥ २१ ॥

विश्रसाख्यो द्वितीय उत्पादः । विश्रसाशब्दस्य कोऽर्थः सहजं विना यत्नमुत्पद्यते यः स विश्रसोत्पादः । सोऽपि पुनर्द्विविधो द्विप्रकारः । एकस्तत्र समुदयजनितः द्वितीय एकत्विकः । उक्तं च " साहाविओ वि समुदय कओ व्व एगत्तिओ व्व होज्जाहि " तत्रापि तयोर्द्वयोर्मध्य आद्यः समुदयजनितो विश्रसोत्पादः अचेतनस्कन्धजन्यः समुदयः कथितः । अभ्रादीनां समुदयपुद्गलानां यथोत्पादः ॥ २० ॥ तथा पुनर्द्वितीयः सचित्तमिश्रजः शरीरवर्णादिकानां निर्धारो ज्ञेयः । सचित्ताः पुद्गला वर्णादीनां तथा तथाकारयोग्यादिपुद्गलानां परिणत्या परिणतानामेकत्वप्रकारकएकताकारेण परिणताः । अनेकेषां वर्णादीनां संगतानां परस्परमुत्पादकत्या विश्रसी भूतानामवयवानामवयविधर्मत्वेन देहदृश्याकारभूतानामणूनां शरीरादि सुनिर्धारो भवति । देहादिपिण्डानां (सु) धर्निर्धारेण निर्धारो वपुरूपावस्थत्वं भण्यते । तथाच प्रज्ञापनायां स्थानाङ्गे च " तिविहा पुग्गला पन्नत्ता तंजहा पओगपरिणता १, मीससा परिणता २, वीससा परिणता ३," तत्र च प्रथम प्रयोगपरिणताः पुद्गला ये भवन्ति ते जीवप्रयोगेण संयुक्ताः शरीरादयः सचित्ताः १ तथा मिश्रपरिणताश्च ते ये जीवेन पुद्गला मुक्ताः कलेवरादयः २ पुनश्च विश्रसा परिणताः स्वभावेन परिणताः यथाभ्रेन्द्रधनुरादयः ३ एवं च सम्यग् विश्रसाख्यस्य भेदस्य स्वभावजनितस्य द्वैविध्यं प्रदर्शितम् । अचेतनस्कन्धजन्यसमुदायाख्यः प्रथमस्तत्र सचित्तमिश्रजन्यैकत्वप्रकारकशरीरादिवर्णादिसुनिर्धारसंज्ञो द्वितीयः । अत्रायं विशेषः स्वाभाविके परिणमनेऽचित्तपुद्गलेरेवायत्नसाध्यव्यवहार उपदिष्टः । इह तु द्वयमपि ॥ २१ ॥

पुनर्भेदं दर्शयन्नाह ॥

यत्संयोगं विनैकत्वं, तद्द्रव्यांशेन सिद्धता ॥

यथास्कन्धविभागाणोः, सिद्धस्यावरणक्षये ॥ २२ ॥

स्कन्धहेतुं विना योगः, परयोगेण चोद्भवः ॥

क्षणे क्षणे च पर्याया–स्तदेकत्वमुच्यते ॥ २३ ॥

उत्पादो ननु धर्मादेः, परप्रत्ययतो भवेत् ॥

निजप्रत्ययतो वापि, ज्ञात्वान्तर्नय योजनाम् ॥ २४ ॥

नाशोऽपि द्विविधो ज्ञेयो रूपान्तरविगोचरः ॥

संयोगं विना विश्रसोत्पादो यद्द्रव्यस्तदेकत्वं ज्ञेयम् । तदेवैकत्वं द्रव्यांशेन द्रव्यविभागेन सिद्धता नाम उत्पन्नत्वं ज्ञेयम् । यथा द्विप्रदेशादिस्कन्धविभागेनाणोः परमाणोर्द्रव्यस्योत्पादः । तथा [illegible] सिद्धस्य [illegible]

[illegible]

दयः कथयन्ति । तेषां मते एकतन्त्वादिविभागेन खण्डपटोत्पत्तिः कथं जायतेति प्रतिबन्धककालभावस्यावस्थितावयवसंयोगस्य हेतुताकल्पने महागौरवात् । तस्मात् कुत्रचित्संयोगात् कुत्रचिद्विभागाद्द्रव्योत्पादकता मन्तव्या । तदा विभागजपरमाणूत्पादोऽप्ययत्नतः सिद्धः स्यात् संमतिशास्त्रे इत्थं सूचितमस्ति । तदुक्तम् । " दव्वंतरसंजोआहि, केवि दवियस्स विंति उप्पायं । उप्पायं या कुसला, विभागजाइं न इच्छंति ॥ १ ॥ अणुमत्तपाहि आरद्ध-दव्वे तिअणुअंति निद्देसो । तत्तो अ पुण विभत्ते, अणुत्ति जाओ अणू होइ ॥ २ ॥ आभ्यां गाथाभ्यां भावार्थोऽवधार्यः । यथा परमाणोरुत्पादः एकत्वजन्यस्तथा येन संयोगेन स्कन्धो न निष्पद्यते एतादृशो धर्मास्तिकायादीनां जीवपुद्गलयोस्संयोगस्तद्द्वारा यश्च संयुक्तद्रव्योत्पादोऽसंयुक्तावस्थाविनाशपूर्वकः तथा ऋजुसूत्रनयाभिमतो यश्च क्षणिकपर्यायः प्रथमद्वितीयसमयादिव्यवहारहेतुस्तद्द्वारा यश्चोत्पादश्च तत्सर्वमेकत्वं ज्ञेयम् ॥ २२ ॥ अत्र न किंचिद्विवादस्तत्र श्लोकमाह । स्कन्धहेतुं विना यः संयोगपरयोगेन धर्मास्तिकायादीनां यश्चोत्पादः तथाच क्षणिकपर्याये प्रथमद्वितीयादिद्रव्यव्यवहारहेतवस्तद्द्वारा य उत्पादः तत्सर्वमेकत्वं कथ्यते तत्र न कोऽपि विसंवाद इति ॥२३॥ पुनर्भेदं कथयन्नाह (उत्पादेति) ननु धर्मादेरुत्पादः परप्रत्ययो भवेत् अपि पुनर्निजप्रत्ययाद्भवेदन्तर्नययोजनां ज्ञात्वा इति । भावार्थस्त्वयम् धर्मास्तिकायादीनामुत्पादो नियमेन परप्रत्यय-स्तोपपन्नश्च गत्यादिपरिणतजीवपुद्गलादिनिमित्त उक्तः । स उभयजनितस्स चैकजनितोऽपि भवेत् । ततस्तस्य निजप्रत्ययतापि कथयितुं युक्ता निश्चयव्यवहारावधारणात् । अयमर्थः । " आगासाईयाणं, तिण्हं परपच्चओ नियमा " इति सम्मतिगाथायामकारप्रश्लेषतया वचनान्तरेण कृतोऽस्ति वृत्तिकारेण तमर्थमनुस्मृत्येहापि लिखितोऽस्ति तस्माद्धर्मास्तिकायादीनामुत्पादो नियमात्परप्रत्यय एव । सोऽपि स्वोपपन्नश्च गत्यादिपरिणतजीवपुद्गलादिनिमित्तः उभयजनितोऽप्येकजनितोऽपि स्यात् । तस्य च निजप्रत्ययताप्यन्तर्नयवादेनोक्तास्ति भावना चेत्थं ज्ञेया ॥ द्र० ९ अध्या० ॥ "उप्पादलक्खणं अ-ण्णि तव्ववहारितं अणण्णियववहारियंति या विस्सिसा द्विहंति या पगट्ठा तव्विवरीतमितरं । तत्थ अण्णि तंजहा पढमसमयसिद्धे सिद्धत्तेण उप्पन्नो अणण्णितो जीजणमोयणउप्पत्ता आ० चू० १ अ० । विशे० । श्रीन्द्रियजीवभेदे च । प्रज्ञा० १ प० । ओत्पात–न० उत्पाते भवमौत्पातम् । पांशुवृष्टयादौ, आ० म० । कांपहसितादौ, सूत्र० २ श्रु० २ अ० ।

उप्पायग–उत्पातक–त्रि० उत्पातयति उत्पातं जनयति–उद्-पत्-णिच्-ण्वुल् उत्पातजनके, ऊर्ध्वपतनशीले च । वाच० ।

उत्पादक–त्रि० उद्–पद्–ण्वुल् उत्पादनकर्त्तरि, स्त्रियां टापि अत इत्वम् । उत्पादिका उत्पादकस्त्रियाम हिलमोचिकायां शब्दा त्रि० पूतिकायाम्, देहिकानामकीटे च स्त्री० । पितरि, पुं० ऊर्ध्वं स्थिताः पादा यस्य कप् । अष्टापदे शरभाख्ये गजघातिनि पशुभेदे, तस्य पृष्ठस्थचतुश्चरणत्वात् ऊर्ध्वपादत्वम् । वाच० । श्रीन्द्रियजीवभेदे च । ये भूमिं भित्त्वा समुत्तिष्ठन्ति द्वीपाः "पाणमौयइकंभूउप्पायगदीहगोम्मि सिसुणागो" व्य० प्र० ८ उ० । नि० चू० १ । प्रज्ञा० १ ।

उप्पायच्छेयण–उत्पादच्छेदन–न० उत्पादो देवत्वादिपर्यायान्तरस्य तेन [illegible] द्रव्यवियोगः उत्पादच्छेदनम् । छेदनभेदे, स्था० ३ ।

उप्पायण–उत्पादन–न० उद्-पद्-णिच्-ल्युट्-जनने,उत्पत्तिकरणे-वाच० । " मचाणुचाएण परिग्गहेण, उप्पायणे रक्खणसंनिओगे " उत्पादने एते विषयादिपदार्थाः कथं मिलिष्यन्तीति चिन्तने, उत्त० ३४ अ० ।

उप्पायणंतरिय–उत्पादनान्तर्य–न० उत्पादनस्याविरहे, यथा निरयगतौ जीवानामुत्कर्षतोऽसंख्येयाः समयाः स्था० ४ ठा० ।

उप्पायणा–उत्पादना–स्त्री० उत्पादनमुत्पादना । मूलतः शुद्धस्य पिण्डस्य धात्रीत्वादिभिः प्रकारैरुपार्जने, प्रव० ६७ द्वा० । पिं० । आव० । तस्या निक्षेपो यथा—

नामं ठवणा दविए, भावे उप्पायणा मुणेयव्वा ।
दव्वम्मि होइ तिविहा, भावम्मि उ सोलसपया ॥

उत्पादना चतुर्धा तद्यथा (नामंति) नामोत्पादना स्थापनोत्पादना द्रव्ये द्रव्यस्योत्पादना भावे भावस्योत्पादना च । तत्र नामस्थापने क्षुण्णे द्रव्योत्पादना च यावन्नो आगमतो भव्यशरीरद्रव्योत्पादना प्रागुक्तगवेषणादिरिव भावनीया । ज्ञशरीरभव्यशरीरव्यतिरिक्ता तु द्रव्योत्पादना त्रिधा सचित्तद्रव्योत्पादना अचित्तद्रव्योत्पादना मिश्रद्रव्योत्पादना च । भावोत्पादना द्विधा तद्यथा आगमतो नोआगमतश्च । तत्र आगमत उत्पादना शब्दार्थज्ञस्तत्रोपयुक्तः नोआगमतो भावोत्पादना तु द्विधा तद्यथा प्रशस्ता अप्रशस्ता च । तत्र प्रशस्ता ज्ञानाद्युत्पादना अप्रशस्ता षोडशपदा वक्ष्यमाणधात्रीदूत्यादिषोडशभेदा ।

तत्र प्रथमतः सचित्तद्रव्योत्पादनां विभावयिषुराह ॥

आसूयमाइएहिं वालवयविगुरंगवीयमाईहिं ।
सुयअस्साहृमाईणं, उप्पायणया उ सचित्ता ॥

पर्यायज्ञानरहिताः सप्त भवन्तीति न शेषा मिथ्यात्वघातिकर्मक्षयानाभावात् । केवलद्विकं केवलज्ञानकेवलदर्शनलक्षणोपयोगद्वयरूपम् । अतएव द्विके सयोगिकेवलिलक्षणचरमगुणस्थानकद्वये भवति न शेषा ज्ञानदर्शनलक्षणास्तदुच्छेदेनैव केवलज्ञानकेवलदर्शनोत्पत्तेः " नट्ठम्मिय छउमत्थिए नाणे " इति वचनात् तदेवमभिहिता गुणस्थानकेषूपयोगाः ॥ कर्म०

अचक्खुचक्खुदंसण-मन्नाणतिगं च मिच्छसासाणे ।
विरयाविरएसम्मे, नाणातिगं दंसणतिगं च ।

अचक्षुर्दर्शनचक्षुर्दर्शनम् अज्ञानत्रिकं च मत्यज्ञानश्रुताज्ञानविभङ्गलक्षणम् । चः समुच्चये मिथ्यादृष्टौ सास्वादने चोपयोगा भवन्ति । यत्तु अवधिदर्शनं तत्कुतश्चिदभिप्रायाद्विशिष्टाः श्रुतविदो नेच्छन्ति तन्न सम्यगवगच्छामः । अथ च सूत्रे मिथ्यादृष्ट्यादीनामवधिदर्शनं प्रतिपाद्यते यतउक्तं प्रज्ञप्तौ "ओहिदंसणअणगारोवउत्ताणं भंते किं नाणी अन्नाणी गोयमा नाणी वि अन्नाणी वि । जइ नाणी ते अत्थेगइया तिनाणी अत्थेगइया चउनाणी जे तिनाणी ते आभिणिबोहियनाणी सुयनाणी ओहिनाणी जे चउनाणी ते आभिणिबोहियनाणी सुयनाणी ओहिनाणी मणपज्जवनाणी । जे अन्नाणी ते नियमा मइअन्नाणी सुयअन्नाणी विभंगनाणी इति" ॥ अत्र हि ये अज्ञानिनस्ते मिथ्यादृष्टीनामप्यवधिदर्शनं साक्षादत्र सूत्रे प्रतिपादितम् यदा त्ववधिज्ञानी सास्वादनभावं मिश्रभावं वा गच्छति तदा तत्राप्यवधिदर्शनं प्राप्यते इति । तथा विरताविरते देशविरते (सम्मेत्ति) अविरतसम्यग्दृष्टौ मतिश्रुतावधिलक्षणज्ञानत्रिकं चक्षुरचक्षुरवधिदर्शनत्रिकमिति षट् उपयोगा भवन्ति ।

मिस्सम्मि य वामिस्सं, मणनाणजयं पमत्तपुव्वाणं ।
केवलियनाणदंसण, उवओगअजोगिजोगीसु ॥

मिश्रे सम्यग्मिथ्यादृष्टौ तदेव ज्ञानत्रिकं दर्शनत्रिकं चानन्तरोक्तमज्ञानव्यामिश्रं द्रष्टव्यम् । मतिज्ञानं मत्यज्ञानमिश्रमित्यादि केवलं कदाचित्सम्यक्त्वबाहुल्यतो ज्ञानबाहुल्यं कदाचिच्च मिथ्यात्वबाहुल्यतोऽज्ञानबाहुल्यं समतायां तु सम्यक्त्वमिथ्यात्वयोरुभयोरपि समतेति तथा तदेव पूर्वोक्तमुपयोगषट्कं मनःपर्यायज्ञानयुतम् । प्रमत्तः पूर्वो येषां ते प्रमत्तपूर्वास्तेषां प्रमत्तपूर्वकरणानिवृत्तिबादरसूक्ष्मसंपरायोपशान्तमोहक्षीणमोहानामवसेयम् । तथा केवलज्ञानकेवलदर्शनलक्षणौ द्वावुपयोगौ सयोग्ययोगिकेवलिषु द्रष्टव्यौ न शेषाः "केवलड्डुगे न सेसा" इति वचनात् ॥ पं०सं०१ । द्वा० ।

([illegible] मार्गणास्थानाल्पबहुत्वं संज्ञिमार्गणादि शब्देषु ।) अवधाने, आव० ६ अ० । यत्सन्निधानादात्मा द्रव्येन्द्रियनिर्वृत्तिं प्रति व्याप्रियते तन्निमित्तमात्मनो मनः [illegible] प्रति व्यापाररूपे, आचा० १ श्रु० ३ अ० १ उ० स्वस्वविषये लब्ध्यनुसारेणात्मनः परिच्छेदव्यापारस्वरूपे वा भावेन्द्रियभेदे, । प्रज्ञा० १ प्रति० । आ० म० द्वि० । " [illegible] उवओगो " । यः श्रोत्रादीन्द्रियस्य स्वविषये शब्दादौ परिच्छेदव्यापारः स उपयोगः उपयोजनमुपयोगः । [illegible] विशे० । "उवओगदिट्ठसारा [illegible]" नं० । आ० चू० । आ० म० द्वि० । [illegible], महा० ७ अ० । उपयोगकरणे प्रायश्चित्तम् । "[illegible] [illegible] पुव्वहं गुरूणं [illegible] [illegible] । [illegible] [illegible] । [illegible],
[illegible]

उवओगकरावणिया-उपयोगकारणिका- स्त्री० उपयोगकरणविधौ, सा चैवम् ॥

पडिलेहिअ सुपमज्जिअ, तत्तो पत्ताणि पडलगुत्ताणि ।
उग्गाहिय गुरुपुरओ, उवओगं कुणइ उवउत्तो ॥ १ ॥
संपइ सामायारी, दीसइ एसा य मागमपयम्मि ।
जं किज्जइ उवओगो, बालाइअणुग्गहट्ठाए ॥ ३ ॥

पञ्चवस्तुकेऽपि " काउस्समाइओगं, काउं [illegible] [illegible] च संजयंतो, गुरुपुरओ अवि तु उवउत्तो ॥१॥ उपयोगविधिस्त्वेवं तत्रैवम् ।

संदिसह भणंति गुरुं, उवओगं करेमु तं भणइ ।
उवओगकरावणियं, करेमु उस्सग्गमिच्छाइ ॥ १ ॥

संदिशतेति गुरुं भणंति किमित्याह (उवओगं करेमि) [illegible] इच्छाकारेण संदिसह भगवन् ! उपयोगं करेमि" इति [illegible] तत उपयोगकारावणियं करेमि कायोत्सर्गं अन्नत्थ इत्यादि [illegible]

अह कड्ढिऊण सुत्तं, अक्खलिआइगुणसंजुत्तं गच्छा ।
चिंहिति काउसग्गे, चिंतिति अत्थमंगलयं ॥ १ ॥

सुगमा । परं (मंगलंति) पञ्चमङ्गलनमस्कारं कायोत्सर्गे चिन्तयन्ति अत्र पक्षद्वयमाह ।

तप्पुव्वयं जपत्थं, अन्ने उ भणंति धम्मजोगिणं ।
गुरुबालवुड्ढसेहखग, रेसिम्मिण अप्पणो चेव ॥ ३ ॥

तत्पूर्वकं नमस्कारपूर्वकं पदार्थं तत्र चिन्तयन्ति [illegible] लोचितस्य ग्रहणप्रतिषेधात् तस्माद्यावदालोचितं हृदि [illegible] न किंचिद्ग्राह्यम् । अन्ये आचार्या इत्थं भणन्ति धर्मयोगिनं चिन्तयन्तीति । किंविशिष्टं गुरुबालवृद्धशैक्षस्य पदार्थं [illegible] त्मार्थम् । ३ । ततः किमित्याह-

चिंतेतु तओ पच्छा, मंगलपुव्वं भणंति विणयपणया ।
संदिसहत्ति गुरू वि अ, लाभोत्ति भणंति उवउत्तो ॥

चिन्तयित्वा पश्चात् (मंगलपुव्वियंति) "नमो अरिहंताणं" इति " भणनपूर्वं विनयनता भणन्ति किमित्याह (संदिसहंति) सूरिरनुजानातीत्यर्थः । गुरुरपि भणति (लाभोत्ति) कालोचितानुकूलानपायित्वात् उपयुक्तो निमित्ते [illegible] ॥ ४ ॥ ततः किमित्याह-

कहपेच्छमोत्ति पच्छा, सविसेसणया भणंति ते सव्वे ।
आह गुरूवि तहत्ति, जह गहिहं पुव्वसाहूहिं ॥ ५ ॥

ततः कथं गृहीष्याम एवं पश्चात् सविशेषनता [illegible] सम्यग् भणन्ति ततो गुरुरप्याह यथा गृहीतं पूर्वसाधुभिः [illegible] त्यनेन गुरोरस्माधुप्रायोग्येन भणनप्रतिषेधमाह-

आवस्सियाए जस्स य, जोगुत्ति भणितु ते उ [illegible]
णिक्कारणेण कप्पइ, साहूणं वसहिणिग्गमणं ॥

[illegible] [illegible] ([illegible]
[illegible] स्यार्थस्तत्र [illegible]
[illegible] संबन्धी [illegible]
प्यति तं ग्रहीष्यामीत्यर्थः [illegible] ते साधूनां वसतिनिर्गमनं तत्र दोषसम्भवादिति । [illegible] दत्सम्याऽकारणे च दोषो यदुक्तमोघनिर्युक्तौ ॥

जस्स य जोगमकाऊण, निग्गओ न [illegible] ।
नयरमयरायमाई, तेणं गहणं कुणसु सद्दा ॥

यस्य योगमित्येवमकृत्वाऽभणित्वा निर्गतेः सन्न लभते नाभाव्यतया प्राप्नोति सचित्तं प्रव्रज्यार्थमुपस्थितं गृहस्थं नाप्यचित्तं वस्त्रपात्रादि। अथ यदि गृह्णाति ततः स्तैन्यं भवति। तस्मात्कुरु अस्य योगमिति। एवं चोपयोगकरणे चत्वारि स्थानानि तदुक्तम् "आपुच्छणाति पढमा, विइया पडिपुच्छणा य नायव्वा। आवस्सिया य तइया, जस्स य जोगो चउत्थो उ" ध० ३ अधि०।

उवओगगुण-उपयोगगुण-पुं० उपयोगः साकारानाकारभेदं चैतन्यं गुणो धर्मो यस्य स तथा। चैतन्यधर्मके जीवे, "जीवे भावए गुणओ उवओगगुणे" स्था० ५ ठा०। भ०।

उवओगजुय-उपयोगयुत-त्रि० भवहितमनसि, "तं पुण संविग्गेणं उवओगजुएण तिव्वसद्धाए" पञ्चा० ५ विव०।

उवओगट्ठया-उपयोगार्थता-स्त्री० विविधविषयानुपयोगाश्रयणे, "उवओगट्ठयाए अणेगभूयभावभविए वि भवइ" विविधविषयानुपयोगानाश्रित्यानेकभूतभावभविकोऽपि अतीतानागतयोर्हि कालयोरनेकविषयबोधनात्मनः कथञ्चिदनित्यानां भूतत्वात्स्थानित्यपक्षोऽपि न दोषायेति। भ० १८ श० १० उ०।

उवओगद्धिमारा-उपयोगदृष्टसारा-स्त्री० उपयोजनमुपयोगो विवक्षितकर्मणि मनसोऽभिनिवेशः सारस्तस्यैव विवक्षितकर्मणः परमार्थः उपयोगेन दृष्टः सारो यया सा उपयोगदृष्टसारा। अभिनिवेशोपलब्धकर्मपरमार्थायां बुद्धौ," उवओगदिट्ठसारा, कम्मपसंगपरिघोलणविसाला" न०॥

उवओगपरिणाम-उपयोगपरिणाम-पुं० उपयोग एव परिणाम उपयोगपरिणामः जीवपरिणामभेदे, प्रज्ञा० १३ पद। स च साकारानाकारभेदाद् द्विधा, स्था० १० ठा०।

उवओगवक्क-उपयोगवाक्य-न० आनन्दस्य भगवन्तं प्रति वाक्यभेदे, । दर्श०।

उवओगवीरिय-उपयोगवीर्य-आध्यात्मिकवीर्यभेदे, उपयोगवीर्यं साकारानाकारभेदात् द्विविधम्। तत्र साकारोपयोगोऽष्टधा अनाकारश्चतुर्धा तेन चोपयुक्तः स्वविषयस्य द्रव्यक्षेत्रकालभावरूपस्य परिच्छेदं विधत्त इति। सूत्र० १ श्रु० ८ अ०।

उवओगाता-स्त्री० उपयोगात्मन्-पुं० उपयोगः साकारानाकारभेदस्तत्प्रधानः आत्मा उपयोगात्मा। सर्वजीवानां सिद्धसंसारिस्वरूपे विवक्षितवस्तूपयोगविशिष्टे वा आत्मभेदे, भ० ॥ १२ श० १० उ० ॥

उवंग-उपाङ्ग-न० उपमितमङ्गेन। अङ्गावयवभूतेऽङ्गुल्यादौ, प्रज्ञा० २३ पद ॥ कर्म० । धा० म० द्वि०। विशे०। कर्णादिषु, च। उपाङ्गानि कर्णौ नासे अक्षिणी जङ्घे हस्तौ पादौ च। उत्त० ३ अ०। आचा० ॥ "होंति उवंगा कण्णा णासऽच्छी जंघ हत्था पाया य कण्णा णासिगा अच्छि जंघ पादा य पयमादी सव्वे उवंगा भवंति ॥ नि० चू० १ उ० ॥ कर्म०। अङ्गार्थविस्ताररूपे, ॥ कल्प० ॥ शिक्षाद्यङ्गोक्तप्रपञ्चपरे प्रबन्धे, ज्ञा० ५ अ०। नि०। "सगोवंगाणं सरहस्साणं चउण्हं वेयाणं" औ० ॥ लोकोत्तरिकाचाराद्यङ्गद्वादशप्रपञ्चरूपे श्रुते, तानि च द्वादश तथाहि यथाङ्गानि द्वादश उपाङ्गान्यपि अङ्गैकदेशरूपाणि प्रायः प्रत्यङ्गमेकैकभावात् प्रायस्त्येव। तत्राङ्गानि आचाराङ्गादीनि प्रतीतानि। तेषामुपाङ्गानि क्रमेणामूनि आचाराङ्गस्यौपपातिकम् ॥ १ ॥ सूत्रकृदङ्गस्य राजप्रश्नीयम् ॥ २ ॥ स्थानाङ्गस्य जीवाभिगमः ॥ ३ ॥ समवायाङ्गस्य प्रज्ञापना ॥ ४ ॥ भगवत्याः सूर्यप्रज्ञप्तिः ॥ ५ ॥ ज्ञाताधर्मकथाङ्गस्य जम्बूद्वीपप्रज्ञप्तिः ॥ ६ ॥ उपासकदशाङ्गस्य चन्द्रप्रज्ञप्तिः ॥ ७ ॥ अन्तकृद्दशाङ्गादीनां दृष्टिवादपर्यन्तानां पञ्चानामप्यङ्गानां निरयावलिका। श्रुतस्कन्धगतकल्पिकादि पञ्चवर्गाः पञ्चोपाङ्गानि तथाहि अन्तकृद्दशाङ्गस्य कल्पिका ॥ ८ ॥ अनुत्तरोपपातिकदशाङ्गस्य कल्पावतंसिका ९ प्रश्नव्याकरणस्य पुष्पिता ॥ १० ॥ विपाकश्रुतस्य पुष्पचूलिका ॥ ११ ॥ दृष्टिवादस्य वृष्णिदशा ॥ १२ ॥ इति। जं० १ वक्ष० ॥ उपाङ्गानि केन कृतानीत्यत्र प्रश्नोत्तरे सर्वोपाङ्गानि किं गणधररचितानि अन्यथा वा तदाङ्गप्रणयनकालेऽन्यदा वा तन्निर्माणमिति। सर्वोपाङ्गानि स्थविराः कुर्वन्ति तीर्थंकरे विद्यमानेऽविद्यमाने वाऽङ्गप्रणयनकाले एवं तेषां निर्माणमिति नैकान्त इति नन्दीसूत्रवृत्तौ व्यक्तोक्तमस्ति तेन विशेषतस्ततोऽवसेयमिति ही०। (अङ्गपविट्ठशब्दे तथा दर्शितम्) उपाङ्गेषु केन किं विवृतम् उपाङ्गानां च मध्ये प्रथममुपाङ्गं श्रीअभयदेवसूरिभिर्विवृतम्। राजप्रश्नीयादीनि षट् श्रीमलयगिरिपादैर्विवृतानि पञ्चोपाङ्गमयी निरयावलिका च श्रीचन्द्रसूरिभिर्विवृता तत्र प्रस्तुतोपाङ्गस्य वृत्तिः श्रीमलयगिरिकृताऽपि संप्रति कालदोषेण व्यवच्छिन्ना इदं च गम्भीरार्थतया अतिगहनं तेनानुयोगरहितं मुद्रितराजकीयकमनीयकोशगृहमिव न तदर्थार्थिनां हस्तानुयोगार्थितसिद्धिकं संजायत इति कल्पितार्थकदानकल्पद्रुमाणां युगप्रधानसमानम्। संप्रति विजयमानगच्छनायकपरमगुरुश्रीहरिविजयसूरीश्वरनिर्देशेन कोशाध्यक्षाज्ञया प्रवेशेणैवान्तुदुणमिव मया तदनुयोगः प्रारभ्यते ॥ जं० १ वक्ष०। ठा०। तिलके, पुं० वाच०।

उवंगतिग-उपाङ्गत्रिक-न० औदारिकवैक्रियाहारकाङ्गोपाङ्गरूपे त्रये, कर्म० ॥

उवंजण-उपाञ्जन-न० उप अञ्ज ल्युट्, लेपने, गोमयादिनानुलेपने, संमार्जनोपार्जनेन संकेतोल्लेखने, च। वाच० ॥ अभ्यङ्गे, "अक्खोवंजण वणाणुलेवणभूयं" सूत्र० २ श्रु० १ अ०। आधारे ल्युट्। अञ्जनाधारे, हस्त्यादौ च। वाच० ॥

उवंसुजव-उपांशुजप-पुं० परैरश्रूयमाणेऽन्तःसंजल्पनरूपे जपभेदे, ध० ४ अधि० ॥

उवकप्प-उपकल्प-पुं० उपगतः कल्पम्। मत्या० स० कर्मोपगते, प्रके शते, न०। उप सामीप्ये कल्पन्य कल्पने इति उपकल्पः। आहारादिषु तेषामुपकारे वर्तनं इत्युपकल्पः। आहारादिना साधोरुपग्रहकरणे, । पं० चू० ॥

एत्तो पुच्छा महंतु. उवकप्पं उवग्गहे। उवकप्पनी वंनि. उवणाइत्त होंति एकट्ठा ॥ भत्तेण व पाणेण व, उवग्गहं तओ कुणति। उवकप्पति गुणधारी, उवकंपंतं वियाणाहि ॥ खुड्डिओ पिवासिओ वा, सीतजिजूतो व ण तरति। पडितं तस्स करेंति, उवग्गहप्पमंतं कुहुस वा एणे ॥ जो उप्पाए समाहि, चउव्विहं णाणदंसणचरित्ते। तत्तो य सत्तमाहि, तस्स सत्थाणिज्जए होइ ॥ भत्तेण व पाणेण व, उवग्गहेण व उवग्गहितदेहो। जं कुणति सो समाहि, तम्मा कारणं हवति दाता ॥ भत्तस्स व पाणस्स व, . . . उवग्गहकरस्स। जो कुणति अंतरायं, . . . ॥ एसुरकप्पो भणितो ॥ पं० भा० ॥

इयाणिं उवकप्पो तत्थ गाहा " भत्तेण व पाणेण य " उप सामीप्ये उपेत्य कल्पते इत्युपकल्पः आहारादिसु उपन्योपकारे वर्तते इत्युपकल्पः । साहुस्स उवग्गहं करेइ आहाराइणा-पर्दतस्स तदुस्सेव मूला मूलगुणउत्तरगुणधारी उवकप्पंतं वियाणाहि गाहा "भत्तेण य सो पुण भत्ताईहिं साहुस्स उवग्गहं कुणमाणो समाहि समुप्पायइ चउव्विहं पि नाणदंसिणतवच-रित्तसमाहिं सो पुण समाहिमुप्पायतो तासिं चेव नाणदंसिण-चरित्ततवसमाहीणं आवरणं हणइ कम्मं गाहा "भत्तस्स य पाणस्स य" जो पुण अंतरायं करेइ आहाराइणं साहुस्स दिज्जंताणं से तासिं चेव णाणदंसिणतवसमाहीणं अंतराए पवट्टइ सो णाणाइअंतराइयं बंधइ उवकप्पो ॥ पं० चू० ॥

उवकप्पंत–उपकल्पयत्– त्रि० निष्पादयति, "जेसिं तेहिं उवकप्पंति अन्नं पाणं तह त्ति" उपकल्पयन्ति निष्पादयन्ति सूत्र० १ श्रु० १२ अ० ॥

उवकय–उपकृत– त्रि० उप-कृ-क्त० । कृतोपकारे, यस्योपकारः कृतस्तस्मिन् वाच० । परैर्वर्तिते, "अणुवकयपराणुग्गहपरायणा" आव० ४ अ० ॥

उवकमंत–उपक्रमत्– त्रि० प्रजाति, "पन्नासमक्खितावेगे । नारीणं वसमुवकमंति " सूत्र० १ श्रु० ४ अ० ॥

उवकुल–उपकुल– न० कुलानां समीपमुपकुलम । तत्र वर्त्तन्ते यानि नक्षत्राणि तान्युपचारादुपकुलानीति व्युत्पत्तेः कुलसंज्ञकानां नक्षत्राणामधस्तनेषु नक्षत्रेषु, तानि द्वादश । श्रवणः पूर्वभाद्रपदा रेवती भरणी रोहिणी पुनर्वसु अश्लेषा पूर्वफाल्गुनी हस्तः स्वाती ज्येष्ठापूर्वाषाढाश्चेति । जं० ७ वक्ष० । चं० ॥ सू० प्र० (लक्षणस्य शब्दे सूत्रतः स्पष्टीभविष्यति)

उवकेसपुर–उपकेशपुर– न० स्वनामख्याते तीर्थभेदे, यत्र वीरभगवत्प्रतिमा ॥ ती० ॥

उवकोसा–उपकोशा– स्त्री० पाटलिपुत्रवासिन्याः कोशागणिकायाः कनिष्ठभगिन्याम, "पाडलिपुत्ते नयरे दो गणियाओ कोसा उवकोसाओ । भा० म० द्वि० । कोसाए रूढरिकामगिणी उवकोसानाम समं वररुची वसति । आ० चू० ४ अ० । (थूलभद्दशब्दे कथानकम)

उवक्कम–उपक्रम–पुं० उपक्रमणमुपक्रमः उप-क्रम् घञ् वृद्ध्यभावः । उपाये, आचा० १ श्रु० ७ अ० ८ उ० । "मोच्चा भगवाणुसासणं सच्चे तत्थ करेज्जुवक्कमं " तदुपक्रमं तत्प्राप्त्युपायं कुर्यात् सूत्र० १ श्रु० २ अ० । उपायपूर्वके आरम्भे, तद्भेदाश्च यथा—

तिविहे उवक्कमे पण्णत्ते तं जहा धम्मिए उवक्कमे अहम्मिए उवक्कमे धम्मियाधम्मिए उवक्कमे ॥

उपक्रमणमुपक्रम उपायपूर्वक आरम्भो धर्मश्रुतचारित्रात्मके स स वा धर्मार्थमित्येवं धार्मिकश्रुतचारित्रार्थं आरम्भ इत्यर्थः [illegible] धार्मिकोऽधार्मिकः संयमार्थस्तथा धार्मिकश्चासौ देशतः [illegible] धार्मिकाधार्मिकं [illegible] इत्यर्थः । अथवा नामस्थापनाद्रव्यक्षेत्रकाल-[illegible] उपक्रमस्तत्र [illegible] इत्योपक्रम-[illegible] सचित्ताचित्तमिश्रद्रव्ये-[illegible] पुनः-[illegible] च । तत्र परिकर्मद्रव्य [illegible] गुणान्तरापादनं [illegible] तत्र [illegible] वस्तुविनाशस्तु [illegible] सूत्रादौ

शुक्लादिगुणापादनमिति । तत्र वस्तुविनाशे च पुरुषादीनां खड्गादिभिर्विनाश एवोपक्रम इति । एवमचित्तद्रव्योपक्रमः पद्मरागादिमणेः क्षारमृत्पुटपाकादिना वैद्यापादनं विनाशश्चेति । मिश्रद्रव्योपक्रमस्तु कटकादिविभूषितपुरुषादिद्रव्यस्यैवेति । तथा क्षेत्रस्य शालिक्षेत्रादेः परिकर्मविनाशो वा क्षेत्रोपक्रमस्तथा कालस्य चन्द्रोपरागादिद्वारेण परिकर्म उपायेन परिज्ञानं कालोपक्रमः । तथा भावस्य प्रशस्ताप्रशस्तरूपस्योपायतः परिज्ञानमेव भावोपक्रमः । स चाप्रशस्तो ब्राह्मणीगणिकामात्यदृष्टान्तादवसेयः । प्रशस्तस्तु श्रुतादिनिमित्तमाचार्यादिभावोपक्रम एवं धार्मिकस्य संयतस्य यथार्थमवश्यकाद्यनावाधामुपक्रम उक्तस्वरूप स धार्मिक एवोक्तः । तथा अधार्मिकस्याऽसंयतस्यासंयमार्थं यः सोऽधार्मिक एव । तथा धार्मिकाधार्मिकस्य देशविरतस्य यः स धार्मिकाधार्मिक इति ॥ अथ स्वाम्यन्तरभेदेनोपक्रममेव त्रिधाह–

अहवा तिविहे उवक्कमे पण्णत्ते तं जहा आयोवक्कमे परोवक्कमे तदुभयोवक्कमे एवं वेयावच्चे अणुग्गहे अणुसट्ठी उवालंभे एवमिक्किक्के तिन्नि २ आलावगा जहेव उवक्कमे ॥

तत्रात्मनोऽनुकूलोपसर्गादौ शीलरक्षणनिमित्तमुपक्रमो वैहायसादिना विनाशः परिकर्म वा आत्मार्थं वा उपक्रमोऽयमस्य स आत्मोपक्रम इति । तथा परस्य परार्थं चोपक्रमः परोपक्रम इति तदुभयस्य आत्मपरलक्षणस्य तदुभयार्थं चोपक्रमस्तदुभयोपक्रम इति । एवमिति । उपक्रमसूत्रवत् आत्मपरोभयभेदेन वैयावृत्त्यादयो वाच्याः । स्था० ३ ठा० । प्रथमतः सर्वद्रव्यविशेषे, अनु० । उपक्रम्यतेऽनेनेत्युपक्रमः । कर्मवेदनोपाये, भ० १ श० ४ उ० । उपक्रमणमुपक्रमः । कर्मणामनुदयप्राप्तानामुदयप्रापणे, सूत्र० १ श्रु० ३ अ० । उपक्रम्यते क्रियतेऽनेनेति उपक्रमः । कर्मणो बन्धसंक्रमणोदीरणोपशमनादिना परिणमनहेतौ जीवस्य शक्तिविशेषे, योऽन्यत्र करणमिति रूढः । तद्भेदा यथा–

चउव्विहे उवक्कमे पण्णत्ते तंजहा बंधणोवक्कमे उदीरणोवक्कमे उवसामणोवक्कमे विप्परिणामणोवक्कमे ॥

उपक्रमणं चोपक्रमो बन्धनादीनामारम्भः स्यादारम्भ उपक्रम इति वचनादिति तत्र बन्धने कर्मपुद्गलानां जीवप्रदेशानाञ्च परस्परं संबन्धनमिदञ्च सूत्रमात्रवल्लोहपिण्डवद्वा बन्धोपममवगन्तव्यं तस्योपक्रम उक्तार्थो बन्धनोपक्रम । इति सकलितावस्थस्य वा कर्मणो बद्धावस्थीकरणं संबन्धनं तदेवोपक्रमो वस्तुपरिकर्मरूपो बन्धनोपक्रमो वस्तुपरिकर्मवस्तुविनाशरूपस्याप्युपक्रमस्याभिहितत्वादिति । एवमन्यत्रापि । स्था० ४ ठा० २ उ० । (बन्धनोपक्रमादीनां व्याख्या स्वस्थाने) मरणे, बृ० ४ उ० । व्यापादे, दूरस्थस्य सतो वस्तुनस्तैस्तैः प्रकारैः समीपानयने, " उपक्रमणमुपक्रमनिरूपणकरक्रिया " उत्त० १ अ० । व्याचिख्यासितशास्त्रस्य समीपानयनलक्षणे चतुर्णामनुयोगद्वाराणां प्रथमे द्वारे, आव० १ श्रु० १ अ० ।

अथोपक्रमस्य निरुक्तिमाह–

सत्थस्सोवक्कमणं, उवक्कमो तेण तम्मि य तओ वा ।
सत्थसमीवीकरणं, आणयणं नासदेसम्मि ॥

उप सामीप्ये क्रमु पादविक्षेपे उपक्रमणं शास्त्रस्य [illegible] प्रतिपादनप्रकारैः समीपीकरणं न्यासदेशानयनं [illegible] योग्यताकरणमित्युपक्रमः । उपक्रम्यते शास्त्रम् [illegible] निक्षिप्यते भाष्यतेति भावः । उपक्रम्यते वा निक्षेपयोग्यं क्रियतेऽनेन गुरुवाग्योगेनेत्युपक्रमः । अथवा उपक्रम्यते [illegible]

पनादि करोति अथवा उपक्रम्यतेऽस्मादिनीतविनेयविनयादित्युपक्रमः विनेयविनयापितैः हि गुरूपक्रमस्य निःप्रत्यूहं शास्त्रं करोति नाज्ञानिमाय. । सदेवं करणाधिकरणापादानकारकेषूपक्रमयोगात्मकोऽयं विग्रहभेदतो भेदोक्तः । यदि तु विवक्षया सर्वेऽप्येते करणादिकारकैरपि ज्ञेयास्तथापि न दोषः । (शास्त्रसमीपीकरणमिति) शास्त्रस्य समीपीकरणं शास्त्रस्य न्यासदेशानयनं निक्षेपयोग्यताकरणमुपक्रम इति सर्वत्र संबध्यते इति ॥ विशे० १ द्वा० । अनु० । उपक्रमणमुपक्रम इति भावसाधनः । शास्त्रस्य न्यासदेशसमीपीकरणलक्षणः उपक्रम्यते वाग्योगेनेत्युपक्रम इति करणसाधनः । उपक्रम्यतेऽस्मिन्निति वा शिष्यश्रवणभावे सतीत्युपक्रम इत्यधिकरणसाधनः । उपक्रम्यते अस्मादिति वा विनेयविनयादित्युपक्रम इत्यपादानसाधन इति । स्था० १ ठा० । स्व० । आ० म० प्र० । सूत्र० । जं० । उपक्रमो द्विधा । शास्त्रीय इतरश्च । शास्त्रानुगतः शास्त्रीयः (आचा०) इतरश्च लोकमानिकः । अथेतरजिज्ञासयाह—

से किं तं उवक्कमे छव्विहे पण्णत्ते तं जहा णामोवक्कमे ठवणोवक्कमे दव्वोवक्कमे खेत्तोवक्कमे कालोवक्कमे भावोवक्कमे नामठवणाओ गयाओ ॥

अत्र कश्चिदिह इत्येवं उवक्कमे दुविहे पण्णत्ते इत्यादि" अयं च पाठ आधुनिको पुस्तके आह वा उवक्कमे छव्विहे पण्णत्ते इत्यादि एतत्प्रमाणग्रन्थोपन्यासस्यापरमानताप्रसङ्गात् । यदि शास्त्रीयोपक्रमोऽत्र प्रतिज्ञातः स्यात्तन्नत्र वक्ष्यमाणसूत्रमेव स्यात् "से किं तं सत्थोवक्कमे २ छव्विहे पण्णत्ते इत्यादि " नचैवं तस्मादिह सूत्रेष्वपि प्रतिज्ञा किन्त्वितरोपक्रमनयनं चेतसि विकल्प्य यथा निर्दिष्टमेव सूत्रमित्यङ्गं विस्तारेण । प्रकृतं प्रस्तुतं सूत्रम् । नामस्थापनोपक्रमव्याख्या नामस्थापनावश्यकव्याख्यानुसारेण कर्तव्या । अनु० । विशे० ॥

द्रव्योपक्रमः ।

से किं तं दव्वोवक्कमे २ दुविहे पण्णत्ते तं जहा आगमओ अ नोआगमओ अ । जाणयसरीरभवियसरीरवइरित्ते दव्वोवक्कमे २ तिविहे पण्णत्ते तं जहा सचित्ते अचित्ते मीसए। से किं तं सचित्ते दव्वोवक्कमे २ तिविहे पण्णत्ते तं जहा दुपए चउप्पए अपए एक्किक्के पुण दुविहे पण्णत्ते तं जहा परिकम्मे अ वत्थुविणासे अ ॥

द्रव्योपक्रमव्याख्यापि द्रव्यावश्यकवदेव यावत्तद्व्योपक्रमं इत्यादि । तत्र द्रव्यस्य नटादेरुपक्रमणं कालान्तरभाविनाऽपि पर्यायेण सहैदानीमेवोपायविशेषतः संयोजनं द्रव्योपक्रमः । अथवा द्रव्येण घृतादिना कुमारादौ क्रियतः घृतादेर्वोपक्रमो द्रव्योपक्रम इत्यादि । कारकयोजना विवक्षया कर्त्तव्येति । स च त्रिविधः प्रक्रमस्तथा सचित्तद्रव्यविषयः सचित्तः । अचित्तद्रव्यविषयोऽचित्त । मिश्रद्रव्यविषयस्तु मिश्र. । द्रव्योपक्रमस्त्रिविधः प्रक्रमस्तथा द्विपदानां नटनर्तकादीनां चतुष्पदानामश्वहस्त्यादीनामपदानामाम्रादीनाम् । तत्रैककः पुनरपि द्विधा परिकर्मणि वस्तुनाशे च । तत्रावस्थितस्यैव वस्तुनो गुणविशेषाधानं परिकर्म । तत्र परिकर्मणि परिकर्मविषयो द्रव्योपक्रमः । यदा तु वस्तुनो विनाश एवोपायविशेषैरुपक्रम्यते तदा वस्तुनाशविषयो द्रव्योपक्रमः । सूत्रे द्विपदानां नटनर्तकादीनां घृताद्युपयोगेन बलवर्णादिकरणं वर्णस्कन्धवर्द्धनादिक्रिया वा परिकर्मणि सचित्तद्रव्योपक्रमः ॥

द्विविधमप्येतदुपक्रमं विभणिषुराह—

से किं तं दुपए उवक्कमे नडाणं नट्टाणं जल्लाणं मल्लाणं मुट्ठियाणं वेलंवगाणं कहगाणं पवगाणं लासगाणं आइक्खगाणं लंखाणं मंखाणं तूणइल्लाणं तुंववीणियाणं कायाणं मागहाणं सेत्तं दुपए उवक्कमे ॥

अत्र निर्वचनं (दुपयाणं नडाणमित्यादि) तत्र नाटकानां नाटयितारो नटास्तेषां (नट्टाणंति) नृत्यविधायिनो नर्तकास्तेषां (जल्लाणंति) जल्ला वरत्राः खेलकास्तेषां राजस्तोत्रपाठकानामित्यन्ये (मल्लाणंति) मल्लाः प्रतीतास्तेषां (मुट्ठियाणंति) मौष्टिका ये मुष्टिभिः प्रहरन्ति मल्लविशेषा एव तेषां (वेलंवगाणंति) विडम्बका विदूषका नानावेषादिकारिण इत्यर्थः । तेषां (कहगाणंति) कथकानां प्रतीतानाम् (पवगाणंति) प्लवका ये उत्प्लवन्ति गर्तादिकं कपाभिर्लङ्घयन्ति नद्यादिकं वा तरन्ति तेषां (लासगाणंति) लासका ये रासकान् गायन्ति तेषां जय शब्दप्रयोक्तॄणां वा भण्डानामित्यर्थः। (आयंक्खगाणंति) ये शुभाशुभमाख्यायन्ति ते आख्यायकास्तेषां (लंखाणंति) ये महावंशाग्रमारोहन्ति ते लंखास्तेषाम् (मंखाणंति) ये चित्रपटादिहस्ता भिक्षां चरन्ति ते मंखास्तेषाम् (तूणइल्लाणंति) तूणाभिधानवाद्यविशेषवताम् (तुंववीणियाणंति) वीणावादकानां (कायाणंति) कावडिवाहकानाम् (मागहाणंति) मङ्गलपाठकानामेषां सर्वेषामपि यद्घृताद्युपयोगेन बलवर्णादिकरणं वर्णस्कन्धवर्द्धनादिक्रिया वा स परिकर्मणि सचित्तद्रव्योपक्रमः । यस्तु खड्गादिभिरेषां नाश एवोपक्रम्यते सम्पाद्यते स वस्तुनाशे सचित्तद्रव्योपक्रम इति वाक्यशेषः । अन्ये तु शास्त्रं गन्धर्वनृत्यादिकलासम्पादनमपि परिकर्मणि द्रव्योपक्रम इति व्याचक्षते एतच्चायुक्तं विज्ञानविशेषात्मकत्वाच्छास्त्रादिपरिज्ञानस्य च भावत्वादिति । अथवा यद्यात्मकद्रव्यसंस्कारमात्रापेक्षया शरीरवर्णादिकरणवदित्युच्यते तर्ह्येतदप्युक्तमेवेति । सेत्तमित्यादिनिगमनम् ।

अथ चतुष्पादानां द्विविधमप्युपक्रमं विभणिषुराह—

से किं तं चउप्पए उवक्कमे, चउप्पयाणं आसाणं हत्थीणं । इच्चादि सेत्तं चउप्पयउवक्कमे, से किं तं अप्पए उवक्कमे ॥ अप्पयाणं अंबाणं अंबाडगाणं इच्चाइ सेत्तं अप्पयउवक्कमे। सेत्तं सचित्ते दव्वोवक्कमे ॥

से किं तमित्यादि । अत्र निर्वचनं "चउप्पयाणं आसाणं हत्थीणमित्यादि अश्वादयः प्रतीता एव एतेषां शिक्षा गुणविशेषकरणं परिकर्मणि खड्गादिस्त्वेषां नाशोपक्रमणं वस्तुनाशे सचित्तद्रव्योपक्रम इतीहापि वाक्यशेषः सेत्तमित्यादिनिगमनम् । अथापदानां द्विविधमप्युपक्रमं विभणिषुराह । अत्र निर्वचनम् । "अप्पयाणं अंबाणं चारगाणमित्यादि" इहाम्रादयो देशप्रतीता एव नवरं (चाराणंति) येषु चारकुलिका उत्पद्यन्ते ते चारवृक्षाः आम्रादिशब्दाश्च वृक्षास्तत्फलानि वा गृह्यन्ते तत्र वृक्षाणां वृक्षायुर्वेदोपदेशाद्वार्द्धक्यादिगुणानन्तरं तु गर्तप्रक्षेपकोद्रवपलालस्थगनादिनाऽश्वेव पाकादिकरणं परिकर्मणि शस्त्रादिभिस्तु मूलत एव विनाशनं वस्तुनाशे सचित्तद्रव्योपक्रम इत्यत्रापि वाक्यशेषः सेत्तमित्यादि निगमनद्वयम् ॥

अथाचित्तद्रव्योपक्रमं विवक्षुराह—

से किं तं अचित्ते दव्वोवक्कमे खंडाईणं गुडाईणं मच्छंडीणं सेत्तं अचित्ते दव्वोवक्कमे ॥

तत्तृतीयगृहे कुरु त्वं न तथाविधनकरो भर्ता भविष्यतीति । द्वितीयापि तथैव शिक्षिता । तयापि च तथैव स्वभर्ता शिरसि प्रहतः केवलमसौ तैलकुलप्रसूतानां युज्यत इत्यादि किञ्चित्क्षणमेकं ऊषित्वा स्वपुरस्तस्मिंश्च व्यतिकरे तया मातुर्निवेदिते प्रोक्तं मात्रा वत्से! त्वमपि यथेष्टं तद्गृहे विजृम्भस्व केवलं त्वद्भर्ता ऊषित्वा स्थास्यति । एवं तृतीययापि मातृशिक्षितया दुहित्रा तथैव प्रहतः स्वभर्ता केवलमेतेनोच्छ्रसदुच्छकोपेन नूनमकुलीना त्वं येनैवं शिष्टजनानुचितं विचेष्टसे इत्याद्यभिधाय गाढं कुट्टयित्वा निष्काशिता गृहात् । तया च गत्वा सर्वं मात्रे निवेदितम् । ततस्तया विज्ञातजामातृभावतया तत्समीपं गत्वा वत्स ! स्वकुलस्थितिरियमस्माकं यदुत प्रथमसमागमे वध्वा वरस्येत्थं विधातव्यमित्यादि किञ्चिदभिधाय कथमप्यनुनीतोऽसौ दुहिता च प्रोक्ता वत्से ! दुराराधस्ते भर्ता भविष्यति परमदेवतावदप्रमत्ततया समाराधनीय इति ब्राह्मणीदृष्टान्तः ।

अथ गणिकादृष्टान्त उच्यते ॥ एकस्मिन्नगरे चतुःषष्टिविज्ञानकलिता देवदत्ताभिधाना रूपादिगुणवती वेश्या परिवसति तया च भुजङ्गजनाभिप्रायपरिज्ञानार्थं स्वव्यापारं कुर्वत्या सर्वा अपि राजपुत्रादिजातयो रतिभवनभित्तिषु चित्रकर्मणि लेखितास्तत्र च यः कश्चिद्राजपुत्रादिरागच्छति स यत्र २ स्वाभ्यासस्तत्तदेव चित्रलिखितं दृष्ट्वा अत्यर्थं प्रशंसति । ततोऽसौ विलासिनी राजपुत्रादीनामन्यतरत्वेन निश्चित्य यथौचित्येनोपचरति । आनुकूल्येनोपचरिताश्च राजपुत्रादयस्तस्यै प्रचुरमर्थजातं प्रयच्छन्तीति गणिकादृष्टान्तः ।

अथामात्यदृष्टान्तोऽभिधीयते ॥ एकस्मिन्नगरे कश्चिद्राजा अमात्येन सहाश्ववाहनिकायां निर्गतस्तत्र च पथि गच्छता राजतुरङ्गमेण क्वचिदविस्तृतप्रदेशे प्रस्रवणमकारि तच्च तत्प्रदेशपृथिव्याः स्थिरत्वेन तथैव स्थितम् चिरेणाप्यशुष्कं व्यावर्तमानो राजा तथैव व्यवस्थितमद्राक्षीच्चिरावस्थायिजलः शोभनोऽत्र प्रदेशे तडागो भविष्यतीति चिन्तितं चिरमवलोकितवांस्तदिति । ततश्चेङ्गिताकारकुशलतया विदितं तदभिप्रायेणामात्येन राजादेशमन्तरेणापि खानितं तत्प्रदेशे महासरः नत्पाल्यां च रोपिताः सर्वर्तुकपुष्पफलसमृद्धा नानाजातीयतरुनिवहाः । अन्यदा च तेनैव प्रदेशेन गच्छता भूपालेन दृष्टं पृष्टं चाहो मानसमनोहरमिदं रमणीयं केनेदं खानितं सरः । अमात्यो जगाद देव ! भवद्भिरेव । राजा सविस्मयं प्राह कथं कदा मयैतत्कारणाय निरूपितं इत्यतः सचिवो यथावृत्तं सर्वमपि कथितवानहो परचित्तोपलक्षकत्वमस्येति विचिन्त्य परितुष्टो राजा तस्य वृत्तिवर्धनादिना प्रसादं चकार तदेवमादिकः संसारफलोऽप्रशस्तभावोपक्रमः स्वयमभ्यूह्य इति ॥ विशे० ॥ अथ प्रशस्तभावोपक्रममाह । " पसत्थे गुरुमाईणं " तत्र श्रुतादिनिमित्तं गुर्वादीनां यद् भावोपक्रमणं स प्रशस्तभावोपक्रमः ॥ अनु० ॥

सीसो गुरुणो भावं, जमुवक्कमइ सुहं पसत्थमणो ।
सहियत्थं मपसत्थो, इह भावोवक्कमो हि गओ ॥

इह यच्छिष्यः स्वहितार्थं श्रुतार्थं श्रुताध्ययनादिहेतोः प्रशस्तमनाः श्रुतहेतुत्वाच्छुभं गुरुभावमुपक्रामतीङ्गिताकारादिना जानाति स मोक्षफलत्वात्प्रशस्तभावोपक्रमस्तेनैव चेहाधिकारो मोक्षार्थत्वादेव सर्वस्यास्य प्रारम्भस्येति । विशे० । वृ० (गुरुचित्तोपक्रमो गुरुशब्दे) साम्प्रतं तमेव शास्त्रीयोपक्रमलक्षणेन प्रकारान्तरेणाभिधित्सुराह—

अहवा उवक्कमे छव्विहे पण्णत्ते तंजहा आणुपुव्वी १ नाम २ पमाणे ३ वत्तव्वया ४ अत्थाहिगारे ५ समोआरे ६ ॥

अथवा अनन्तरं यः प्रशस्तभावोपक्रमः उक्तः श्लोके पूर्वादिविभागः स हि द्विविधो द्रष्टव्यो गुरुभावोपक्रमः शास्त्रभावोपक्रमश्च । शास्त्रलक्षणो भावस्तस्योपक्रमः शास्त्रभावोपक्रमस्तत्रैकेन गुरुभावोपक्रमलक्षणेन प्रकारेणोक्तोऽथ द्वितीयेन शास्त्रभावोपक्रमलक्षणेन प्रकारान्तरेण तमभिधित्सुराह (अहवा उवक्कमे इत्यादि) अथवेति पक्षान्तरसूचकः उपक्रमः प्रथमव्याख्यानपक्षे शास्त्रीयोपक्रमो द्वितीयव्याख्यानपक्षे तु शास्त्रभावोपक्रमः षड्विधः षट्प्रकारः प्रज्ञप्तस्तद्यथा आनुपूर्वी १ नाम २ प्रमाण ३ वक्तव्यता ४ अर्थाधिकारः ५ समवतारः ६ अनु० (एतेषाञ्च शब्दव्युत्पत्त्यादिस्वरूपं यथावसरं स्वस्वस्थाने) (उपोद्घातादस्य भेदः स्वस्थाने) उपक्रम्यतेऽनेनेत्युपक्रमः । ज्वरातिसारादौ, स्था० ४ ठा० । शस्त्रे, " शुभमाहारच्छेद उपक्रमेण च परिणाम " तच्च त्रिधा स्वकायपरकायतदुभयरूपम् । तत्र स्वकायशस्त्रं यथा लवणोदकं मधुरोदकस्य कृष्णभूमं वा पाण्डुभूमस्य । परकायशस्त्रं यथाऽग्निरुदकस्य उदकं चाग्नेरिति तदुभयशस्त्रं यथा उदकः शुद्धोदकस्येत्यादि । ध० २ अधि० । उपक्रमोपसंहारौ हेतुतात्पर्यनिर्णये, वेदान्तिमते तात्पर्यनिर्णायके हेतुभेदे, तत्रोपक्रमोपसंहाराभ्यां ताभ्यामेव तात्पर्यं निश्चीयते नत्वेकैकेनेति बोध्यम् । करणे घञ् । सामाद्युपाये, कर्मणि घञ् आरभ्यमाणे, पुं० वाच० ।

उवक्कमकाल–उपक्रमकाल–पुं० क० स० । अभिप्रेतार्थसामीप्यानयनलक्षणे सामाचारीयथायुष्कभेदभिन्ने वा कालभेदे, आ० म० द्वि० ॥

अथोपक्रमकालं विनणिपुणभाष्यकारस्तत्स्वरूपमाह–

जेणोवक्कामिज्जइ, समीवमाणिज्जए जओ जंतु ।
स किलोवक्कमकालो, किरियापरिणामजूढो ॥

वस्तु पादविक्षेपे विवक्षितस्य दूरस्थितस्य वस्तुनस्तैस्तैरुपायभूतैः क्रियाविशेषैरुपक्रमणं सामीप्यानयनमुपक्रमः । अथ येन क्रियाविशेषेणोपक्रम्यते दूरस्थं समीपमानीयते स उपक्रमः । यतो वा क्रियाविशेषादुपक्रम्यते । यद्वा सामाचारीप्रभृतं वस्तु उपक्रम्यते स उपक्रमस्तस्य कालोऽप्युपचारादुपक्रम एव कालः उपक्रमकालः । किलशब्द आप्तवचनोपदर्शनार्थः । अयं च बहुभिः क्रियापरिणामैर्नृपित्व प्रचुरो भवति अनन्ताः क्रियापरिणामा इह भवन्ति । यदवाऽऽयुष्काद्युपक्रमहेतुभूताः क्रिया भवन्तीति यावत् । तथाच वक्ष्यति "अज्झवसाणनिमित्ते, आहारे वेयणापराघाए । फासे आणापाणू, सत्तविहं भिज्जए आऊ" इत्यादीति गाथार्थः । २३ ॥

अयं च द्विविधो भवति कथमित्याह निर्युक्तिकारः–

दुविहोवक्कमकालो, सामायारी अहाउयं चेव ।
सामायारी तिविहा, ओहे दसहा य पयविभागे ॥

यथोक्त उपक्रमकालो द्विविधस्तदेव द्वैविध्यं दर्शयति सामाचार्युपक्रमकालो यथायुष्कोपक्रमकालश्च । अथ सामाचार्या उपक्रमकालत्वं समर्थयन्नाह भाष्यकारः ॥

जेणोवरियसुयाओ, सामायारिमुवमाणियं हेट्ठा ।
ओहाइतिविहा एसो, उवक्कमो समयरज्जाए ॥

पूर्वनिर्दिष्टान्नवमपूर्वादुपरितनश्रुतादधुनाऽऽकृष्य येन साधुसामाचारीप्रतिपादकं श्रुतमधस्तादिदानीन्तनकालेऽपि समा-

उदयक्खयखओवसमो–वसमा जं च कम्मणो भणियं ।
दव्वाइपंचयं पइ–जुत्तमुवक्कामणमओ वि ॥

यथ यस्मादुदयश्च क्षयश्च क्षयोपशमश्च उपशमश्च उदयक्षयक्षयोपशमोपशमास्ते कर्मणो द्रव्यक्षेत्रकालभवभावपञ्चकं प्रति भणिता द्रव्यादीनाश्रित्योक्ता अतोऽपि कारणाद्द्रव्यादिद्रव्याप्य प्राप्यायुष्कादीनां युक्तमुपक्रमणं क्षय इति । तथाऽसातवेदनीयस्य कर्मणो द्रव्यमहिविषकण्टकादिमाप्योदयो भवति क्षेत्रं तु नरकचारकादिकं कालं तीव्रनिदाघसमयादिकं भवं नारक-भवादिकं भावं तु वृद्धतादिकम क्षयोऽस्यस्य द्रव्यं सकुन्दचरणादिकं प्राप्य भवति क्षेत्रं तु पुण्यतीर्थादिकं कालं सुषमदुःषमादिकं भवं मनुजजन्मलक्षणं भावं तु सम्यग्ज्ञानाचरणादिकम क्षयोपशमोपशमौ तु वेदनीयस्य न भवतः । मिथ्यात्वमोहनीयस्य द्रव्यं कुतीर्थादिकं प्राप्योदयो भवति क्षेत्रं तु कुरुक्षेत्रादिकं साध्यादिरहितदेशादिकं वा कालं दुःषमादिकं भवं नैरयिकैकेन्द्रियादिकम अनार्यमनुजजन्मरूपं वा भावं कुसमदेशनादिकमिति । क्षयक्षयोपशमा-वस्य द्रव्यं तीर्थकरादिकं प्राप्य भवति । क्षेत्रं तु महाविदेहादिकं, कालं सुषमदुःषमादिकं भवं सुमनुजकुलजन्म भावं सम्यग्ज्ञानाचरणादिकमिति एवं शेषेऽपि ज्ञानदर्शनावरणादिके कर्मणि निद्रावेदनीयकर्मणो माहिषदधिमृणालादिकं द्रव्यमासाद्योदयो भवति क्षेत्रं तु अनूपादिकं कालं ग्रीष्मादिकं प्रथमेकेन्द्रियादिकं भावं तु वृद्धत्वादिकमिति । क्षयोपशमोपशमौ त्वस्यापि न भवतः । एवमन्येषामपि कर्मणामुदयादयो यथायोगं द्रव्यादीन प्राप्य स्वधिया भावनीया इति । अथ दृष्टान्तद्वारेण कर्मणां द्रव्यादि सहकारिकारणापेक्षतां साधयन्नाह–

पुण्णापुण्णं कयं पि हु, सायमसायं जहोदयाईं य ।
वउज्ज्वलाहाणा उ, देइ तह पुण्णपावं पि ॥

यथा सातं सुखमसातं तु दुःखं पुण्यापुण्यरूपकर्मजनितमपि स्रक्चन्दनाङ्गनादिविषकण्टकादिना बाह्येन सहकारिणा पद्गलस्य सामर्थ्यस्याधानं विधानं तस्मादुदयादीन् ददाति तथैवमेव पुण्यपापोदयमाश्रात् ततश्च यथा तत्कालो[illegible] सुखदुःखाख्यं कार्यं बाह्यान द्रव्यक्षेत्रादीनपेक्ष्योदेति क्षीयते वा न पुनरेवमेव तथा तत्कारणं पुण्यपापाख्यमपि द्रव्यक्षेत्रादीनपेक्ष्योदेति क्षीयते चेति निश्चयेव नहि [illegible] द्रव्यादीनपेक्ष्य तत्कारणं तु नापेक्षते इति शक्यते वक्तुं न खलु कार्यं हतो घटस्य चीवरादीनपेक्षते आपन्न तत्कारणमस्तु कुम्भकारचक्रादि एव परं अनपेक्षमुपयमानं [illegible] निर्भर तस्मादुदयादीन् प्रति द्रव्यादिसापेक्षणां कर्मणामपि विधानानुपक्रम इति । यदि पुनर्यथा बद्धं तथैव वेद्यते कर्म न पुनरुपक्रम्यते तदा किं दूषणमित्याह–

[illegible] कम्मोवणिय, स्वविकयं कम्मं पयत्ता न दणं ।
[illegible]गयनरविजय, नाणागङ्गयाणं ऊणत ॥
[illegible]नयाणुभवणा, पावादस्मिन् पस्मयूलं वा ।
[illegible]नवमो बंधो उ, मोक्खो भावो सदाण्णि ।

[illegible] सर्वेक प्रतिसमयमनुभूयमान प्रतिसमय [illegible] कर्म सम्यक् इति यथाक्रम [illegible] संसारपन्नभवं [illegible] सर्वस्य[illegible] भावस्य समिसाधने प्रसज्येत न कर्मणि[illegible] [illegible]भावनामितिदाह । तत्र सर्वस्य[illegible] सदा–

यानसंख्येयसमयाविनकर्मणः [illegible] एवडन्येन नरकादिनानागतिकारणस्य [illegible] पश्चानुभवने एकस्मिन्नपि भव सम्भवे [illegible] न प्राप्नोति तथायुष्कं कृत इत्याह । ([illegible]) [illegible] धर्मास्मिन्मनुष्यगतिवर्तीति सम्भवे नारकतिर्यक्[illegible] भवानां [illegible] निकारणं कर्म पश्चान्पश्चात् [illegible] किमेताथवा विनश्यति तद्युक्तं कुत इत्याह । ([illegible]) इत्युक्तं भवति पर्यायेण वा [illegible] कर्मोऽनुभवतः पुनरपि नानागतिकारणस्य कर्मणो बन्ध पुनरपि च क्रमेण [illegible] कर्म वश इत्येवं मोक्षाभावः । [illegible] मुपक्रम इति । अत्र [illegible] मेव पुनः कारणमाह ।

णणु तम्म मदोवचियं, [illegible] ।
[illegible] चिय, तेण वि य [illegible] ॥

[illegible]

[illegible]

[illegible]

जिणो महेड कालो. मुट्ठि वि एगम्मि एवं च;
मन्नेइ गहणकालो. गमेड्डा प्पसमं चिय ।
मड गुप्पम्मि वि हम्मे य. परिग्गहाईण चिय
निम्माणुभवणकालो, मेडो णाओ मइयं ।
मड वा दीहा रज्जू, घाएइ काळेण पुंस लि'
विरमो पडो व्व गुम्मा. सिंदोकुम्हो व कमेण ।
जामा य निसेडो. हीरइ कडमो मझा वही भिन्न
विविधा चिमेमओ वा, सव्वे वि एते विजिउन्न ।

[illegible]

उवक्कमण–उपक्रमण– न० उप-क्रम-ल्युट् । विक्रेपणे, विशे० ७ द्वा० । आरम्भे, करणे ल्युट् तत्साधने, सुश्रुतोक्ते दीर्घायुष्यादिज्ञानपूर्वकचिकित्सायाम्, भूमिकायाम्, स्त्री० । वाच० ॥

उवक्कमिया–औपक्रमिकी– स्त्री० उपक्रम्यतेऽनेनेत्युपक्रमो ज्वरातिसारादिस्तत्र भवा या सा औपक्रमिकी । स्था० । उपक्रम्यतेऽनेनेत्युपक्रमः कर्मवेदनोपायस्तत्र भवा औपक्रमिकी (भ० १ श०४ उ०) कर्मोदीरणकारणेन निर्वृत्तायां तत्र भवायां ज्वरातिसारादिजन्यायां वा वेदनायाम्, स्था० २ ठा० । " अहं उवक्कमियं वेयणं णो सम्मं सहामि " ॥ स्था० ४ ठा० ॥

उवक्कमियउवसग्ग–औपक्रमिकोपसर्ग– पुं० दण्डकशाद्यादिनाऽसातवेदनीयोदयापादके, सूत्र० १ श्रु० ३ अ० । (उवसग्गशब्दे विवृतिः) ।

उवक्केस–उपक्लेश-पुं० उपक्लिश्नाति अनेन उप क्लिश् करणे घञ् मदादिषु, वाच० ; भावे घञ् । शोकादिबाधायाम्, स्था०७ ठा० ।

उवक्खइत्ता (वक्खा) इत्ता-उपख्यापयितृ त्रि० लोके ख्यापयति, "पावेहिं कम्मेहिं अत्ताणं उवक्खाइत्ता भवइत्ति" । पापैः कर्मभिरात्मानमुपख्यापयिता भवति । अय महापापकारीत्येव लोके ख्यापयतीति । सूत्र० २ श्रु० २ अ० ॥

उवक्खड–उपस्कृत–त्रि० उप-कृ-क्त–भूषणादौ सुट् । भूषिते, संहते, विकृते, अध्याहृते, वाच० । घृतहिङ्गुधान्यकमिरचलवणजीरकादिभिः कृतोपस्कारे शाकादिके, । "उवक्खडं भोयणमाहणाणं अत्तट्ठियं सिद्धमिहेगपक्खं" उत्त० । "उवक्खडाइणीदहिमादी" नि० चू० ८ उ० । उपस्करणमुपस्कृतम् । पाके, । स्था० ४ ठा० ।

उवक्खडसंपण्ण–उपस्कृतसंपन्न–पुं० उपस्कृतेन पाकेन संपन्न । ओदनमण्डकादौ आहारभेदे, । स्था०४ठा० ।

उवक्खडणाम–उपस्कृतनाम–न० कङ्कटुकादिउवक्खडं इत्युक्ते नामभेदे, "उवक्खडणामं णाम जहा चणयादीण उवक्खडियाण जेण-सिज्जंति से कंकटुयाम उवक्खडियाम भण्णति' नि०चू०१ ५उ० ।

उवक्खडिज्जमाण–उपस्क्रियमाण–त्रि० उपसंस्क्रियमाणे, "उवक्खडिज्जमाणे पेहाए पुरा अप्पजूहिए" आचा० २श्रु०२अ० । नि०चू०

उवक्खडिय–उपस्कृत–त्रि० संस्कृते, "विरूवरूवे भोयणजाए उवक्खडिए सिया" "उवक्खडियंपेहाए" उवक्खडियं पेहाए तहा वि तं णो एवं वएज्जा" आचा० २ श्रु० ४ अ० । " सयायपरमण्णं उवक्खडियं । आ०म०द्वि० ॥

उवक्खडेत्ता–उपस्कृत्य–अव्य० संस्कृत्येत्यर्थे, "असणं वा ४ उवक्खडेत्ता । आचा० १ श्रु० २ अ० २ उ० ।

उवक्खर–उपस्कर– पुं० उप-कृ-भावे अप् । हिंसने सुट् । ...स्ने, उपस्करोति उप-कृ-अच् । भूषणे, समवाये, प्रतियत्ने, विकारे, सकले, कटकमलकादौ, समुदिते, संहते, व्यञ्जनसंस्कारकधान्यकादिद्रव्ये, गृहसंस्कारके संमार्जन्यादौ, वाच० । ...दिके, नि० चू० १० उ० ॥ उपस्क्रियतेऽनेनेत्युपस्करः । ...ण्यादौ । स्था० ४ ठा० ॥

उवक्खरणसाला–उपस्करणशाला-स्त्री० महानसे, नि०चू०८उ० ।

उवक्खरसंपण्ण–उपस्करसंपन्न– पुं० उपस्क्रियतेऽनेनेत्युपस्करो हिङ्ग्वादिस्तेन संपन्नः । हिङ्ग्वादिभिः संस्कृते ओदनमण्डकादौ, ...भेदे, स्था० ४ ठा० ।

उवक्खाइया–उपाख्यायिका–स्त्री० कथाभेदे, ज्ञाताधर्मकथासु ...आख्यायिकोपाख्यायिकाशतानि । नं० ॥

उवग–उपग– त्रि० उप-गम-ड–उपगन्तरि, वाच० ॥

उवक्क–पुं० निराधि, "तद्गुणपर पाचि उवगो" उपको ... कोऽपि निर्व्यंगापनितो निलिनः । वृ० ६ उ० । गतायां च । नि०...

उवगंतुकाम–उपगन्तुकाम– त्रि० अन्तुन्यातुकामे, " जो ... गविहारं उवगंतुकामो अब्भुट्ठिउकाम इत्यर्थं " । नि० चू० १...

उवगय–उपगत– त्रि० उप-गम्-क्त । स्वीकृते, उपस्थिते, ... वाच० । ढौकिते, सूत्र० १ श्रु० ३ अ० । अधिगते, " णि... मिप्पोयगपर्द्ध " औ० । प्रश्न० । युक्ते, " भिरिए हिरिए उव... उवगयसरीरे " रा० । " समाणणाणोवगए महेसी" उत्त० ... अ० । औ० । उप सामीप्येन गतः । प्राप्ते, सूत्र० २ श्रु० १ अ० ... द० । पंचा० । अनु० । रा० । " णिद्दयदयणरसओग्गाणकडम... रणमयभावमुवगयाओ " औ० । उत्त० । " उवगओ... संजमेणं तवसा अप्पाणं भावेमाणे विहरइ " ध्यानं धर्म्यं ... वा तदेव कोष्ठः कुशूलो ध्यानकोष्ठस्तमुपगतस्तत्र प्रविष्टो ध्यानकोष्ठोपगतः भ० १ श० १ उ० । "लोयग्गमुवगयाणं" लोकाग्रमुपगतेभ्यः लोकाग्रमीषत्प्राग्भाराख्य तदुप सामीप्येन निरव... शेषकर्मांशितुपानपतानिभ्रदेशतया गताः उपगताः । स० । ...वर्तिन कालसामीप्येन गतानां प्राप्तानाम । यद्वा कथंचनुपगताः प्रकर्षेऽप्युपगम्यन्ते यथा पोतारोपेण नैव ध्यानमनुक्रमेतुर्ण प्रव... र्तेण गतानामिति सम्म० ॥

उवगयसञ्झाहण–उपगतश्लाघन्त– न० सत्यगुणयोगात मानाग्र... घनारूपे चतुर्विंशे सत्यवचनातिशये, स० । रा० ॥

उवगरण–उपकरण– न० उपक्रियतेऽनेन उप-कृ-ल्युट् प्रथमान्... धर्मे अङ्गे, ... आचा० १ श्रु० २ अ० । "वेयज्ञिस्सर्ण वीरियस्स संजोगमट्ठयाए ..." ...रणाई भवंति । भ० ५ श० ४ उ० । ... हिरण्यादिके, सूत्र०२ श्रु० १ अ० । ... घुङ्गयादिके दर्व्यादिके च । ...

उपकरणशुद्धं व्याख्यायते ॥

सिज्झउसग्गुवयारं, हिरण्णसम्म व वाय य जं दव्वं ।
तं उवगरणुद्धी, उवगरणं पि होवाइ ॥

...पन शुद्धयादिक सिद्धतेऽपरस्य यद्वा यद्दन्यादिकं दीपमन्वादि भक्तस्यापकार करोति तदवह्रयादिकं दर्व्यादिकं च उपकरणमित्युच्यते । उपक्रियतेऽनेनेत्युपकरणमिति व्युत्पत्तेः । पि० ॥ आचा० । स्था० । उपकरण ... दिके, अनु० । प्र० । " ...कडुच्छुकादी, भ० ५ श० ७ उ० । उपक्रियते यदनेनेत्युपकरणम् धर्मसाधनं ... देसी ... दर्पा, उत्त० १२ अ० । ... प्रश्न० १ द्वा० । प्रव० । स्था० । ... करणमुच्यते । तथा चाह । "जं ... उवगरणं ... होइ उवगरणं । अहिगरणं अजओ य, अजं परिहरंतो परिहर... तो " ध० ३ अधि० । ... करणं किन्तु अधिकरणम् । वृ० १ उ० । उवगरणं ... अ० १ द्वा० । ... कर्मनिर्वृत्तो ... लोके, औ० १ प्रति० । आचा० ।

उवगरणउप्पायणया–उपकरणोत्पादनता–स्त्री० ... मीनामसंस्तिषु सीदत्सु विवरितु ... सा उवगरणोप्पायणया ... हे, भवेदवर्गोत्पादनतां ... ।

से किं तं उवगरणउप्पायणया ? चउव्विहा पएणत्ता तं जहा अणुप्पण्णाइं उवगरणाइं उप्पाइत्ता भवति पोराणाइं उवगरणाइं संरक्खित्ता भवति । संगोवित्ता भवति परित्तं जाणित्ता पच्चुद्धरित्ता भवति जधाविधिं संविभइत्ता भवति सेत्तं उवगरणउप्पायणया ।

प्रश्नसूत्रं कण्ठ्यम् । गुरुराह । चतुर्विधाः प्रज्ञप्तास्तद्यथा (अणुप्पण्णाइंति) अनुत्पन्नानि पूर्वमप्राप्तानि अपेक्षमाणानि उपकरणानि सम्यगेषणाविशुद्ध्या उत्पादयिता संपादनशीलो भवति यतः स्वयमाचार्यस्योपकरणोत्पादने वाचनाधर्मकथाद्यन्तरायो भवति अतः शिष्येणैवोपकरणाद्युत्पादनीयम् । (पोराणाइंति) पुरातनान्युपकरणानि संरक्षयिता उपायेन चोरादिभ्यः अथवा जीर्णानि सीव्यति काले प्रावृणोति व्याख्यानकाले चोलपट्टादिकम् । संगोपयिता च अल्पसागारिककरणेन मलिनतारक्षणेन चेति २ "परित्तं" नाम अल्पोपधिकं देशान्तरादागतं साधर्मिकं समीपस्थं वा अन्यगणसत्कं वा सीदन्तं दृष्ट्वा उपकरणैरुद्धर्ता भवति ३ यथाविधिसंविभक्ता भवति यथाविधि नाम यथाशास्त्रिकतया दाता भवति ग्लानादिकारणे वा तथाविधवस्त्रसंग्राहको भवति४ सेत्तमित्यादिनिगमनवचनं व्यक्तम् । दशा० ४ अ० ॥

उवगरणदाण–उपकरणदान–न० उपकरणं दण्डकादि तस्य दानम् वितरणम् । ममैकान्तनिर्जरा भवत्विति बुद्ध्या दण्डकादिवितरणे, "बहुमाणो वंदणयनिवेयणा पालणा य जातगउवगरणमेय" दर्श० ॥

उवगरणपूतिय–उपकरणपूतिक–न० राध्यमानस्य दीयमानस्य वा उपकारकारके पूतिभेदे, "जंतं रज्झंतस्स वा दिज्जंतस्स वा उवकारं करेति तं उवकरणपूतियं तं च इमं चुल्लुक्खलियं डोयदव्वी।चुल्ले य गामयं पूति डोयसोणेहिं गूमंकामणसंकाइसंधूमे" नि०चू० २ उ० ।

उवगरणलाघव–उपकरणलाघव–न० अल्पोपधितयरूपे द्रव्यलाघवे, आचा० १ श्रु०६ अ० ३ उ० ।

उवगरणपडिमा–उपकरणप्रतिमा–स्त्री० उपकरणलाभप्रतिज्ञायाम्, "चत्तारि उवगरणपडिमाओ संपडिवज्जित्ता गच्छेज्जा" आमोषकाधीन उपकरणप्रतिमया उपकरणार्थिनः समागच्छेयुः । आचा० २. श्रु० ।

उवगरणसंजम–उपकरणसंयम–पुं० महामूल्यवस्त्रादिपरिहाररूपे पुस्तकपञ्चकतृणपञ्चकचर्मपञ्चकपरिहारलक्षणे वा संयमभेदे, स्था० ४ ठा० ।

उवगरणसंजोयणा–उपकरणसंयोजना–स्त्री० उपकरणविषये [illegible], सा च बाह्याऽभ्यन्तरा च । तत्र बहिर्लाभसंयोजना उपकरणं संयोजयन् एव मार्गे [illegible] [illegible] परिभुञ्जानस्य भवति । [illegible] परिभुञ्जानस्य । पञ्चा० १३ विव० । पिं० नि० ।

उवगरणसंवर–उपकरणसंवर–पुं० [illegible]
[illegible]

उवगार–उपकार–पुं० उप-कृ-भावे-घञ् । प्रधानस्यानुगुणसम्पादने, उपकृतौ, वाच० ॥ उपकारवक्तव्यताभेदाश्च । चैत्यमुनिचन्दनप्रभृति-भाष्यविवृतेर्यथाश्रुतं किंचित् । संक्षम्याचारविधिं, वक्ष्ये स्वपरोपकाराय ।२। इहहि दुरन्तानन्तदुरन्तासारविसारिसंसारापारावारे निमज्जता भव्यजन्तुना जिनप्रवचनप्रतीतचोल्लकादिदशनिदर्शनदुष्प्रापं कथमपि प्रशस्तमनुजजन्मादिसामग्रीमवाप्य भवजलधिसमुत्तरणप्रवहणधर्मसद्धर्म्मविधाने प्रयत्नो विधेयः । यदवादि "भवकोटीदुष्प्रापामवाप्य नृभवादिसकलसामग्रीम् । भवजलधियानपात्रे, धर्मे यत्नः सदा कार्यः । १ । तत्रापि विशेषतः परोपकारकरणे प्रवर्तितव्यम् । तस्यैवान्वयव्यतिरेकाभ्यामपि पुण्यबन्धनिबन्धनत्वात् उक्तं च "संक्षेपात्कथ्यते धर्मो, जनाः किं विस्तरेण वः । परोपकारः पुण्याय, पापाय परपीडनम् । १ । स चोपकारो द्वेधा । द्रव्यतो भावतश्च । तत्र द्रव्योपकारो भोजनपानाच्छादनप्रदानादिलक्षणः स चाल्पीयानात्यन्तिकश्चैहिकार्थस्यापि साधनेनैकान्तेन साधीयानिति । भावोपकारस्त्वध्यापनश्रावणादिस्वरूपो गरीयानित्यात्यन्तिक उभयलोकसुखावहश्चेत्यतो भावोपकार एव यतितव्यम् । स च परमार्थतः पारमेश्वरप्रवचनोपदेश एव । तस्यैव भवशतोपचितदुःखलक्षक्षयक्षमत्वात् ॥ आहच ॥ नोपकारो जगत्यस्मिंस्तादृशो विद्यते क्वचित् । यादृशी दुःखविच्छेदाद्देहिनां धर्मदेशना ॥ २ ॥ संघा० । नं० । सुखानुभवे, षो० ९ विव० ।

उवगा (या) रण–उपकारण–न० आत्मनोऽन्यस्य वा ग्लानाद्यवस्थायामन्येनोपकारकरणे, "उवयारउपारणासु विणओ पउंजियव्वो" प्रश्न० ३ द्वा० ।

उवगाराभाव–उपकाराभाव–पुं० कृतकृत्यत्वेनानन्दानुपकारस्यासंभवे, " उवगाराभावम्मि वि, पूआणं पूजगस्स उवगारो " पंचा० ४ विव० ।

उवगारि (ण्)–उपकारिन्–त्रि० उपकारके, आ० म० प्र० । विशे० । उपकारवति, षो० १० विव० ।

उवगारिया–उपकारिका–स्त्री० विमानाधिपतिसत्कप्रासादावतंसकादीन् उपकरोत्युपष्टम्भातीत्युपकारिका विमानाधिपतिसत्कप्रासादावतंसकादीनां पीठिकायाम्, अन्यत्र त्वियमुपकार्यौपकारिकेति प्रसिद्धा । उक्तं च " गृहस्थानां स्तृ [illegible] राजगृहोपकार्यौपकारिका " इति । रा० ।

उवगारि (य) यालयण-उपकारिकालयन-न० उपकारिका [illegible] [illegible]कारिकालयनम् । [illegible]र्यौपकारिकारूपे लयने, [illegible] उवगारियल[illegible] एगं जोयणसयसहस्सं [illegible] ; " रा० [illegible]

उ[illegible] क्रियमाणोप- [illegible] उव- [illegible] त्सर्गान [illegible]

वाच० । प्रच्छदपटलने, रचनायां च । " आच्छादणपट्टगेहिं वालयउवगूहणेहिं च " मं० ॥

उवगूहिज्जमाण–उपगूह्यमान–त्रि० आलिङ्ग्यमाने, " उवगच्छिज्जमाणे उवगाइज्जमाणे उवलालिज्जमाणे उवगूहिज्जमाणे " ज्ञा० १ अ० ॥

उवगूहिय–उपगूहित (उपगूढ) न० गाढतरपरिष्वङ्गरूपे संभोगकामभेदे, प्रव० १७० द्वा० । द० । आलिङ्गिते, त्रि० "एस सो वररो गुंडेति उवगूहिओ " आ० म० द्वि० ।

उवग्ग–उपाग्र–न० अग्रस्य मुखस्य वर्षाकालसंबन्धिनः समीपमुपाग्रम ॥ आषाढमासे, " एसो वियकालो पुणरेव गणं उवग्गम्मि " व्य० १ उ० ।

उवग्गह–उपग्रह–पुं० उपगृह्यतेऽनेनेत्युपग्रहः । उपाधौ, ओ० । नि० चू० । उपग्रहणमुपग्रहः शिष्याणां भक्तश्रुतादिदानेनोपष्टम्भने, ग० १ अधि० । वि० । ओ० । पं० चू० । पं० भा० । (तद्भेदाः परिहारशब्दे वक्ष्यन्ते) आत्मनः समीपे संयमोपष्टम्भार्थवस्तुनो ग्रहणे, प्रव० ६० द्वा० । उपकारे, विशे० । कारावन्धने बन्दीकरणे, उपयोगे, आनुकूल्ये, वाच० । परस्मैपदात्मने पदयोर्व्यत्यये, यथा तिष्ठति प्रतिष्ठते रमते उपरमतीत्यादि । सूत्र० २ श्रु० ७ अ० । वर्मणि च । कारावेश्मनि, बन्द्याम्, वाच० ।

उवग्गहकर–उपग्रहकर–त्रि० उपकारके, "ओमंपि वत्थमाइ उवग्गहं करेमि गच्छस्स " पं० व० २ द्वा० ॥

उवग्गहकुसल–उपग्रहकुशल–पुं० उपग्रहविषयके कुशले, उपसामीप्येन ग्रहः सोऽपि द्विधा द्रव्यतो भावतश्च । तत्र येषामाचार्यं उपाध्यायो वा न विद्यते तान् । आत्मसमीपे समानीय तेषामित्वरं दिशं कथा तावद्धारयति यावन्निष्पाद्यन्ते एष द्रव्यत उपग्रहः । ग्रह उपादाने इति वचनात् । यः पुनरविशेषेण सर्वेषामुपकारे वर्त्तते स भावतः उपग्रहः ॥

उपग्रहकुशलमाह ॥

बाला सहवुड्ढेसुं, संतररकिलंतवेयणातंके ।
सेज्जनिसेज्जोवहिपाण, समणभेसज्जुवग्गहिए ॥
दाणदवावणकारा–वणे य तहाकयमणुन्नाए ।
उवहितमणुवहितविही, जाणाति उवग्गहं एयं ॥

बालाः सहवृद्धेषु तथा प्रभृतिमार्गगमनतः । वचनो वा श्रान्तेषु तपःक्लान्तेषु तथा वेदनायां सामान्यतः शरीरपीडायां जाताया- मातङ्के च सद्यो जाते सति रोगे समुत्पन्ने शय्या वसतिर्निषद्या पीठफलकादिरूपा उपधिः कल्पादिः पानं द्रव्यम् अशनमोदनादि भेषजमौषधमौपग्रहिकं दण्डकं प्रोञ्छनाद्युपकरणम् । एतेषां समाहारो द्वन्द्वस्तस्मिन् सप्तमी षष्ठ्यर्थे ततोऽयमर्थः । एतेषां स्वयं दानेऽन्यैर्दापने तथा वैयावृत्त्यादेः कारापणे च तथा "कयमणुन्नाए" इति पदैः कृतस्यानुज्ञायां यत्प्रवर्त्तनं तथा च उपहितविधिर्यश्चानुपहितविधिर्नाम यत् आचार्यैर्वितीर्णं तदाचार्यमनुज्ञाप्यान्येषां साधूनां तदन्तरेण वितरयतां ददाति अनुपहितविधिर्यदनुत्पन्नमुत्पाद्य ददाति । अन्ये तु व्याचक्षते यद्यस्य गुरुभिर्दत्तं तत्तस्योपनयतीत्येष उपहितविधिः । यत्पुनस्तस्य गुरुभिर्दत्तं तत्सोऽन्यस्य गुरून् अनुज्ञाप्य ददाति एषोऽनुपहितविधिः । एवं सर्वमुपग्रहं जानाति । एतदेव लेशतो व्याख्यानयति ॥

बालादीणं तेहिंय, सेज्जनिसेज्जोवहिप्पयाणेहिं ।
जयभत्तपाणभेसज्ज–मादीहिं उवग्गहिं कुणइ ॥
देइ सयं दावेइ य, करेय कारावए य अणुजाणे ।
उवहिय जं जस्स गुरूहिं, दिण्णं तस्स उवणेति ॥
अणुवहियं जं तस्स उ, दिन्नं देइ सो उ अन्नस्स ।
खमासमणेहिं दिन्नं, तुज्झं ति उवग्गहो एसो ॥

एतेषामनन्तरगाथाभिहितानां बालादीनां बालासमर्थवृद्धमार्गगमनादिश्रान्ततपःक्लान्तवेदनार्त्तजातातङ्कानां शय्यानिषद्योपधिप्रदानैस्तथा भक्तं मोदकाशोकवर्त्यादि अशमोदनादि पानभैषज्ये प्रागुक्तस्वरूपे आदिशब्दादौपग्रहिकोपकरणादिपरिग्रहः । एतैरुपग्रहमुपष्टम्भं करोति कथमित्याह । स्वयं शय्यादिकं ददाति । अन्यैर्वा दापयति तथा स्वयं वैयावृत्त्यादि करोति । अन्यैः कारयति । कुर्वन्तं वा अन्यमनुजानीते । (उवहियत्ति) पदैकदेशे पदसमुदायोपचारादुपहितविधिरिति द्रष्टव्यम् । यद्यस्य गुरुभिर्दत्तं तत्तस्योपनयतीत्येष उपहितविधिर्यत्पुनस्तस्य दत्तं सोऽन्यस्मै गुरून् अनुज्ञाप्य ददाति । क्षमाश्रमणैस्तुभ्यमिदं दत्तमित्येषोऽनुपहितविधिः । एष सर्वोऽप्युपग्रहः । उक्त उपग्रहकुशलः ॥ व्य० ३ उ० ॥

उवग्गहट्ठया–उपग्रहार्थता–स्त्री० भक्तपानवस्त्राद्युत्पादनसमर्थतयोपष्टम्भयिता भवत्विति प्रयोजने, स्था० ५ ठा० ३ उ० ॥

उवग्गहिय–उपगृहीत–न० भावे क्त० । पुरुषस्यालिङ्गनैकान्तनयनलिङ्गग्रहणकरग्रहणादौ, " उवहसिएहिं उवगूहिएहिं उवसद्देहिं " तं० । कर्मणि क्त । ज्ञानादिभिर्वस्त्रादिभिश्चोपष्टम्भिते, ॥ पा० ॥

उवग्घाय–उपोद्घात–पुं० समीपवर्तिनः प्रकृतस्य उद्घात उद्धननम् ज्ञानं चिन्तनं यत्र । उप– हन्– गतौ– गत्यर्थत्वात् ज्ञानार्थता आधारे घञ् । प्रकृतसिद्ध्यर्थमालोचनात्मके सङ्गतिप्रभेदे "चिन्तां प्रकृतसिद्ध्यर्थ–मुपोद्घातं विदुर्बुधाः" तदर्थवर्णने आरम्भो शास्त्रोत्पत्तौ, विशे० ॥ उपक्रमादस्य भेदः । अपरस्त्वाह । ननूपक्रमः प्रायः शास्त्रसमुत्थापनार्थं उक्तः उपोद्घातोऽप्येवशास्त्रसमुद्घातप्रयोजन एवेति कोऽनयोर्भेदः । उच्यते उपक्रमो ह्युद्देशमात्रनियतव्यापार उपोद्घातस्तु प्रायेण तदुद्दिष्टवस्तुप्रयोजनफलोऽर्थानुगमत्वादित्यलं विस्तरेण आ० म० प्र० ॥ उपोद्धननमुपोद्घातः । व्याख्येयस्य सूत्रस्य व्याख्यानविधिसमीपीकरणे ॥ विशे० ॥ उपोद्घातफलम् ॥ अनेन चापोद्घातेनाभिहितेन सूत्रादयोऽर्था व्यक्ताः भवन्ति यथा दीपेनापवरके न मणि उक्तं च "वत्ती भवन्ति अत्था, दीवेणं अप्पगास उव्वरए । वत्ती भवति अत्था, उवघाएणं तहा सत्थे" उपोद्घाताभिधानमन्तरेण पुनः शास्त्रं स्वतोऽतिविशिष्टमपि न तथाविधमुपादेयतया विराजते यथा नभसि मेघच्छन्नश्चन्द्रमाः । उक्तं च " मेघच्छन्नो यथा चन्द्रो, न राजति नभस्तले । उपोद्घातं विना शास्त्रं । न राजति तथा विधं " तत्र सूत्रभणितं " नो कप्पति निग्गंथाण वा निग्गंथीण वा आमेतालपलंबे इत्यादि " सूत्रस्पर्शिकनिर्युक्तिभणितमिदम् । वृ० १ उ० ॥

उवग्घायणिज्जुत्ति–उपोद्घातनिर्युक्ति–स्त्री० उपोद्घातेन व्याख्येयस्य सूत्रस्य व्याख्या विधिसमीपीकरणमुपोद्घातनिर्युक्तिस्तद्रूपस्तस्या वा अनुगम उपोद्घातनिर्युक्त्यनुगमः । निर्युक्त्यनुगमभेदे, " से किं तं उवग्घायनिज्जुत्तिअणुगमे २ इमाहिं दोहिं मूलगाहाहिं अणुगंतव्वे तंजहा "उद्देसे १ निद्देसे अ २ निग्गमे ३ खित्ते ४ काले ५ पुरिसे य ६ । कारण ७ पच्चय ८ लक्खण, ९ नए १० समोआरणाणुमए ११ ॥ किं १२ कइविहं १३ कस्स, १४ कहिं १५ केसु १६ कहं १७ किच्चिरं हवइ कालं १८ । कइ १९ संतर २० मविरहियं, २१ भवा २२ गरिस २३ फा-

मत्त २४ निरुत्ता २५ ॥ सेत्तं उवग्घायनिज्जुत्ति अणुगमो" । अनु० । आ० म० प्र० । विशे० । आ० म० द्वि० (समाइय शब्दे दर्शी भविष्यति)

उवघाय-उपघात-पुं० उपहननमुपघातः । पिण्डशय्यादेरकल्पताधाम । स्था० ३ ठा० । असवर्लीकरणे, ओ० । परम्पराघाते, प्रश्न० २ द्वा० । उपघातभेदः "उवघाओ" उपेत्य घातो उपघातः स च द्विविधः द्रव्योपघातो भावोपघातश्च तत्र द्रव्योपघातो विद्रुतद्रव्येणोपहन्यते । भावोपघातो द्विविधः प्रशस्तोऽप्रशस्तश्च । तत्र अप्रशस्तोपघातः मिथ्यादर्शनाविरतिप्रमादकषायोपघातः सम्यग्दर्शनादिषु प्रशस्तः । अप्रशस्तोपघातस्तु सम्यग्दर्शनादुपघातः मिथ्यात्वादिषु प्रशस्तः विरोधी नानार्यातिशयेषु सुप्रतिमा [illegible] शोधनं शुद्धिः विविधमनेकप्रकारा या शुद्धिर्विशुद्धिरियं द्विविधा द्रव्यविशुद्धिर्वस्त्रादि भावविशुद्धिः सम्यग्दर्शनज्ञानचारित्रविशुद्धिः । स च विद्रुतपघातो या अजीवद्रव्याणां न भवतीन्येव सिद्धान्तः कस्मात्तस्मादजीवद्रव्याणां सोधादयः परिणामविशेषा न भवन्ति तेनोपघातो विशुद्धता या अजीवानां न भवन्तीत्येव भावनानिश्चय इत्यर्थः । आह कस्योपघात इति अत्र । यदजीवानां न भवति शुद्धिरुपघातो वा तदुपपन्नं [illegible] परिणामस्यथा जीवानां भवति न [illegible] सिद्धान्तः । परिणतिः परिणामः भावप्रभावो [illegible] । पं० चू० ॥

त्रिविध उपघातः

तिविहे उवघाए पन्नत्ते तंजहा उग्गमोवघाए उप्पायणोवघाए एसणोवघाए । एवं विसोही ॥

[illegible] । तत्र उद्गमः [illegible] आधाकर्मादयः षोडश दोषाः । उक्तं च " [illegible] पसारि होंति [illegible] दोसा [illegible] होंति " [illegible]

[illegible]

दसविहे उवघाए पन्नत्ते तंजहा उग्गमोवघाए उप्पायणोवघाए जहा पंचट्ठाणे जाव परिहरणोवघाए णाणोवघाए दंसणोवघाए चरित्तोवघाए अवियत्तोवघाए सारक्खणोवघाए ॥

[illegible]

वसहिंत्ति " ॥ ३ ॥ दूमिया धवलिता " वडिका धूपिता अभ्यक्ता । छगणादिना लिप्ता संमृष्टा समार्जितेत्यर्थः हरणा आसेवा तयोपध्यादेरकल्पता तथोपध्युपादानेन एकसाधुना यदासेवितमुपकरणं तदुपहतं [illegible] व्यवस्था " जगाहण अप्परिच्चाण, जइ वि विरेचे न [illegible] ति " वचनात् । अस्य चायमर्थः एकाकी गच्छाद् [illegible] तिं दुग्धादिषु च न प्रतिबध्यते तदा यद्यप्यसौ गच्छे [illegible] च्छति तयाऽप्युपधिर्नोपहन्यते अन्यथा तूपहन्यत इति । [illegible] पि मासचतुर्मासयोरुपरि कालातिक्रान्तेति । [illegible] चतुर्मासद्वयं वा वर्जयित्वा पुनस्तत्रैव वसतावुपस्थाने [illegible] तद्दोषाभिधानात् । उक्तञ्च " उउ वासा समतीता, [illegible] व सा जेव सेज्जा । से चेव उवट्ठाण-दुगुणादुगुणं च [illegible] त्ति " ॥ १ ॥ तथा भक्तस्यापरिष्ठापनिकाकारे [illegible] कं " विहिगहियं विहिभुत्तं, अइरेगं भत्तपाणभोत्तव्वं । [illegible] गहिए विहिभुत्ते, इत्थ य चउरो भवे भंगा ॥ १ ॥ [illegible] अ विहिगहियं, विहिभुत्तं तं गुरूहि पूषायं । सेसा [illegible] गहणे दिंते पनिज्जुहणंति । स्था० ३ ठा० । ([illegible])

दशविध उपघातः ॥

यदुद्गमेनाधाकर्मादिना षोडशविधेनोपहननं विराधनं [illegible] स्याकल्प्यता वा भक्तादेः स उद्गमोपघातः [illegible] इत्यादिदोषलक्षणाया यः स उत्पादनोपघातः । " [illegible] भणनात्सूत्रमिह दृश्यं कियदुत आह जाव परिहरणा [illegible] णोवघाए) एषणया शङ्कितादिभेदया यः स एषणोपघातः ([illegible] कम्मोवघाए) परिकर्म वस्त्रपात्रादिसमारचनं तेनोपघातः [illegible] व्यायामश्रमादिना शरीरस्य संयमस्य वोपघातः परिकर्मोपघातः । (परिहरणोवघाए) परिहरणा अनासेवनीयस्य [illegible] पोपकरणस्य सेवा तया यः स परिहरणोपघातस्तथा [illegible] तः श्रुतज्ञानापेक्षया प्रमादतो दर्शनोपघातः [illegible] घातः शङ्कितादिभिः (अवियत्तोवघाएत्ति) अवियत्तमप्रीतिकं तेनोपघातो विनयादेः (सारक्खणोवघाएत्ति) [illegible] शरीरादिविषये मूर्च्छायोगात् परिग्रहविरतेरिति [illegible] न इति । स्था० १० ठा० । " उवघायं च दसविहं, [illegible] च संकिलेसं च । परिवज्जंतो गुत्तो, रक्खामि महव्वए [illegible] पा० । घ० । मूलतो विनाशे, कर्म० । नि० चू० । [illegible] कर्मोपघातासम्पादने, अपकारे, वाच० ॥

उवघायकम्म-उपघातकर्मन्-न० [illegible] " [illegible] णिमित्तयाणं च, णिदुवघाय कम्माणं । [illegible] परिजाणिया " सूत्र० १ श्रु० ८ अ० ।

उवघायजणग-उपघातजनक-त्रि० उपघात [illegible] जनक, अनु० । [illegible] हिंसा धर्मोपघ्नादि ॥ विशे० । [illegible] " सू० १ ३० ।

[illegible]

स्वयं स्तोद्गन्धनभैरवप्रपातादिभिस्तदुपघातनाम । पं० सं० । कर्म० । स० । आ० । प्रव० ॥

उवघायणिस्सिय–उपघातनिश्रित–न० उपघाते प्राणि वधे निश्रितमाश्रितम । दशमे मृषाभेदे, स्था० १० ठा० ।

उवघायपकरग–उपघातप्रकरक–पुं० उपहतवेदोपकरणे पकरकभेदे, नि० चू० ५ उ० । अथोपघातप्रकरकमाह—

पुव्विमयाणं कम्मा–णं असुजफलविवागेण ।

नो उवहम्मइ वेओ, जीवाणं पावकम्माणं ॥

पूर्वं दुश्चीर्णानां दुराचारसमाचरणेनार्जितानां कर्मणामशुभफलो विपाक उदयो यद्भवति ततो जीवानां पापकर्मणां वेद उपहन्यते । तत्र चायं दृष्टान्तः—

जह हेमो उ कुमारो, इंदमहे तुम्भियानिमित्ताणं ।

मुच्छिय गिद्धो य मओ, वेओ वि य उवहओ तस्स ॥

यथा हेमो नाम कुमार इन्द्रमहे समागता यास्तुम्भिका बालिकास्तासां निमित्तेन मूर्च्छितो गृद्धोऽत्यन्तमासक्तः सन् मृतः पञ्चत्वमुपगतो वेदोऽपि च तस्योपहतः संजात इत्यक्षरार्थः । भावार्थः कथानकादवसेयः तच्चेदं हेमपुरे नगरे हेमकूडो राया हेमसंभवा भारिया तस्स पुत्तो भरतवियहेमसंनिभो हेमा नाम कुमारो सो य पत्तजोव्वणो अन्नया इंदमहे इन्दट्ठाणगओ पेच्छइ य । तत्थ नगरकुलबालियाणं रूववईणं पंचसय बलिपुप्फधूवं कडुच्छुयहत्थो ताओ दट्ठुं सेवगपुरिसे भणइ किमेयाओ बालियाओ किं वा अभिलसंतित्ति । तेहिं सिहियं इंदं ससंति वरं सोहणगं अभिलसंति भणिया य तेण सेवगपुरिसा अहमेयासिं इंदेण वरो दत्तो नेहयाओ अंतेउरम्मि । तेहिं ताओ घेत्तुं सव्वाओ अंतेउरे स्थूढाओ ताहे नागरजणो रायाणं उवट्ठिओ मोएहेत्ति तओ रन्ना भणियं किं मज्झ पुत्तो न रोयति तुहं जामाओ तओ नागरा तुण्हिक्कादिया एयं रन्नो सम्मतंति अविघ्नप्पगया नागरा कुमारेण तासंव्वा परिणीया सो पत्तु अतीव पसत्तो पमत्तस्स य तस्स सव्वयीयनीगाहो जाओ तओ तस्स वेओ पया य आओ य अन्नं भणति ताहिं चेव अणमिसे रोगत्ति कयियाहिं अद्दाएहिं मारिओ एयावदोपघातपरूक उच्यते । वृ० ४उ० ।

उवचय–उपचय–पुं० उपचीयते उपचयं नीयते इन्द्रियमनेनेति उपचयः । प्रायोग्यपुद्गलसंग्रहणरूपनिरिन्द्रियपर्याप्तौ प्रज्ञा० १५ पद । इन्द्रियशब्दे तदुपचय उक्तः ॥ शरीरे, आव० ४ अ० । पिण्डे, निकाये, समूहे, पि० । ओ० । वृद्धौ, भ० । अत्र दण्डकः—

जीवाणं जंते ! किं सोवचया सावचया सोवचयसावचया निरुवचया निरवचया गोयमा ! जीवा नो सोवचया नो सावचया नो सोवचयसावचया निरुवचया निरवचया । एगिंदिया तइयपदे सेसा जीवा चउहिं पएहिं जाणियव्वा । सिद्धाणं जंते पुच्छा गोयमा ! सिद्धा सोवचया नो सावचया नो सोवचयसावचया निरुवचय निरवचया । जीवाणं जंते ! केवइयं कालं निरुवचयनिरवचया ? गोयमा ! सव्वद्धं । नेरइयाणं जंते ! केवइयं कालं सोवचया ? गोयमा ! जहण्णं एक्कं समयं उक्कोसेणं आवलियाए असंखेज्जइजागं केवइयं कालं सावचया एवं चेव केवइयं कालं सोवचयसावचया एवं चेव केवइयं कालं निरुवचयनिरवचया ? गोयमा ! जहण्णं एक्कं समयं उक्कोसं बारसमुहुत्ता एगिंदिया सव्वे सोवचया सावचया सव्वद्धं । सेसा सव्वे सोवचया वि सोवचयसावचया वि । जहण्णं एक्कं समयं उक्कोसं आवलियाए असंखेज्जइ जागं अवट्ठिएहिं वक्कंति य कालो जाणियव्वो । सिद्धाणं जंते ! केवइयं कालं सोवचया गोयमा ! जहण्णं एक्कं समयं उक्कोसं अट्ठ समया केवइयं निरुवचयनिरवचया जहण्णं एक्कं उक्कोसं छम्मासा सेवं जंते जंतेत्ति ।

सोपचयाः सवृद्धयः प्राक्तनेष्वन्येषामुत्पादात् । सापचयाः प्राक्तनेभ्यः केषाञ्चिदुद्वर्त्तनात्सहानयोः सोपचयसापचया उत्पादोद्वर्त्तनाभ्यां वृद्धिहान्योर्युगपद्भावात् निरुपचयनिरपचया उत्पादोद्वर्त्तनयोरभावेन वृद्धिहान्योरभावात् । ननूपचयो वृद्धिरपचयस्तु हानिर्युगपद्द्वयमद्वयं चावस्थितत्वमेवं च शब्दभेदव्यतिरेकेण कोऽनयोः सूत्रयोर्भेदः ? उच्यते पूर्वत्र परिमाणमभिप्रेतमिह तु तदनपेक्षमुत्पादोद्वर्तनामात्रं ततश्चेह तृतीयभङ्गके पूर्वोक्तवृद्ध्यादिविकल्पानां त्रयमपि स्यात्तथाहि बहुतरोत्पादे वृद्धिर्बहुतरोद्वर्तने च हानिः । समोत्पादोद्वर्तनयोश्चावस्थितत्वमित्येवं भेद इति । (एगिंदिया तइयपयम्मि) सोपचयसापचया इत्यर्थः युगपदुत्पादोद्वर्तनाभ्यां वृद्धिहानिभावात् शेषभङ्गकेषु ते न सम्भवन्ति प्रत्येकमुत्पादोद्वर्तनयोस्तद्विरहस्य चाभावादिति । (अवट्ठिएहिं) निरुपचयनिरपचयेषु । (वक्कंति कालो भाणियव्वोति) विरहकालो वाच्यः ॥

वस्त्रस्य पुद्गलोपचयो जीवानां कर्मोपचयः ।

परुषाणि कर्कशानि वा दुष्टानि तानि वा परैर्दुःखेन तितिक्ष्यन्त इति दुस्तितिक्षाणि तान्यतिगत्याविगणय्य मुनिर्भगवान्विदितजगत्स्वभावः पराक्रममाणः सम्यक् तितिक्षते तथा आख्यातानि च तानि नृत्तगीतानि च आख्यातनृत्तगीतानि तान्युद्दिश्य न कामुकं विदधाति नापि दण्डयुद्धमुष्टियुद्धान्याकर्ण्य विस्मयोत्फुल्ललोचन उत्पुलकितरोमकूपो भवति ।

गढिए मिहो कहासु, समयम्मि णायसुत्ते विसोगे ।
अद्दक्खु एताइ सो उरालाइं, गच्छति णायपुत्ते असरणाए ॥ ९ ॥

ग्रथितो वा बद्धो मिथोऽन्योन्यं कथासु स्वैरं कथासु समये वा कश्चिदवबद्धस्तं स्त्रीद्वय वा परस्परकथायां गृद्धिमपेक्ष्य तस्मिन्प्रसरे ज्ञातपुत्रो भगवान् विशोको विगतहर्षश्च तान् मिथः कथावबद्धानमध्यस्थोऽद्राक्षीत् । एतान्यन्यानि वाऽनुकूलप्रतिकूलानि परीषहोपसर्गरूपाण्युदारानि दुष्प्रधर्षाणि दुःखान्यस्मरन् गच्छति संयमानुष्ठाने पराक्रमते ज्ञाताः क्षत्रियास्तेषां पुत्रोऽपत्यं ज्ञातपुत्रः वीरवर्द्धमानस्वामी स भगवानेनदुःसरणाय गच्छति पराक्रमत इति सम्बन्धः यदि वा शरणं गृहं नात्र शरणमस्तीत्यशरणः संयमस्तस्मै अशरणाय पराक्रमत इति । तथा हि किमत्र चित्रं यद्भगवानपरिमितबलपराक्रमः प्रतिज्ञामन्दरमारूढः पराक्रमते स भगवानप्रव्रजितोऽपि

प्रासुकाहारानुवर्त्यासीत् । श्रूयते च किल पञ्चत्वमुपगते मातापितरि समाप्तप्रतिज्ञोऽभूत् । ततः प्रविव्रजिषुः ज्ञातिभिरभिहितो यथा हि भगवन्मा कृथाः क्षतिक्षारावसेचनमित्येवमभिहितेन भगवताऽवधिना व्यज्ञायि यथा मय्यस्मिन्नवसरे प्रव्रजति सति बहवो भ्रष्टचित्ता विगतासवश्च स्युरित्यवधार्य तानुवाच कियन्तं कालं पुनरत्र मया स्थातव्यमिति । त ऊचुः संवत्सरद्वयेनास्माकं शोकापगमो भावीति भट्टारकोऽप्योमित्युवाच । किं त्वाहारादिकं मया स्वेच्छया कार्यं नेच्छाविघाताय भवद्भिरुपस्थातव्यं तैरपि यथाकथञ्चिदार्य ! तिष्ठत्विति तैः सर्वं तथैव प्रतिपेदे । ततो भगवांस्तद्वचनमनुवर्त्यात्मीयञ्च निष्क्रमणावसरमवगम्य संसारासारतां विज्ञाय तीर्थप्रवर्तनायोद्यत इति दर्शयितुमाह ॥

अवि साहिए दुवे वासे, सीतोदगं अभुच्चा णिक्खंते ।
एगत्तगए पिहियच्चे, से अभिण्णायदंसणे संते ॥१०॥
पुढविं च आउकायं च, तेउकायं च वाउकायं च ।
पणगाइं बीयहरियाइं, तसकायं सव्वसो णच्चा ॥११॥
एयाइं संति पडिलेहे, चित्तमंताइं से अभिण्णाय ।
परिवज्जियाण विहरित्था, इति संखाय से महावीरे ॥१२॥

अपि साधिके द्वे वर्षे शीतोदकमभुक्त्वा अनभ्यवहृत्यापीत्वेत्यर्थः अपरा अपि पादधावनादिकाः प्रासुकेनैव कृतवान् ततो निष्क्रान्तो यथा च प्राणातिपातं परिहृतवानेवं शेषव्रतान्यपि पालितवानिति । तथा एकत्वमिति तत एकत्वभावनाभावितान्तःकरणः पिहिता उपशमिताः क्रोधज्वाला येन स तथा । यदि वा पिहितार्चो गुप्ततनुः स भगवांश्छद्मस्थकालेऽभिज्ञातदर्शनः सम्यक्त्वभावनया भावितः शान्त इन्द्रियनोइन्द्रियैः स एवंभूतो भगवान् गृहवासेऽपि सावद्यारम्भत्यागी किं पुनः प्रव्रज्यायामिति दर्शयितुमाह "पुढविं च इत्यादि एयाइं इत्यादि" श्लोकद्वयस्याप्ययमर्थः । एतानि पृथिव्यादीनि चित्तमन्त्यभिज्ञाय तदारम्भं परिवर्ज्य विहृतवानिति क्रियाकारकसंबन्धस्तत्र पृथ्वी सूक्ष्मबादरभेदेन द्विधा सूक्ष्मा सर्वगा बादराऽपि श्लक्ष्णकठिनभेदेन द्विधैव । तत्र श्लक्ष्णा शुक्लादिपञ्चवर्णा कठिना तु पृथिवी शर्करावालुकादिषट्त्रिंशद्भेदा शस्त्रपरिज्ञानुसारेण द्रष्टव्या । अप्कायोऽपि सूक्ष्मबादरभेदाद् द्विधा । तत्र सूक्ष्मः सर्वगो बादरस्तु शुद्धोदकादिभेदेन पञ्चधा । तेजःकायोऽपि पूर्ववत्सूक्ष्मः बादरोऽङ्गारादि पञ्चधा । वायुरपि तथैव सूक्ष्मः बादर उत्कलिकादिभेदेन पञ्चधा । वनस्पतिरपि सूक्ष्मबादरभेदेन द्विधा । तत्र सूक्ष्मः सर्वगो बादरोऽग्रमूलस्कन्धपर्वबीजसम्मूर्च्छनभेदात्सामान्यतः षोढा पुनर्द्विधा प्रत्येकः साधारणश्च । तत्र प्रत्येको वृक्षगुच्छादिभेदाद् द्वादशधा साधारणस्त्वनेकविध इति । स एवं भेदभिन्नोऽपि वनस्पतिः सूक्ष्मः [illegible] बादरेन्द्रियग्राह्यत्वाच्च [illegible] बादरो भेदेन संगृहीतस्तथा पनकग्रहणेन बीजाङ्कुर- [illegible] ग्रहणं बीजग्रहणेन [illegible] पृथिव्यादीनि [illegible] नत्वा । चित्त- [illegible] पृथिव्यादी- [illegible] संसारमुपगतानामनु- [illegible] ॥

अदु थावरा य तसत्ताए, तसजीवा य थावरत्ताए ।
अदु वा सव्वजोणिया सत्ता, कम्मुणा कप्पिया पुढो बाला ॥१३॥
भगवं च एवमन्नेसिं, सोवहिए हु लुप्पती बाले ।
कम्मं च सव्वसो णच्चा, तं पडियाइक्खे पावगं भगवं ॥१४॥
दुविहं समेच्च मेहावी, किरियमक्खायमणेलिसं णाणी ।
आयाणसोयमतिवायसोयं जोगं च सव्वसो णच्चा ॥१५॥

अथानन्तर्ये स्थावराः पृथिव्यप्तेजोवायुवनस्पतयस्ते त्रसतया द्वीन्द्रियादितया विपरिणमन्ते कर्मवशाद् गच्छन्ति चशब्दः समुच्चयार्थस्तथा त्रसजीवाश्च कृम्यादयः स्थावरतया पृथिव्यादित्वेन कर्मनिघ्नाः समुत्पद्यन्ते । तथा चान्यत्राप्युक्तम् "अयं णं भंते ! जीवे पुढविकाइयत्ताए उववन्नपुव्वे ? हंता गोयमा ! असइं अदुवा अणंतखुत्तो जाव उववन्नपुव्वेत्ति" अथवा सर्वा योनय उत्पत्तिस्थानानि येषां सत्त्वानां ते सर्वयोनिकाः सत्त्वाः सर्वगतिभाजस्ते च बालाः रागद्वेषाकलिताः स्वकृतेन कर्मणा पृथक् सर्वयोनिभाक्त्वेन च कल्पिता व्यवस्थापिता इति । तथा चोक्तम् " णत्थि किर सो पएसो लोए वालग्गकोडिमेत्तो वि । जम्मणमरणाबाहा अणेगसो जत्थ णवि पत्ता" अपि च । रङ्गभूमिर्न सा काचिच्छुद्धा जगति विद्यते । विचित्रैः कर्मनेपथ्यैर्यत्र सत्त्वैर्न नाटितम्" मित्यादि । किञ्च (भगवं च इत्यादि) भगवांश्च एवं मन्यमानः स्याद्वादमवगम्य ज्ञातवान् सह उपधिना वर्तत इति सोपधिकः द्रव्यभावोपधियुक्तः हु यस्मात्कारणे लुप्यते [illegible] कर्मणा [illegible] दामनुभवत्येवाज्ञो बाल इति । यदि वा हु इतो यस्मात् [illegible] कर्मणा लुप्यते बालस्तस्मात्कर्म सर्वशो ज्ञात्वा तत्कर्मोपादानं [illegible] तदुपादानं च पापकर्मानुष्ठानं भगवान् वर्द्धमानस्वामी [illegible] । किञ्च (दुविहं इत्यादि) द्वे विधे प्रकारावस्येति द्विविधं हि कर्म ईर्याप्रत्ययं सांपरायिकञ्च तद् द्विविधमपि समेत्य ज्ञात्वा मेधावी सर्वभावज्ञः क्रियां संयमानुष्ठानरूपां कर्मोच्छेत्रीमनीदृशीमनन्य- सदृशीमाख्यातवान् किंभूतो ज्ञानी केवलज्ञानी [illegible] परमाख्यातवानिति दर्शयति आदीयते कर्मानेनेत्यादानं दुष्प्रणिहितमिन्द्रियमादानञ्च श्रोतश्च आदानश्रोतस्तज्ज्ञात्वा [illegible] तच्छ्रोतः उपलक्षणार्थत्वाद्स्य मृषावादादिकमपि ज्ञात्वा [illegible] श्च मनोवाक्कायलक्षणं दुष्प्रणिहितं सर्वशः सर्वप्रकारैः [illegible] ति ज्ञात्वा श्रोतःक्रियासंयमलक्षणामाख्यातवानिति संबन्धः किञ्च ।

अतिवातियं अणाउट्टिं, सयमन्नेसिं अकरणयाए ।
जस्सित्थिओ परिण्णाया, सव्वकम्मावहाओ से अदक्खू ॥१६॥

आकुट्टिर्हिंसा न आकुट्टिरनाकुट्टिरहिंसां संश्रयः । [illegible] स्तां पातकादतिपातकान्निवृत्तस्तामाश्रित्य [illegible] रणतया व्यापारतया प्रवृत्त इति । तथा यस्य स्त्रियः [illegible] द्विपाकतश्च परिज्ञाता भवन्ति । सर्वं कर्मावहन्तीति सर्वकर्मावहाः सर्वपापोपादानभूताः स यथावस्थित [illegible] संसारस्वभावं ज्ञातवान् । एतदुक्तं भवति । [illegible] स्त्रीपरिहारेण च स भगवान् परमार्थदर्शी इति । मूलगुण- [illegible] उत्तरगुणप्रविकटयिषयाह ॥

अहागडं ण से सेवे, सव्वसो कम्मुणा अदक्खू ।
जं किंचि पावगं भगवं, तं अकुव्वं वियडं भुंजित्था ॥१७॥

यथा येन प्रकारेण पृष्टाऽपृष्टो वा कृतं यथाकृतमाधाकर्मादि [illegible] नासौ सेवते निषेवते । [illegible] कर्मणा अष्टप्रकारेण बन्धमद्राक्षीत् । [illegible]

सेवते इति दर्शयति । यत्किञ्चित्पापकं पापोपादानकारणं तदुद्गमादिदोषदुष्टं प्रासुकमप्युक्तमुपभुक्तवान् । किञ्च

णो सेवती य परवत्थं, परपाए वि से ण भुंजित्था ।

परिवज्जियाण उ माणं, गच्छति संखडिं असरणाए ॥ १८ ॥

नासेवते च नोपभुङ्क्ते च परवस्त्रं प्रधानं वस्त्रं परस्य वा वस्त्रं परवस्त्रं नासेवते । तथा परपात्रेऽप्यसौ नो भुङ्क्ते तथा परिवर्ज्यापमानमवगणय्य गच्छत्यसावाहाराय संस्कृत्यन्ते प्राणिनोऽस्यामिति संखडिस्तामाहारपाकस्थानमित्यर्थः अशरणाय शरणमनाश्रयमानोऽदीनमनस्कः कल्प इति कृत्वा परीषहविजयार्थं गच्छतीति । किञ्च

मायण्णे असणपाणस्स, णाणुगिद्धे रसेसु अपडिण्णे ।

अच्छिं पि णो पमज्जिज्जा, णो वि य कंडूयए मुणी गायं ॥ १९ ॥

आहारस्य मात्रां जानातीति मात्रज्ञः कस्याश्यत इत्यशनं शाल्योदनादि पीयत इति पानं द्राक्षापानकादि तस्य च । तथा नानुगृद्धो रसेषु विकृतिषु भगवतो हि गृहस्थभावेऽपि रसेषु गृद्धिर्नासीत् । किं पुनः प्रव्रजितस्येति । तथा रसेष्वेव प्रहणं प्रत्यप्रतिज्ञो यथा मयाऽद्य सिंहकेसरामोदका एव ग्राह्या इत्येवंरूपप्रतिज्ञारहितोऽन्यत्र कुल्माषादौ सप्रतिज्ञ एव । तथा अक्ष्यपि रजःकणकाद्यपनयनाय नो प्रमार्जयेत्नापि च गात्रं मुनिरसौ कण्डूयते काष्ठादिना गात्रस्य कण्डूयनं नोपनोदं न विधत्त इति । किञ्च ।

अप्पं तिरियं पेहाए, अप्पं पिट्ठओ पेहाए ।

अप्पं बुइए पडिभाणी, पंथपेही चरेजते माणे ॥ २० ॥

अल्पशब्दोऽभावे वर्तते अल्पं तिर्यक् तिरश्चीनं गच्छन् प्रेक्षते तथाऽल्पं पृष्ठतः स्थित्वोत्प्रेक्षते तथा मार्गादिः केनचित्पृष्टः सन्नल्पं प्रतिभाषी मन्दल्पं ब्रूते मौनेन गच्छत्येव केवलमिति दर्शयति पथिप्रेक्षी चरेद्यतमानः प्राणिविषये यत्नवानिति । किञ्च

सिसिरंसि अद्धपडिवन्ने, तं वोसिरिज्ज वत्थमणगारे ।

पसारेत्तु बाहुं परक्कमे, णो अवलंबियाण खंधंसि ॥ २१ ॥

अर्द्धप्रतिपन्ने शिशिरे सति तद्देवदूष्यवस्त्रं व्युत्सृज्यानगारो भगवान् प्रसार्य बाहुं पराक्रमते । न तु पुनः शीतार्दितः सन् संकोचयति नापि स्कन्धौ वक्षं व्यतितिष्ठतीति । सांप्रतमुपसंजिहीर्षुराह ॥

एस विही अणुक्कंते, माहणेण मईमया ।

बहुसो अपडिण्णेण, भगवया एवं रीयंति त्ति बेमि ॥

एष चर्याविधिरनन्तरोक्तोऽन्वाक्रान्तोऽनुचीर्णः (माहणेत्ति) श्रीवर्द्धमानस्वामिना मतिमता विदितवेद्येन बहुशोऽनेकप्रकारमप्रतिज्ञेनानिदानेन भगवता ऐश्वर्यादिगुणोपेतेन एवमनेन यथा भगवदनुचीर्णेनान्ये मुमुक्षवोऽशेषकर्मक्षयाय साधवो रीयन्ते गच्छन्तीति । इत्यधिकारपरिसमाप्तौ ब्रवीमीति पूर्ववदुपधानश्रुताध्ययनस्य प्रथमोद्देशकः इति उक्तः प्रथमोद्देशकः । साम्प्रतं द्वितीय आरभ्यते । अस्य चायमभिसंबन्ध इहानन्तरोद्देशके भगवतश्चर्याऽभिहिता । तत्र चावश्यं कदाचिद्यथाऽवसरतया भाव्यमतस्तत्प्रतिपादनायायमुद्देशकः प्रतन्यते इत्यनेन संबन्धेनायातस्यास्योद्देशकस्यादिसूत्रम् ॥

चरियासणाई सेज्जाओ, एगतियाओ ज्ज ओम्नइत्ताओ ।

आइक्खताइं सयणासणाइं, जाइं सेवित्थ से महावीरे ॥

चर्यायामवश्यंभावितया यानि शय्यासनान्यभिहितानि सामर्थ्यायातानि शयनासनानि शय्याफलकादीन्याचक्ष्वेति सुधर्मस्वामी जम्बूनाम्नाऽभिहितो यानि सेवितवान्महावीरो वर्द्धमानस्वामी । अयञ्च श्लोकश्चिरन्तनटीकाकारेण न व्याख्यातः । तत्र किं सुगमत्वादुताभावात् सूत्रपुस्तकेषु तु दृश्यते तदभिप्रायं च वयं न विद्म इति प्रश्नवति प्रतिवचनमाह (आवेसण इत्यादि) भगवतो ह्याहाराभिग्रहवत्प्रतिमाव्यतिरेकेण प्रायशो न शय्याऽभिग्रह आसीत् नवरं यत्रैव चरमपौरुषी भवति तत्रैवानुज्ञाप्य स्थितवान् । तद्दर्शयति ॥

आवेसणसभापवासु, पणियसालासु एगया वासो ।

अदुवा पलियट्ठाणेसु, पलालपुंजेसु एगदा वासो ॥ २ ॥

आ समन्ताद्विशन्ति यत्र तदावेशनं शून्यगृहं सभा नाम ग्रामनगरादीनां तद्वासिलोकाच्छायिकार्थमागन्तुकशयनार्थं च कुड्याद्याकृतिः क्रियते । प्रपा उदकस्थानम् आवेशनं च सभा च प्रपा चेत्यावेशनसभाप्रपास्तासु । तथा पण्यशालासु हट्टेषु एकदा कदाचिद्वासो भगवतोऽथवा (पलियंति) कर्म्म तस्य स्थानं कर्म्मस्थानम् । अयस्कारवर्द्धकिकुड्यादिकम् । तथा पलालपुञ्जेषु मञ्चोपरिव्यवस्थितेष्वधो न पुनस्तेष्वधः सुषिरत्वादिति । किञ्च ॥

आगंतारे आरा-मागारे णगरे वि एगदा वासो ।

सुसाणे सुण्णगारे वा, रुक्खमूले वि एगदा वासो ॥ ३ ॥

प्रसङ्गायाता आगन्त्य वा यत्र तिष्ठति तदागन्तारं तत्पुनर्ग्रामानगराद्बहिःस्थानं तत्र यथा आरामे आगारं गृहमारामागारं तत्र वा तथा नगरे वा एकदा वासस्तथा श्मशाने शून्यागारे वा आवेशनशून्यागारयोर्भेदः स कुड्याकुड्यकृतो वृक्षमूले वा एकदा वासः किञ्च ॥

एतेहिं मुणी सयणेहिं, समणे आसि पतेरसवासे ।

राइंदियं पि जयमाणे, अप्पमत्ते समाहिए झाति ॥ ४ ॥

एतेषु पूर्वोक्तेषु शयनेषु वसतिषु स मुनिर्जगत्त्रयवेत्ता अनुवर्षं वर्षासु वा श्रमणस्तपस्युद्युक्तः समना वासीत् निश्चलमना इत्यर्थः । कियन्तं काल यावदिति दर्शयति (पतेरसवासेत्ति) प्रकर्षेण त्रयोदश वर्षं यावत्समस्तं रात्रिन्दिवमपि यतमानः संयमानुष्ठानं उद्युक्तवांस्तथा अप्रमत्तो निद्रादिप्रमादरहितविस्रोतसिकारहितो धर्मध्यानं शुक्लध्यानं वा ध्यायतीति । किञ्च ।

णिद्दं पि णो पगामाए, सेवइ य भगवं उट्ठाए ।

जग्गावति य अप्पाणं, इसिं साति य अपडिण्णे ॥ ५ ॥

निद्राप्रत्ययसादप्रमादरहितो न प्रकामतः सेवते तथा च किल भगवतो द्वादशसु संवत्सरेषु मध्येऽस्थिकग्रामे व्यन्तरोपसर्गान्ते कायोत्सर्गव्यवस्थितस्यैवान्तर्मुहूर्त्तं यावत् स्वप्नदर्शनाभ्यासितः सकृन्निद्राप्रमाद आसीत्ततोऽपि चोत्थायात्मानं जागरयति कुशलानुष्ठाने प्रवर्त्तयति । यत्रापि वसत्यासीत्तत्राप्यप्रतिज्ञः प्रतिज्ञारहितो न तत्रापि स्वापाद्युपगमपूर्वकं शयीत इत्यर्थः । किञ्च ।

संबुज्झमाणे पुणरवि, आसंसु भगवं उट्ठाए ।

णिक्खम्म एगया राओ, बहिं चंकमित्ता मुहुत्तागं ॥ ६ ॥

स मुनिर्निद्राप्रमादादुत्थितचित्तः संबुध्यमानः संसारपातादायं प्रमाद इत्येवमवगच्छन् पुनरप्रमत्तो भगवान् संयमोत्थानेनोत्थाय यदि तत्रान्तर्व्यवस्थितस्य कुशचिन्निद्राप्रमाद [illegible] तत-

यत्र विहरन् इत्याद्यनन्तरोद्देशकस्यायमिति इति ग्रन्थेनिश्चयः पूर्वश्रुतस्यानन्तरस्य द्वितीयोद्देशकः समाप्तः । उक्तो द्वितीयो-द्देशकः । साम्प्रतं तृतीय आरभ्यते । अस्य चायमभिसंबन्धः इहा-नन्तरोद्देशके भगवतः शय्याः प्रतिपादितास्तासु स्थितेन ये यथोपसर्गाः परीषहाश्च सोढास्तत्प्रतिपादनार्थमिदमुपक्रम्यते । इत्यनेन संबन्धेनायातस्यास्योद्देशकस्यादिसूत्रम् ।

तणफासे सीयफासे य, तेउफासे य दंसमसगे य ।
अहियासए सया समिए, फासाइं विरूवरूवाइं ॥ १ ॥

तृणानां कुशादीनां स्पर्शास्तृणस्पर्शास्तथा शीतस्पर्शाः उष्ण-स्पर्शा आतपनादिकाले भवन्ति । यदि वा गच्छतः किल भगवत-स्तेजःकाय [illegible] दंशमशकादयश्च एतांस्तृणस्पर्शादि-कानधिसहितवान् भगवान् [illegible] समितिभिः समितो वेति । किञ्च ।

अह दुच्चरलाढमचारी, वज्जभूमिं च सुब्भभूमिं च ।
पंतं सेज्जं सेविंसु, आसणगाइं चेव पंताइं ॥ २ ॥

अथानन्तर्ये दुःखेन चर्यतेऽस्मिन्निति दुश्चरः स चासौ लाढश्च जनपदविशेषो दुश्चरलाढस्तं चीर्णवानिति गतवान् । स च द्विरूपो वज्रभूमिः शुभ्रभूमिः इत्यादिकमपि विहृतवांस्तत्र च प्रान्तां शय्यां वसतिं शून्यगृहादिकामनेकोपद्रवोपद्रुतां सेवितवांस्तथा प्रान्तानि आसनानि पांशूत्करशर्करालोष्टाद्युपचितानि काष्ठानि च दुर्घटितान्यासेवितवानिति । किञ्च ।

लाढेहिं तस्सुवसग्गा, बहवे जाणवया लूसिंसु ।
अह लूहदेसिए भत्ते, कुक्कुरा तत्थ हिंसिंसु णिवइंसु ॥ ३ ॥

लाढा नाम जनपदविशेषास्तेषु च द्विरूपेष्वपि लाढेषु तस्य भगवतो बहव उपसर्गाः प्रायशः प्रतिकूला आक्रोशाश्च भक्षणा-दयश्च [illegible] दर्शयति जनपदे तथा जानपदा [illegible] भगवन्तं लूषितवन्तो दन्तनखोल्मुकदण्डमुष्ट्यादिभिर्जघ्नुः । [illegible] तत्र [illegible] महाविघ्नः [illegible] तथा तत्र कुक्कुराः [illegible] निपेतुरिति । किञ्च ॥

अप्पे जणे णिवारेइ, लूसणए सुणए दसमाणे ।
छुछुकारिंति आहंसु, समणं कुक्कुरा दसंतु त्ति ॥ ४ ॥

अल्पः स्तोकः स जनो यदि परं [illegible] निवारयति [illegible] [illegible] [illegible] जनपदे [illegible] ।

एलिक्खए जणे भुज्जो, बहवे वज्जभूमि फरुसासी ।
लट्ठिं गहाय णालीयं, समणा तत्थ एव विहरिंसु ॥ ५ ॥

ईदृक्षः पूर्वोक्तस्वभावो [illegible] जनपदे [illegible] [illegible] [illegible] [illegible] [illegible] ।

एवं तत्थ विहरंता, पुट्ठपुव्वा अहेसि सुणएहिं ।
संलुंचमाणा सुणएहिं, दुच्चरगाणि तत्थ लाढेहिं ॥ ६ ॥

[illegible] विहरन्तः [illegible] संलुच्यमाना [illegible] दुश्चराणि [illegible] ।

णिहाय दंडं पाणेहिं, तं कायं वोसज्जमणगारे ।
अह गामकंटए भगवं, ते अहियासए अभिसमेच्चा ॥ ७ ॥

[illegible]

णाओ संगामसीसे वा, पारए तत्थ से महावीरे ।
एवं पि तत्थ लाढेहिं, अलद्धपुव्वो वि एगया गामो ॥ ८ ॥

[illegible]

उवसंकमंतमपडिण्णं, [illegible]
[illegible]

[illegible]

हयपुव्वो [illegible]
अदु [illegible]

[illegible]

[illegible]
[illegible]

[illegible]

[illegible]
[illegible]

[illegible]

यथा हि संग्रामशिरसि शूरोऽक्षोभ्यः परैः कुन्तादिभिर्भिद्यमानोऽपि धर्मंसा संवृताङ्गो न भङ्गमुपयातीत्येवं स भगवान्महावीरस्तत्र लाढादिजनपदे परीषहानीकतुद्यमानोऽपि प्रतिसेव्यमानश्च परुषान् दुःखविशेषान् मेरुरिवाचलो निष्प्रकम्पो धृत्या संवृताङ्गो भगवान् रीयते स्म ज्ञानदर्शनचारित्रात्मके मोक्षाध्वनि पराक्रमते स्मेति । उद्देशकार्थमुपसंजिहीर्षुराह ॥

एस विही अणुक्कंतो, माहणेणं मईमया ।
बहुसो अपडिण्णेणं, भगवता एव रीयंति त्तिबेमि ॥१४॥

"एसविही" इत्यादि पूर्ववत् उपधानश्रुताध्ययनस्य तृतीयोद्देशकः परिसमाप्त इति उक्तस्तृतीयोद्देशकः । सांप्रतं चतुर्थ आरभ्यते । अस्य चायमभिसंबन्धः । इहानन्तरोद्देशके भगवतः परीषहोपसर्गाधिसहनं प्रतिपादितं तदिहापि रोगातङ्कपीडां चिकित्सानुदासीन सम्यगधिसहते तदुत्पत्तौ च नितरां तपश्चरणायोद्यच्छतीत्येनत्प्रतिपाद्यते तदनेन संबन्धेनायातस्यास्योद्देशकस्यादिसूत्रम् ।

ओमोदरियं चाएइ, अपुट्ठे वि भगवं रोगेहिं ।
पुट्ठो वि से अपुट्ठो वा से, णो सेसाइज्जति ते इच्छं ॥१॥

[illegible] पुनरवमोदर्यं भगवांस्तु पुनः रोगैरस्पृष्टोऽपि वातादिक्षोभाभावेऽप्यवमौदर्यं स्यूनोदरतां शक्नोति कर्तुं लोको हि रोगैरभिभूतः [illegible] भगवांस्तु तदभावेऽपि विधत्त इत्यपिशब्दार्थः । अथवा स्पृष्टोऽपि कासश्वासादिभिर्द्रव्यरोगैः [illegible] स्पृष्टोऽप्यस्पृष्टो वा [illegible] । अथ किं द्रव्यरोगाभावाद्भगवतो न [illegible] उच्यते भगवतो हि न [illegible] कासश्वासादयो भवन्त्यागन्तुकास्तु [illegible] भवन्ति । स च भगवान् स्पृष्टो वा [illegible] अस्पृष्टो वा कासादिभिर्नासौ चिकित्सामभिलषति न [illegible] पीडोपशमं प्रार्थयतीत्येतदेव दर्शयितुमाह ।

संसोहणं च वमणं च, गायब्भंगणं च सिणाणं च ।
संबाहणं च ण से कप्पइ, दंतपक्खालणं परिण्णाय ॥२॥

[illegible] शोधनं विरेचनं निरूहादिभिस्तथा वमनं [illegible] गात्राभ्यङ्गनम् [illegible] स्नानं [illegible] संबाधनञ्च हस्त[illegible] न कल्पते । तथा [illegible] इत्यादि [illegible] । किञ्च ।

विरए य गामधम्मेहिं, रीयइ माहणे अबहुवाई ।
सिसिरंमि एगया भगवं, छायाए झाइ आसी य ॥३॥

[illegible] (माहणेत्ति) [illegible] शिशिरे [illegible] । किञ्च

[illegible] अभिवावे ।
[illegible] ॥ ४ ॥

[illegible] सप्तम्यर्थे षष्ठी । ग्रीष्मेष्वातापयति [illegible] तिष्ठत्युत्कुटुकासनोऽभितापं ताप्याभिमुख्यमिति । [illegible] धर्माधारं देहं यापयति स्म रूक्षेण स्नेहरहितेन [illegible] मन्थुकुल्माषेण ओदनञ्च कोद्रवौदनादि मन्थु बदरचूर्णादि कुल्माषाश्च माषविशेषा पर्योत्तरापथे धान्यविशेषभूताः [illegible] तमाषाः वा सिद्धमाषा वा ओदनमन्थुकुल्माषाणामिति समाहारद्वन्द्वः । तेनात्मानं यापयतीति सवन्ध इत्येतदेव कालावधिविशेषणतो दर्शयितुमाह ॥

एयाणि तिण्णि पडिसेवे, अट्ठमासे अजावए भगवं ।
अपि इत्थं एगया भगवं, अद्धमासं अदुवा मासं पि ॥५॥

एतान्योदनादीन्यनन्तरोक्तानि प्रतिसेवते तानि च [illegible] द्वन्द्वेन तिरोहितावयवसमुदायप्रधानेन निर्देशः [illegible] स्यादार्षत्वात् यथा त्रीण्यपि समुदितानि प्रतिसेवन इत्यतस्तदुदासाय त्रीणीत्यनया संख्यया निर्देश इति त्रीणि समस्तानि व्यस्तानि वा यथालाभं प्रतिसेवित इति । कियन्तं कालमिति [illegible] अष्टौ मासानृतुबद्धसंज्ञकानात्मानमयापयत् [illegible] ति । तथा पानमप्यर्द्धमासं भगवानपीतवानपि च ।

अवि साहिए दुवे मासे, छप्पि मासे अदुवा विहरित्था ।
राओवरायं अपडिण्णे, अन्नगिलायं एगया भुंजे ॥६॥

मासद्वयमपि साधिकमथवा षडपि मासान् [illegible] भगवान् पानकमपीत्वाऽपि रात्रोपरात्रमित्यहर्निशं विहृतवान् [illegible] सूत्रेऽप्रतिज्ञः पानाद्युपगमरहित इत्यर्थस्तथा [illegible] पर्युषितं तदेकदा भुक्तवानिति । किञ्च ।

अदुवा अट्ठमेणं दसमेणं, छट्ठेणं एगया भुंजे ।
दुवालसमेण एगया भुंजे, पेहमाणे समाहिं अपडिण्णे ॥७॥

षष्ठेनैकदा भुङ्क्ते तथा [illegible] विधत्ते [illegible] द्वयमुक्त्वा चतुर्थेऽहन्येकभक्तमपि विधत्ते [illegible] भक्तद्वयं मध्यदिवसयोश्च [illegible] क्तानां परित्यागात् षष्ठं भवत्येवं दिनादिवृद्ध्या [illegible] अथवा अष्टमेन दशमेनाथवा द्वादशेनैकदा कदाचिद् [illegible] समाधिं शरीरसमाधानं प्रेक्षमाणः पर्यालोचयन् [illegible] [illegible] । तथा अप्रतिज्ञो [illegible]

णच्चा णं से महावीरे, णो वि य पावगं सयमकासी ।
अन्नेहिं वि ण कारित्था, कीरंतं पि णाणुजाणित्था ॥८॥

ज्ञात्वा हेयोपादेयं स महावीरः [illegible] पापकं स्वयमकार्षीत् [illegible] क्रियमाणमपि [illegible] नीति । किञ्च ।

गामं पविस्स णगरं वा, घासमेसे कडं परट्ठाए ।
सुविसुद्धमेसिया भगवं, आयतजोगयाए सेवित्था ॥९॥

ग्रामं नगरं वा प्रविश्य भगवान् [illegible] [illegible] तथा सुविशुद्धम् [illegible] [illegible] [illegible] [illegible] [illegible] ।

अदुवा य सा दिगिंछत्ता, जे अन्ने रसेसिणो सत्ता ।
घासेसणाए चिट्ठंति, सययं निवतिए य पेहाए ॥१०॥

अथ ग्रामं पर्यटतो भगवतः पथि वायसाः काकाः (दिगिंच्छित्ति) बुभुक्षा तया आर्त्ता ये चान्ये रसैषिणः पानार्थिनः कपोतपारावतादयः सत्त्वाः । तथा आमिषरणार्थमन्वेषणार्थञ्च ये तिष्ठन्ति तान् सततमनवरत निपतितान् भूमौ प्रेक्ष्य दृष्ट्वा तेषां वृत्तिव्यवच्छेदं वर्जयन् मन्दमाहारार्थी पराक्रमते । किञ्च ॥

अदु माहणं च समणं वा, गामपिंडोलगं च अतिहिं वा ।
सोवागमूसियारिं वा, कुक्कुरं वा चिट्ठियं वा पुरओ ॥ ११ ॥
वित्तिच्छेदं वज्जंतो, तेसप्पत्तियं परिहरंतो ।
मंदं परिक्कमे भगवं, अहिंसमाणो घासमेसित्था ॥ १२ ॥

अथ ब्राह्मणं ग्रामार्थमुपस्थितं दृष्ट्वा तथा श्रमणं शाक्याजीवकपरिव्राजकतापसनिर्ग्रन्थानामन्यतमं ग्रामपिण्डोलक इति भिक्षयोदरभरणार्थं ग्राममाश्रितस्तुन्दपरिमृजो द्रमक इति तथा अतिथिं वा आगन्तुकं तथा श्वपाकं चाण्डालं मार्जारं वा कुक्कुरं वाऽपि श्वानं विविधं स्थितं पुरतोऽग्रतः समुपलभ्य तेषां वृत्तिच्छेदं वर्जयन्मनसो दुष्प्रणिधानञ्च वर्जयन्मन्दमनास्तेषां त्रासमकुर्वन् भगवान् पराक्रमते । तथाऽपरांश्च कुन्थुकादीन् जन्तून् अहिंसन् ग्रासमन्वेषितवानिति । किञ्च ।

अवि सूइयं च सुक्कं वा, सीयपिंडं पुराणकुम्मासं ।
अदु बक्कसं पुलागं वा, लद्धे पिंडे अलद्धए दविए ॥ १३ ॥

" सूइयंति " दध्यादिना भक्तमार्द्रीकृतमपि तथाभूतं शुष्कं वा वल्लचनकादि शीतपिण्डं वा पर्युषितभक्तं तथा पुराणं कुल्माषं वा बहुदिवससिद्धस्थितकुल्माषं (बक्कसंति) चिरन्तनधान्यौदनं यदि वा पुरातनं सत् कुपिण्डं बहुदिवससम्भृतगोरसगोधूममण्डकञ्चेति तथा पुलाकं यवनिष्पादितं तदेवंभूतं पिण्डमवाप्य रागद्वेषविरहाद्द्रविको भगवांस्तथाऽन्यस्मिन्नपि पिण्डे लब्धे अलब्धे वा द्रविक एव भगवानिति । तथा हि लब्धे पर्याप्ते शोभने वा नोत्कर्षं याति नाप्यलब्धे अपर्याप्ते अशोभने वाऽऽत्मानमाहारं दातारं वा जुगुप्सति । किञ्च ॥

अवि झाति से महावीरे, आसणत्थे अकुक्कुए झाणं ।
उड्ढं अहे तिरियं च, लोए झायती समाहिमपडिण्णे ॥ १४ ॥

तस्मिंस्तथाभूत आहारे लब्ध उपभुक्ते अलब्धे वाऽपि ध्यायति स महावीरो दुष्प्रणिधानादिना नापध्यानं विधत्ते किम्भूतो ध्यायतीति दर्शयत्यासनस्थ उत्कुटुकासनादिकावीरासनस्थोऽकौत्कुच ईषन्मुखविकारादिरहितो ध्यानं धर्म्मशुक्लयोरन्यतरद्ध्यायतीति किं पुनस्तत्र ध्येयं ध्यायतीति दर्शयितुमाह । ऊर्ध्वमधस्तिर्यक् लोकस्य ये जीवपरमाण्वादिकास्तान् व्यवस्थितास्तान् द्रव्यपर्यायनित्यानित्यादिरूपतया ध्यायति । तथा समाधिमन्तःकरणशुद्धिञ्च प्रेक्षमाणोऽप्रतिज्ञो ध्यायतीति । किञ्च ॥

अकसाई विगतगेही य, सद्दरूवेसु अमुच्छिए झाति ।
छउमत्थो वि परक्कममाणो ण पमायं सइं पि कुव्वित्था ॥ १५ ॥

न कषायी तदुदयापादितभ्रुकुट्यादिकार्याभावात् । तथा विगता गृद्धिर्गार्द्ध्यं यस्यासौ विगतगृद्धिः तथा शब्दरूपादिष्विन्द्रियार्थेष्वमूर्च्छितो ध्यायति मनोऽनुकूलेषु न रागमुपयाति नाप्रीतिकरेषु द्वेषवशगोऽभूदिति । तथा छद्मनि ज्ञानदर्शनावरणमोहनीयान्तरायात्मके तिष्ठतीति छद्मस्थ इत्येवंभूतो भगवानेकप्रकारं सदनुष्ठाने पराक्रममाणो न प्रमादं सकृदपि कृतवानिति । किञ्च ।

सयमेव अभिसमागम्म, आयतजोगमायसोहीए ।
अभिनिव्वुडे अमाइल्ले, आवकहं भगवं समितासी ॥ १६ ॥

स्वयमेवात्मना तत्त्वमभिसमागत्य विदितसंसारस्वभावः स्वयंबुद्धः सन् तीर्थप्रवर्त्तनायोद्यतवांस्तथा चोक्तम् । 'आदित्याद्यैर्विबुधगण इमं विस्मरन्त्यां त्रिलोक्या-मास्कन्दन्तं पदमनुपमं वन्दितुं चानुवाच । तीर्थं नाथ लघु भवभयच्छेदि तूर्णं विधत्स्वेत्येतद्वाक्यं त्वदवगतये नाकिमुख्यान्नियोगः' इत्यादि कथं तीर्थप्रवर्त्तनायोद्यत इति दर्शयत्यात्मशुद्ध्या कर्म्मक्षयोपशमक्षयलक्षणया आयतयोगं सुप्रणिहितमनोवाक्कायात्मकं विधाय विषयकषायाद्युपशमादिभिर्निर्वृतः शीतीभूतः तथाऽमायावी मायारहित उपलक्षणार्थत्वादस्याक्रोधाद्यपि द्रष्टव्यं यावत्कथमिति यावज्जीवं भगवान् पञ्चभिः समितिभिः समितस्तथा तिसृभिर्गुप्तिभिर्गुप्तश्चासीदिति । श्रुतस्कन्धाध्ययनोद्देशकार्थमुपसंजिहीर्षुराह ।

एस विही अणुक्कंतो, माहणेणं मईमया ।
बहुसो अपडिण्णेणं, भगवया एवं रीयंति त्ति बेमि ॥

ओहाणं सुयं सम्मत्तं ॥

एषोऽनन्तरोक्तः शस्त्रपरिज्ञादेरारभ्य योऽभिहितः सोऽनुक्रान्तोऽनुष्ठित आसेवनापरिज्ञया सेवित' केन श्रीवर्द्धमानस्वामिना मतिमता ज्ञानचतुष्टयान्वितेन बहुशोऽनेकशोऽप्रतिज्ञेनानिदानेन भगवतैश्वर्यादिगुणोपेतेनातोऽपरोऽपि मुमुक्षुरनेनैव भगवदाचीर्णेन मोक्षमार्गेण यथा आत्महितमाचरन् रीयते पराक्रमते इतिरधिकारपरिसमाप्तौ ब्रवीमीति सुधर्म्मस्वामी जम्बूस्वामिने कथयति सोऽहं ब्रवीमि येन मया भगवद्वदनारविन्दादर्थजातं निर्यातमवधारितमिति उक्तोऽनुगमः । आचा० १ श्रु० ९ अ० ।

उवहाणाइयार—उपधानातिचार—पुं० आचाराम्लादितपसा योगविधानरूपस्योपधानस्याऽकरणे, जीत० ॥

उवहार—उपहार—पुं० उप-हृ-घञ्-उपढौकने, उपायने, कर्मणि घञ् । उपढौकनीये, उपायनद्रव्ये, उपगतः हारम् अस्मा०स० । हारसमीपस्थे तदुपशोभके द्रव्ये, वाच० । उप-हृ-भावे घञ् । विस्तारणे, " पहासमुद्धा पहारा हि सप्पकः पया दीवयंत " कल्प० । (मातृग्रामस्य मैथुनप्रतिज्ञयोपहारसंपादनं मेहुणशब्दे)

उवहारणया—उपधारणता—स्त्री० अविच्युतिस्मृतिवासनाविधारणे, " सुयाणं धम्माणं उवहारणयाए अब्भुट्ठेयव्वं भवइ " स्था० ८ ठा० ॥

उवहारिय—उपधारित—त्रि० अवधारिते, सूत्र० २ श्रु० ।

उवहास—उपहास—पुं० उप-हस्-भावे-घञ् । निन्दापूर्वके हासे, " इहरे मए समं मा कारेसु उवहासं " पा० ।

उवहि—उपधि—पुं० उपधीयते संगृह्यते इत्युपधिः । द्रव्यतो हिरण्यादौ, भावतो मायायाम्, आचा० १ श्रु० ४ अ० १ उ० । सूत्र० । उपधीयते ढौक्यते दुर्गतिं प्रत्यात्मा येनासावुपधिः मायायाम्, अष्टप्रकारे वा कर्मणि, सूत्र० १ श्रु० २ अ० । प्रश्न० । स० । उत्त० । दश० । उप-धा-भावे-कि-अन्यस्यान्यरूपस्य वस्तुनोऽन्यथाप्रकाशके, व्यापारे आधारे-कि-रथाङ्गे, हेम० । उपधीयते येनाऽऽयुरुपधिः । पञ्चनीयसमीपगमनं संज्ञा भावे, १२ ठा० ४ उ० । उपधिच्छद्ममायेत्यनर्थान्तरम् ।
यतो जीवो दुर्गतौ स्थाप्यते अनेनेत्युपधिः
उप सामीप्येन सप्रवं स्थाप्यते

उपदधातीत्युपधिः । वस्त्रपात्राद्यनेकविधे परिग्रहे, द० १ अ० प्रश्न० । स्था० । कल्पादौ, ध० ३ अ० । स० । प्रज्ञा० । स्था० ।

(१) उपधेर्भेदाः ।
(२) भेदेन सविस्तरतः प्रतिपादनम् ।
(३) द्वारसंग्रहः ।
(४) जिनकल्पिकानां स्थविरकल्पिकानां चोपधिः ।
(५) जिनकल्पिकानां (स्थविरकल्पिकानां) गच्छवासिनां चोपधेरुत्कृष्टविभागप्रमाणम् ।
(६) आर्यिकाणामुपधिप्रमाणम् ।
(७) औपग्रहिकोपधेरुत्कृष्टादिभेदाः ।
(८) औपग्रहिकोपधयः ।
(९) उपधिन्यूनाधिक्ये प्रायश्चित्तम् ।
(१०) प्रथमसमवसरणे उपधिग्रहणम् ।
(११) प्रथमं प्रव्रजत उपधिः ।
(१२) प्रव्रज्यां गृह्णन्त्या निर्ग्रन्थ्या उपधिः ।
(१३) रात्रौ विकाले वोपधिग्रहणम् ।
(१४) भिक्षणाय गतस्य भिक्षोरुपनिमन्त्रणा ।
(१५) भिक्षार्थं गतस्योपकरणपतने विधिः ।
(१६) स्थविराणां ग्रहणयोग्या उपधयः ।
(१७) निर्ग्रन्थीभ्य उपकरणदाने निर्ग्रन्थीनामागमनपथे उपकरणानि स्थापयितव्यानि ।
(१८) पात्रबन्धादिप्रमाणं, उपधिविषयोऽवग्रहः, तीर्थकृतां सोपधित्वं, पादप्रोञ्छनं याचित्वा प्रत्यर्पणम्, उपधीनां धावनं, परिष्ठापनं, प्रत्युपेक्षणं च, प्रलम्बग्रहणे च उपधिग्रहः इत्यादि स्वस्थाने ।
(१९) उपकरणप्रयोजनं विहारशब्दे ऋतुबद्धे वस्त्रग्रहणं वस्त्रधावनविधिश्च वत्थशब्दे भिक्षाचर्यायां च उपधिमेवाय इत्येषणा विहारादिशब्देषु उपधेरवश्यकरणीयत्वं चोटियशब्दे मध्यमतीर्थकृतां महामूल्यानि वासांसि धारणीयानीत्यचेलशब्दे धर्मोपकरणे परिग्रहदोषो नेति परिग्गहशब्दे विलोकनीयम्)

(१) त्रिविध उपधिः ।

तिविहा उवही पण्णत्ता ? तंजहा कम्मोवही सरीरोवही बाहिरभंडमत्तोवही । एवं असुरकुमाराणं भाणियव्वं । एवं एगिंदिय नेरइयवज्जं जाव वेमाणियाणं ॥

कर्मैवोपधिः कर्मोपधिः एवं शरीरोपधिः । बाह्यं शरीरव्यतिरिक्तं भाण्डानि च भाजनानि मृन्मयानि मात्राणि मात्रायुक्तानि कांस्यादिभाजनानि भाण्डोपकरणमित्यर्थः । भाण्डकमात्राणि नारकादीनां भाण्डमात्रोपधिरयथा भाण्डं यत्नानरणादि तदेव मात्रा परिच्छेदः सैवोपधिरिति ततो बाह्यशब्दस्य कर्मधारय इति चतुर्विंशतिदण्डकचिन्तायामसुरादीनां त्रयोऽपि वाच्याः । नारकैकेन्द्रियवर्जं शेषाणामुपकरणस्याभावात् द्वीन्द्रियादीनामुपकरणं दृश्यते । एवं वैमानिकादिति । अत एवाह । एवमित्यादि ।

अहवा तिविहा उवही पण्णत्ता ? तंजहा सचित्ते अचित्ते मीसए । एवं नेरइयाणं निरंतरं जाव वेमाणियाणं ॥

(अहवेत्यादि । सचित्तादिरुपधिः शरीरमात्रमभिमतोपधिरयं नारकादिः ... शरीरमेव सचित्तादिरिति । ... शरीरमनेन शरीरमिश्रत्वा-

न्मिश्रः शरीरमेवोच्छ्वासादिपुद्गलयुक्तं तेषां सचेतनाचेतनत्वेन मिश्रत्वस्य विवक्षणादिति । एवमेव शेषाणामपीति । स्था० ३ ठा० । नि० चू० । तस्य भेदपर्यायान्यांश्चेति एतदेव प्रतिपादयन्नाह । " उवहीउवग्गहे संगहे य तह पग्गहे चेव । उग्गह उवगरणे वि य, करणे वि य हुंति एगट्ठा " एतेषां व्याख्यात्रैवोपरि [ओघनिर्युक्तौ] द्रष्टव्या ॥

[२] इदानीं भेदतः प्रतिपादयन्नाह ।

ओहे उवग्गहम्मि य, दुविहो उवही उ होइ नायव्वो ।
एक्केक्को वि य दुविहो, गणणापमाणओ चेव ॥

उपधिर्द्विविधः ओघोपधिः उपग्रहोपधिश्चेति । एवं द्विविध विज्ञेयः । इदानीं स एवैकैको द्विविधः कथं गणनाप्रमाणेन प्रमाणप्रमाणेन च तत्र एतदुक्तं भवति ओघोपधेः गणनाप्रमाणेन तथा प्रमाणप्रमाणेन च द्वैविध्यम् । अवग्रहोपधेरपि ग्रहणाप्रमाणेन प्रमाणप्रमाणेन भवेद् द्वैविध्यम् । तत्र ओघोपधिर्नित्यमेव यो गृह्यते अवग्रहोपधिस्तु कारणे आपन्ने संयमार्थयोर्गृह्यते सोऽवग्रहोपधिरिति । ओघोपधिगणनाप्रमाणमेकद्व्यादिभेदं वक्तव्यं प्रमाणप्रमाणं च वक्तव्यं दीर्घपृथुतया । तथा अवग्रहोपधेरपि एकद्व्यादिगणनाप्रमाणप्रमाणं च दीर्घपृथुत्वद्वारेण वक्तव्यमिति (ओ०) (ओघेत्ति) ओघः संक्षेपः स्तोकः छिद्रकारको अवश्यं ग्राह्य । "उवग्गहोवही" उत्पत्तिकं कारणमपेक्ष्य संयमोपकरणं गृह्यते एस संखेवतो दुविधो उवही । उवग्गहिओ तिविधो ... जहण्णो मज्झिमो उक्कोसो उवहीगणणप्पमाणेण पमाणपमाणेण य दुविधो भवति इमं गणणप्पमाणं ।

बारस चोद्दस पणवीस, उ य ओघोवही मुणेयव्वो ।
जिणकप्पे थेराण य, अज्जाणं चेव कप्पम्मि ॥

बारसविहो चोद्दसविधो पणवीसविहो ओहोवही एयं गणणप्पमाणं यथासंख्यं जिणाण थेराण अज्जाण य । कल्पशब्दः प्रत्येकं योज्यः ।

ओघोवधी जिणाणं, थेराणेहि उवग्गहो चेव ।
ओहोवधिमज्जाणं, उवग्गहिओ अणा तव्वा ॥

जिणाण एगविहो ओहोवधी भवति थेराण अज्जाण य ओहिओ उवग्गहिओ य दुविधो भवति । नि० चू० २ उ० । प्रव० ६१० ।

(३) द्वारसंग्रहः अथ प्रमाणादिस्वरूपनिरूपणाय द्वारगाथामाह ।

दव्वप्पमाणअइरे-गहणे परिकम्मविहूसणामुच्छा ।
उवहिस्स पमाणजिणं, थेरं अज्जक्खं वोच्छं ॥

इह द्रव्यं वस्त्रं तस्य प्रमाणं गणनया प्रमाणेन च द्विविधं वक्तव्यम् । अतिरिक्ते हीने वा वस्त्रे दोषा अभिधातव्याः ... सीवनमित्येकोऽर्थः तन्निरूपयितव्यम् । (विभूसणत्ति) विभूषणार्थं यदि वस्त्रं क्षालयति वा रञ्जयति वा ... तदा प्रायश्चित्तं भवतीति कर्त्तव्यम् । मूर्च्छया वा वस्त्रं न परिभुङ्क्ते तदापि प्रायश्चित्तं वक्तव्यम् । ... उपधेः प्रमाणं जिनकल्पिकस्थविरकल्पिकानामार्याणां ... वक्ष्ये । प्रतिज्ञातमेव निर्वाहयितुं जिनकल्पिकानुद्दिश्य गणनाप्रमाणतो निरूपयति । बृ० ३ उ० ।

(४) जिनकल्पिकानामुपधिमाह ।

जिणकप्पिया उ दुविहा, पाणीपाया पडिग्गहधरा य ।
पाउरणमपाउरणा; एक्केक्का ते भवे दुविहा ॥

जिनकल्पिका द्विविधा भवन्ति पाणिपात्राः प्रतिग्रहधराश्च ...

[illegible] हरियं [illegible]

[illegible] ।

[illegible] ॥

[illegible]

[illegible], होंति [illegible] ।

[illegible], [illegible] ॥

[illegible]

[illegible] ।

[illegible], पायपुंछणं च [illegible] ।

[illegible], [illegible] ॥

[illegible], [illegible] हुंति [illegible] ।

[illegible], [illegible] ॥

[illegible]

[illegible] ।

एए चेव दुवालस-मत्तग अइरेगचोलपट्टो य ।

एसो उ चउदसविहो, उवही पुण थेरकप्पम्मि ॥

[illegible] मात्रकं [illegible]

[illegible] भवति ।

[illegible] ।

जिणा बारसरूवाइं, थेरा चउदसरूविणो ।

ओहेण उवहिमिच्छंति, अओ उड्ढं उवग्गहो ॥

जिना जिनकल्पिकाः [illegible] द्वादश रूपाणि धारयन्तीति [illegible] । स्थविरास्तु चतुर्दशरूपाणि [illegible] उपकरणचतुर्दशधारिण इत्यर्थः । [illegible] मिच्छन्ति [illegible] । [illegible] जिनकल्पिकादिस्थविरकल्पिकानां [illegible] ।

(१) [illegible] प्रमाणमाह ।

चत्तारि [illegible] मज्झिम-जहन्नगा वि चत्तारि ।

कप्पाणं तु पमाणं, संडासो दो तु [illegible] ॥

जिनकल्पिकानां [illegible] भवन्ति [illegible] प्रत्येकं चत्वारि । तत्र [illegible] मध्यमानि । मुखवस्त्रिका [illegible] गोच्छकश्चेति जघन्यानि । [illegible] दीर्घत्वेन [illegible] हस्तमेकम् । यथा ॥

अप्पो वि य आएसो, संडासो सत्थिएण चेसे य ।

जं गोन्हिं [illegible], हत्थाणं तुम्ह [illegible] ॥

[illegible] संदंशः स्वस्तिकश्च । तत्र जिनकल्पिकस्य [illegible] संदंशकाकारस्य पुरः पृष्ठं [illegible] न मन्यते [illegible] प्रमाणम् । अयं च संदंशक उच्यते । तथा तस्यैव [illegible] पूर्वोक्त [illegible] गृहीत्वा द्वि अपि बाहू [illegible] दक्षिणेन हस्तेन वामं बाहुशीर्षं वामेन दक्षिणमपि [illegible] यो विन्यासविशेषः स [illegible] इति कृत्वा स्वस्तिक उच्यते । [illegible] यदि च [illegible] पण्मासान् यावद् म्रियते तदा [illegible] पण्मासानपि यावत् [illegible] कृत्वा न गृह्णाति । अथ किमर्थमसौ स्वस्तिकं करोतीत्याह ।

संडासछिड्डेण हिमादिएति, गुत्ता अगुत्ता वि य तस्स सेज्जा ।

हत्थेहि मासो छिवडेहि घेत्तुं, वत्थस्स कोणेमुवरं च जाति ॥

तस्य जिनकल्पिकस्य शय्या गुप्ता अगुप्ता वा भवेत् । ततः संदंशकच्छिद्रेण हिमादिकं शीतवातसर्पादिकमेत्यागच्छति । ततस्तस्य [illegible] स्वस्तिकाकारनिवेशिताभ्यां द्वावपि वस्त्रस्य कोणौ गृहीत्वा [illegible] एव स स्वपिति वा ध्यायति वा । तत्र प्रायेण धर्मजागरिकया जागर्ति पर केचिदाचार्या ब्रुवते [illegible] एव तृतीययामे क्षणमात्रं स्वपितीति । वृ० ३ उ० प्रव० । ध० । नि०चू० । इदानीं स जिनकल्पिकोपधिः स्थविरकल्पिकोपधिश्च सर्व एव त्रयविधो भवति तस्य च मध्ये कानिचिदुत्कृष्टानि [illegible] कानिचित् जघन्यानि कानिचित् मध्यमानि । तत्र जिनकल्पिकानां तावत्प्रतिपादनायाह ।

तिन्नेव य पच्छागा, पडिग्गहो चेव होइ उक्कोसो ।

गुच्छगपत्तट्ठवणं, मुहणंतगकेसरिजहन्नो ॥ ७४ ॥

त्रयः प्रच्छादककल्पा इत्यर्थः प्रतिग्रहश्चेति एष जिनकल्पिकाश्रितमध्ये [illegible] उपधिः प्रधानश्चतुर्विधोऽपि [illegible] प्रधानानि

आहस्थान द्विधा छन्दतो गर्वादी निमज्जतो गच्छादि भावतः संसारगर्तायां निपततां ज्ञानादि इह पुनर्यत्र क्षेत्रे काले वा दुर्लभं वस्त्रं तदादिकमासाद्यतं गृह्णाते तत्र विशुद्धे प्रशस्ते सति द्विगुणो वा चतुर्गुणो वा औपग्रहिकोपधि सर्वोऽपि महाजनस्य गच्छस्योपग्रहकरो भविष्यतीति कृत्वा गणचिन्तकस्य परिग्रहे भवतीति । गतं प्रमाणद्वारम् ।

(६) आर्यिकाणामुपधिप्रमाणम् ।

पत्तं पत्ताबंधो, पायट्ठवणं च पायकेसरिया ।
पडलाइं रयत्ताणं, गुच्छओ पायनिज्जोगो ॥
तिन्नेव य पच्छागा, रयहरणं चेव होइ मुहपोत्ती ।
तत्तो य मत्तए खलु, चोद्दसमे कमढए होति ॥
उग्गहणंतगपट्टो, अड्ढोरुअचलणिआ य बोधव्वा ।
अब्भिंतरबाहिणियं-सणी य तह कंचुए चेव ॥
ओकच्छिय वेगच्छिय, संघाडी चेव खंधकरणी य ।
ओहोवहिम्मि एते, अज्जाणं पणवीसं तु ॥

पात्रकादिद्वयोदशोऽपि करणानि साधूनामिव द्रष्टव्यानि । चतुर्दश तु चोलपट्टकस्थाने तासां कमठकं भवति । तथाऽवग्रहानन्तकं संयतीनां निजदेहप्रमाणेन विज्ञेयम् । तथा अवग्रहानन्तकं १५ पट्टम १६ अर्द्धोरुकं १७ चलनिका च १८ बोधव्या । अभ्यन्तरनिवसनी १९ बहिर्निवसनी २० तथा कञ्चुकश्च २१ औपकक्षिकी २२ वैकक्षिकी २३ संघाटी २४ स्कन्धकरणी २५ एवमेतान्यौघोपधौ आर्यिकाणां पञ्चविंशतिरुपकरणानि भवन्ति । अथैतान्येव विवृणोति ।

उग्गहणंतग नाव, गुज्झदेसरक्खणट्ठाए ।
सो उ पमाणेणेक्को, घणमसिणो देहमासज्ज ॥

इहावग्रह इति योनिद्वारस्य सामयिकी संज्ञा तस्यानन्तकं वस्त्रमवग्रहानन्तकं पुंस्त्वं प्राकृतत्वात् तच्च नौनिभं मध्यभागे विशालं पर्यन्तभागयोस्तु तनुकं गुह्यदेशरक्षार्थं क्रियते । तच्च गणनयैकं अन्तर्बीजपातसंरक्षणार्थं च घनं घनवस्त्रेण पुरुषसमानकर्कशस्पर्शपरिहरणार्थं च मसृणं मसृणवस्त्रेण क्रियते प्रमाणे न च देहं स्त्रीशरीरमासाद्य तद्विधीयते देहो हि कस्याश्चित्तनुः कस्याश्चित्स्थूलः । ततस्तदनुसारेण विधेयमित्यर्थः ।

पट्टो वि होइ एक्को, देहपमाणेण सो उ भइयव्वो ।
छायंतोग्गहणंतं, कडिबंधो मल्लकच्छो वा ॥

पट्टोऽपि गणनयैको भवति स च पर्यन्तभागवर्तिबाहुकबन्धबद्धः पृथुत्वेन चतुरङ्गुलप्रमाणः समतिरिक्तो वा दीर्घेण तु कटीप्रमाणः स च देहप्रमाणेन भक्तव्यः पृथुलकटीभागाया दीर्घं संकीर्णकटीभागायास्तु ह्रस्व इत्यर्थः । स चावग्रहानन्तकमुभयान्तयोराच्छादयन् कटीबद्धः सन् मल्लकच्छावज्ज्ञायते ।

अड्ढोरुगो उ ते दो वि, गिण्हिउं छायए कडीभागं ।
जाणुप्पमाणचलणी, असिव्विया लंखियाए व ॥

अर्द्धोरुकोऽपि तौ द्वावपि अवग्रहानन्तकपट्टावुपरिष्टाद् गृहीत्वा सर्वकटीभागमाच्छादयति । स च मल्लचलनाकृतिः कथलमुपरि ऊरुद्वये च कसाबद्धः चलनिकाऽप्येवमेव । नवरं सा जानुप्रमाणा अस्यूता लङ्खिका परिधिर्भवति वंशाग्रनर्तकी लङ्खिका मन्तव्या ।

अंतोनियंसणी पुण, लीणतरा जाव अद्धजंघाओ ।
बाहिरखुलगपमाणा, कडी य दोरेण पडिबद्धा ॥

अन्तर्निवसनी पुनरुपरि कटीभागादारभ्याधोऽर्द्धजङ्घां यावद्भवति सा च परिधानकाले लीनतरा परिधीयते मा भूज्जनोपहास्येति बहिर्निवसनी पुनरुपरि कटीभागादारभ्याधः खुलकप्रमाणा चरणगुल्फं यावदित्यर्थः कट्यां च दवरकेन प्रतिबद्ध इदमधःशरीरस्य षड्विधमुपकरणमुक्तम् ।
अथार्द्धकायोपयोगिकञ्चुकादिकं व्याख्याति ।

छाएइ अणुक्कुइए, उरोरुहे कंचुओ असिव्वियओ ।
एमेव य उक्कच्छी, सा नवरं दाहिणे पासे ॥

दैर्घ्यमाश्रित्य स्वहस्तेनार्द्धतृतीयहस्तप्रमाणः पृथुत्वेन तु हस्तमानोऽसीवित ढलयन् कसाबद्धः कञ्चुकः क्रियते स चोरोरुहौ छादयति किन्तु तौ च शुके विनौ गाढपरिधाने हि विशिकविनाशो भवेताम् कक्षायाः समीपमुपकक्षं तत्र भवा औपकक्षिकी अध्यात्मादित्वादिकण्प्रत्यय एवमेव च कञ्चुकवदस्या अपि स्वरूपं वक्तव्यं सा नवरं दक्षिणपार्श्वे समचतुरस्रा हस्तेन सार्द्धहस्तप्रमाणा उरो भाग पृष्ठ च प्रच्छादयन्ती वामस्कन्धे वामपार्श्वे च योटकबद्धा परिधीयते ।

वेगच्छिया उ पट्टो, कंचुकमुक्कच्छियं च छाएइ ।
संघाडीओ चउरो, तत्थ दुहत्था उवस्सए ॥
दुन्नि तिहत्थायामा, भिक्खट्ठा एगएगउच्चारे ।
ओसरणे चउहत्थाय, निसन्नपच्छायणी मसिणा ॥

औपकक्षिकीविपरीता वैकक्षिकीनामकः पट्टः कञ्चुकमौपकक्षिकीं च छादयन् वामपार्श्वे परिधीयते तथा चतस्रः परिभोग्याः संघाटिकाः श्रमण्यो भवन्ति । एका द्विहस्ता द्वे त्रिहस्ते एका च चतुर्हस्ता दैर्घ्येण चतस्रोऽपि साढ्दहस्तप्रमाणा चतुर्हस्ता वा मन्तव्या तत्र हि द्विहस्ता द्विहस्तविस्तृता सा विहारे परिधीयते न सा विहाय प्रकटदेहा वक्तारोऽपि भविष्यन्ति भावः । ये च द्वे त्रिहस्तायामे त्रिहस्तविस्तृते तयोर्मध्ये एका भिक्षार्थं गच्छन्त्या प्राब्रियते एका उच्चारभूमिं गच्छन्त्या तथा समवसरणे व्याख्यानश्रवणार्थं गच्छन्ती चतुर्हस्ता प्रावृणोति सा च स्नानसंघाटीवत् बृहत्प्रमाणा प्रतिवसनप्रच्छादनार्थं क्रियते यतो न तत्र समवसरणधर्मस्य विन्यासं विधाय गात्रानुपघातवर्णादिविषयं तत्तस्या स्कन्धादारभ्य पादौ यावत् प्रच्छादनं निषण्णपृष्ठतः प्रच्छादनार्थं प्रवचनवर्णवत्वादिकार्यं च मसृणा क्रियते चतस्रोऽपि च गणनाप्रमाणेनैवमेव यत प्रत्येकं युगपत्परिभोगाभावात् ।

खंधकरणी चउहत्था, वित्थारा वायविहुयरक्खट्ठा ।
खुज्जकरणी उ कीरइ, रूववईणं कुडहहेउं ॥

स्कन्धकरणी चतुर्हस्ता विस्तारा समचतुरस्रा प्रावरणस्य वातविधुतरक्षणार्थं चतुष्पटा स्कन्धे कृत्वा प्राब्रियते रूपवत्यः श्रमणीः कुब्जकरणीयाः कुब्जकरणी अपि क्रियते पृष्ठे स्कन्धयोर्मध्ये उपधिकया स्थगिता तथा विरूपता दर्शयन्ति कुब्जे विधीयत इति भावः । उपसंहरन्नाह ।

संखेवेणं वा, सव्वो वेसो समासओ उवही ।
पासगबद्धमुसिरो, जं वाउलियं छिद्दे ॥

सर्वोऽप्येष यथोक्त उपधि समासतो द्विधा भवति तत्र

यानि साधर्मिकसंबन्धेन संबद्धानि परस्परं समनोज्ञसमनोज्ञापितानि च क्षेत्राणि तेषु वर्षासु कल्पते साधर्मिकाणामनुग्रहणार्थं चत्वारि पञ्च योजनानि यावत् गन्तुं वस्तुं वा एवं कार्यं गतस्यापान्तराले वर्षात्राणेन कश्चिदामिमन्त्रणं कुर्यात् तस्य च प्राक्तनो वर्षात्राणः परिजीर्णस्तनश्च वर्षात्राणं घनमसृणमभिनवं च ततो वर्षासु बहुगुणमिति कृत्वा गृह्णाति । कारणतोऽन्यदपि पटलकादिकं घनमसृणादिगुणोपेतमाचार्यप्रायोग्यं वा वस्त्रं लभ्यते तदपि भूयान् गुणोऽत्र गृहीते भविष्यतीति कृत्वा गृह्णाति एवं कारणगमनं ग्रहणं चोभयमपि दृष्टम्। कारणाभावे तु न कल्पते गन्तुं गृहीतुं वा। अथ गृह्णाति ततोऽमून् षोडश दोषान् । प्राप्नोति

आहाकम्मुद्देसिय, पूतीकम्मे य मीसजायाए ।
ठवणा पाहुडियाए, पादोकरकीतपामिच्चे ॥
परियट्टिए अतिहडे उ, उब्भिणमालाहडे य ।
अच्छिज्जे अणिसिट्ठे, धोते रत्ते य घट्टे य ॥

आधाकर्म्म १ औद्देशिकं २ पूतिकर्म्म ३ मिश्रजातं ४ स्थापना ५ प्राभृतिका ६ प्रादुष्करणं ७ क्रीतं ८ प्रामित्यं ९ परिवर्त्तितम् १० दूरयाहृतम् ११ उद्भिन्नं १२ मालाहृतम् १३ आच्छेद्यम् १४ अनिसृष्टं चेति १५ पञ्चदश दोषाः (धोयरत्तेयघट्टेयत्ति) साधूनामर्थाय मलिनवस्त्रं धौतं गौरवं कृतमित्यर्थः। एवं रक्तं प्रदत्तरागं घृष्टं मसृणं पाषाणादिना उत्तेजितमेते त्रयोऽप्येक एव दोष इति।

एते सव्वे दोसा, पढमोसमोसरेणवज्जिता होंति ।
जिणदिट्ठेहिं अगहितो, जो गेण्हति तेहि सो पुट्ठो ॥

एते सर्वेऽप्याधाकर्म्मादयो दोषाः प्रथमे समवसरणे वस्त्रादिकं गृह्णता न वर्जिता भवन्ति। अथ पूर्वं दर्पतो न गृहीतमुपकरणं ततः प्रथमे समवसरणे यो गृह्णाति सोऽपि जिनैस्तीर्थकरैर्ये दृष्टाः कर्मबन्धदोषास्तैः स्पृष्टो मन्तव्यः । भावतस्तेन दोषाणामङ्गीकृतत्वात् ।

पढमम्मि समवसरणे, जो वतियं पत्तचीवरं गहियं ।
सव्वं वोसरियव्वं, पायच्छित्तं च वोढव्वं ॥

प्रथमे समवसरणे दर्पतो यावत् पात्रचीवरं गृहीतं तावत्सर्वमपि व्युत्सृष्टव्यं प्रायश्चित्तं च गुरुप्रदत्तं यथोक्तं वोढव्यम्। अथ वा कार्ये समुत्पन्ने यत्पात्रं वा चीवरं वारणादिषु गृहीतं तत्सर्वं कृते कार्ये परिष्ठापनीयम्। अपरिणामकप्रत्ययनिमित्तं च यथालघीयः प्रायश्चित्तं वोढव्यम्।

सज्झायट्ठा दप्पेण, वावि जाणंतए वि पच्छित्तं ।
कारणगहियं तु विधूय, धरेत गीए ण उ ज्झाति ॥

स्वाध्यायार्थं दर्पेण वा यदि "वहिअंतमज्झिनु जं दिट्ठं तेसु चेय उमादिट्ठं" इत्यादिकं क्रममुल्लङ्घ्य गृहीतं तत्र जानतोऽपि गीतार्थस्यापि प्रायश्चित्तम्। यत्तु कारणे क्रमेण विधिना गृहीतं तद्यदि सर्वेऽपि विदो गीतार्थास्ते धारयन्ति अथागीतार्थनिश्रामतोऽन्यस्मिन्नुपकरणे लब्धे न दुष्यन्ति । वृ० ३ उ० नि० चू० । कल्प० (अनुबद्धे वस्त्रग्रहणं वत्थ शब्दे)

(११) प्रथमं प्रव्रजत उपधिग्रहणम् ।

(सूत्रम्) निग्गंथस्स य तप्पढमयाए संपव्वयमाणस्स कप्पइ रयहरणगोच्छयपडिग्गहमायाए तिहिं य कसिणेहिं वत्थेहिं आयाए संपव्वइत्तए से पुव्वोवट्ठिए सिया एवं से नो कप्पइ रयहरणपडिग्गहगोच्छगमायाए तिहिं य कसिणेहिं वत्थेहिं आयाए संपव्वइत्तए कप्पइ से अहापरिग्गहियाइं वत्थाइं गहाय आयाए संपव्वइत्तए ।

अथास्य सूत्रस्य कः संबन्ध इत्याह ।

णिग्गंथिचेलगहणं, भणियं समणाण वोच्छामि ।
निक्खंते वाहुत्तं, निक्खममाणे इमं सुत्तं ॥

निर्ग्रन्थीविषयं चेलग्रहणं भणितम्। इदानीं श्रमणानां यथा वस्त्रं गृहीतुं कल्पते तथाऽभिधीयते । यद्वा निष्क्रान्तो दीक्षितस्तद्विषयं वस्त्रग्रहणमुक्तमिदं तु निष्क्रामति दीक्षां गृह्णति वस्त्रग्रहणाभिधायकं सूत्रमारभ्यते अनेन संबन्धेनायातस्यास्य व्याख्या निर्ग्रन्थस्य तत्प्रथमतया सम्यक् प्रकर्षेण पुनरपि कारणवशेन व्रजनो गृहवासात्प्रव्रजतः संप्रव्रजतः कल्पते। रजोहरणगोच्छकप्रतिग्रहमादाय त्रिभिः कृत्स्नैर्वस्त्रैरात्मना संप्रव्रजितुम। इह रजोहरणग्रहणेन मध्यमोपधिगोच्छकग्रहणेन जघन्योपधिः प्रतिग्रहग्रहणेनोत्कृष्टोपधिः सर्वो गृहीतस्ततोऽयमर्थ जघन्यमध्यमोत्कृष्टोपधिनिष्पन्ना ये त्रय कृत्स्नाः प्रतिपूर्णा वस्त्रपात्रे प्रत्यवतारास्तैरात्मना सहितैः प्रव्रज्या ग्रहीतुं कल्पते (भवति) चशब्दार्थे। अथासौ प्रव्रज्यां प्रतिपद्य पूर्वमुपस्थितो दीक्षितः स्यात् ततो नो कल्पते (से) तस्य पूर्वोपस्थितस्य रजोहरणगोच्छकप्रतिग्रहमादाय त्रिभिः कृत्स्नैरात्मना संप्रव्रजितुं। किंतु कल्पते (से) तस्य यथा परिगृहीतानि क्रीतकृतादिदोषरहितानि वस्त्राणि गृहीत्वा आत्मना संप्रव्रजितुमिति सूत्रसमासार्थः । अथ विस्तरार्थोऽभिधीयते । आह न तावद्वाप्ययं प्रव्रजति ततः कथं निर्ग्रन्थः। उच्यते द्रव्यत एको भावतो द्वितीयो द्रव्यतोऽपि भावतोऽपि अपरो न द्रव्यतो न भावतः। तत्र द्रव्यतो निर्ग्रन्थः स उच्यते यो लिङ्गसहितो द्रव्यलिङ्गयुक्तो निःशङ्कः सङ्गवशात् प्रव्रजतीत्यर्थः। यस्तु प्रव्रज्यायामभिमुखो न तावदद्यापि प्रव्रजति कारणेन वा यः साधुः परलिङ्गे वर्तते स द्वितीयो द्वितीयभङ्गवर्ती यस्तु उदयसहितो द्रव्यभावलिङ्गयुक्तः स तृतीयभङ्गवर्त्यपि निर्ग्रन्थ इति भावः। उभयविमुक्ते तु द्रव्यभावलिङ्गरहिते गृहस्थादौ चरमश्चतुर्थो भङ्गो भवति । अत्राचार्यो देवस्य मानुष्यस्य सहवासलक्षणं दृष्टान्तं कर्तुकाम प्रथमतः सिद्धान्तं प्रज्ञापयति ।

चउधा खलु संवासो, देवासुररक्खसे माणुस्से य ।
अण्णोण्णकामणेण य, संजोगा सोलस हवंति ॥

देवसंवासः असुरसंवासो राक्षससंवासो मनुजसंवासश्चेति संवासश्चतुर्धा । अत्र चान्योन्यकाम्यया षोडश संयोगा भवन्ति। तद्यथा देवो देव्या सार्द्धं संवसति १ देवोऽसुर्या सार्द्धम् २ देवो राक्षस्या सार्द्धम् ३ देवो मानुष्या सार्द्धम् ४ असुरो देव्या समं संवसति ५ असुरोऽसुर्या ६ असुरो मानुष्या ७ असुरो राक्षस्या ८ राक्षसो देव्या ९ राक्षसोऽसुर्या १० राक्षसो मानुष्या ११ राक्षसो राक्षस्या १२ मनुष्यो देव्या १३ मनुष्योऽसुर्या १४ मनुष्यो राक्षस्या १५ मनुष्यो मानुष्या १६ चेति । अत्र देवशब्देन वैमानिको ज्योतिष्को वा । असुरशब्देन तु सामान्यतो व्यन्तरः परिगृह्यते। अधस्तने च षोडश भङ्गान् चतुर्षु भङ्गेष्ववतारयन्नाह।

अहवा देवछवीणं, संवासे एत्थ होंति चउभंगी ।
पव्वज्जाभिमुहंतर, गुज्झगतभामिया वासे ॥

अथवेति प्रकारान्तरद्योतकः । देवच्छविमतोः संवासे चतुर्भङ्गी भवति । देवो देव्या सार्द्धं संवसति । १ । देवशरीरभव्या सा-

र्द्धम् २ अविमान् देव्या सार्द्धम् ३ अविमान् अविमत्या ४ अत्र देवशब्देन सामान्यतो भवनपत्यादिनिकायचतुष्टयान्यतरवर्ती गृह्यते अविमांश्च मनुष्य उच्यते अत एतेषु चतुर्षु भङ्गेषु पूर्वोक्ताः षोडशापि भङ्गा अन्तर्भूता एवं सिद्धान्तं प्रज्ञाप्य प्रस्तुतार्थसाधकं दृष्टान्तमाह 'पवज्जा' इत्यादि । एकः कश्चित्तरुणः प्रव्रज्याभिमुखो गुरूणां पार्श्वे प्रस्थितः अन्तरा कस्मिंश्चिद्ग्रामे एकस्यास्तरुण्या गृहे वासार्थमुपगम्य द्वारमूले सुप्तः सा च तरुणी उद्भ्रामिका दुःशीला गुह्यकः कश्चिद्यक्षस्तया उद्भ्रामिकया सह रात्रौ वासं कृत्वा प्रभाते स्वस्थानं गच्छति एवं दिवसे दिवसे करोति । तस्मिंश्च दिवसे यक्षो नोपागमत् द्वितीये दिवसे कोऽपि सन्निहितः पापी चौर्यं कर्तुकामस्तस्मिन्नेव ग्रामे तस्या एव तरुण्या गृहे तथैव मूले प्रसुप्तः । यक्षश्च तद्दिवसमागतः ।

बितियणिसाए पुच्छा, एत्थ जती आसि तेण णितऽम्मो ।
नतिवेसो यं चोरो, जो अज्ज तुहं वसति दारे ॥

यस्मिन् दिवसे यक्षोऽनायातस्ततो यो द्वितीयो दिवसस्तत्र निशायामागतस्य यक्षस्य पार्श्वे पृच्छा कृता कल्ये किं नागतोऽसि यक्षः प्राह । अत्र कल्ये यतिरासीत् । तेन कारणेनाहमत्र नायातः । यति च साधुसंयमस्थिना तेजसैव समुल्लङ्घ्य गन्तुं न शक्यते सा प्राह किमेवं मृषा भाषसे अयमपि तावदन्य साधुर्द्वारमूले सुप्तस्तिष्ठति । अत एवमुल्लङ्घ्य कथमयागतोऽसीति । उक्तः प्राह एष चारित्रं प्रति विपरिणतधीर्यः कर्तुकामः । अतो यतिवेषेण चौरोऽयं मन्तव्यः यस्तवाद्य द्वारे वसतीति । तदेवमनेन दृष्टान्तेन प्रव्रज्यायामभिमुखः प्रव्रजित एवोच्यते । उक्तं च नैश्चयिकनयवक्तव्यतामङ्गीकृत्य भगवत्याम् "नेरइए णं भंते नेरइएसु उववज्जइ अनेरइए ? गोयमा ! नेरइएसु उववज्जइ नो अनेरइएसु उववज्जइ " ॥

अथ रजोहरणादिपदानि व्याचष्टे ॥

रयहरणे विमज्झिमो, गुच्छगगहणे जहण्णगग्गहणं ।
पडिग्गहग्गहणं गहणं, उक्कोसओ होइ अवहिस्स ॥

रजोहरणग्रहणेन विमध्यमोपधिर्गृहीतो गुच्छकग्रहणेन जघन्योपधिग्रहणं भवति प्रतिग्रहग्रहणेन चोत्कृष्टस्योपधेर्ग्रहणं मन्तव्यम् ।

पडिपुण्णा पडुयारा, कसिणग्गहणेण अप्पणो तिण्णि ।
पुव्विं उवहितो पुण, जो पुव्वं दिक्खितो आसी ॥

कृत्स्नग्रहणेनेदमुक्तं भवति । तेन प्रव्रजता आत्मनो योग्याखयः प्रत्यवताराः प्रतिपूर्णा गृहीतव्याः पूर्वमुपस्थितः पुनः स उच्यते यः पूर्वं दीक्षित आसीत् एष सूत्रार्थः । अथ निर्युक्तिविस्तरः ।

सोऊण कोइ धम्मं, उवसंतो परिणओ य पव्वज्जं ।
पुच्छति पूयं आयरिय उव-ज्झायपवत्तिसंघाडिए चेव ॥

इह कश्चिद्यथारूपाणां स्थविराणामन्तिके धर्मं श्रुत्वा उपशान्तप्रतिबद्धः प्रव्रज्यायां च परिणतः आचार्यान् पृच्छति आदिशत क्षमाश्रमणाः किं मया कर्तव्यम् । सूर्यस्तस्य सारसंवेगं ज्ञात्वा भणेत् (पृच्छति) चैत्यानां विपुलां पूजां कुरु श्रमणसंघस्य च वस्त्रादिभिः प्रतिलाभनं कुरु । एवमुक्ते स तथैव चैत्यानां श्रमणसंघस्य च पूजां करोति । अथ श्रमणमहं न पूजयितुमीशस्तत आचार्योपाध्यायस्य प्रवर्तिनः संघाटकसाधोश्च वस्त्रादिभिः पूजा विधातव्या । इदमेव भावयति ॥

अंतगयवगुलगोरस, फासुयपडिलाभणं समणसंघं ।
असति गणिवायगाणं, तदसति सव्वस्स गच्छस्स ॥

स प्रविव्रजिषुः श्रमणसङ्घस्य सकलस्यापि प्रासुकैः इक्षुगुडगोरसादिभिर्द्रव्यैः प्रतिलाभनं करोति । अथ नास्त्येतावत् सारं ततो ये गणिन आचार्या ये च वाचका उपाध्यायास्तेषां सर्वेषामपि करोति । अथ नास्त्येतावती शक्तिस्ततो यस्मिन् गच्छेऽसौ प्रव्रजिष्यति तस्य सर्वस्यापि प्रतिलाभनां विधत्ते ॥

तदसति पुव्वत्ताणं, चउण्ह मीसनिय तेसि वायारो ।
हाणी जा तिण्णि सयं, तदभावे गुरुउ सव्वं ति ॥

तस्या अपि सकलगच्छपूजाया अभावे शक्त्यभावे ये पूर्वमाचार्या ये च वाचका उपाध्यायास्तेषां सर्वेषामपि करोति आचार्योपाध्यायप्रवर्तिसंघाटकसाधुलक्षणानां चतुर्णां पूजां करोति । तेषां चाचार्यादीनां व्यापारोऽयं [illegible] पुनः शिष्येण कथ्यते यथा आचार्योऽर्थं व्याख्यानयति उपाध्यायः सूत्रं वाचयति प्रवर्तते यः स मयमादौ प्रवृत्ति [illegible] संघाटकसाधुभिर्भिक्षादिविचारभूम्यादौ गच्छतां साहाय्यं विधत्ते एतेषां पूजा विधेयेति । अथ नास्त्येतावती शक्तिस्ततः [illegible] प्रथममाचार्योपाध्याययोस्तदभावे [illegible] पूजां करोति । एवमन्यतरा [illegible] तदभावे एकमपि प्रत्यवतारमादाय प्रव्रजति । अथ [illegible] कोऽपि प्रत्यवतारस्ततः सर्वमपि [illegible] प्रयच्छन्ति । [illegible] नवेति चिन्ता विधीयते ॥

अप्पणो कि सकम्मं व, आसकायं व येगु [illegible] ।
संजोए चेव तथा, अणिद्दिट्ठे मग्गणा होति ॥

स गृहस्थः [illegible] कर्म या गृहीत्वा गुरूणामन्तिके [illegible] । अत्र कालेनगृहीतेन विशेषितं [illegible] दोषाणामनिर्दिष्टे [illegible] या मार्गणा कर्तव्या भवतीति [illegible] ।

[illegible]

कीयम्मि अ णिद्दिट्ठे, [illegible] ।
निद्दिट्ठम्मि ण कप्पति, [illegible] ॥

क्रीतकृतं द्विधा निर्दिष्टमनिर्दिष्टं च । निर्दिष्टं [illegible] करोति [illegible] निर्दिष्टम् । [illegible] निर्दिष्टे तु साधु [illegible] । अथवा तत्र निर्दिष्टं [illegible] ।

[illegible]
[illegible] ॥

[illegible]

यंति) परिष्ठापयन्ति । एवं परिष्ठाप्यमानेषु स शैक्षो ब्रूयात् ।

एवं पि मा उज्झह देह मज्झं, मज्झव्वगा गेएहह एक दो वा ।
अत्तट्ठिए होंति कदायि सव्वे, सव्वे विकप्पंत वि सोधएसा ॥

एतमपि वस्त्रमन्यवतारमकल्पनीयतया मा संमा उज्झह किं तु मह्यं प्रयच्छत मदीयमन्यवतारान् चैकं द्वौ वा यूयं गृह्णीत । अथ तेन बहवः अन्यवताराः क्रीतास्ततः को विधिरित्याह यान् प्रत्यवतारान् एकं वा द्वौ वा त्रीन् वा स दाता आत्मार्थयति स त्रीन् वा कदाचिदात्मार्थं करोति तदा सर्वेऽपि कल्पन्ते एव विशोधिकोटिविषयो विधिरुक्तः । अथाविशोधिकोटिविषयं तमेवाह ॥

उग्गमकोडीए वि हु, संजोजं तयंव होति अनिद्दिट्ठे ।
इयरम्मि विसंजोजो, जइ सेहो सयं जाणइ ॥

उद्गमकोटिनाम आधाकर्मादयोऽविशोधिकोटयो दोषास्तेष्वपि यदि निर्दिष्टमिदं साधूनां दास्यामि इदं मम भविष्यतीति निर्विभागेन वस्त्रादि क्रीतं तत्र कल्पते (संजोजमंदोइयानिद्दिष्ट) अनिर्दिष्टेऽपि यद्येषां दाता ब्रूयात् येनैवं निमन्त्रिता यदि तानि नेच्छथ तत इमानि मे परिगृहीतानि गृह्णीत यानि युष्माभिः प्रतिषिद्धानि तानि मम भविष्यन्ति एवमसौ संक्रोजं प्रक्षेपकं कृत्वा यदि ददाति तर्हि सर्वाण्यपि कल्पन्ते (इतरम्मिविसंजोजो) इतरस्मिन् निर्दिष्टे तथार्थेव संक्रोजो यदि स्यात्ततः कल्पते । संक्रोजः पुनरयं यथा असौ गृहस्थः शैक्षः स्वयमन्येनानुपदिष्ट आत्मनैव जानाति ।

[illegible] य दुक्करं च, वज्जिया फेसितं हमि विथेव ।
इति [illegible] मेहिं, वट्टंति निद्दिट्ठगेसुं पि ॥

यानि वस्त्राणि मया युष्मदर्थं कारितानि वस्त्राणि बहुमूल्यानि तत [illegible] दुर्लभं वा महता प्रयत्नेन वाऽपि तानि [illegible] मानितोऽहं यूयेषामीतिः युष्माकमनुपकरणानि [illegible] मदीयानि यूयं गृह्णीत युष्मदीयानि च मम भवन्तु । [illegible] निर्दिष्टान्यपि [illegible] निर्दिश्य कृतान्यपि संक्रोजं [illegible] वदन्ति [illegible] । [illegible] निर्दिष्टान्यपि [illegible] । अत्र मतान्तरमुपन्यस्य दूषयन्नाह ।

जा संकप्पलीढा, मंडोयम्मि वि न कप्पते केई ।
तं तु ण जुज्जइ जम्हा, दिसंति मेहम अविरुद्धं ॥

[illegible]

[illegible] दुक्करं [illegible], परिक्लिट्ठं [illegible] ।
[illegible], [illegible] वि कप्पंति [illegible] ॥

[illegible]

[illegible] निद्दिट्ठे [illegible] ।
[illegible] ॥

यथा सहस्रानुपाति विषं भक्ष्यमाणं सहस्रान्तरितमपि पुरुषं मारयति । एवमाधाकर्माद्युपभुज्यमानं सहस्रान्तरितमपि साधुं संयमजीविताद् व्यपनयति न सहस्रानुपातिविषज्ञातेन केचिदाचार्याः साधुनिमित्तं निर्दिष्टे संक्रोजेऽपि कृते नेच्छन्ति अनिर्दिष्टे पुनः क्रोजं कृत्वा ददानस्य कल्पनीयं वदन्ति । एतदेव चरिफल्गु निस्सारं मन्तव्यम् । कथमित्याह ॥

एवं पि सप्पइरमीसेण, परिसरग तेण फग्गुमिच्छामो ।
दुविधं पि ततो गहियं, कप्पविरवणावउक्कं ॥

यच्चे आचार्यदेशीया इति निर्दिष्टे संक्रोजे कृते कल्पनीयं ब्रुवते एतदपि स्वगृहपतिमिश्रेण सदृशं तेन कारणेन परिफल्गु वयमिच्छामः तदीयानि प्रायेण हीनदपि स्वगृहपतिमिति हाक अकल्पनीयं प्राप्नोति तच्चानिष्टं ततो द्विविधमपि निर्दिष्टानिर्दिष्टभेदाद् द्विप्रकारमपि तेन शैक्षेण संक्रोजकारणेनात्मीकृतं सत्कल्पते । यथा वाऽत्र रत्नाकरो मेरुर्दृष्टान्तः । तथा हि तत्र प्रक्षिप्तं तृणादिकमपि सुवर्णीभवति एवं शैक्षगृहस्थेन परिगृहीतं सर्वमपि कल्पनीयं भवति । अपि च ॥

जहट्ठकडं चरिमाणं, पडिसिद्धं तं हि मज्झिमो गहियं ।
पडिवएणपंचजामे, कप्पति तेसिं तहणोमिं ॥

यथा चरमतीर्थवर्त्तिनां पञ्चयामिकानां साधूनामर्थाय किमपि वस्त्रं वा पात्रं वा कृतं तच्च तैः प्रतिषिद्धं न गृहीतं मध्यमपार्श्वनाथतीर्थवर्तिनिश्चतुर्यामिकैस्तत्प्रतिगृहीतं ते चतुर्यामिकाः पञ्चयामधर्मप्रतिपन्नास्ततस्तद्वस्त्रादिकं तेषामन्येषामपि पञ्चयामिकानां परिभोक्तुं कल्पते । एवमत्रापि साधूनामर्थाय कृतं तैः प्रतिषिद्धं शैक्षगृहस्थेनात्मार्थीकृतं सद्गृह्यमाणं कल्पते ।

अथ संयोगद्वारं व्याख्याति ॥

उग्गमविसोधिकोटी, दुगादिसंजोगओ बहू भंगा ।
पत्तगमीसिगासु य, णिद्दिट्ठा तह अणिद्दिट्ठा ॥

इहोद्गमकोटिभेदा आधाकर्ममिश्रजातादयस्तेषां द्विकादिसंयोगतो द्विकत्रिकचतुष्कादिसंयोगनिष्पन्ना बहवोऽत्र भङ्गा भवन्ति । ते च सुगमतया स्वयमभ्यूह्य मन्तव्याः । एवं विशोधिकोटिभेदानामपि क्रीतकृतादीनां द्विकादिसंयोगनिष्पन्नास्तथैव बहवो भङ्गकाः एते च प्रत्येकं भङ्गका उक्ताः । एतेषामुद्गमकोटिभेदानां च परस्परं द्विकादिसंयोगनिष्पन्ना एवमेव बहवो भङ्गका भवन्ति । ते च मिश्रभङ्गका भण्यन्ते । सर्वेऽप्येते द्विधा निर्दिष्टा अनिर्दिष्टाश्च एतासु प्रत्येकमिश्रासु भङ्गकेषु कल्प्याकल्प्यविभागाः प्रागुक्तप्रकारेणावगन्तव्याः । अथ वक्ष्यमाणार्थसंबन्धनाय प्रस्तावनां करोति ।

वत्था व पत्ता व परे वि हुला, दव्वं पि दुल्लभा निव्वणे सव्वे ।
णिज्जुलनं मे व रयोहरादि, कोई किणे तू निव भावणा ॥

वस्त्राणि वा पात्राणि वा प्रायो गृहेऽपि भवेयुः । [illegible] [illegible] पात्रनिर्योगस्य करणं [illegible] [illegible] रजोहरणादिकं वा यदन्यत्र दुर्लभमुपकरणं तत् [illegible] [illegible] साधूनां समीपे दृष्ट्वा तदनुसारेण स्वयमपि [illegible] [illegible] [illegible] । ([illegible]) [illegible] [illegible] ।

[illegible] य [illegible], [illegible] य [illegible] ।
[illegible] य [illegible], [illegible] ॥

मत नियोगान् गृहीत्वा प्रव्रजतोऽयं गुणस्तेषां सतानां मध्यात् भीन् स शैक्ष आत्मनोऽर्थाय गृह्णातीत्यर्थः । चतुरश्च नियोगान् पूजनार्हाणामाचार्योपाध्यायप्रवर्त्तिसंघाटकसाधूनां प्रयच्छति तस्य चैवं प्रयच्छतो यद्यसौ नियोगः शुरूस्ततो ग्रहीतव्यः । अथाशुद्धस्ततः शैक्षस्य दातव्यः । शैक्षस्याभावे 'विगिंचनं' परिष्ठापनं तस्य क्रियते । एवं तस्य नीनियोगान् गृहीत्वा प्रव्रजितस्य यद्भवति तद्दर्शयति ।

सज्झाए पलिमंथो, पडिलेहणिया य सो हवइ खिन्नो ।
एगं व देति तहि तं, दोन्नि य से अप्पणो हुंति ॥

तस्य त्रीन्नियोगानुभयकालं प्रत्युपेक्षमाणस्य महान् स्वाध्यायविपरिमन्थो भवति । तया च महत्या प्रत्युपेक्षणया स खिन्नः परिश्रान्तो भवति तत एवं निर्विण्णः सन् एकं नियोगं सूरीणां ददाति प्रदत्ते च तस्मिन् तस्य द्वौ नियोगावात्मनः सत्कायां भवतः । एवमप्यसौ द्वाभ्यां नियोगाभ्यां नैव साधुभ्योऽभ्यधिक एव दृश्यते । ततः ।

निग्गमणे बहुभंडो, कत्तो कतरो व वाणिओ एइ ।
बितियं पि देति तहि, सा जंते दुल्लहं होज्जा ॥

मासकल्पे पूर्णे ततः क्षेत्रान्निर्गच्छतां मध्ये स एवैको बहुभण्डोपकरणो दृश्यते । ततो लोकस्तमुद्दिश्य ब्रूते । अहो कुतः कतरो वा अयं वणिज एवमुपस्करसंभारितः समुपैति । एवमुपहासमाकर्ण्य स द्वितीयमपि नियोगं गुरूणां ददाति । तत्र गुरुभिर्वक्तव्यं हे भदन्त ! आर्य मा ते तव भूयो दुर्लभमुपकरणं भवेत् अत आत्मपार्श्व एव तावद्धारय । स प्राह ।

भारेण खंधे च कडी य बाहा, पाक्खिज्जए खिस्ससए य उड्डं ।
तेणे य ओधीणमभिद्दवेज्जा, ण एत्तिया इति ममोवओगं ॥

मम मार्गे गच्छतो द्वयोर्भेदात् भारो भवति तेन स्कन्धः कटी बाहाश्चगाढतरं पीड्यन्ते । ततश्चेत्थमूर्ध्वनिश्वासेनाकुलो प्रयामीत्यर्थः । स्तेनाश्च मामुपकरणमानिनं दृष्ट्वा उपधिकारणादभिद्रवेयुः । एतावन्ति च वस्त्रपात्राणि ममोपभोगं नायान्ति । यच्च भगवद्भिरुक्तं मा भूयो दुर्लभं भवेत । तत्रोच्यते ॥

जं होहि ति बहुगाणं, इम्म धम्मचरणं पवत्ताणं ।
तं होहिति अम्हं पि, तुम्हेहिं सम पवणाण ॥

